नं॰ २(क)

महाभाष्यप्रदीपः १अध्याय
१६८ पत्राणि सं०१८२६
व्याकरण

पुस्तकमेतद्वैद्यनाथपाठकीयम्

भा० कै० प्र० १

श्रीगणेशाय नमः॥ पाणिनिपतंजलिकात्यायनेभ्यो नमः। सर्वाकारं निराकारं विश्वाध्यक्षमतीन्द्रियं सदसद्रूपतातीतमदृश्यं मायया वृतैः १ ज्ञानलो
चनसंलक्ष्यं नारायणमजं विभुं प्रणम्य परमात्मानं सर्वविद्याविधायिनम् २ पुरुषाः प्रतिपद्यन्ते देवत्वं यदनुग्रहात् सरस्वतीं च तां नत्वा सर्वविद्या
धिदेवतां ३ पदवाक्यप्रमाणानां पारं यातस्य धीमतः गुरोर्महेश्वरस्यापि कृत्वा चरणवंदनं ४ महाभाष्यार्णवावारपारीणं विवृतिप्लवम् य
थागमं विधास्येऽहं कैयटो जैयटात्मजः ५ भाष्याब्धिः क्वातिगंभीरः क्वाहं मंदमतिस्ततः छात्राणामुपहास्यत्वं यास्यामि पिशुनात्मनाम् ६ तथा

श्रीगणेशाय नमः। योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन योऽपाकरोत्तं प्रवरं मुनीनां पतंजलिं प्रांज
स २ लिरानतोऽस्मि १ अथ शब्दानुशासनम्। अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते॥ ॥ ॥

पि हरिबद्धेन सारेण ग्रंथसेतुना क्रममाणः शनैः पारं तस्य प्राप्तास्मि पंगुवत् ७ भाष्यकारो विवरणकारत्वाद्व्याकरणस्य साक्षात्प्रयोजनमाह अ
थ शब्दानुशासनमिति प्रयोजनप्रयोजनानि तु रक्षोहादीनि पश्चाद्दर्शयिष्यते स्ववाक्यं व्याख्यातुं तदवयवमथशब्दं तावद्व्याचष्टे अथेत्ययमिति इतिशब्दो
ऽथशब्दस्य स्वरूपेऽवस्थापनाय प्रयुक्तः एवं हि पदान्तरैः सामानाधिकरण्येन संबंधे सति अथशब्दो व्याख्यातुं शक्यते स्वरूपे व्यवस्थितस्य सर्वनाम्ना परामृश्य
ते अयमिति शब्द इति स्वरूपकथनं विस्पष्टप्रतिपत्त्यर्थम् अधिकारार्थ इति अधिकारः प्रस्तावः द्योतकत्वेनास्य प्रयोजनमित्यर्थः निपातानां च द्यो ग्म०
तकत्वं वाक्यपदीये निर्णीतम्॥ ॥ ॥ १

अथशब्दस्याधिकारार्थत्वे यो वाक्यार्थः संपद्यते तं दर्शयति शब्दानुशासनमिति अनेकक्रियाविषयस्यापि शब्दानुशासनस्यारभ्यमाणता अथशब्दसंनिधाने प्रतीयते व्याकरणस्य चेदमन्वर्थं नाम शब्दानुशासनमिति अत्र चाचार्यस्य कर्तुः प्रयोजनाभावादनुपादानादुभयप्राप्त्यभावात् नोभयप्राप्तौ कर्मणीत्यनेन षष्ठी अपि तु कर्तृकर्मणोः कृतीत्यनेनेति कर्मणि चेति समासप्रतिषेधाप्रसंगादिध्मप्रव्रश्चनादिवत्समासः शब्दशब्दस्यासामान्यशब्दत्वाद्विना प्रकरणादिना विशेषे वस्थानाभावात्तैजीशब्दकाकवासितादीनामप्यनुशासनप्रसंग इति मत्वा पृच्छति केषामिति उत्तरपदार्थान्तर्गतस्यापि पूर्वपदार्थस्य बुध्या प्रविभागात्समस्तस्य परामर्शः यथा राजपुरुष इत्युक्ते कस्य राज्ञ इति सिद्धान्तवादी तु व्याकरणस्य वेदाङ्गत्वात्सामर्थ्याद्विशेषावगतिरिति मत्वाह लौकिकाना-

शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यं केषां शब्दानां लौकिकानां वैदिकानां च तत्र लौकिकास्तावत् गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति वैदिकाः खल्वपि शन्नो देवीरभिष्टये इषे त्वोर्जे त्वा अग्निमीळे पुरोहितं अग्न आयाहि वीतये इति अथ गौरित्यत्र कः शब्दः किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः ॥ ॥ ॥

मिति लोके विदिता इति लौकिकाः सर्वलोकात् ठञिति ठञ् अथवा भवार्थे अध्यात्मादित्वाट्ठञ् वेदे भवा वैदिकाः वैदिकानां [redacted] लौकिकत्वेपि प्राधान्यख्यापनाय पृथगुपादानं यथा ब्राह्मणा आयाताः वसिष्ठोप्यायात इति वसिष्ठस्य तेषां तु प्राधान्यं यत्नेनापभ्रंशपरिहारात् अथवा भाषाशब्दानामेव लौकिकत्वमिति भेदेन निर्देशः तत्र लोके पदानुपूर्वीनियमाभावात्सदाम्न्येव दर्शयति गौरश्व इति वेदे त्वानुपूर्वीनियमाद्वाक्यान्युदाहरति शन्न इति अयं गौरयं शुक्ल इति शब्दार्थयोरभेदेन लोके व्यवहारदर्शनात् शब्दस्वरूपनिर्धारणाय पृच्छति गौरिति विज्ञाने प्रतिभासमाने पुरस्ताद्बहुकः शब्द इत्यर्थः तान्येव वस्तूनि क्रमेण दर्शयति किं यत्तदिति उद्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वमापादयन्ति सर्वनामानि पर्यायेणात्तलिङ्गमुपाददते इति कामचारतः स शब्द इति पुल्लिङ्गेन निर्देशः ॥ ॥

भा० कै० प्र० २ नेत्याहेति भिन्नेन्द्रियग्राह्यत्वान्न द्रव्यं शब्द इति प्रतीतं अपि तु द्रव्यमिति यदि हि द्रव्यानुशासनं विवक्षितमभविष्यत् अथ द्रव्यानुशासनमित्येवावक्ष्य
त् अनेनैव न्यायेन गुणक्रियासामान्यानां निराकृतेपि शब्दत्वे प्रपंचार्थं तच्चोद्यपूर्वकं निराकरोति यत्तर्हीति गोशब्दार्थे चेष्टासंभवाच्छब्दत्वमाशंक्य
ते परिहारस्तु पूर्ववत् तत्रेंगितमभिप्रायस्य सूचकः शरीरव्यापारः चेष्टितं कायपरिस्पंदः निमिषितमक्षिव्यापारः शुक्लो नील इति द्रव्यस्य प्रागु
पन्यासात् गुणमात्राभिधायिनोत्र शुक्लादयो द्रष्टव्याः भिन्नेष्वभिन्नमिति अनेन न सामान्यस्यैकत्वं कथ्यते छिन्नेष्वच्छिन्नमिति अनेन तु नि
त्यत्वं सामान्यभूतमिति सत्ताख्यं महासामान्यं गोत्वादेः सामान्यविशेषस्योपमानं निर्दिष्टं सामान्यमिव सामान्यभूतं भूतशब्द उपमार्थो यथा

नेत्याह द्रव्यं नाम तत्। यत्तर्हि तदिंगितं चेष्टितं निमिषितमिति स शब्दः नेत्याह क्रिया नाम सा यत्तर्हि शुक्लो नीलः कपिलः कपो
त इति स शब्दः नेत्याह गुणो नाम सः। यत्तर्हि तत् भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्दः नेत्याह आकृतिर्नाम सा क
स्तर्हि शब्दः येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः ॥ ॥ ॥

पितृभूत इति द्रव्यादिषु निरस्तेषु पृच्छति कस्तर्हीति उत्तरमाह। येनोच्चारितेनेति वैयाकरणाः वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमि
च्छंति वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसंगात्॥ आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावादभिव्यक्तिपक्षे
तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्य सुप्तिङन्तानां वाचकत्वे सरो रस इत्यादावर्थप्रतिपत्त्यविशेषप्रसंगात्तद्व्यतिरिक्तः स्फोटो नादाभि राम० २
व्यंग्यो वाचको विस्तरेण वाक्यपदीये व्यवस्थापितः उच्चारितेन प्रकाशितेनेत्यर्थः॥ ॥५॥ ॥

अथवेति अन्यत्र ध्वनिस्फोटयोर्भेदस्य व्यवस्थापितत्वादिहाभेदेन व्यवहारेपि न दोषः इत्यादयो न शब्दं वाच्या इत्यत्र तात्पर्यात् ध्वनिं कुर्वन्निति विधिनिषेध
योरप्रवृत्तविषयत्वात्कथमस्य त्रिभिः संबंधः उच्यते शब्दं कुर्वन्नपि शब्दं कुर्वित्युच्यते विरामाशंकायां तन्निवृत्तये तथानभिमतशब्दश्रवणोद्वेजितेनोच्यते मा
शब्दं कार्षीरिति कानि पुनरिति किं संध्योपासनादिवत् व्याकरणाध्ययनं नित्यं कर्म्म उत काम्यमिति प्रश्नः पारंपर्येण पुरुषार्थसाधनतामस्याह र
क्षेति लोके लोपाद्यदृष्टं वेदे दृष्ट्वा भ्राम्येद्वैयाकरणः। वैयाकरणस्तु न भ्रमति वेदार्थं चाध्यवस्यति तत्र लोपागमयोरुदाहरणं देवाञ्जुहुतेति इहेले

अथवा प्रतीतपदार्थको लोके ध्वनिः शब्दः इत्युच्यते तद्यथा शब्दं कुरु मा शब्दं कार्षीः शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नेवमुच्यते तेन
तस्मात् ध्वनिः शब्दः कानि पुनरस्य शब्दानुशासनस्य प्रयोजनानि रक्षोहागमलघ्वसंदेहाः प्रयोजनं। रक्षार्थं वेदानामध्येयं व्याकरणं लोपा
गमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति ऊहः खल्वपि। न सर्वैर्लिंगैः न च सर्वाभिर्विभक्तिभिर्वेदे मंत्रा निगदिताः ते चावश्यं य
ज्ञगतेन पुरुषेण यथार्थं विपरिणमयितव्याः तन्नावैयाकरणः शक्नोति विपरिणमयितुं तस्मादध्येयं व्याकरणं॥ ॥ ॥

रिः कस्मात् एदेशोक्ते तेलोपस्तत्रोपात्मनेपदेष्विति तलोपः। बहुलं छंदसि इति हृदिसनिरूपमेतत्। वर्णविकारो यथा। उद्ग्राभं च निग्राभं चेति हृग्रहोर्भश्छंद
सि हस्येति वक्तव्यमिति हकारस्य भकारः उदिग्रहः इत्यत्र उद्ग्राभनिग्राभौ च छंदसि [redacted] स्रुगुद्यमननिपातनयोरिति वचनात् घञ् ऊहः खल्व
पीति इह यस्मिन्प्रयोगे इतिकर्तव्यतोपदिष्टा यागांतरेण उपजीव्यते सा प्रकृतिः येनोपजीव्यते सा विकृतिः प्रकृतिवद्विकृतिः कर्तव्येति मीमांसकैर्व्यवस्थापिते
न्याये प्रकृतिप्रत्ययादीनामूहं वैयाकरणः सम्यग्विजानाति। तत्राग्नेयो मंत्रोऽग्नये त्वा जुष्टं निर्वपामीति। तत्र सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति सौर्यचरौ

[redacted]

मा॰कै॰प्र॰ आगम इति आगमः प्रयोजकः प्रवर्त्तको नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति प्रयोजनशब्देन च फलं प्रयोजकश्चोच्यते निष्कारण इति
३ दृष्टं कारणमनपेक्ष्येत्यर्थः प्रधानं चेति पदपदार्थावगमस्य व्याकरणनिमित्तत्वात्तन्मूलत्वाद्वाक्यवाक्यार्थावसायस्येति भावः ब्राह्मणेने
3 ति अध्यापनं ब्राह्मणस्य वृत्तिः न चाशब्दज्ञमुपश्लिष्यंति शिष्या इति लाघवेन शब्दज्ञानमस्य प्रयोजनं असंदेहार्थमिति संदेहस्यापा
गमायोत्र वेदितव्यः नतु प्रध्वंसाभावः नहि वैयाकरणस्य संशय उत्पद्य विनश्यति इतरस्यैव तदुत्पादात् स्वरात् इति पूर्वपदप्रकृतिस्वराद्ब

आगमः खल्वपि। ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोध्येयो ज्ञेयश्चेति। प्रधानं च षडंगेषु व्याकरणं। प्रधाने च कृतो यत्नः फलवान्
भवति लघ्वर्थं चाध्येयं व्याकरणं। ब्राह्मणेनावश्यं शब्दा ज्ञेया इति नचांतरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुं अ
संदेहार्थं चाध्येयं व्याकरणं। याज्ञिकाः पठंति स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति। तस्यां संदेहः स्थूला चासौ पृषती च स्थूला
नि वा पृषंति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोध्यवस्यति यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः अथ समासांतोदात्त
त्वं ततस्तत्पुरुष इति इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि तेऽसुराः दुष्टः शब्दः यदधीतं यस्तु प्रयुंक्ते अविद्वांसः विभक्तिं कुर्व
न्ति यो वा इमां चत्वारि उत त्वः सक्तुमिव सारस्वतीं दशम्यां पुत्रस्य सुदेवो असि वरुण इति तेऽसुराः तेऽसुरा हेलयो हेलय इति कुर्वंतः पराब

हुव्रीह्यर्थावसाय इत्यर्थः॥ मुख्यानि प्रयोजनानि प्रदर्श्य आनुषंगिकाण्यपि प्रदर्शयति इमानि चेति भूय इति पुनरित्यर्थः आनुषंगिकत्वाच्चैषां वर्गद्व
योपादानं तेऽसुरा हेलय इति निंदार्थवादेन न म्लेच्छितवा इति म्लेच्छनं निषिध्यते तत्र केचिदाहुः हैहे प्रयोगे हैहयोरिति प्लुते प्रकृतिभावे च कृते त्वेतद् एम॰
करणं म्लेच्छनमिति पदद्विर्वचने कार्ये वाक्यद्विर्वचने लत्वं च म्लेच्छनमित्यपरे न म्लेच्छितवा इत्यस्य पर्यायो नापभाषितवा इति। म्लेसार्थे इति तु वै प्रसयः ३

दुष्टः शब्द इति स्वरेण स्वरतः आद्यादित्वात्तसिः मिथ्याप्रयुक्त इति यदर्थप्रतिपादनाय प्रयुक्तस्ततोऽर्थान्तरं स्वरवर्णदोषात्प्रतिपादयन्नभिमतम
र्थं नाहेत्यर्थः वाग्वज्रो हिंसकत्वात् यथेन्द्रशत्रुः शब्दः स्वरदोषाद्यजमानं हिंसितवानित्यर्थः इन्द्रस्याभिचारो वृत्रेणारब्धः तत्रेन्द्रशत्रुर्वर्धस्वेति मंत्र उ
हितः तत्रेन्द्रस्य शातयिता शमयिता वा भवेति क्रियाशब्दोऽत्र शत्रुशब्द आश्रितो न तु रूढिशब्दः न हास्य यतो हि बहुव्रीहितत्पुरुषयोरर्थभेदः तत्रेन्द्रा
मित्रत्वे सिद्धे सति इन्द्रस्य शत्रुर्भवेत्यस्यार्थे प्रतिपाद्ये अन्तोदात्ते प्रयोक्तव्ये आद्युदात्तत्वं कृत्वा प्रयुक्त इति अर्थान्तराभिधानादिन्द्र एव वृत्रस्य शातयि

तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः म्लेच्छा मा भूमेत्यध्येयं व्याकरणम् तेऽसुराः दुष्टः शब्दः दुष्टः श
ब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति। दुष्टाञ्छब्दान्मा प्र
युक्ष्महीत्यध्येयं व्याकरणम् दुष्टः शब्दः यदधीतं यदधीतमविज्ञातं निगदेनैव शब्द्यते अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् त
स्मादनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम् यदधीतं यस्तु प्रयुङ्क्ते यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले सो
ऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः॥ ॥ ॥

नासंपन्नः इन्द्रशत्रुत्वस्य च विधेयत्वात्संबोधनविभक्तेरनुवाद्यविषयत्वादिहाभावः यथा राजा भव युध्यस्वेति उच्यमानस्य चामंत्रत्वाद्यज्ञक
र्मणीति जपादिप्रयुक्तासेन मंत्राणामेकश्रुतिर्विधीयमाने हन भवति अविज्ञातमिति अविदितस्वाद्दिसंस्कारत्वादर्थापरिज्ञानाद्वा निगदेनेति पाठमा
त्रेण न तज्ज्वलतीति निष्फलं भवति अनर्थकमिति निःप्रयोजनं यस्तु प्रयुंक्त इति अनेनाभ्युदयहेतुत्वं व्याकरणाध्ययनस्य दर्शयति विशे
ष इति स एव शब्दः केचिदर्थे केनचिन्निमित्तेन प्रयुक्तः साधुः अन्यथा त्वसाधुः यथाऽश्वः स्वशब्दो धनाभावनिमित्तकः साधुः जातिनिमित्तकोऽसाधुः।

भा०कै०प्र० क इति वाग्योगविदः श्रुतत्वाद्दोषदर्शनाच्च प्रश्नः प्रष्टैव परमतमाशंक्याह वाग्योगविदेवेति एवमपशब्दज्ञाने पीतिर्यथा श्लेष्मिकद्रव्यसेवया श्लेष्मिको व्या
४ धिर्भवतीति तद्विपरीतसेवया त्वारोग्यं तथात्रापि यथोक्तन्याय्यमिति भावः भूयांसोऽल्पीयांस इति परमतापेक्षया प्रकर्षप्रत्ययः यदि मन्त्र से बहवः शब्दाः अल्पे
५ ऽपशब्दाः अंगभूयस्त्वाच्च फलभूयस्त्वमिति तच्च यस्माद्भूयांसोऽपशब्दाः अल्पीयांसः शब्दाः अज्ञानमिति तथा च तिरश्चां ब्रह्महत्यादि फलाभावः ना

कः वाग्योगविदेव कुत एतत् यो हि शब्दान् जानाति अपशब्दानप्यसौ जानाति यथैव हि शब्दज्ञाने धर्मः एवमपशब्दज्ञानेऽप्यधर्मः अथ
वा भूयानधर्मः प्राप्नोति भूयांसोऽपशब्दा अल्पीयांसः शब्दाः इति एकैकस्य शब्दस्य बहवोऽपभ्रंशाः तद्यथा गौरित्यस्य गावी गोणी गोता गो
पोतलिकेत्येवमादयोऽपभ्रंशाः अथ योऽवाग्योगवित् अज्ञानं तस्य शरणं विषम उपन्यासः नात्यन्तायाज्ञानं शरणं भवितुमर्ह
ति यो ह्यजानन्वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात् एवं तर्हि सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापश
ब्दैः ॥ कः ॥ अवाग्योगविदेव अथ यो वाग्योगद्विज्ञानं तस्य शरणं क्व पुनरिदं पठितं भ्राजा नाम श्लोकाः किं च भोः श्लोका अपि प्र
माणं किं चातः यदि प्रमाणं अयमपि प्रमाणं भवितुमर्हति ॥ ॥ ॥

न्तायेति पुरुषाणां विधिनिषेधयोरधिकारात्तत्परिज्ञाने प्रयत्नस्यावश्यकत्वात् गप्रकरणात्सामर्थ्ये बलीय इत्याह अवाग्योगविदिति वाग्योगविन्नू
भयज्ञोऽपि शब्दान् प्रयुंक्ते नापशब्दानिति ज्ञानपूर्वकयोगादभ्युदयभाग्भवति श्लोकस्याप्रसिद्धत्वात्पृच्छति क्व पुनरिति प्रातिपदिकार्थे प्रश्न एवात्र जात्य एम०
र्थे किं तर्हि त्रियत्र इदं पठितमित्यर्थः अत एव श्लोका इति प्रथमान्तेनोत्तरं अन्यथा श्लोकेष्विति वाच्यं स्यात् आप्तोक्तत्वापरिज्ञानादाह किं च भो इति ॥०॥ ४

यदुदुंबरेति अयं श्लोकः सौत्रामणियागे सुरापाणस्य दुष्टत्वमुद्भावयति प्रमत्तगीत इति प्रमादेन विप्रतिपन्नत्वेन गीत इत्यर्थः। कात्यायनोपनिबद्ध भ्राजाख्यश्लोकमध्यपठितत्वात्तस्य श्रुतिरनुग्राहिकास्ति एकः शब्दः सुज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति स्त्रीष्विवेति प्रत्यभिवादे हि गुरुणा प्लुतः कार्यः। यस्तु प्लुतं कर्तुं न जानाति स स्त्रीवद्द्रष्टव्यः यमहमिति न त्वभिवादये देवदत्तो हमित्यादिना संस्कृतवाक्येनेत्यर्थः प्रयाजा इति प्रयाजमंत्रा दुह्यमानाग्निशब्दस्य तु विभक्तियुक्ता इत्यर्थः। यथा समिधः समिधोग्ने [redacted] आज्यस्य व्यंतु अग्निर [redacted] ग्न इति पदं पदमिति पस्पशाह्निः १

यदुदुंबरवर्णानां घटीनां मंडलं महत् पीतं न गमयेत्स्वर्गं किं तत्क्रतुगतं नयेत् इति। प्रमत्तगीत एषः तत्रभवतो यस्त्वप्रमत्तगीतस्तत्प्रमाणं यस्तु प्रयुंक्ते अविद्वांसः अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् स्त्रीवन्मा भूमेत्यध्येयं व्याकरणं अविद्वांसः विभक्तिं कुर्वंति याज्ञिकाः पठंति प्रयाजाः सविभक्तिकाः कार्या इति नचांतरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुं। विभक्तिं कुर्वंति यो वा इमां यो वा इमां पदशः स्वरशोक्षरशो वाचं विदधाति स आर्त्विजीनो भवति आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणं यो वा इमां॥ ॥ ॥

संख्यैकवचनादिति शस् स्वरश इति स्वर उदात्तादिः अक्षरश इति अक्षरं व्यंजनसहितो च आर्त्विजीन इति ऋत्विजमर्हे सार्त्विजीनो यजमानः ऋत्विक्कर्मार्हतीति याजकोप्यार्त्विजीनः यज्ञर्त्विग्भ्यां घखञाविति सूत्रेण यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानमिति वार्त्तिकेन च खञ् विद्वान्यजेत विद्वान्याजयेदिति द्वयोरपि विदुषोरधिकारात्॥ ॥ ॥श्री॥ ॥१॥ ॥

चत्वारीति शब्दस्वरूपमनेन निरूपणं त्रयः काला इति लडादिविषयाः निसः कार्यं येषु ते अंगपद्यंजकभेदेन सप्तविभक्तय इति सुप इत्यर्थः केचित्तु तिङाम
पीत्याह प्रसंगात्स द्वशीर्षेण सप्तकारकाणि विभक्तिशब्दाभिधेयानीति व्याचक्षते वर्षणादिति कामानां ज्ञानपूर्वकानुष्ठानफलत्वात् महते तिपरेण ब्रह्मणेत्यर्थः॥ च
त्वारीत्यनेनैकदेशेन सदृशेन वाक्यांतरमपि सूच्यत इत्याह अपर आहेति परिमितानीति पात्रेषु शब्दरसिबुद्धलमिति शोणोपे परिमितेति भवति परि

चत्वारि चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेशेति चत्वारि शृंगा
णि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च त्रयो अस्य पादाः त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे द्वौ शब्दात्मानौ नि
त्यः कार्यश्च सप्त हस्तासो अस्य सप्त विभक्तयः त्रिधा बद्धः त्रिषु स्थानेषु बद्धः उरसि कंठे शिरसीति वृषभो वर्षणात् रोरवीति शब्दं करो
ति कुत एतत् रौतिः शब्दकर्मा महो देवो मर्त्यां आविवेशेति महान्देवः शब्दो मर्त्याः मरणधर्माणो मनुष्याः तानाविवेश महता दे
वेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणं अपर आह चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि नि
हिता नेंगयन्ति तुरीयं वाचो मनुष्या वदन्ति चत्वारि वाक्परिमिता पदानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च तानि विदुर्ब्रा
ह्मणा ये मनीषिणः मनस ईषिणो मनीषिणः॥ ॥ ॥

मितानि परिच्छिन्नान्येतावंत्येवेत्यर्थः॥ मनीषिशब्दः पृषोदरादित्वात्साधुः कथं मनीषिण एवं विदन्तीत्याह॥ ॥श्री॥ ॥श्री॥
॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

गुहेति अज्ञानमेव गुहा तस्यामित्यर्थः सुपां सुलुगिति सप्तम्या लुक् व्याकरणप्रदीपेन तु ता निमकाशंते तत्र चतुर्णां पदजातानां एकैकस्य चतुर्भागं मनुष्या अ
वैयाकरणा वदंति नेंगयंतीत्यस्यैव व्याख्यानं न चेष्टंते न निमिषंतीति उत त्व इति त्वशब्दोऽन्यवाची उत शब्दोऽपिशब्दस्यार्थे स च भिन्नक्रमः प्रत्यक्षेण शब्दस्वरू
पमुपलभमानोऽपि अर्थापरिज्ञानान्न पश्यतीत्यर्थः उतो इति। उत उ इति निपातसमाहारः अपि हीं समाहार्य्यमिति अपि इदं लक्षणमर्थमर्हं च आहेत्यर्थः

गुहा त्रीणि निहिता नेंङ्गयंति गुहायां त्रीणि निहितानि नेंगयंति न चेष्टंते न निमिषंतीत्यर्थः तुरीयं वाचो मनुष्या वदंति तुरीयं वा एतद्वाचोय
न्मनुष्येषु वर्त्तते चतुर्थमित्यर्थः चत्वारि। उत त्वः उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उश
तीसुवासाः [redacted] अपि खल्वेकः पश्यन्नपि न पश्यति अपि खल्वेकः शृण्वन्नपि न शृणोतीत्येनामिति अपि हीं समाहार्य्यं उतो त्वस्मै त
न्वं विसस्रे। तन्वं विवृणुते जायेव पत्य उशती सुवासाः तद्यथा जायापत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते एवं वाक् वाग्विदे स्वा
त्मानं विवृणुते। वाङ्नो विवृणुयादात्मानमित्यध्येयं व्याकरणं उत त्वः सक्तुमिव सक्तुमिव तितउना पुनंतो यत्र धीरा मनसा वाचमक्रत अ
त्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि सक्तुः सचतेर्दुर्धावो भवति कसतेर्वा विपरीताद्विकसितो भवतीति तितउ परिपवनं
१ भवति ततवद्वा तुन्नवद्वा धीराः ध्यानवंतो मनसा प्रज्ञानेन वाचमक्रत अकृषत ॥ ॥

सचतेरिति षच्च सेचने इत्यस्य दुर्धाव इति दुः शोधः यथा तितउना सक्तोः कणाद्यपनीयते तथा व्याकरणेन वाचोऽपशब्दा इत्यर्थः कसतेरिति पृषोदरादि
त्वाद्वर्णव्यत्ययः ततवदिति विस्तारयुक्तमित्यर्थः। तुन्नवदिति। बहुछिद्रं धीरा इति वैयाकरणाः। वाचमक्रतेति अपशब्देभ्यो विविक्तां कृतवंतः। मंत्रे घसेति
१ लेर्लुकि ससक्रतेति रूपं ॥ ॥ ॥ ॥

भा०कै०प्र०
६
6

अत्रासखाय इति कश्चित्तु तुद्येतिदीर्घः सखायः समानख्यातयो मे इयह स्य निर्वृत्तत्वात्सर्वमेक मितिमन्यंते सख्यानीति सायुज्यानीत्यर्थः। एकगम्य इति त्वा नेनैव प्राप्यः वाचीति वेदाख्ये ब्रह्मणि [redacted] याल क्ष्मीर्विद्दां तेषु परमार्थं मे विलक्षणे क्वा सेषां निहितेत्यर्थः प्रायश्चित्तीयामिति भवार्थे वृद्धा छः प्रायश्चित्तीया इति प्रायश्चित्ता प पापशोधनाय श्रुति स्मृति विहितायक र्मणोहितास्तत्रिमित्तो सारकाःमाभूमेत्यर्थः दशम्युत्तरकालमिति दशम्या उत्त

अत्रासखायः सख्यानि जानते अत्र सखायः [redacted] संतः सख्यानि जानते [redacted] क य एषः दुर्गोमार्गः एकगम्यो वाग्विषयः के पुनस्तैवैयाकरणाः॥ कुत एतत् भद्रैषांल क्ष्मीर्निहिताधिवाचि एषांवाचि भद्रालक्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद्भास नात्परिवृढा भवति सक्तुमिव सारस्वती। याज्ञिकाः पठंति आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयांसारस्वतीमिष्टिं निर्वपेदिति प्रायश्चित्तीयामाभूमेत्यध्येयं व्याकरणं सारस्वती दशम्यां पुत्रस्य। याज्ञिकाः पठंति दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यंतरं तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा [redacted] कृतं कुर्यान्न तद्धितमिति न
चांतरेण व्याकरणं कृत्तद्धिता वा शक्या विज्ञातुं दशम्यां पुत्रस्य॥ ॥

र इति पंचमीति योगविभागात्समासः ततः कालशब्देन बहुव्रीहिः क्रियाविशेषणं चैतत्। दशरात्रात्याशौचं भवतीति दशम्युत्तरकालमित्युक्तं येऽपि गृह्यकाराः पठंति दशम्यां पुत्रस्येति तैरपि दशम्यामिति सामीप्यिकमधिकरणं व्याख्येयं घोषवदादीति घोषवंतो ये वर्णाः शिक्षायां प्रदर्शिताः तदादि॥ अंतरंतस्थमिति मध्येयरलवा यस्य तदित्यर्थः त्रिपुरुषानूकमिति नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषाः तान्नुकायत्यभिधत्त इति
न

॥ ० ॥

पा० ६

सुदेवो ऽसीति वरुणस्येयं स्तुतिः यतो हेतो व्याकरणज्ञानात् वरुण सत्यदेवो ऽसि ततो हेतो त्वमपि सत्यदेवो भवतीत्यर्थः। सिंधव इति नद्य इव विभक्तय इत्यर्थः॥ सूर्म्यमिति सूर्मीमिति प्राप्ते अमि पूर्व इत्यत्र वा छंदसीत्यनुवृत्तेः अनुक्षरंतीति निःसृत्य प्रकाशंत इत्यर्थः। तास्मिन्नुद्यत इति अनेकार्थत्वाद्धातूनामुल्लिख्यत इत्यर्थः॥ यणादेशः। किं पुनरिति ननु कानि पुनरस्येति येन पृष्टं स एव कथं पृच्छतीति किं पुनरिति एवं तर्हि भाष्यकारः प्रयोजनान्वाख्यानस्य विषयविभागं दर्शयति। पुरा वेद

सुदेवो ऽसि सुदेवो असि वरुण यस्य ते सप्त सिंधवः अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव सुदेवो असि वरुण सत्यदेवो ऽसि यस्य ते सप्त सिंधवः सप्त विभक्तयः अनुक्षरंति काकुदं। काकुदं तालु। काकुर्जिह्वा सास्मिन्नुद्यत इति काकुदं सूर्म्यं सुषिरामिव। तद्यथा शोभनां सूर्मिं सुषिरामग्निरंतः प्रविश्य दहति एवं ते सप्त सिंधवः सप्त विभक्तयस्तालु अनुक्षरंति तेनासि सत्यदेवः। सत्यदेवाः स्यामेत्यध्येयं व्याकरणं सुदेवो असि। किं पुनरिदं व्याकरणमेवाधिजिगांसमानेभ्यः प्रयोजनमन्वाख्यायते न पुनरन्यदपि किंचित् ओमित्युक्त्वा वृत्तान्तशः शमित्येवमादीनृषिश्राव्य ... पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते तेभ्यस्तत्र स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यंते तदद्यत्वे न तथा वेदमधीत्य त्वरिता वक्तारो भवंति वेदान्नो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः अनर्थकं व्याकरणमिति तेभ्य एवं विप्रतिपन्नबुद्धिभ्योऽध्येतृभ्यः सुहृद्भूत्वा आचार्य इदं शास्त्रमन्वाचष्टे। इमानि प्रयोजनान्यध्येयं व्याकरणमिति उक्तः शब्दः स्वरूपमप्युक्तं प्रयोजनान्यप्युक्तानि शब्दानुशासनमिदानीं कर्त्तव्यं कथं कर्त्तव्यं किं शब्दोपदेशः कर्त्तव्यः

अध्ययनात्पूर्वं व्याकरणमधीयते ते बाल्यात्प्रभृत्यसमर्था इति न प्रयोजनमन्वाख्येयं अद्यत्वे तु स्वल्पायुष्ट्वात्पूर्वमेव वेदं प्रधानमधीयते ततः प्रवृत्तं समर्थत्वाद्व्याकरणाध्ययनस्य प्रयोजनं पृच्छतीत्यत्र प्रत्याख्येयं प्रयोजनं न पुनरन्यदिति वेदमप्यधिजिगांसमानेभ्य इत्यर्थः॥ ओमित्युक्त्वा इति अभ्युपगम्येत्यर्थः॥ वृत्तान्तशः इति वृत्तान्ततः प्रपाठकश उच्यते वृत्तान्तं वृत्तान्तं पठतीत्यर्थः। अद्यत्वे शब्दो निपातोऽस्मिन् काल इत्यत्रार्थे वर्त्तते त्वरिता इति विवाहार्थे उभयोपदेश इति द्वयोपादेयोपदेशेऽस्पष्टा प्रतिपत्तिर्भवतीत्युभयोपदेश उद्भावितः यद्यपि प्रतिपत्तिः स्पष्टा गौरवं तु भवतीत्याह॥ ॥

भा॰कै॰प्र॰ ८ 7

अन्यतरेति शब्दापशब्दयोरित्यर्थः अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावात् द्विबहुविषये निर्द्धारणे वर्त्तेते पंचेति अखिलानां प्राप्तं पंचनखेषु
नियम्यमानं सामर्थ्यादन्येभ्यो निवर्त्तते न त्वयं विधिः अप्राप्तेरभावात् किं पुनरिति उभयोपदेशाद्द्वयोरपि प्रशस्तो तयोः को ज्यायानित्यर्थः इष्टेति
साधुशब्दप्रयोगाद्धर्मावाप्तिरित्यर्थः अपशब्दोपादेयोपदेशात्साक्षात्प्रतिपत्तिर्भवतीति भावः बृहस्पतिरिंद्रायेति प्रतिपदपाठस्याशक्यत्वं प्रतिपाद

अन्यतरोपदेशेन कृतं स्यात् तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते पंच पंचनखा भक्ष्या इत्युक्ते गम्यत एतदतोऽन्येऽभक्ष्या
इति अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः तद्यथा अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते गम्यत एतदतोऽन्य आरण्यो भ
क्ष्य इति एवमिहापि यदि तावच्छब्दोपदेशः क्रियते गौरित्येतस्मिन्नुपदिष्टे गम्यत एतत् गाव्यादयोऽपशब्दा इति अथाप्यपशब्दोप
देशः क्रियेत गाव्यादिषूपदिष्टेषु गम्यत एतत् गौरित्येष शब्द इति किं पुनरत्र ज्यायः लघुत्वाच्छब्दोपदेशः लघीयाञ्छब्दोपदेशः गरीया
नपशब्दोपदेशः एकैकस्य शब्दस्य बहवोऽपभ्रंशाः तद्यथा गौरित्यस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः इष्टान्वाख्यानं
खल्वपि भवति अथैतस्मिञ्छब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्यः गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इत्येवमाद
यः शब्दाः पठितव्याः नेत्याह अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः एवं हि श्रूयते बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां
शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालः॥ ॥ ॥

यितुमयमर्थवादः शब्दानामिति शब्दपारायणं शब्दो योगरूढः शास्त्रविशेषस्य॥ तत्र प्रतिपदोक्तानामिति विशेषणाभिधानाय गम्यमानार्थस्यापि शब्दाना
मित्यस्य प्रयोगः एकदेशोपयोगादपि लोके उपयुक्तमित्युच्यते यथौषधं स्फुतं घृतमात्रेकदेशोपयोगे उपयुक्तं घृतमिति व्यवहारः तथेह नेति प्रतिपा

राम॰ ८

चतुर्भिरिति आगमकालो ग्रहणकालः। स्वाध्यायकालोऽभ्यासकालः। प्रवचनकालोऽध्यापनकालः। व्यवहारो यज्ञकर्मणि। किंचिदिति सामान्यविशेषौ यस्मि
न् न तत्सामान्यविशेषवत् कर्मण्यण् आतोऽनुपसर्गे क इत्यादि सकलशास्त्रव्यवहारेऽकृतप्रयत्नस्य शब्दानां सिध्यतीति पक्षद्वयाश्रयणं प्रश्नपूर्वकं करोति
किंपुनरिति आकृतिपक्षे केवलं प्राश्रीयमाणे सरूपसूत्रे विप्रतिषेधे इत्यादिनोपपद्यते केवलेऽपि च व्यक्तिपक्षे पुनः प्रसंगविज्ञानादिति न घटते।
तस्मात् लक्ष्यसिद्धये क्वचित्प्रदेशे कश्चित्पक्षः परिगृह्यते। जातिवादिन आहुः जातिरेव शब्देन प्रतिपाद्यते। व्यक्तीनामानन्त्यात् संबंधग्रहणासं

नचान्तं जगाम। किंपुनरद्य त्वेयः सर्वथा चिरं जीवति स वर्षशतं जीवति चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति आगमकालेन स्वाध्यायकाले
न प्रवचनकालेन व्यवहारकालेनेति तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपा
ठः कथं तर्हीमे शब्दाः प्रतिपत्तव्याः। किंचित् सामान्यविशेषवल्लक्षणं प्रवर्त्यं येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किंपु
नस्तत् उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः। कथंजातीयकः पुनरुत्सर्गः कर्तव्यः कथंजातीयकोऽपवादः। सामान्येनोत्सर्गः
कर्तव्यः। तद्यथा कर्मण्यण्। तस्य विशेषेणापवादः। तद्यथा। आतोऽनुपसर्गे कः। किंपुनराकृतिः पदार्थ आहोस्वित् द्रव्यं उभयमित्याह कथं
ज्ञायते उभयथा ह्याचार्येण सूत्राणि पठितानि आकृतिं पदार्थं मत्वा जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यामित्युच्यते द्रव्यं पदा:

र्थं मत्वा। सा च जातिः सर्वव्यक्तिष्वेकाकारप्रत्ययदर्शनात् समवसीयते तत्र गवादयः शब्दाः भिन्नद्रव्यसमवेतां जातिमभिदधति तत्प्रतीतावंतरा शब्दान्
द्रव्यच्छिन्नं द्रव्यं प्रतीयते। शुक्लादयः शब्दाः गुणसमवेतां जातिमाचक्षते गुणे तु तत्संबंधात् प्रत्ययः द्रव्ये संबंधिसंबंधात् संज्ञाशब्दानामपुत्थप्रभृत्या
विनाशात् पिंडस्य कौमारयौवनाद्यवस्थाभेदेऽपि स एवायमिति अभिन्नप्रत्ययनिमित्तं डित्थत्वादिका जातिर्वाच्या। क्रियास्वपि जातिर्विद्यते सैव धातुवाच्या। पठति
पठतः पठंतीत्यादेरभिन्नस्य प्रत्ययस्य सद्भावात्तन्निमित्तजात्यभ्युपगमः व्यक्तिवादिनस्त्वाहुः शब्दस्य व्यक्तिरेवाभिधेया। जाते स्वरूपलक्षणाभावेनाप्र

भा०कै०१७ किंपुनरिति विप्रतिपत्त्या संशयः केचिद्ध्वनिव्यंग्यं वर्णात्मकं नित्यं शब्दमाहुः अन्ये वर्णव्यतिरिक्तं पदस्फोटमिच्छंति। वाक्यस्फोटमपरे संगिरंते अन्ये तु ध्वनि
८ रेव शब्दः स च कार्यस्तद्ध्वनिरेकोऽन्यस्यानुपलंभादित्याचक्षते संग्रह इति ग्रंथविशेषे कथं पुनरिति किमाचार्य[illegible]ष्टा शब्दार्थसंबंधानामयमनित्यत्वमिति प्रश्नः सि
8 द्ध इति तत्र नित्यः शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा। कार्यशब्दिकानामपि प्रवाहनित्यतया अर्थस्यापि जातिलक्षणस्य नित्यत्वं द्रव्यपक्षे सर्वश
ब्दानामसत्योपाधिव्यवच्छिन्नं ब्रह्मतत्त्वं वाच्यमिति नित्यता। प्रवाहनित्यतया वा। संबंधस्यापि व्यवहारपरंपरया अनादित्वान्नित्यता सिद्धशब्दस्य नित्या नित्ययो

किं पुनर्नित्यः शब्दः आहोस्वित्कार्यः संग्रह एतत्प्राधान्येन परीक्षितं नित्यो वा स्यात्कार्यो वेति [illegible]तोक्ता दोषाः प्रयोजनान्यप्युक्तानि तत्र त्वेष
निर्णयः यद्येव नित्यः अथापि कार्यः उभयथापि लक्षणं प्रवर्त्यमिति कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तं सिद्धे शब्दार्थ
संबंधे सिद्धे शब्देऽर्थे संबंधे चेति अथ सिद्धशब्दस्य कः पदार्थः। नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते यत्कूटस्थेष्वविचालिष्वभावे
ष्ववर्त्तते तद्यथा सिद्धा द्यौः सिद्धा पृथिवी सिद्धमाकाशमिति ननु च भोः कार्येष्वपि वर्त्तते तद्यथा सिद्ध ओदनः। सिद्धः सूपः। सिद्धा यवागू
रिति यावता कार्येष्वपि वर्त्तते तत्र कुत एतत् नित्यपर्यायवाचिनो ग्रहणं न पुनः कार्ये यः सिद्धशब्द इति संग्रहे तावत्कार्यप्रतिद्वंद्विभावान्म
न्यामहे नित्यपर्यायवाचिनो ग्रहणमिति इहापि तदेव॥ ॥ ॥

दर्शनात्पृच्छति अथेति नित्येति नित्यलक्षणस्यार्थस्य पर्यायेण वाचकः तमेवार्थं कदाचिन्नित्यशब्द आह कदाचित्सिद्धशब्द इत्यर्थः कूटस्थेष्विति अविना
शिषु॥ अविचालिष्विति देशांतरप्राप्तिरहितेषु ननु चेति सिद्धशब्दात्क्रियानिष्पत्तौ पर्यायो अवगम्यत इत्यर्थः संग्रहे तावदिति तत्र हि किं कार्यः शब्दोऽथ सिद्ध इति एम०
पक्षद्वयविचारः कृतः। तत्र कार्यप्रतिपक्षार्थोऽभिधायी सामर्थ्यात्सिद्धशब्द इति स्थितं न समानतंत्रत्वादिहापि तथैव युक्तमित्यर्थः॥ ॥ ॥ ८

अथवेति एवशब्दप्रयोगे द्विपदमवधारणं द्योतकत्वेन एवशब्दस्यापेक्षणात् यदा तु द्योतकमन्तरेण सामर्थ्यादवधारणं गम्यते तदा तदेकपदमित्युच्य-
ते. तत्र सर्व एवापो भक्षयन्तीत्यत्र भक्षश्रुतिः सामर्थ्यान्नियममवगमयति अप एवेति इहापि नित्यानित्यव्यतिरेकेण राश्यन्तराभावात्सिद्धशब्दोपादानान्निय-
मोऽवगम्यते सिद्ध एवेति कार्याणां तु पदार्थानां प्राक्प्रध्वंसावस्थयोः सिद्धता नास्तीति नैते सिद्धा एव अथवेति कथं पुनर्देवदत्तशब्दे संज्ञात्वेन विनियुक्ते एक-
देशः प्रयुज्यते नह्यसौ संज्ञात्वेन विनियुक्तः । न चैकदेशात्स्मर्यमाणसमुदायस्य वाचकत्वमुपपद्यते । प्रतीयमानस्य प्रत्यायकत्वासंभवादुच्चार्यमा-
णस्यैव वाचकत्वात् एवं तर्हि अनुनिष्पादिन्योऽवयवसरूपाः संज्ञा विनियोगकाले विनियुक्ता एव । लोपस्तु वर्णानां साधुत्वं माभूदित्यन्वाख्यायते इहापि

अथवासंत्येकपदान्यप्यवधारणानि तद्यथा अब्भक्षो वायुभक्ष इति अप एव भक्षयति वायुमेव भक्षयतीति गम्यते एवमिहापि सिद्ध एव
न साध्य इति अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः अत्यन्तसिद्धः सिद्ध इति तद्यथा देवदत्तो दत्तः सत्यभामा भामेति अथवा व्याख्यानतो विशेषप्रतिपत्ति-
र्न हि संदेहादलक्षणमिति नित्यपर्यायवाचिनो ग्रहणमिति व्याख्यास्यामः । किं पुनरनेन वर्ण्येन किं न महता कण्ठेन नित्यशब्द एवोपात्तः । य-
स्मिन्नुपादीयमानेऽसंदेहः स्यात् मंगलार्थं मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं सिद्धशब्दमादितः प्रयुंक्ते मंगलादीनि हि
शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवंत्यायुष्मत्पुरुषाणि चाध्येतारश्च सिद्धार्था यथा स्युरिति ॥ ॥ ॥

नित्यानित्ययोर्निष्पन्नत्वाविशेषात्सिद्धश्रुतिः प्राप्तप्रकर्षं गमयति अत्यन्तसिद्ध इति न्यायाद्वा शब्दादीनां स्थितं नित्यत्वमित्याह अथवेति न हि संदेहमा-
त्रादलक्षणता भवति । पुनः प्रमाणान्तरेण निश्चयोत्पादात् वर्ण्येनेति प्रयत्नव्याख्यातव्येनेत्यर्थः अगर्हितामीष्टार्थसिद्धिर्मंगलेन तत्प्रयोजनमाचार्यो
मांगलिकः प्रथन्त इत्यध्ययनस्याविच्छेदात् वीरपुरुषाणीति श्रोतृणां परैरपराजयात् आयुष्मत्पुरुषाणीति शास्त्रार्थानुष्ठाने धर्मोपचयादायुर्वर्द्धना-
त् सिद्धार्था इति अध्ययननिष्पत्तिरेव तेषां सिद्धिः ॥ ॥श्री॥ ॥

भा०कै०प्र० नावश्यमिति ततश्चाभीक्ष्णे न ये शब्दाः प्रयुज्यंते आगोपालांगनं तेषामन्वाख्यानं स्यात् न विरलप्रयोगाणां विनापि च क्रियापदप्रयोगेणाभीक्ष्ण्यवृत्तिर्नि
१९ त्यशब्दः प्रयुज्यते। यथा आश्चर्यमनित्ये नित्यवीप्सयोरिति अर्थेसंबंधे चेति द्रव्यपक्षे द्रव्य स्यानित्यत्वादर्थग्रहणं संबंधविशेषणार्थमुपात्तं अनित्येष्वर्थेषु क

अयं खलु नित्यशब्दो नावश्यं कूटस्थेष्वविचालिषु भावेषु वर्त्तते किं तर्ह्याभीक्ष्ण्येपि वर्त्तते तद्यथा। नित्यप्रहसितो नित्यप्रजल्पित इति यावता
ता आभीक्ष्ण्येपि वर्त्तते तत्राप्यनेनैवार्थः स्यात् व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति पश्पशायां आचार्यो मंगलार्थं वृद्धिशब्द
शब्द आदितः प्रयुक्तो भविष्यति शक्ष्यामि चैनं नित्यपर्यायवाचिनं वर्णयितुमिति अतः सिद्धशब्द एवोपात्तो न नित्यशब्दः अथ कं पुनः पदार्थं
मत्वा एष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबंधे चेति आकृतिमित्याह कुत एतत् आकृतिर्हि नित्या द्रव्यमनित्यं अथ द्रव्ये पदार्थे कथं विग्रहः
कर्त्तव्यः। सिद्धे शब्देऽर्थसंबंधे चेति नित्यो ह्यर्थवतामर्थैरभिसंबंधः। अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः। सिद्धे शब्देऽर्थे संबंधे चेति
द्रव्यं हि नित्यं आकृतिरनित्या कथं ज्ञायते एवं हि दृश्यते लोके मृत् कयाचिदाकृत्या युक्ता पिंडो भवति पिंडाकृतिमुपमृद्य घटिकाः क्रियंते घटि
काकृतिमुपमृद्य कुंडिकाः क्रियंते। तथा सुवर्णं कयाचिदाकृत्या युक्तं पिंडो भवति पिंडाकृतिमुपमृद्य रुचकाः क्रियंते रुचकाकृतिमुपमृद्य कटकाः
क्रियंते। कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियंते पुनरावृत्तः सुवर्णपिंडः पुनरपरया आकृत्या युक्तः खदिरांगारसवर्णे कुंडले भवतः आकृतिरन्या चा
न्या च भवति द्रव्यं पुनस्तदेव आकृत्युपमर्देन द्रव्यमेवावशिष्यते आकृतावपि पदार्थे एष विग्रहो न्याय्यः सिद्धे शब्देऽर्थे संबंधे चेति ननु चोक्तमाकृ

थं संबंधस्य नित्यतेति चेत् योग्यतालक्षणत्वात्संबंधस्य तस्याश्च शब्दाश्रयत्वात् शब्दस्य च नित्यत्वाददोषः द्रव्यं हि नित्यमिति असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं प्र०
द्रव्यशब्दवाच्यमित्यर्थः आकृतिरिति संस्थानं। ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वं आत्मैवेदं सर्वमिति श्रुतिवचनात्॥ ॥ ॥ १९

न क्वचिदुपरतेति अनभिव्यक्ते सत्यर्थः। अद्वैतेन लौकिकव्यवहाराभावात् व्यवहारे चाकृतेरेकाकारपरामर्शहेतुत्वान्नित्यत्वं अध्यवेति अससत्वेपि तत्वतो लोक व्यवहाराश्रयणेन जातेर्नित्यत्वं साध्यते। त्रिविधा चानित्यता। संसर्गानित्यता यथा। स्फटिकस्य लाक्षाद्युपधाने स्वरूपतिरोधानेन पररूपप्रतिभासः उपधानापगमे स्वरूपप्रतिभासानुपरिणामाभावः। परिणामानित्यता यथा बदरीफलस्य श्यामतातिरोभावे लौहित्यस्याविर्भावः। प्रध्वंसानित्यता। सर्वात्मनाविनाशः एतत्त्रि विधानित्यताप्रतिक्षेपेण नित्यतां प्रतिपादयितुमुक्तं ध्रुवमित्यादि तत्र ध्रुवं कूटस्थमिति संसर्गानित्यता परिहृता अविचालीति परिणामानित्यता अनपाये

न क्वचिदुपरतेति कृत्स्नस्य सर्वेणोपरतामवृत्ति द्रव्यान्तरस्थात् उपलभ्यते अथ वा नेदमेव नित्यलक्षणं ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्य नुत्पत्त्यवृद्ध्यव्ययोगि यत्तन्नित्यमिति तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते किं पुनस्तत्त्वं तद्भावस्तत्त्वं आकृतावपि तत्त्वं न विहन्यते अथ वा किं न एतेन इदं नित्यमिदमनित्यमिति यन्नित्यं तं पदार्थं मत्वैष विग्रहः क्रियते सिद्धे शब्देऽर्थे संबन्धे चेति कथं पुनर्ज्ञायते सिद्धः शब्दोऽर्थः संबन्धश्चे ति लोकतः। यल्लोकेऽर्थमुपादाय शब्दान्प्रयुंजते नैषां निर्वृत्तौ यत्नं कुर्वन्ति ये पुनः कार्या भावाः निर्वृत्तौ तावत्तेषां यत्नः क्रियते तद्यथा घटे न कार्यं करिष्यन् कुंभकारकुलं गत्वाह कुरु घटं कार्यमनेन करिष्यामीति। न तद्वच्छब्दान्प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाह कुरु शब्दान्प्रयोक्ष्य

इति ॥०॥ ॥

त्यादिना प्रध्वंसानित्यता यन्नित्यमिति बुद्धिप्रतिभासः शब्दार्थो यदा यदा शब्द उच्चरितस्तदा तदा तदर्थाकारा बुद्धिरुपजायत इति प्रवाहनित्यत्वाच्छब्दार्थस्य नित्यत्व मित्यर्थः। लोकत इति अन्यथा कार्येषु वस्तुषु लोकव्यवहारोऽन्यथा नित्येषु। शास्त्रव्यवहारोऽनादिवृद्धव्यवहारपरंपराव्युत्पत्तिपूर्वक इति शब्दादीनां नित्यत्वं घटा दयस्त्वर्थक्रियार्थिभिरन्यत आनीयन्ते उत्पाद्य विना प्रयुज्यमाना उपलभ्यन्ते नैवं शब्दादयः॥ ॥ ॥ ॥

भा॰कै॰पु॰ तावत्सेवार्थमिति बुद्ध्या वस्तु निरूप्येत्यर्थः अत्र भाष्यकारेण संभवंतीमप्येकवाक्यतामनाश्रित्य वाक्यत्रयं स्थापितं । सिद्धे शब्दार्थसंबंधे शास्त्रं प्रवृत्तमित्येकं वाक्यं कथं ज्ञा
१० यत इति प्रश्ने लोकतो ज्ञायत इति द्वितीयं । लोकत इत्यस्याहृत्यालोकतोर्थप्रयुक्त इत्यादि तृतीयं शब्दप्रयोग इति प्रयोगग्रहणेन प्रयोगाद्धर्मो न तु ज्ञानमात्रादित्युक्तं भव
10 ति अर्थेनात्मप्रत्यायनाय प्रयुक्तोऽर्थप्रयुक्तः धर्माय नियम इति चतुर्थ्या तादर्थ्यं प्रतिपाद्यते संबंधसामान्ये तु षष्ठीं विधाय समासः कर्त्तव्यः चतुर्थीसमासस्य प्रकृ
तिविकारभाव एव विधानात् धर्मार्थ इति धर्मार्थत्वान्नियम एव धर्मशब्देनाभिधीयत इति कर्मधारयसमासः धर्मप्रयोजन इति लिङादिविषयेण नियोगाख्येन धर्मे
ण प्रयुक्त इत्यर्थः प्रियतद्धिता इति नायमपशब्दः किंतु ये लोकवेदयोर्भवा अवयवास्ते लोकवेदशब्दाभ्यामभिधातुं शक्यंते आधाराधेययोः कल्पनया तु तद्धितप्रयोगः

तावत्सेवार्थमुपादाय शब्दान्प्रयुंजते यदि तर्हि लोक एषु प्रमाणं किं शास्त्रेण क्रियते लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः लोक
तोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मे नियमः क्रियते किमिदं धर्मे नियम इति धर्माय नियमो धर्मनियमः । धर्मार्थो वा नियमो धर्मनियमः
धर्मप्रयोजनो वा नियमो धर्मनियमः यथा लौकिकवैदिकेषु प्रियतद्धिता दाक्षिणात्याः यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिके
ष्विति प्रयुंजते अथवा युक्त एवात्र तद्धितार्थः यथा लौकिकेषु वैदिकेषु च कृतांतेषु लोके तावद् अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यशूकर इत्यु
च्यते भक्ष्यं च नाम क्षुत्प्रतिघातार्थमुपादीयते शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहंतुं । तत्र नियमः क्रियते इदं भक्ष्यमिदमभक्ष्यमिति ॥ ०॥

प्रियतद्धितत्वनिमित्तः यथा कश्चिद्दनस्नातय इति प्रयुंक्ते कश्चिद्दानस्नसमिति संप्रत्ययांतं अपर्व्वेति नात्रावयवावयविभावः किं तर्हि वेदलोकव्यतिरिक्तः
सिद्धांतः शब्दार्थो भवरूप इत्यर्थः । लौकिकः स्मृतिषूपनिबद्धः वैदिकः श्रुतिषूपनिबद्धः शक्यं चानेनेति शक्यं कर्मसामान्ये लिंगसर्वनामनपुंसकयुक्ते कृत्यप्रत्ययः । ततः पदांत
रसंबंधादुपजायमानमपि स्त्रीत्वं बहिरंगत्वादंतरंगसंस्कारं न बाधत इति शक्यं क्षुदित्युक्तं यदा तु पूर्वमेव विवक्षा तदा शक्या क्षुदिति भवत्येव यदा तु प्रतिघातस्यैव क्षुत्कर्म एम॰
ऽशक्तेस्तु प्रतिघातः तदा क्षुधं प्रतिहंतुं शक्यमिति भवति॥ ॥ ॥ १०

सामर्थ्या॰

खेदादिति। खेदयतीति खेदो रागः। इंद्रियनियमासामर्थ्यं वा खेदः। पयोव्रत इति। स सामर्थ्यैनायां पय एव व्रतयतीति नियमोयं न तु विधिः। अर्थित्वाभावे कारणाभावा
त्। समानायामिति। यद्यपि साक्षादपभ्रंशा न वाचकास्तथापि स्मर्यमाणसाधुशब्दव्यवधानेनार्थं प्रत्याययंति। केचित्त्वपभ्रंशाः परंपरया निरूढिमागताः साधुशब्दा

तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति। समानश्च खेदविगमो गम्यायां चागम्यायां च तत्र नियमः क्रियते इयं गम्येयमगम्येति वेदे खल्वपि पयोव्रतो
ब्राह्मणः यवागूव्रतो राजन्यः आमिक्षाव्रतो वैश्य इत्युच्यते व्रतं च नामाभ्यवहारार्थमुपादीयते शक्यं चानेन शालिमांसादीन्यपि व्रतयितुं।
तत्र नियमः क्रियते तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते यूपश्च नाम पश्वनुबंधार्थमुपादीयते पाक्यं चानेन यत्किंचिदेव काष्ठमुच्छ्रित्या
नुच्छ्रित्य वा पशुरनुबंधुं। तत्र नियमः क्रियते तथाग्नौ कपालान्यधिश्रित्याभिमंत्रयते भृगूणामंगिरसां घर्मस्य तपसा तप्यध्वमिति अंतरेणापि
मंत्रमग्निर्दहनकर्मा कपालानि संतापयति तत्र नियमः क्रियते एवं क्रियमाणमभ्युदयकारि भवतीति एवमिहापि समानायामर्थावगतौ श
ब्देन चापशब्देन च। धर्मे नियमः क्रियते। शब्देनैवार्थोभिधेयो नापशब्देनेति। एवं क्रियमाणमभ्युदयकारि भवतीति॥ अस्त्यप्रयुक्तः। संति वै
शब्दाः अप्रयुक्ताः तद्यथा ऊष। तेर। चक्र। पेचेति। किमतो यत्संत्यप्रयुक्ताः प्रयोगाद्धि भवांछब्दानां साधुत्वमध्यवस्यति य इदानीमप्रयुक्ता ना

न स्मारयंत एवार्थं प्रत्याययंति अन्ये तु मन्यंते साधुशब्दवदपभ्रंशा अपि साक्षादर्थस्य वाचका इति। अस्त्यप्रयुक्त इति। प्रयोगमूलत्वात्स्मृतेरप्रयुक्तानामप्य
न्वाख्यानादप्रामाण्यमाशंकते। यथा घटादीनां विना प्रयोगेण क्रियया सत्त्वं गम्यते नैवं शब्दानां ते हि सर्वदा व्यवहाराय प्रयुज्यमानाः संतः सत्त्वेनावसीयंत इत्याह॥ ॥

इदमिति। कश्चेदानीमित्युपहासपरं उत्तरं तु पाणिनीयस्य दृष्ट्या प्रकृतिप्रत्ययादिसद्भावादनुमितसत्ताः व्यवहारे तु न दृश्यन्त इत्युक्तं। न त्वहं लोक इति। यथा लोको
घोषवगमाय शब्दं प्रयुङ्क्ते नैवं मयैतेऽर्थे प्रयुक्ताः। अपि तु स्वरूपपदार्थका इत्यर्थः। अर्थे शब्दप्रयोगादिति। अर्थसद्भावः शब्दसद्भावे लिङ्गं। न हि विनाशब्देना

इदं तावद्विप्रतिषिद्धं यदुच्यते सन्ति वै शब्दा अप्रयुक्ता इति। यदि सन्ति नाप्रयुक्ताः। अथाप्रयुक्ता न सन्ति। सन्ति चाप्रयुक्ताश्चेति विप्रति-
षिद्धं प्रयुञ्जान एव खलु भवानाह सन्ति शब्दा अप्रयुक्ता इति। कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात्। नैतद्वि-
प्रतिषिद्धं सन्तीति तावद्ब्रूमः। यदेताञ्छास्त्रविदः शास्त्रेणानुविदधते। अप्रयुक्ता इति ब्रूमः यल्लोकेऽप्रयुक्ता इति। यदप्युच्यते कश्चेदानी-
मन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यादिति। न ब्रूमोऽस्माभिरप्रयुक्ता इति। किं तर्हि लोकेऽप्रयुक्ता इति। ननु च भवान-
प्यभ्यन्तरो लोके। अभ्यन्तरोऽहं लोके न त्वहं लोकः। अस्त्यप्रयुक्त इति चेन्नार्थे शब्दप्रयोगात्। अस्त्यप्रयुक्त इति चेत्तन्न। किं कारणं। अ-
र्थे शब्दप्रयोगात्। अर्थे शब्दाः प्रयुज्यन्ते। सन्ति चैषां शब्दानामर्थाः येष्वर्थेषु प्रयुज्यन्ते। अप्रयोगः प्रयोगान्यत्वात्। अप्रयोगः खल्वप्ये-
षां शब्दानां न्याय्यः। कुतः। प्रयोगान्यत्वात्। यदेतेषां शब्दानामर्थेऽन्याञ्छब्दान्प्रयुञ्जते। तद्यथा। ऊषेत्यस्य शब्दस्यार्थे क्व यूयमुषिताः।
तेरेत्यस्यार्थे क्व यूयं तीर्णाः। चक्रेत्यस्यार्थे क्व यूयं कृतवन्तः। पेचेत्यस्यार्थे क्व यूयं पक्ववन्त इति। अप्रयुक्ते दीर्घसत्त्रवत्। यद्यप्यप्रयुक्ताः अ-
वश्यं दीर्घसत्त्रवल्लक्षणेनानुविधेयाः। तद्यथा। दीर्घसत्त्राणि वार्षशतिकानि वार्षसहस्रिकाणि च। न चाद्यत्वे कश्चिदपि व्यवहरति। केवलमृ-

र्थप्रत्यायनमुपपद्यते। इतरोऽभ्युपगम्य सिद्धतामाह। अप्रयोग इति। यतोऽन्ये तेषामर्थानां सन्ति वाचकास्ततो नैषामनुमानमुपपद्यते। यद्यप्यूषेत्यस्योषिता इति समा-
नार्थो न भवति परोक्षत्वादेर्विशेषस्यानवगमात् तथापि तत्प्रत्यायनाय पदान्तरसहितः प्रयुज्यते। सम्प्रत्यप्रयुज्यमानानामपि पूर्वं प्रयुक्तत्वात्तु शासनं कर्तव्यमित्याह

१

प्रत्युक्ति २

सर्व इति। इदमत्र तात्पर्यं यस्य कस्यचिद्वचनात्प्रयोगाप्रयोगौ न भवतिष्ठेते अपि तु शिष्टानामेव वचनात्। वाकोवाक्यशब्देनोक्तिरूपो ग्रंथ उच्यते। यथा किंस्विदा
वपनं महद्भूमिरावपनं महदिति पूर्वं चोदितं संकीर्त्तनमिति हासः। वंशाद्यनुकीर्त्तनं पुराणं। विकार इति जीवतो मृतावस्था विकारस्तत्रेत्यर्थः। किं पुनरिति। एकः

सर्वे देशान्तरे। सर्वे खल्वप्येते शब्दा देशान्तरेषु प्रयुज्यन्ते न चैवोपलभ्यन्ते उपलब्धौ यत्नः क्रियतां महान्हि शब्दस्य प्रयोगविषयः सप्तद्वीपा
वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्याः बहुधा भिन्नाः एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वृच्यं न
वधाथर्वणो वेदः वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावान् शब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषयमननुनिशम्य सं
सप्रयुक्ता इति वचनं केवलं साहसमात्रमेव एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषया दृश्यन्ते तद्यथा।
शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति विकार एनमार्या भाषन्ते शव इति हम्मतिः सुराष्ट्रेषु रंहतिः प्राच्यमध्येषु गमिमेव त्वार्याः
प्रयुंजते दातिर्लवनार्थे प्राच्येषु। दात्रमुदीच्येषु ये चाप्येते भवतोऽप्रयुक्ता अभिमताः शब्दाः एतेषामपि प्रयोगो दृश्यते क्व। वेदे। त
द्यथा यद्वो रेवती रेवतं तमूष यन्मे नरः श्रुत्यं ब्रह्म चक्र यत्रा नश्चक्रा जरसं तनूनामिति॥ किं पुनः शब्दस्य ज्ञाने धर्मः आहोस्वित्प्रयोगे।
कश्चात्र विशेषः। ज्ञाने धर्म इति चेत्तथाऽधर्मः ज्ञाने धर्म इति चेत् तथा अधर्मः प्राप्नोति। यो हि शब्दान् जानात्यपशब्दानप्यसौ जानाति।
यथैव शब्दज्ञाने धर्मः एवमपशब्दज्ञानेऽप्यधर्मः अथवा भूयानधर्मः प्राप्नोति भूयांसोऽपशब्दाः अल्पीयांसः शब्दाः एकैकस्य शब्दस्य बहवोऽप

ऽभ्रंशाः। तद्यथा। गौरित्यस्य
शब्दस्य गावीगोणीगोतागोपोतलिकेत्येवमादयोऽपभ्रंशाः॥०॥

शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति श्रुतिः। तत्र किं सम्यग्ज्ञातः कामधुग्भवति सुप्रयोगात्तु सम्यग्ज्ञातत्वानुमानमित्यर्थः आहोस्वि
त्सुप्रयुक्तः कामधुग्भवति सुप्रयुक्तत्वं तु सम्यग्ज्ञानादित्यर्थ इति प्रश्नः ज्ञाने धर्म इति चेदिति यथाग्नेः स्पर्शः प्रकोपनं तेजः ह द्रव्यं रूक्षं वायोः। तथेहापि प्राप्नोतीति भावः॥०॥

भा०कै०प्र० १२ 12

आचार इति। प्रयोगे ऋषिर्वेदः। न च प्रयत्न इति। यदि प्रयत्नेन विना फलं स्यात् प्रयत्नस्य वैयर्थ्यमापद्येतेत्यर्थः। व्यतिरेक इति। परिहारः। तत्तुल्यमिति वे
दः शास्त्रीयस्यार्थस्य स वेदशब्दः। तस्य यथा ज्ञात्वानुष्ठानं तथा शब्दानामपि प्रकृत्यादिविभागज्ञानपूर्वकं प्रयोग इत्यर्थः। अपर आहेति। वेदस्यासौ शब्द इति वेदशब्द इति कर्मधा

योहेऌ

आचारे नियमः। आचारे पुनरृषिर्नियमं वेदयते। तेऽसुरा हेऌय इति कुर्वन्तः पराबभूवुरिति। अस्तु तर्हि प्रयोगे। प्रयोगे सर्वलोकस्य। यदि प्रयोगे ध
र्मः सर्वो लोकोऽभ्युदयेन युज्येत। कश्चेदानीं भवतो मत्सरः। यदि सर्वो लोकोऽभ्युदयेन युज्येत। न खलु कश्चिन्मत्सरः। प्रयत्नानर्थक्यं तु भवति। फलवता ना
म प्रयत्नेन भवितव्यं। न च प्रयत्नः फलाद्व्यतिरेच्यः। ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते। त एव साधीयोऽभ्युदयेन योक्ष्यन्ते। व्यति
रेकोऽपि वै लक्ष्यते। दृश्यन्ते हि कृतप्रयत्नाश्चाप्रवीणाः। अकृतप्रयत्नाश्च प्रवीणाः। तत्र फलव्यतिरेकोऽपि स्यात्। एवं तर्हि नापि ज्ञान एव धर्मो नापि
प्रयोग एव। किं तर्हि। शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन। शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते। तत्तुल्यं वेदशब्देन। वेदशब्दा अ
प्येवमभिवदन्ति। योऽग्निष्टोमेन यजते य उ चैनमेवं वेद। योऽग्निं नाचिकेतं चिनुते य उ चैनमेवं वेद। अपर आह तत्तुल्यं वेदशब्देनेति। यथा वेदश
ब्दा नियमपूर्वमधीताः फलवन्तो भवन्ति। एवं यः शास्त्रपूर्वकं शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति। अथवा पुनरस्तु ज्ञान एव धर्म इति। ननु
॥ चोक्तं ज्ञाने धर्म इति चेत्तथाऽधर्म इति॥ ॥ ॥ ॥

यः। अथ वेति। अपशब्दज्ञानमान्तरीयकत्वाच्छब्दज्ञानस्य पृथक् फलमपशब्दज्ञानस्य नास्तीत्यर्थः॥ ॥श्री॥ ॥छ॥ ॥ प्रम०
॥ श्री॥ ॥श्री॥ ॥ ॐ १२

दोष इति । उत्कृष्टधर्मफलावाप्तौ स्वल्पमधर्मफलमुत्पन्नमप्यनुत्पन्नकल्पं भवतीत्यर्थः । प्रत्यक्षधर्माण इति । योगिप्रत्यक्षेण सर्वं विदितवन्तः । परापरज्ञा इति
विद्याविद्याप्रविभागज्ञाः । अथेति । उक्तमिदं न चान्तरेण व्याकरणमित्यादि । तत्र पक्षद्वयेऽपि दोषदर्शनात्पराध्यप्रश्नः । पक्षार्थ इति द्वाभ्यामपि प्रकाराभ्यामछाय्या

नैष दोषः शब्दप्रमाणका वयं । यच्छब्द आह तदस्माकं प्रमाणं । शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञानेऽधर्ममाह । यच्च पुनरशिष्टाप्रतिषिद्धं
नैव तद्दोषाय भवति नाभ्युदयाय तद्यथा हिक्कितहसितकण्डूयितानि नैव दोषाय भवन्ति नाभ्युदयाय । अथवाऽभ्युपाय एवापशब्दज्ञानं शब्द
ज्ञाने । योऽपशब्दाञ्जानाति शब्दानप्यसौ जानाति । तदेवं ज्ञाने धर्म इति ब्रुवतोऽर्थादापन्नं भवति । अपशब्दज्ञानपूर्वके शब्दज्ञाने धर्म इति अथ
वा कूपखानकवदेतद्भविष्यति तद्यथा कूपखानकः कूपं खनन्यद्यपि मृदा पांसुभिश्चावकीर्णो भवति सोऽप्सु संजातासु तत एव तं गुणमासाद
यति । येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मः तथापि यस्त्वसौ शब्दज्ञाने धर्मः
तेन स च दोषो निर्घानिष्यते । भूयसाभ्युदयेन योगो भविष्यति यदप्युच्यते आचारे नियम इति । याज्ञे कर्मणि स नियमः अन्यत्रानिय
मः एवं हि श्रूयते यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञाः विदितवेदितव्या अधिगतयाथातथ्याः ते तत्रभवन्तः यद्वानर नस्तद्वा
ति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते ॥ याज्ञे पुनः कर्मणि नापभाषन्ते तैः पुनरसुरैर्याज्ञे कर्मण्यपभाषितं ततस्ते पराभूताः अथ व्याक
रणमित्यस्य शब्दस्य कः पदार्थः । सूत्रं । सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्नः । सूत्रे व्याकरणे षष्ठ्यर्थो नोपपद्यते व्याकरणस्य सूत्रमिति । किं हि तदन्य
ल्सूत्राद्व्याकरणं यस्यादः सूत्रं स्यात् ॥ ॥ ॥

प्याः प्रतिपादनाद्व्यतिरेकाभावः । सामान्यविशेषशब्दवत्तयानुद्वयोः प्रयोगो न विरुध्यते यदा त्वष्टाध्याय्येकदेशः सूत्रं शब्देनोच्यते तदा षष्ठ्यर्थो ह्युपपद्यते ॥०॥

व १९ ॥श्री॥ ॥७॥ ॥४॥ ॥

भा० कै० प्र० शब्दाप्रतिपत्तिरिति। नहि व्याख्यानरहितसूत्रमात्रश्रवणाच्छब्दाः प्रतीयन्ते। समुदितमिति। समुदायादेवार्थावसायोऽसाधारण इत्यर्थः। शब्द इति। करणे ल्युड्विधीयते शब्द
१३ श्च व्याक्रियमाणत्वात्कर्म न तु करणमिति भावः। भवे चेति। शब्देष्वव्याख्यायकत्वेन भवो योग इति चेत् मीमांसादियोगस्यापि शब्दं प्रति विचारकत्वाद्वैयाकरणत्वप्रसं
13

शब्दाप्रतिपत्तिः। शब्दानां चाप्रतिपत्तिः प्राप्नोति। व्याकरणाच्छब्दान्प्रतिपद्यामह इति। नहि सूत्रत एव शब्दान्प्रतिपद्यन्ते किं तर्हि व्याख्यानतश्चानुच
तदेव सूत्रं विगृहीतं व्याख्यानं भवति न केवलानि चर्चापदानि व्याख्यानं। वृद्धिः आत् ऐजिति। किं तर्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्स
मुदितं व्याख्यानं भवति। एवं तर्हि शब्दः। शब्दे ल्युडर्थः। यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते व्याक्रियन्ते शब्दा अनेनेति व्याकरणं। नहि शब्देन किंचिद्व्या
क्रियते। केन तर्हि सूत्रेण। भवे च तद्धितो नोपपद्यते व्याकरणे भवो योगो वैयाकरण इति। नहि शब्दे भवो योगः। क्व तर्हि सूत्रे। प्रोक्तादयश्च तद्धिताः प्रोक्ताद
यश्च तद्धिता नोपपद्यन्ते पाणिना प्रोक्तं पाणिनीयं आपिशलं काशकृत्स्नमिति। नहि पाणिना शब्दाः प्रोक्ताः किं तर्हि सूत्रं। किमर्थमिदमुभयमुच्य
ते भवे प्रोक्तादयश्च तद्धिता इति। न प्रोक्तादयश्च तद्धिता इत्येव भवेऽपि [redacted] तद्धितश्चोदितः स्यात्। पुरस्तादिदमाचार्येण दृष्टं भवे [redacted] इति तत्पठितं
तत उत्तरकालमिदं दृष्टं प्रोक्तादयश्च तद्धिता इति तदपि पठितं। न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति। अयं तावददोषः यदुच्यते शब्दे ल्युड
र्थ इति। नावश्यं करणाधिकरणयोरेव ल्युड्विधीयते किं तर्हि अन्येष्वपि कारकेषु। कृत्यल्युटो बहुलमिति। तद्यथा प्रस्कन्दनं प्रपतनमिति॥ ॥

गः। न चेदानीमिति। लक्षणप्रपञ्चाभ्यां मूलसूत्रवद्वार्त्तिकानामुपपत्त्या सारेषाभावः। प्रस्कन्दनमिति। यद्यप्ययं भीमादिः तथापि कृत्यल्युटो बहुलमित्यस्यैव भीमादयो एम०
पादान इत्ययं प्रपञ्च इति भावः॥ ॥श्री॥ ॥श्री॥ ॥७॥ ॥ १३

गौरिसुक्त इति। साह्नादिमतियद्यकं चित्त्वस्य यं गौरित्युच्यते तत्रान्तरत्वाच्चुक्तांतराणां निवृत्तिः कृता भवति एवमेकस्मिन्नुदाहरणे उपन्यस्ते सर्वाणि तत्सदृशानि दाहृांतराणि प्रतीयन्ते सर्वे पंचाला इति जनपदान्तरनिवृत्तिर्विवक्षायामेकदेशेपि समुदायरूपारोपात्प्रयोगः तैलमिति यद्येषधर्मः संस्कृता घृतमैलमात्रा भवति तदेतदुदाहरणं। आस्तिवाचित्वेतु घृततैलशब्दयोः संस्थानप्रमाणानिरपेक्षा सर्वत्र मुख्यावृत्तिः शुक्ल इति अशुक्लेप्यवयवे अवयवांतरस्य शौक्ल्यात्समुदायस्य शुक्लत्वे समारोपात्प्रयोगः

अथवा शब्दैरपि शब्दा अभिधीयन्ते तद्यथा गौरित्युक्ते सर्वे संदेहा निवर्त्यन्ते नाश्वो न गर्दभ इति। अयं तर्हि दोषः। भवेन्मोक्तादयश्च न द्विता इति। एवं तर्हि लक्ष्यलक्षणे व्याकरणं। लक्ष्यं च लक्षणं च एतत्समुदितं व्याकरणं भवति किं पुनर्लक्ष्यं किं लक्षणं शब्दो लक्ष्यः। सूत्रं लक्षणं एवमप्ययं दोषः। समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवे नोपपद्यते सूत्राणि चाप्यधीयान इष्यते वैयाकरण इति नैष दोषः समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्त्तन्ते। तद्यथा पूर्वे पंचालाः उत्तरे पं[redacted]चालाः तैलं भुक्तं घृतं भुक्तं शुक्लो नीलः [redacted]कृष्ण इति एवमयं समुदाये व्याकरणशब्दः प्रवृत्तोऽवयवेपि वर्त्तते। अथवा पुनरस्तु सूत्रं। ननु चोक्तं सूत्रे व्याकरणे षष्ठ्यर्थोनुपपन्न इति नैष दोषः व्यपदेशिवद्भावेन भविष्यति यदप्युच्यते शब्दाप्रतिपत्तिरिति न हि सूत्रत एव शब्दान्प्रतिपद्यंते किं तर्हि व्याख्यानतश्चेति परिहृतमेतत् तदेव सूत्रं विगृहीतं व्याख्यानं भवतीति ननु चोक्तं न केवलानि चर्चापदानि व्याख्यानं वृद्धिः आत् ऐजिति किं तर्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत्समुदितं व्याख्यानं भवति अविजानत एतदेवं भवति॥ सूत्रत एव हि शब्दान्प्रतिपद्यंते॥ ॥ ॥

व्यपदेशिवद्भावेनेति यथा राहोः शिर इत्येकस्मिन्नपि वस्तुनि षाष्ठ्यर्थभेदाद्व्यवहारः एवमिहापि व्याकरणशब्देन शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्यते तत्र शब्देन तु समुदायात्पृथगिति भेदव्यवहार उपपद्यते सूत्रत एवेति पदच्छेदादिभिः सूत्रार्थस्यैवाभिव्यंजनात्॥ ॥श्री॥ ॥

आत इति निपातः आतश्चहेतोरित्यर्थः नाद इति नैतदिसर्थः अथवानारोर्थे रहितत्वाद्वोपमात्रमेव गृह्येतेत्यर्थः किमर्थ इति न हि वर्णोपदेशेन कस्यचित्सा
धुशब्दस्यानुशासनमिति भावः वृत्तिसमवायार्थ इति लाघवेन शास्त्रप्रवृत्त्यर्थ इत्यर्थः धर्मेनियमवत्समासः र इत्यर्थ इति शास्त्रप्रवृत्तिप्रत्यासन्नत्वं समवायस्य दर्श
यति। इग्यणः इत्यादौ हि यथासंख्यशास्त्रं वर्णसंनिवेशमात्रादेवावतिष्ठते वृत्तिप्रयोजन इति पारंपर्येण शास्त्रप्रवृत्त्यावस्थागतत्वं। सति हि समवाय इत्यं ज्ञातत आदि

आतश्च सूत्रनतएवं यो त्युत्सूत्रं कल्पयेन्नारोग त्येत अथ किमर्थो वर्णानामुपदेशः वृत्तिसमवायार्थ उपदेशः वृत्तिसमवायार्थो वर्णानामुपदेशः कर्त
व्यः। किमिदं वृत्तिसमवायार्थ इति वृत्तये समवायो वृत्तिसमवायः वृत्त्यर्थो वा समवायो वृत्तिसमवायः वृत्तिप्रयोजनो वा समवायो वृत्तिसमवायः। का पुनर्वृत्तिः।
शास्त्रप्रवृत्तिः। अथ कः समवायः। वर्णानामानुपूर्व्येण संनिवेशः अथ क उपदेशः उच्चारणं कुत एतत् दिशिरुच्चारणक्रियः। उच्चार्य हि वर्णानाह
उपदिष्टा इमे वर्णा इति अनुबंधकरणार्थश्च। अनुबंधकरणार्थश्च वर्णानामुपदेशः कर्तव्यः अनुबंधानासंक्ष्यामीति। न ह्यनुपदिश्य वर्णाननु
बंधाः शक्या आसंक्तुं स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबंधकरणार्थश्च वृत्तिसमवायश्चानुबंधकरणं च प्रत्याहारार्थं प्रत्याहारो वृत्त्य
र्थः।। इष्टबुद्ध्यर्थश्च इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः इष्टान्वर्णान्भोत्स्यामह इति न ह्यनुपदिश्य वर्णानिष्टा वर्णाः शक्या विज्ञातुं इष्टबुद्ध्यर्थश्चेति चे
दुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः इष्टबुद्ध्यर्थश्चेति चेदुदात्तानुदात्तस्वरितानुनासिकदीर्घप्लुतानामप्युपदेशः कर्तव्यः एवंगुणाश्च
नानुदा

रंसेनेति ततो द्रुतोपद इत्यादि शास्त्रप्रवृत्तिः प्रत्याहारार्थमिति प्रत्याहारशब्देन अणादिकाः संज्ञा उच्यन्ते इष्टबुद्ध्यर्थश्चेति सन्निधः पदेशो कलादिदोषरहिता ये वर्णानि
दिष्टास्ते त एव प्रयोक्तव्या इत्युक्तं भवति एकश्रुत्या सूत्राणां पाठात्तद्वैषामुदात्तादीनामुपदेशः कर्तव्य इत्याह इष्टबुद्ध्यर्थश्चेति चेदिति।। ।। ।।

आल्हसुपदेशादिति। उपात्तोपि विशेषो नांतरीयकत्वात् जातिप्राधान्यविवक्षायां न विवक्ष्यत इत्यर्थः। संवृतादीनामिति। आकारादीनां संवृतत्वं दोषो न त्वकारस्य सं
वृतगुणत्वात्। तत्र संध्यक्षरेषु विवृततमेषूच्चार्येषु संवृतत्वं दोषः कलः स्थानांतरनिष्पन्नः काकलिकत्वेप्रसिद्धः। ध्मातः श्वासभूयिष्ठतया ह्रस्वोपि दीर्घ इव लक्ष्य
ते एणीकृतः अविशिष्टः किमयमोकार औकारो वेति यत्र संदेहः अंबूकृतो यो व्यक्तोप्यंतर्मुख इव श्रूयते अर्द्धको दीर्घोपि ह्रस्व इव। ग्रस्तो जिह्वामूलेनिगृ
हीतः अव्यक्त इत्यपरे। निरस्तो निष्ठुरः प्रगीतः सामवदुच्चरितः उपगीतः समीपवर्णांतरगीत्याऽनुरक्तः क्ष्विण्णः कंपमान इव। रोमशो गंभीरः अवलंबितो व

आल्हसुपदेशात्सिद्धं अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति तथेवर्णाकृतिस्तथोवर्णाकृतिः। आल्हसुपदेशात्सिद्धमिति चेत् सं
वृतादीनां प्रतिषेधः। आल्हसुपदेशात् सिद्धमिति चेत् संवृतादीनां प्रतिषेधो वक्तव्यः। के पुनः संवृतादयः। संवृतः कलो ध्मातः एणीकृतः अंबूकृतो
अर्द्धको ग्रस्तो निरस्तः प्रगीत उपगीतः क्ष्विण्णो रोमश इति। अपर आह। ग्रस्तं निरस्तमवलंबितं निर्हतमंबूकृतं ध्मातमथो विकंपितं संदष्टमेणी
कृतमर्द्धकं द्रुतं विकीर्णमेताः स्वरदोषभावनाः इति। अतोन्ये व्यंजनदोषाः। नैष दोषः गर्गादिबिदादिपाठात् संवृतादीनां निवृत्तिर्भविष्यति। अ
स्त्यन्यद् गर्गादिबिदादिपाठे प्रयोजनं किं समुदायानां साधुत्वं यथा स्यादिति एवं तर्ह्यष्टादशधा भिन्नां निवृत्तकलादिकामवर्णस्य प्रत्यापत्तिं वक्ष्यामि [illegible]

संवृतादयश्च भिन्ना निर्दिष्टो रूक्षः संदष्टो वर्द्धित इत्यविकीर्णो वर्णांतरे प्रसृतः एकोप्यनेकनिर्भासी इत्यपरे। स्वरदोषभावना इति स्वरदोषगोत्राणि अनंता हि दोषा अप्रशक्ति
प्रमादकृताः। अस्त्यन्यदिति गर्गादिसादिनेवसंनिवेशेन गर्गादीनां साधुत्वं यथा स्यात् गार्ग्यसादीनां मा भूत् ततश्च तद्भूतानामेवाकारादीनां दोषनिवृत्तिः कृ
ता स्यात् न तु समुदायांतरस्थानां। यद्यपि प्रसंगविध्येयो गर्गादीनां पाठः तथापि प्रसंगात् समुदायसाधुत्वायापि भवति। निवृत्तकलादिकामिति। अकारस्य संवृतत्वा
न्निवृत्तेः संवृतत्वादिकामिति नोक्तं अकारस्य निदर्शनार्थत्वात् सर्वेषां वर्णानां शास्त्रांते प्रत्यापत्तिरित्यर्थः॥ ॥ ॥ ॥

यदनुबंधैरिति। यथास्वरितत्वमविकारार्थे एवमात्मनेपदार्थं कत्वादिकं प्रतिज्ञाय कत्वादात्मनेपदमित्यादि करिष्यते न त्वनुदात्तङित इत्यादि। ननु चानुबंधा
भावे कथमणादिकाः संज्ञा उपपद्यन्ते। आदिरन्त्येन सहेत्यत्र आदिकत्वोः सहेत्युक्ता अण् उ इत्यादिकाः संज्ञाः करिष्यन्ते। स्वरसंधिविष्वासंदेहाय नकारिष्यत इत्यदोषः। उभय

लिंगार्थो नुमस्यापत्तिः लिंगार्थोस्या तर्हि भवति। नन्वर्हि वक्तव्यो यद्यप्येतदुच्यते अपवैतर्हि अनेकमनुबंधशतं नोच्चार्यं इत्संज्ञा च न वक्त
व्या लोपश्च न वक्तव्यः यदनुबंधैः क्रियते तत्कत्वादिभिः करिष्यते सिध्यत्येवं अपाणिनीयं तु भवति यथान्यासमेवास्तु। ननु चोक्तं आ
कृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेध इति परिहृतमेतत् गर्गादिबिदादिपाठात्संवृतादीनां निवृत्तिर्भविष्यति ननु चान्य द्गर्गादि
बिदादिपाठे प्रयोजनमुक्तं किं समुदायानां साधुत्वं यथा स्यादिति एवं तर्ह्युभयमनेन क्रियते पाठश्चैव विशेष्यते कत्वादयश्च निवर्त्यन्ते
कथं पुनरेकेन यत्नेनोभयं लभ्यं लभ्यमित्याह द्विगता अपि हेतवो भवन्ति। तद्यथा आम्राश्च सिक्ताः पितरश्च प्रीणिता इति तथा वा
क्यान्यपि द्विष्ठानि भवन्ति श्वेतो धावति अलंबुसानां यातेति॥ ॥श्री॥ ॥७॥ ॥

मिति यथाभूतागर्गादिस्था अकारादयस्तथाभूता एव सर्वत्र प्रयोक्तव्या इति प्रतिपाद्यत इत्यर्थः द्विगता इति द्वावर्थौ गताः प्रयोजनद्वयस्य संपादकाइ
त्यर्थः॥ तथा वाक्यान्यपीति शाब्दस्याप्यर्थवत् द्विगतत्वमित्यर्थः॥ ॥श्री॥ ॥७॥ ॥

ॐ श्रीगणेशाय नमः ॥ अइउण् ॥ सर्ववर्णानां न विशेषेण विचार्य विशेषेणात्र विचारः क्रियते अकारस्येति
अत्राकारादीनां स्वरूपेणानुकार्येण वा सत्तोऽप्यर्थवत्त्वस्याविवक्षितत्वाद्विभक्त्यनुपपत्तिः स्वर
संधिस्तु न प्रवर्त्तते वर्णोपदेशः ज्ञादिसंज्ञानामनिष्पादनात् न चाकारस्य संवृतत्वाद्दीर्घप्लु
तयोर्विवृतत्वात्प्रयत्नभेदात्सवर्णसंज्ञाया अप्रसंगात्प्रदेशेष्वकारेण दीर्घप्लुतयोर्ग्रहणं न स्या

अइउण् ॥ अकारस्य विवृतोपदेश आकारग्रहणार्थः ॥ अकारस्य विवृतोपदेशः कर्त्तव्यः

किं प्रयोजनं आकारग्रहणार्थः अकारः सवर्णग्रहणेनाकारमपि गृह्णीयात्

प्रोतिरिति विवृतत्वमस्योपदिश्यते विवृतत्वस्य गुणस्योपदेशो विवृतोपदेशः न तु गुणस्या
तिन्नस्यापेक्षत्वात् कारापेक्षितत्वेपि समासः यथा देवदत्तस्य गुरुकुलमिति आकारग्रहणा
र्थ इति विवृतोपदेश आकारग्रहणार्थ इति सामानाधिकरण्येन निर्देशादाकारग्रहणं विवृ
तोपदेशस्य प्रयोजनमिति सामर्थ्याद्वा[illegible]माद्वाघाद्रूपमुत्तरत्र न भवतीति न चोदनीयं सव

किंचकारणमिति आकृतिपदार्थेन ग्रहणकशास्त्रस्य प्रत्याख्यानादाकारस्याप्यत्वजातिसद्भा
वात्सिद्धं ग्रहणमिति भावः अत्र च निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति श आकृता
नेनकस्मात्कारणादित्यर्थः संपद्यते विवारभेदादित्यत्र तु कारणशब्दप्रयोगाभावात्प्राप्यग्रह

किंचकारणं न गृह्णीयात् विवारभेदात् किमुच्यते विवारभेदादिति न पुनः काल
भेदादिति यथैव ह्ययं विवारभिन्नः एवं कालभिन्नोपि ॥ ॥

णात्सर्वनाम्नो वा प्रथमाद्वितीययोरभावाद्विभाषा गुणे स्त्रियामिति पंचमी विहिता विवारयतीति वि
कासयतीत्यास्यमिति विवारः प्रयत्नः व्यक्तिपदे ग्रहणकशास्त्रारंभाद्दोषापत्तिः व्यक्तिपदे भेदात
तत्सद्भावादाह किमुच्यत इति ॥

वायुश्चेति प्रयत्नाभिनिर्वृत्तत्वात्कालस्यप्रयत्नत्वमभ्युपगम्यवाह्यत्वेनपरिहारःप्रसिद्धपरिमाणवस्त्वन्तर।
भा॰वै॰ गतपरिच्छेदकक्रियान्तरापेक्षणात्कालव्यवहारस्यवाह्यत्वंकालस्य यथाव्रीह्यादेःप्रस्थादिव्यवहारःपरि।
२ माणाख्यकृतःएवंमात्रादिव्यपदेशोनिमेषादिक्रियाकृतः अथवानाभिप्रदेशाख्यविशिष्टप्रयत्नाद्
2

सत्यमेवमेतत् वक्ष्यतितुल्यास्यप्रयत्नंसवर्णमित्यत्रास्यग्रहणस्यप्रयोजनं आस्येयंवातुल्या
देशःप्रयत्नश्चतेसवर्णसंज्ञकाभवंति वायुश्चपुनरास्यात्कालः तेनतस्मादेवकालभिन्न।
स्यग्रहणेनपुनर्विचारभिन्नस्य ॥

भाष्येऊर्ध्वादिनिष्ठस्यानाभेश्चास्याद्वाह्यत्वात्कालस्यवाह्यत्वं विवृतत्वादीनांचास्यवर्ज्जिप्रयत्ननिष्पाद्य
त्वादास्यान्तरत्वं ऊनादिवृत्तेनयत्नतुयथानभेदिकास्तथानपरस्मृतेवक्ष्यति ॥
२

किंपुनरिति किंसूत्रकारेणैव विवृतोपदेशः कृतो वार्तिककारेण । तत्र तस्य प्रयोजनमुक्तं अथवा ।
कृत एव विवृतोपदेशो वार्तिककृता चो ध वेनोपन्यस्त इति प्रश्नः उभयथा रत्नाउपदिष्टोपि ।

किंपुनरिदं विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते आहोस्वित्संवृतस्योप ।
दिश्यमानस्य विवृतोपदेशः क्रियते विवृतस्योपदिश्यमानस्य प्रयोजनमन्वा ।
ख्यायते कथं ज्ञायते यदयं ग्रन्थकारस्य विवृतस्य संवृततापत्तिं शास्ति नै ।
नदस्ति ज्ञापकं

विवृतो व्याख्यानेन विना न शक्यते ज्ञातुमिति यत्नस्त्वेष्यकारे प्रश्लेषोऽयं नाम संज्ञः तत्र प्रत्यायन्या
पूर्वः पतञ्ज्याश्रितः अन्यथाशास्त्रान्ते प्रत्यापत्तिवचनं अनर्थकं स्यात् स्वरूपप्रत्यक्षाभावात् ।

भा॰ कै॰
३
3

अस्तिप्रन्वदिति प्रयोग एव प्राप्ते विवृतत्वे संवृतप्रत्यापत्तिः स्यादिति ज्ञापकमेतदित्यर्थः न
त्विहासति विवृतोपदेशस्यावर्णस्याभावादकारस्याग्रहणाद्दृष्टत्वाभावात्कथमतिखट्वइति ह्रस्वः
नैष दोषः उदीर्यमाणः स्यान्नत्वितिज्ञापकाद्भवत्याकारस्य ह्रस्वः नैव लोक इति प्रयुक्तानामन्व
अस्तिप्रयदेतस्य वचने प्रयोजनं किं अतिखट्वः अतिमाल इत्यत्रान्तर्यतो विवृतस्य वि।
वृतः प्राप्नोति संवृतः स्यादित्येवमर्थ्या प्रत्यापत्तिः नैतदस्ति नैव लोके नैव वेदे अकारो।
विवृतोऽस्ति कस्तर्हि संवृतः योऽस्ति स भविष्यति न देनत्प्रत्यापत्तिवचनं ज्ञापकमेव भविष्य
ति विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इति कः पुनरत्र विशेषः विवृत।
स्योपदिश्यमानस्य प्रयोजनमन्वाख्यायेत संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चो
द्यत इति नात्र कश्चिद्विशेषः
शास्त्रान्तप्रयोगे च विवृतस्याकारस्यासम्भवात्संवृत एव भविष्यतीति प्रत्यापत्तिर्ज्ञापिकैव कः पुन ३
रिति विवृतोपदेश इत्यत्र कृतनइति का कर्तव्य इति वा वाक्याध्याहारेण कश्चिद्विशेष इत्यर्थः

३

आह्येषु रूपिकेति अह्नो ऽह्नेषु रूपषड्स्वह्येकारवानेदोषु रूपबलस्य भावस्तिमतोत्तादितानुम् अह्येका
रववमित्यर्थः तस्येति यदा प्रत्याहारे विवृतोकार उपदिष्टस्तदा प्रयत्नभेदात्तेन संवृतस्याकार
स्य ग्रहणाभावात्तत्कार्यं न स्यादिति तत्सिद्धये सर्वस्याकारस्य विवृतत्वं कर्तव्यमित्यर्थः तेन शास्त्र
आह्नेषु रूषिकामात्रेण भवानाह संवृतस्योपदिश्यमानस्य विवृतोपदेशश्चोद्यते इति वचनं तु
मो विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते इति तस्य विवृतोपदेशादन्यत्रापि विवृ
तोपदेशः सवर्णग्रहणार्थः तस्यैतस्याक्षरसमाम्नायिकस्य विवृतोपदेशादन्यत्र विवृतो
पदेशः कर्तव्यः क्वान्यत्र धातुप्रातिपदिकप्रत्ययनिपातनस्थस्य किं प्रयोजनं सवर्णग्रह
णार्थः अक्षरसमाम्नायिकेनास्य ग्रहणं यथा स्यात् किं च कारणं न स्यात् विवारभेदादे
तत् आचार्यप्रवृत्तिर्ज्ञापयति भवत्यक्षरसमाम्नायिकेन धात्वादिस्थस्य ग्रहणमिति
तीसादेर्दीर्घादिति ष्यति ननु च सर्वेषामकाराणां यत्नामात्रं स्वतन्त्रकरणमत्राकारः तस्य च वि
वृतत्वे प्रतिज्ञायमाने सर्वेषां तस्य तितां न भवतीति किमुच्यते तस्य विवृतोपदेशादिति एवं तर्हि
यदा कस्यचिदेवाकारस्येदमनुकरणं स्वरूपपदार्थको वाऽयमकारः तदेतदुच्यतेऽनस्य दोषः ॥

पि॰

भा॰ के॰ पदद्वयमिति अत्र हिकारेण विहतेन प्रत्याहारस्य विहतो निर्दिष्टः तेन संहतस्याग्रहणे इकः स
वर्ण इति वक्तव्यं नहि द्वयोरिति यद्यप्येको विहतो नास्ति तथाप्यविघातत्वादेकादेशस्य द्व।
योरित्युक्तं नैतदिति अकइत्यकारेण विहतेन दीर्घस्य विहतस्याग्रहणाद् ज्ञापकमेतदित्य।

पदद्वयमकः सवर्णे दीर्घ इति प्रत्याहारेऽको ग्रहणं करोति कथं कृत्वा ज्ञापकं नहि द्व
योरान्तरसमाम्नायिकयोर्युगपत्सम्भवस्थानमस्ति नैतदस्ति ज्ञापकं अस्ति प्रयस्य।
देतस्य वचने प्रयोजनं किं यस्मादान्तरसमाम्नायिके न ग्रहणमस्ति तदर्थमेतत्स्यात्
खट्वाढकं मालाढकमिति सति प्रयोजने ज्ञापकं न भवति तस्माद्विहतोपदेशः
कर्तव्यः कपषयत इत्याद्येते विहतोपदेशा नाम विहतो वा यदि शेषेन संहतो वा को
ऽत्र विशेषः सपषसर्वेष्वेवमेव प्रयत्नः क्रियते

र्थः कपषयत इति याह्लादयः पठिताः तत्राकारो विहतः पदान्तानान्द्विगोरेवं भवति तत्।
किमुच्यते। अत्रापि विहतोपदेशः कर्तव्य इति प्रश्नः ८

यानीति प्रतिपदपाठस्याशक्यत्वात्तस्य विवृतोपदेशादित्यनेन सर्वस्याकारस्य विवृतोपदेशः का
र्येनयाचोद्यते इत्यर्थः याह्वादिस्या इति अग्रहणप्रातिपदिकार्थे विवृतत्वेऽवश्यचोदनीये

यान्येतानि प्रातिपदिकान्यग्रहणानि तेषामेतेनाभ्युपायेनोपदेशश्चोद्यते तद्रूपं भवा
ति तस्माद्धृतमथ्याह्वादिस्याऽविवृता इति दीर्घप्लुतवचने च संवृतनिवृत्त्यर्थः दी
र्घप्लुतवचने च संवृतनिवृत्त्यर्थो विवृतोपदेशः कर्तव्यः दीर्घप्लुतौ तासंवृतौ माभूता
मिति वृत्ताभ्यादेवतन्ना इ इति ॥

याह्वादिस्यस्यापि संवृतस्यैव पठितस्य कार्यार्थे विवृतत्वं प्रतिज्ञेयं अन्यथा दोषरूप विवृतो
च्चारणप्रपन्नस्य गौरवं स्यात् विवृतत्वज्ञाने प्रयोजनान्तरमाह दीर्घेति असति विवृतत्व
प्रतिज्ञाने संवृतस्याकारस्य स्थाने सावर्ण्यात्संवृतयोरेव दीर्घप्लुतयोः प्रसंग इत्यर्थः

नैवलोकइति अस्मन्यपिसावर्ण्येलिंगादकारस्यसंवृतस्यविवृतौदीर्घप्लुतौभविष्यतः यद्वयमतो।
भा॰कै॰ दीर्घोपिजिह्वतोरोरप्लुतादप्लुतइत्याहेतिभावः सततत्वेति अशक्यत्वादीर्घप्लुतयोः संवृतयो ॰ञ्चारणस्ये सर्वथैव[illegible]
नैवलोकेनैववेदेदीर्घप्लुतौसंवृतौस्तः कौतर्हिविवृतौ यौस्तःतौभविष्यतः स्थानीप्रक
५ ल्पयेदेतावनुस्वारोयण्यायणांसंवृतःस्थानी संवृतौदीर्घप्लुतौप्रकल्पयेत् अनुस्वारो।
5 यण्यायणां तद्यथा सय्यन्तासवृत्सरः यल्लोकंतल्लोकमिति अनुस्वारस्थानीयणमनुना
सिकंप्रकल्पयति विषमउपन्यासः युक्तंयत्सतस्तत्रप्रक्लृप्तिर्भवति सतिहियणःसानुनासि
कांतिरननुनासिकास्तुदीर्घप्लुतौनैवलोकेनैवचवेदेसंवृतौस्तःकौतर्हि विवृतौ यौस्तस्तौ
भविष्यतःएवमपिकुतएतत्तुल्यस्थानौप्रयत्नभिन्नौभविष्यतः नपुनस्तुल्यप्रयत्नौस्थान
ॐ४ भिन्नौस्थानतोइकारउकारोवेति वक्ष्यतिस्थानेन्तरतमइत्यत्रवर्तमानेपुनः स्थानग्रहणस्य
योजनंयत्रानेकविधमान्तर्यंतत्रस्थानतआन्तर्यंबलीयोभवतीति। ल्वारणस्यसर्वथा एवम
पीति अस्मतिविवृतत्वप्रतिज्ञानेसंवृतस्याकारस्यसंवृतावेवईकारोकारौप्राप्नुतःप्लुतःसंवृतत्वस्य। ५
न्यत्राभावात्सामान्यइतिकेचित्टीकाटीकारोकारयोः संवृतत्वस्याभ्युपगमात्
५

तत्रानुवृत्तिनिर्देशा इति अकः सवर्णे दीर्घ इत्यादौ अयमेवाकारोऽनुवृत्त इति ककारादिना विच्छेदेन ।
ज्ञायते ततश्चाणत्वात्तस्य ग्राहकत्वमस्तु अस्य च्वावित्यादौ तकारस्यानण्त्वाद्ग्राहकत्वं न प्राप्नो ।
तीत्यर्थः वृत्तिः शास्त्रस्य लक्ष्ये प्रवृत्तिः तदनुगतो निर्देशोऽनुवृत्तिनिर्देशः एकत्वादकारस्येति

तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वात् तत्रानुवृत्तिनिर्देशे सवर्णानां ग्रहणं न प्रा
प्नोति अस्य च्वौ पश्यतीति च किं कारणं अनण्त्वात् न ह्येतेऽणः येऽनुवृत्तौ के तर्हि येऽत्र
समाम्नाय उपदिश्यन्ते एकत्वादकारस्य सिद्धं एकोऽयमकारो यश्चाक्षरसमाम्नाये य ।
श्चानुवृत्तौ यश्चाथात्वादिषु अनुबन्धसंकरस्तु अनुबन्धसंकरस्तु प्राप्नोति कर्मण्यण् ।
आतोऽनुपसर्गे क इति केऽप्यणि कृते प्राप्नोति

एकैवाकारव्यक्तिः उदात्तादिभेदप्रतिभासस्तु व्यञ्जकध्वनिकृतः खड्गतैलादर्शादिभेदप्रतिबिंब
प्रतिबिंबवत् अकारस्यानिर्दिष्टार्थत्वात् ककारादीनामप्येवोद्धव्यं अनुबन्धसंकर इति एकत्वा ।
काणटकारादीनां भेदाभावाद्ह्रादादौ ङीबादिः प्राप्नोति कं रामः

किमिति नेगोऽस्मावर्णोति प्रतिषेधात् कारोनेनाटाहृतः घटेनेति एकएवाकारोऽह्निस्त्वार्यतन्नशतिद्य
भावः उत्तवाहुकाहिपकृनार्थं दृष्टवदिति उपचारोऽव्यवहारः यष्टेकेनघटेनोदकाहरणादिकि

एकाजनेकाजग्रहणेऽप्यनुपपत्तिः एकाजनेकाजग्रहणेऽप्यनुपपत्तिर्भवति नचैकोदो
वः किरिणागिरिणोरेकाजलक्षणमेतोटातंत्रप्नोमीति दृष्टवघटेनतरतिघटिकइतिद्यः
लक्षणम्प्रत्नप्नोमीति दृष्टवन्नोपचारः दृष्टवन्नोपचारा प्राप्नुवंति नयथाह्यैकेनैकेनघ
टेनानेकोयुगपत्कार्यंकरोति एवमिमकारेनानेकोयुगपदुच्चारयेत विषयेणतुनानालिं
गकरणात्सिद्धं यस्यंविषयेविषयेनानालिंगमकारंकरोति कर्मणापत्ता प्राप्तानुपसर्गेक
इति नेनन्नायनेनानुवंधमेकोग्रहीति यदिहिस्यात्नानालिंगाकरणमनर्थकंस्यात् एकमेंघि

यंयुगपदनेकानकरोतिनत्वेवैकमकारंयुगपदनेकोनोच्चारयेदित्यर्थः विषयेणेति वार्तिककारेण
करणत्वेनसामान्यरूपतयाचाभेदेनविषयोनिर्दिष्टः भाष्यकारस्त्वधिकरणत्वव्यक्तिभेदाहीदृशंच

२४

सर्वगुणामिति गुणानुबंधाः कार्याया श्रितत्वादुपकारकत्वात्तत्र कर्मणि काह्लि निरूपादित्य-
र्थः शाल्यकवदिति शाल्यकः प्राणिविशेषः स यथा कंटकतुल्यैः पर्दैर्बाध्यते नैवं सर्वेऽनुबंध
गुणाः ऽकारः शकेनानिर्दिष्टं आद्यंतयोरेवेत्संज्ञाविधानान्मध्यपतितानां श्रवणप्रसंगादित्संज्ञैवाय

सर्वगुणामुच्चारयेत् नैतद्वाल्लिङ्गापकं इत्संज्ञायाः कार्यमेतत्स्मात् न ह्येषमनुबंधैः
शाल्यकवच्छकाउपचेतं इत्संज्ञायां हि दोषः स्यात् आद्यस्य हि द्वयोरित्संज्ञा स्यात् क-
योः आद्यंतयोः एवं तर्हि विषयेणानु पुनर्लिंगकरणान्निर्देशं पदस्य विषये विषये पुन
र्लिंगमकार्यं करोति प्राग्दीव्यतोऽण् शिवादिभ्योऽणिति तेन ज्ञायते नानुबंधसंकरोऽस्ती-
ति यदि हि स्यात्पुनर्लिंगकरणमनर्थकं स्यात्

ह्यनेनाप्रियते वृत्तिकतव्यैककर्तृकत्वाद्दायस्य उपत्तुक्तं एवं न ह्येति विषयेणानन्यथा व्याचष्टे तानाश्राहम
पनीयपुनः पाहूंपठित्वा यद्यनुबंधसंकरः स्यादकारमेव शिवादिभ्यो विदध्यात् अर्थाच्चित्तणि
त्कृतमेव यथा स्यात् नित्कृतं मा भूदिति नियमार्थमेतत्स्मात् नच नियमार्थे विधेर्बलीयस्त्वात्

भा॰कै॰

१

अथवेति नह्यमः सर्वेण गुणशब्दार्थेयेदिति किं तर्हि यथा लोके इह मुण्डो भवेह इह जटिलो भव इह
नग्नो भवेति यद्गुणको यत्रोच्यते तद्गुणक एव तत्र भवति एवमिहापि याभ्यां प्रकृतिभ्यां पदद्वयं
पविशिष्टौ विधीयते तस्मात्तत्तद्गुणं तन्निमित्तमेव कार्यं संपादयति आवृत्तिसंख्यानादिति यथा
अथवा पुनरस्तु विषयेणानुपुनर्लिङ्गकरणात्सिद्धमित्येव ननु चोक्तं इत्संज्ञत्यपल्लुप्य
येमेतत्स्यात इति नैष दोषः लोकत एतत्सिद्धं तद्यथा लोके कश्चिद्देवदत्तमाह इ
ह मुण्डो भव इह जटिलो भव इह शिखी भवेति यल्लिङ्गो यत्रोपदिश्यते तल्लिङ्गस्तत्रो
पतिष्ठते एवमयमकारो यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थास्यते यदप्युच्यते एका
जनेकाज्ग्रहणेषु चानुपपत्तिरिति एकाजनेकाज्ग्रहणेष्वावृत्तिसंख्यानात् ए
काजनेकाज्ग्रहणेष्वावृत्तेः संख्यानादनेकाज्भविष्यति ।
॥विकृतियागेत्रयोटप्रा॥
सामिधेन्यः समिधोऽस्त्रियाहृत्यासमदृशसंपद्यते नयाचरटेननरतीति वृजलद्ग्राहणान्भवति
ननु सूत्रविषये कर्तार्थवाहचनस्य गोणेद्धत्वे कथं कार्यनिमित्त उच्यते गोहावद्धन्यत्रास्मश

प्रथ्य मो॰३ घं १

१

भेदादिति निमित्तानित्यत्वादावाहृतिभेदेऽपि गुणस्यैकत्वं न निवर्तते इति भावः एतदपीति लोके सर्वासां स्त्रीणां
संख्यान्तरेण गुणेन योगो न व्यवायेन इत्यर्थः ऋषिसहस्रमिति विंशतिं क्रीत्वा प्रत्येकं दत्वा सहस्रद

न यथा सप्तदश सामिधेन्यो भवन्तीति त्रिः प्रथमामन्वाह त्रिरुत्तमामित्यावृत्तितः सप्त
दशत्वं भवति एवमिहाप्यावृत्तितोऽनेकत्वं भविष्यति भेदादावृत्तिकार्यं परिहृतं इ
ह तु खलु किं निमित्तानित्यत्वादन्यलक्षणा [illegible] मन्त्रोदात्तत्वं प्राप्नोति नैव एतदपीति
हेतुकंथ लोके न तु यथा ऋषिसहस्रमेकाकपिलाएकैकशः सहस्रं कृत्वा दत्वा
तया सर्वे ते सहस्रदातृणः संपन्नाः एवमिहाप्यनेकत्वं भविष्यति यदप्युच्यते
दृष्टो व्यपवर्गः प्राप्नुवन्तीति भेदघटसंभविकार्यं तत्रानेकोऽपृथगपवर्गं कुर्यात् यत्तु
खलु संभविकार्यमनेकोऽपि नपृथगपवर्गं करोति न यथा घटे [illegible] दर्शनस्पर्शने वा   स्व

तीणां ऋषयः संपन्ना इत्यर्थः ऋषयः सहस्रमिति कर्मधारये मातापितृभिः संबंधः षष्ठीस
मासेन सामर्थ्यलक्षणः संबंधः यथा ब्राह्मणशतं भोज्यतामिति ध्रुनिब्राह्मणोः ॥

भा॰कै॰ ८

संभविचेति यदिकारस्यौकाराकारं सगुणायतेस्यानकवणानिष्पन्नत्वान्निर्वग्रपत्वात्सर्वैरित्यर्थः एवंपरि
हृते ग्रपि दोषे श्रुतत्वत्स्वायेनाकारस्यभेदं साधयति आन्यभाव्यमिति अन्यस्यभावोऽन्यभावः ततो व्याञ्‌ ततः
संभविचेदं कार्यमकारस्याकारणेनानामानेकोपितद्युगपत्न क्रियेते आन्यभाव्यंतु कालशब्द
व्यवायात्‌ आन्यभाव्यंत्वकारस्य कुतः कालव्यवायात्‌ शब्दव्यवायाच्च कालव्यवायात्‌ द
ण्डअग्रं शब्दव्यवायात्‌ दंडः न चैकस्यात्मनो व्यवायेन भवितव्यं भवति चेद्भवत्यान्यभाव्यम
कारस्य युगपच्च देशपृथक्त्वदर्शनात्‌ युगपद्देशपृथक्त्वदर्शनान्मन्यामहे आन्यभा
व्यमकारस्येति यदयं देशपृथक्त्वेनोपलभ्यते अश्वः अर्कः अर्थ इति न ह्येको देवदत्तो
दिवसार्थविधानार्थान्यात्वात्त्वार्थं च्छन्नः॥ ॥युगपत्स्रुघ्ने च भवति मथुरायां च ग्रामः
अथवान्यभावोऽन्यहृस्वतत्स्यभावइति भावेष्यञ्‌ इदं कालशब्दाभ्यां व्यवधाने दृष्टं यथा अस्तेदि
तायां अ इ उ इत्यादीनां कालव्यवायः इतिरित्यादौ शब्दव्यवायः तकारेण ऋकारेकार्यो व्यवधानात्‌ ए
कत्वेतु व्यवधानं न दृष्टं यथा अश्व इति केवलाकारउच्चायेनेन समाउदात्तादिभेदात्‌ कालशब्दव्यवायश्च ना

८

यदि पुनरिति कालशब्दाभ्यां व्यंजकानामेव ध्वनीनां व्यवायेर्तत्वं नायस्येति व्यक्तिस्फोटवादिनो भावः
यथा शकुनिः पंक्तेः गतौ स्थितस्यास्तु संचारान्तरेण भवति एवं व्यंजकध्वनिसन्निधानासन्निधाना
भ्यां अकारस्योपलभादिनिर्णयः जातिस्फोटवादी व्यक्तिस्फोटवादिनं पर्यनुयुंक्ते अनित्यत्वा

यदि पुनरिमे वर्णाः शकुनिवत्स्युः न यथा शकुनय आशुगामित्वादुत्पतितः पश्चाद्
दृश्यन्ते एवमकारो देशान्तरे दृष्टो देशान्तरे दृश्यते नैव शंक्य अनित्यत्वमेवं स्यात् नि।
त्याः शब्दाः नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारि।
भिः यदि चायं देशान्तरे दृष्टो देशान्तरे दृश्यते नायं कूटस्थः स्यात्

मिति भवता जातिस्तावन्नाभ्युपगम्यते व्यक्तेरेवैकत्वनित्यत्वप्रतिज्ञानात्तथैकं नित्यत्वेनोपपद्यते देड
श्युदात्तानुदात्तभेदेन भिन्नत्वान्न ह्येकस्यैवोदात्तत्वपरित्यागेनानुदात्तत्वयुक्तं रूपान्तरपरिग्रहा
दनित्यत्वं प्रसंगात् न स्माज्जिन्नाप एव नित्यापवाकाराव्यक्त्यभिज्ञातत्वं तन्निवर्तनेति जातिस्फोटपक्षोत्रास्य हि

भा॰कै॰
२१

व्यक्तिस्फोटबाधात् अकारमपीति श्रोत्रोपलब्धिरिति श्रोत्रोपलब्ध्या आकाशदेशत्वं प्रतिपाद
यति आकाशप्रदेशविशेषस्य श्रोत्रत्वादिंद्रियाणामसंबद्धविषयाग्रहणात् श्रोत्रस्य निष्क्रियत्वा
द्गमनाभावादाकाशदेशत्वे शब्दस्यावश्यमभ्युपेयं बुद्धिनिर्ग्राह्य इति सर्वे सर्वेष्वप्युत्पादितानभिव्य।

यदि पुनरिमे वर्णा आदित्यवत्स्युः तद्यथा एक आदित्योऽनेकाधिकरणस्थो देशपृथ
क्त्वेऽप्युपलभ्यते विषम उपन्यासः नैकोऽपि त्वादित्यमनेकाधिकरणस्थं युगपद्देशपृ
थक्त्वेऽप्युपलभते अकारं पुनरुपलभते अकारमपि नोपलभते किं कारणं श्रोत्रोपल
ब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः एकं च पुनराकाशं

क्रियाजनितसंस्कारपरंपराप्राप्तमपरिपाकांत्यबुद्धिनिर्ग्राह्य इत्यर्थः प्रयोगेणेति प्रयुज्यत इति प्रयो
गो ध्वनिः तेनाभिव्यक्तः देशभेदेन तत्प्रतिभासो भिन्नदेशावस्थितपुरुषादीनामभिव्यंजकः।
ध्वनिकृतः भेदबाधात्

अकारादेशा इति यथा पृथिव्या एकत्वेपि बहुत्वमधुरादिदेशव्यवहारः एवमाकाशस्यापि संयोगिघटादि
पदार्थावच्छेदेन व्यवहार इत्यर्थः एवं व्यक्तिस्फोटपक्षे इति याहृते जातिस्फोटपक्ष एवाश्रीयते अकृ
तिग्रहणादिति आकारजातिः सर्वप्रदेशेषु निर्दिश्यते नान्तरीयकस्तु व्यक्तिनिर्देशः ॥

आकाशदेशा बहवः आवन्तो बहवः तस्मात्तान्यभाव्यमकारस्य आकृतिग्रहणात्सिद्धं
अवर्णाकृतिरुपदिष्टा सर्वमवर्णकुलं ग्रहीष्यति तथेवर्णाकृतिस्तथोवर्णाकृतिः त
द्व्यञ्जनपरकरणम् एवं तत्कालपराः क्रियेते आकृतिग्रहणेनातिप्रसक्तमिति ननु च स
मि वर्णग्रहणेनातिप्रसक्तमिति तत्कालपराः क्रियेरन् प्रत्याख्यायेते तत्सवर्णग्रहणम्।
परिभाष्यमाकृतिग्रहणाद्गुणप्रत्याख्येति

तत्र प्रत्याहारे अकारजातेर्निर्देशात्तस्याश्च विवृतत्वप्रतिज्ञानात्संवृतेनेतस्या एव प्रतिपत्तिविधानं न
त्वेवं जातिनिर्देशादनुवृत्तिनिर्देशेन नाकारेण ग्रहणमकारस्येति सिद्धं अष्टतस्माविभक्तावित्यत्र स
मत्र सत्यपि जातिनिर्देशे दीर्घोच्चारणसामर्थ्याद्ध्रस्वस्य ग्रहणं न भवि

भा॰कै॰
१०
10

अन्यथा ह्रस्वमेवोच्चारयेत् लुतश्च विषये स्वरत् इति न्यायात् तस्मात् ग्रहणं न हद्धेति स आकृतिपदार्थो
यत्रास्ति तत्रैव तत् अथवा वस्तुतमेतत् न त्वन्यायेनाकृतिपदार्थस्यापि तत्रान्तरेष्वपि सपवपतः शि
न इत्यर्थः हल्ग्रहणो ह्यचेति अवयवाश्रयणीयत्वमाकृतिपदार्थस्य दर्शयति व्यक्तिपदार्थेऽप्येकस्यैव।

हल्ग्रहणेऽपि च किं आकृतिग्रहणात्सिद्धमित्येव कृत्वोक्तमिति अवर्णाग्रवान्ते अवान्त प
चैतन्नास्ति अण्सवर्णान्ग्रहणातीति रूपसामान्याद्वा रूपसामान्याद्वा सिद्धमेतत् न।
यथा तानेव शाटकानाच्छादयामः ये मथुरायां तानेव शालीन् भुञ्ज्महे ये मगधेषु तदेवेदं
भवतः कार्षापणं यन्मथुरायां गृहीतमिति अन्यासिद्धमन्यरूपसामान्यात्तदेवेदमिति एवमि।
हापि रूपसामान्यात्सिद्धं राम॰

नकारस्यानुकरणं विषये यत्र न इति हेयास्तकारयोः फलत्वेन स्यात् अपितु एकस्यैवेत्याचावान्ता
भिन्नत्वं सिद्धे लोपो न स्यात् अभिस्यात् उन्मादावेव स्यात् रूपसामान्यादिति व्यक्तिनिर्देशेऽपि भेदापरा
पर्यालोचवदभेदव्यवहारोऽस्तीति सिद्धमिदं व्यक्तिव्यतिरिक्तसामान्यं भवतु वा मा भूत् सर्वथा लोकर

[illegible]

ऋलृक् अल्पीयानिति ऋकारापेक्षया प्रकर्षः ऋकारस्याल्पः प्रयोगस्ततोप्यल्पतर इत्यर्थः अ
ल्पप्रयोगार्थमप्युपदेशः कर्तव्य इत्याशंक्याह यश्चापीति तत्र ऋकारव्याख्यायामेवोदात्तादिषु

ऋलृक् अथ लृकारोपदेशः किमर्थः किं विशेषेण लृकारोपदेशश्चोद्यते न पुनरन्येषाम
पि वर्णानामुपदेशश्चोद्येत यदि किंचिदन्येषामपि वर्णानामुपदेशे प्रयोजनमस्ति लृकारो
पदेशस्यापि तद्भवितुमर्हति को वा विशेषः अयमस्ति विशेषः अस्य हि लृकारस्याल्पीयां
श्चैव प्रयोगविषयः यश्चापि प्रयोगविषयः सोपि क्लृपिस्थस्य क्लृपेश्च लत्वमसिद्धं तस्यासि
द्धत्वादृकारस्यैवाच्कार्याणि भविष्यन्ति नार्थो लृकारोपदेशेन अत उत्तरं पठति लृकारो
पदेश राम

क्लृतेषु स्यान्नेनरतनमश्नुतिस्यान्निसदृशे लृकारो भविष्यति रामायरामचंद्रयनमः राम राम
ॐ नमो भगवते वासुदेवाय नमः श्रीरामलक्ष्मणाय नमः रामः श्रीराम श्रीराम ।
ॐ रामाय नमः

भा० कै०

११

यदृच्छेति । अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य ये शब्दाः प्रयोक्त्रभिप्रायेणैव प्रवर्त्तन्ते ते यदृच्छाशब्दा डित्थादिः
ऋकारलृकारयोः सवर्णविधिविषयस्य वार्त्तिककारवाक्यत्वात्सूत्रकारेणानाश्रितत्वादत्र लृकारोपदेशः
कृतः । अशक्यवक्तृत्वाद्भावाश्चानुत्पन्ना यदृच्छाशब्दाः सन्तीत्यवगम्यते गाव्यादीनां तु गवादिनिवर्त्तितत्वा
द्यदृच्छाशक्तिजानुकरणस्तुत्याद्यर्थं लृकारोपदेशः क्रियते यदृच्छाशब्दार्थोऽशक्तिजानु
करणार्थः स्तुत्याद्यर्थश्च यदृच्छाशब्दार्थस्तावत् यदृच्छया कश्चिल्लृतको नाम तस्मिन्नपत्ये कार्या
णि यथा दध्य्लृतकाय देहि मध्व्लृतकाय देहि उदड्लृतको गमत् चतुष्टयी शब्दानां
प्रवृत्तिः जातिशब्दा गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्चतुर्थाः अशक्तिजानुकरणार्थः अ
शक्त्या कयाचिद्ब्राह्मण्या ऋतक इति प्रयोक्तव्ये लृतक इति प्रयुक्ते तस्यानुकरणं ब्राह्मण्यलृ
तक इत्याह कुमार्य्लृतक इत्याह स्तुत्याद्यर्थश्च लृकारोपदेशः कर्त्तव्यः के पुनः स्तुत्यादयः प्ल
प्लुतिर्द्विर्वचनस्वरिताः क्लृ३प्तशिखः क्लृप्तः प्रक्लृप्तः स्तुत्यादिषु कार्येषु क्लृपेर्लत्वमसिद्धं तस्मा
दस्यायं ऋतकशब्दस्तथा प्रयोगेणैव विनियुक्त इति ऋतकशब्दस्यानिर्वृत्तत्वाऽशक्तिजानुकरणे
ऽस्य जातिशब्दत्वमिच्छन्ति यस्मादनुक्रियमाणशब्दस्य जातिः समवेतानन्तत्वबहुमन्वकार्यमनुकरणस्य

प्रत्यङ्लृतको गमत्

११

त्वाप्यभावादिति ऋतकशब्दोऽस्याप्यः कृदन्तेनामकुर्यादितिस्पन्नावुक्तत्वात् ऋतिः सौत्रोधातुः तत
औणादिकः कुनशिल्पिसंज्ञयोरपूर्वस्यापीतिकुन्प्रत्ययः संज्ञादिष्विति आदिशब्देनैतद्दर्शयति गु जाति
णक्रियानिमित्ता अपि शास्त्रान्विताः प्रयोक्तव्या इति सर्वशब्देष्वनुत्पत्तिपक्षे किमर्थवत्त्वं त्रेणेति

नैतानि सन्तिप्रयोजनानि व्याप्यभावात्कल्पने संज्ञादिषु व्याप्यस्य ऋतकशब्दस्य
भावात्कल्पने संज्ञादिषु साधुमन्यन्ते ऋतक एवासौ न ल्टतक इति अपरआह व्या
प्य ऋतकशब्दः शास्त्रान्वितोऽस्तिसकल्पयितव्यः साधुः संज्ञादिषु ऋतक एवासौ न ल्ट
लकः

वेनशिष्टप्रयुक्तानामनुत्पत्तिपक्षेऽप्यस्तीतिज्ञापनार्थमर्थवत्त्वं त्रेणपाठान्तेऽनुकरणशब्दानामनु
त्पन्नत्वात्तदर्थं च अपरआहेति सर्वमुक्तं ऋतकशब्दएवव्याप्यत्वात्प्रयोक्तव्यः नतु ल्टतकशब्दः
इति इदानींतु ऋतकशब्दस्यैवायमपभ्रंशोऽशक्तिजत्वात् ल्टतक इत्युच्यते [illegible]

आ२

अयंतर्हीति ऋतकशब्दो न्याय्यात्तत्वाद्युक्तवाल्लृतकशब्दस्य निवर्तकः ऋफिड ऋफिड्डु इत्येतौ नन्वा
भा॰के॰ ख्यातावितिकथं लृफिड लृफिड्डु इत्यनयोर्निवर्तकौ स्यातामितिभावः पृषोदरादीति उणादयो बहुल
१२ मित्येवान्वाख्याताविन्यर्थः अर्तिप्रवृत्तिरिति अर्तेः प्रवृत्तिरित्वेन प्रवृत्तिरित्यर्थः नसंतीति अयावे
12

अयंतर्हीयदृच्छाशब्दोऽपरिहार्थ्यः लृफिडुः लृपिडुश्चेति पृषोदरादिऋफिडः ऋफिडुश्च
कथं अर्तिप्रवृत्तिश्चैवलोके लक्ष्यते फिडफिड्डुर्वौणादिकौप्रत्ययौ त्रयीचशब्दानांप्रवृत्तिः
जातिशब्दागुणशब्दाः क्रियाशब्दाइति नसंतियदृच्छाशब्दाः अन्यथाकृत्वाप्रयोजनमुक्तमन्य
थाकृत्वापरिहारः संतियदृच्छाशब्दाइतिकृत्वाप्रयोजनमुक्तं नसंतीतिकृत्वापरिहारः

यियदृनामक्रियन्ते तदाप्रशस्यरूपाक्रियागुणोवाध्यारोप्यतेइतिभावः अन्यथाकृत्वेति अशक्त्या
निपदृशाप्रयोगावार्यैणापादपूरणार्थं लृकारः वार्तिककारस्तिवशक्त्यानिपदृशाप्रयोगमन्वाचष्टे ॥ म॰ १२

समानेचेति इहचभिन्नार्थत्वं लक्षणकशब्दो हि यदा संज्ञात्वेन विनियुज्यते कार्यविधिं देतेन तदा तत्स्वरूपस्वरूपाख्या
सः अन्तिकेन विपर्ययाभिन्नस्वरूपौ चैतौ शब्दौ इतिभावः पदान्तरेऽपीति यथा द्रव्यपदे स्वरूपा।

समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्त्तको भवति न यथा देवदत्तश
ब्दे शब्दो देवदिन्नशब्दं निवर्त्तयति न गाव्यादीन् नैष दोषः पदान्तरेऽपि प
रिहारा भवन्ति अन्तरंगाणां शिष्टाशिष्टप्रतिषिद्धेषु यथा लौकिकवैदिकेषु

णामित्यस्यारम्भः ज्ञातिपदे तु प्रत्याख्यानं एवमस्यापीत्यर्थः अनु स त्व संज्ञा शब्दपदेऽपि पार्यायग।
ताः शिष्टप्रयुक्ता एवं संज्ञाः कर्तव्याः प्रयोजनान्तरमपि वार्त्तिककारः प्रत्याचष्टे गम:

भा॰के॰ १२

प्यनुकरणमिति अनुकार्यस्य दुष्टत्वादनुकरणस्यापि दुष्टत्वं मन्यते सुरापानानुकरणवत् विषम इति न ह्यनु
कार्यस्य दोषेणानुकरणस्य दुष्टत्वं विहितकरणं हि धर्मोत्पत्तिः प्रतिषिद्धाचरणाच्चाधर्मोत्पत्तिः न त्वनुमाने
अनुकरणाद्धि शिष्यस्य समायुभवति अशिष्टप्रतिषिद्धस्य वा नैव तद्दोषाय तथा प्रदर्शनाय यथा लौ
किकवैदिकेषु यथा लौकिकेषु वैदिकेषु च हन्तीति लोके तावत् एवमसौ दृष्टानि एवमसौ य
जते एवमसावधीत इति तस्यानुकुर्वता न दोषाय यजेत च सोऽप्यनुष्ठेयेन युज्यते वेदेऽपि एवं विश्वसृ
जः सत्राण्यासत इति तेषामनुकुर्वता न हि सत्राण्यासते सोऽभ्युदयं युज्यते अशिष्टप्रतिषिद्धं एवम
सौ हिंकति एवमसौ हसति एवमसौ कण्डूयतीति तस्यानुकुर्वता हिंकाद्वेशकण्डूयैव नैव
तद्दोषाय तथा प्रदर्शनाय यस्तु वल्ल्ववमसौ ब्राह्मणं हन्ति एवमसौ सुरां पिबतीति तस्यानुकुर्वता ब्राह्म
णं हन्यात् सुरां वा पिबेत् सोऽपि न संयतितः स्यात् विषम उपन्यासः यश्चैवं हन्ति यश्चानु हन्ति उभौ
तौ हतः यश्चापि पिबति यश्चानुपिबति उभौ तौ पिबतः यस्तु वल्ल्ववब्राह्मणं हन्ति सुरां वा पिब
न धर्माधर्मयोर्व्यवस्थितिर्मन्यते सुरापानादौ न तस्यैव क्रियायाश्चानुष्ठानं तस्मात् दृष्टाभावान्नास्त्यनुकरण
त्वं दानादीनां सान्निध्याल्लौकिकत्वं मन्यते स्नातानुलिम्पतेति स्यैवित्वं दर्शयति अन्यथैव न हि चिन्तन
हि अकार्यं क्रियते

३१ ठः कदलीस्तंभं छिंद्यात् पयो वा पिबेत् न स तेन पतितः स्यात् एवमिहापि य एवमसावपशब्दं प्र
न्योः

मात्वग्गणकं व इति लोकमध्ये प्रकाशनेऽयमर्थः अकार्यं कार्यं हि प्रकाशं क्रियते ल्वतक शब्दोऽपि यदा कृत
कार्यं प्रयुज्यते तेन दापशब्दः यदा त्वनुकार्यमत्पादयति तदा माथुरेव अर्थभेदात् असवर्णाणादिवत् ग्र २

मात्वग्गणकैः केऽति तस्मात्कुर्वन्नपशब्दं प्रयुंजीत सोऽप्यपशब्दभाक् स्यात् अयं तत्र सोऽपशब्दप
दार्थकः शब्दोऽयमर्थमुपदेशः कर्तव्यः न चापशब्दपदार्थकः शब्दोऽपशब्दो भवति अवश्यं चैतदेवं
विज्ञेयं यो हि मन्यते अपशब्दपदार्थकः शब्दोऽपशब्दो भवतीति अपशब्द इत्येव तस्यापशब्दः स्या
त् न चैषोऽपशब्दः ४० अयं त्वल्पापि भूयोऽनुकरणशब्दोऽपरिहार्यः यदर्थ उपदेशः कर्तव्यः
साध्वलंकारमधीते मधूलंकारमधीत इति कस्य सम्प्रत्ययो न दनुकरणं ऌपिस्यस्य यदि ऌपि
स्यस्य ऌपेश्च लत्वमसिद्धं तस्मात्सिद्धत्वाद्दकारप्रवाच्यकार्याणाम् अवश्यंभवेत् अर्थेन नार्थः सि
स्यात् अयं तु न ऌपिस्यपदार्थकः शब्दः यदर्थ उपदेशः कर्तव्यः न कर्तव्यः इदमवश्यकर्त

शाद इत्येवेति यस्य हि गाव्यादयोऽपभ्रंशाः वाच्याः अयमिति असाधोरनुकरणमित्येतदप्यत्र नास्ती
ति भावः भवेदिति प्रयोगस्यास्पष्टमनुकरणं प्रयोगे च नास्ति सर्वज्ञासिद्धमिति भावः रामः
रामचंद्राय नमः

भा॰कै॰ १४

प्रकृतिवदिति न च यथा स्फोर्पेर्लत्वस्यासिद्धत्वाद्धकारद्वारेणाल्कारस्याख्यायैतथानुकरणस्यापीत्यर्थः ।
ह्रिरिति पचेत्तु पचेतिति त्रिकेन विकृतत्वे द्विः पचेतिस्यानुकरणे । एतच्च क्रियासाधनाद्यनभिधानातिङंतत्वम
वति एवमग्नी इत्यनुकरणे ह्यर्थानभिधानात्राद्विवचनोत्ते नन्वग्नल्स्वल्स्वल्वित्यादिस्यपदानुकरणेन
टाकर्षप्रकृतिभावः सुत्वाद्धदितश्च तिल्कारेपरतो यणादेशकरणादित्यसत्त्वानुवादाच्चयथातत्तुवेयस्यल्र ।
प्रकृतिवदनुकरणं भवतीति किं प्रयोजनं द्विः पचेतित्याह तिङ्तिङ इति निघातो यथा स्यात् ।
अग्नी इत्याह ईदूदेद्द्विवचनं प्रगृह्यसंज्ञं भवतीति प्रगृह्यसंज्ञा यथा स्यात् यदि प्रकृतिवदनुकर
णं भवतीत्युच्यते अपशब्द एवासौ भवति कुमार्यतेकइत्यादत्वात् एल्कतकइत्याद्ध अपशब्दो ह्य
स्य प्रकृतिः न चापशब्दः प्रकृतिः न ह्यपशब्दा उपदिश्यन्ते न चानुपदिष्टा प्रकृतिरस्ति एकदेश।
विकृतस्यानन्यत्वात्स्नुत्वादस्य एकदेशविकृतमनन्यवद्भवतीति स्नुत्वादेयापि भविष्यति यथैक
कारस्यानुबंधकार्याण्यनुमीयंते न तत्तस्यानुकरणस्यासिद्धः प्रकृति ।। देशविकृतमनन्यवद्भवतीत्यु
वद्भावः न चापशब्द इति सिद्धान्तवादी प्रकरणाद्धि शास्त्रीया प्रकृतिराश्रीयते शास्त्रनिवर्तने च कार्ये इति
दृश्यते अपशब्दाश्च न शास्त्रीयाः प्रकृतिरनुपदिष्टत्वात् न चापशब्दत्वे शास्त्रीयं कार्यं नापि तद्वति देश
कं नहि साधोरसाधुत्वातिदेश उक्तिमान् एवं भाष्यकारेणाशक्तिजानुकरणस्येत्यल्का पदेशस्यापि

षष्ठीनिर्दिष्टस्येति राज्ञः कचेत्यत्र राजन्शब्दः षष्ठीनिर्दिष्टः नत्वनइतिलोपाभावः यद्येवं कृपो रो लः इत्यत्रा।
पि ऋकारः षष्ठ्या न निर्दिष्ट इत्यनन्त्यत्वं प्राप्नोतीत्याह यदीति अथवेति षष्ठीनिर्दिष्टस्येति नापेक्ष्यते।

एकदेशविकृतमनन्यवत् षष्ठीनिर्दिष्टस्य यदि षष्ठीनिर्दिष्टस्येत्युच्यते तर्हि कृ इत्यत्र शिवइति स्व
तेन न प्राप्नोति न ह्यत्र ऋकारः षष्ठीनिर्दिष्टः कस्तर्हि रेफः ऋकारो ह्यत्र षष्ठीनिर्दिष्टः कथं
अविभक्तिको निर्देशः कृपउः रः लः कृपो रो ल इति अथवा पुनरस्तु अविशेषेण नन्वेवमपि राज्ञः
कच राजकीयं अल्लोपोन इति प्राप्नोति नैष दोषः वक्ष्यत्येतत् श्वादीनां सम्प्रसारणे नकारा
न्तग्रहणमनकारान्तप्रतिषेधार्थमिति तत्प्रकृतमुत्तरत्रानुवर्तिष्यते अल्लोपोनः कारान्तस्ये न
ति इह न हिल्लमशिवः अन्नन इति प्रतिषेधः प्राप्नोति रवक्षातिषधा

नकारान्तस्येति न च राजन्शब्दः कादेशो कृतेन नकारान्तो भवति शिवक्षेपद्ध... तिभावः ॥
रामः रामचन्द्राय नमः

ग्रावन इति गोस्यान्तिनित्यमिति नित्ययोगमत्वर्थेन तृकारएव वा न ततवर्त्तक इत्यादावकारः नरवा
न स्वाविति समासः नित्ययोगप्रतिपादनाय बहुव्रीहिर्न कृतः गुरोररस्येति ह्रस्वस्येति तेन ह्रस्वस्यैव
भा॰कौ॰ खतः प्लुतनिषेधो न दीर्घस्य वार्त्तिककारस्य ल्कारप्रत्याख्यानेन निः प्रयोजनमित्याहुः सेधेति पचोद्रू
१५

ह्रारवत्प्रतिषेधार्थश्चैतन्निसिध्यति गुरोररवत इति वक्ष्यामि यद्यरवत इत्युच्यते होतृल्कारः
होतृकारः अत्र न प्राप्नोति गुरोरवतः ह्रस्वस्येति वक्ष्यामि सएवं बहुत्वभेदेन ल्कारोपदेशः
प्लुत्याद्यर्थः सन्प्रत्याख्यायते सेधमहत्तोवशास्त्रं वा ल्वहस्तकृष्णेति पचोद्रू पेचोव इदंवि
चार्यते इमानिमं च्यवद्वयाणि न पराचोपदिशेयन् पतन्त्रोनङ्- पेत मोत च इति अत
परागि वा यथान्यासमिति हम

पेचोव इदं विचार्यते इति न परान पर संध्यक्षरोपदेशो विचार्यत इत्यर्थः तत्रोपदिशेयन्नित्यत्रा
सत्वमनाय द्यपिक्रियाभिधीयते तथापि ब्यापरास्पष्टासत्वरूपतामापादिता विचारक्रियायाः क
र्मभावमत्रभवति यथापथपस्टोगाथा वनीतिस्वरणे दर्शने १५

कस्मात्रेति कार्येको विशेष इत्यर्थः निषेधः तपरोपदेशश्चेदिति यद्यणुपदेशे उच्चारणं तथापि तपरोप
देशफलं वेदे स्थितं तस्मात् तपरोच्चारणं कर्तव्यमित्यर्थः संध्यक्षराणीत्यनर्थ्याः एवाचार्यसंज्ञा संधीयमाना
प्लु३ वयवत्वात् प्लुतादिष्विति प्लुतमभ्युपगम्याच्कार्याणि न सिध्यन्तीत्युच्यते प्लुतएव न प्राप्नोति।

कस्मात्र विशेषः संध्यक्षरेषु तपरोपदेशश्चेत् तपरोच्चारणं संध्यक्षरेषु तपरोपदेशश्चेत् तपरो।
च्चारणं कर्तव्यं प्लुतादिष्वज्विधिः प्लुतादिष्वजाश्रयो विधिर्न सिध्यति गौ३त्रातः नौ३त्रात।
इत्यत्रानचि च इति द्व्यचवुत्तरपदे यरो हि भवत इति द्विर्वचनं न प्राप्नोति इह प्रत्ययैङ् इति कायनः
उदैङ्गा३ इ३पत्रगव इति ऋचीति इ३ देशो न प्राप्नोति प्लुतसंज्ञा च प्लुतसंज्ञा च न सिध्यतीति
इति कायनः ऐ३ इ३प्रगव ऊकालोज्ह्रस्वदीर्घप्लुतसंज्ञो भवतीति प्लुतसंज्ञा न प्राप्नोति ॥

निदर्शयितुमाह प्लुतसंज्ञा चेति त्रिमात्रस्याचः प्लुतसंज्ञा विधीयते तपरे त्विच त्रिमात्रस्याग्रहणाद
प्लुताभावः न त्वेचो प्लुतो विधीयमानः इकारोकाराभ्यां गृहीत इकार उकारश्च तस्मात्
रामः रामः ॥

अतपरइति असन्दीहतपरत्वेएकारौकारयोर्मात्रिकयोरैदौकारयोर्ग्रहणादृद्धाद्वियानंस्यादितिसूत्रेक
रणं तपरत्वेतुनयोरग्रहणात्कारस्याभावः ननुचेति सूत्रारंभप्रतिनकश्चिद्विशेषस्तत्रार्थः अतपरत्वेएच

भाष्ये २६ 16

संवृतनिर्देशतपराणि अतपरएचइग्घ्रस्वादेशे यथातपराणिएचअग्घ्रस्वादेशइतिवक्तव्यं किं
प्रयोजनं एचोऽग्घ्रस्वशासनेषु अर्धएकारअर्धओकारौवामाभूदिति ननुचयस्यापितपरा
णिनेनाप्येतद्वक्तव्यं इमौचैचासमाहारवर्णौमात्रावर्णस्यमात्रेवर्णोवर्णायोः तयोः
तयोःह्रस्वादेशशासनेषुकदाचिदवर्णःस्यान्नकदाचिदिवर्णोवर्णोमाकदाचिदवर्णो
भूदिति प्रत्याख्यायतेयत्नात् ऐचोश्चोत्तरभूयस्त्वादिति यदिप्रत्याख्यानपक्षः इद
मपिप्रत्याख्यायते ॥

इतिवक्तव्यंतपरत्वेनैवइति तयोर्विश्लिष्टावर्णत्वात् श्लिष्टवर्णावर्धइकारोऽर्धउकारोभवतः ऐचोश्चे
ति अर्धमात्रावर्णस्यार्धमात्रेवर्णोवर्णयोः भूयसाचव्यपदेशामल्लग्रामादितीकारोकारावेवमावि

सिद्धमेङ् इति अर्द्धएकारार्द्धौकारौ न स्तः तत्र तालव्यएकारस्य ओष्ठ्य ओकार इति तयोः स्थाने इकारोकारावेव
व भविष्यतः नो चेदिति ताभ्यामुपदिष्टाभ्यां दीर्घप्लुतयोरपि ग्रहणं सिध्यतीति भावः गुणसंज्ञायां तु दीर्घ।

सिद्धमेङः सस्थानत्वादिति ननु चैङः सस्थानतरावर्द्धएकारोऽर्द्धओकारः न तौ स्तः यदि हि
तौ स्यातां तावेवायमुपदिशेत् ननु च भोः छन्दोगानां सात्यमुग्रिराणायनीया अर्द्धमेका
रमर्द्धमोकारं चाधीयते सुजाते एअश्वसूनृते अध्वर्यो अद्रिभिः सुतं शुक्रं ते एअन्यघ्नं ते एअ।
त्यादिति पार्षदकृतिरेषा तत्रभवतां नैव हि लोके नान्यस्मिन्वेदेऽर्द्धएकारोऽर्द्ध।
ओकारो वास्ति एकारेपि दीर्घग्रहणं एकादेशे दीर्घग्रहणं कर्त्तव्यं आद्गुणः दी
र्घाद्दीर्घे विदीर्घ इति किं प्रयोजनं रामाय नमः ॥

कारौ २

वेकारौ निर्दिश्येते सुजाते इति तः पादस्य स्याव्यपरस्याकारस्यार्द्धमेकमर्द्धमोकारं च विदधाति पारिष
दकृतिरिति गीतिवशात्तथोच्चारणमित्यर्थः रामायगणमचेद्रनमः

कै॰ भा॰ १७

ऽन्तर्यत इति अन्यस्यासंभवादिह मत्र नास्ति स्तुतस्य विषये सरत इति अस्येक इति प्रत्ययोविति सिद्धेप
तदपि किमर्थमुच्यते इति चेत् वाक्छेदसीम्यत्रानुवृत्त्यर्थं तस्मात्सर्वेषु इतिः सर्वरूपार्थमेवोत्तरत्रानुव।

ऽन्तर्यतस्त्रिमात्रे चतुर्मात्राणामस्थानिनो त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति खट्वा इन्द्रः
खट्वेन्द्रः खट्वा उदकं खट्वोदकं खट्वा ईषा खट्वेषा खट्वा ऊढा खट्वोढा खट्वा लकार खट्वल
कार खट्वा औदनः खट्वौदनः खट्वा औपतिकायनः खट्वौपतिकायनः खट्वा औपगवः खट्वौपग
व इति तत्र हि दीर्घग्रहणं कर्तव्यं उपरिष्टाद्योगविभागः करिष्यते अकः सवर्णे एको भव
ति ततो दीर्घः दीर्घश्च से भवति यः स एकः सर्वपदयोरिस्थानिर्दिष्ट इति इहापि तर्हि प्राप्नो
ति पञ्चविंशपचं नीति नैष दोषः इह तावत् अपुमिति अस्येक इतीयता सिद्धं सोयमेवं सिद्धे स
ति यत्सर्वग्रहणं करोति तस्यैतत्प्रयोजनं यथाजातीयकः सर्वस्य यथाजातीयक उभयोर्यथास्या

त्तत इति विद्धमिति सर्वरूपं भविष्यति रामाय नमः रामचंद्राय नमः रामः ॥

अथवेति विधिनियमसंभवे च विधिरेव बलीयानिति विधेर्बलवत्वान्नियमो न भवति हलपवदीर्घत्वं यथा।
स्यात्तु न इत्याटो मा भूदिति नपरे इति नपरसंज्ञित मह्वचरिते गुणवृद्धिसंज्ञे इत्यर्थः नाटपीति तेत्रन्याय
अथवाऽऽचार्यप्रवृत्तिर्ज्ञापयति नानेन संप्रसारणाद्दीर्घो भवतीति यदयं हलउत्तरस्य संप्रसार
णस्य दीर्घत्वं शास्ति पंचतीत्येतेण इत्तीयतासिद्धं स्याय एव सिद्धे सति यद्ग्रहणं करोतीति।
स्यैतत्प्रयोजनं यथाजातीयकं परस्वरूपं तथाजातीयकस्य भयोर्यथा स्यादिति अहनहिवद्ध
शेर्था मालुर्य इति दीर्घवचनात्स्कारेण अनेनान्तर्यादेकारेण तत्रको दोषः विगृहीतस्य प्र
वर्णस्य सज्येत न हि मा यत्र क्रियमाणे दोषः तत्र कर्तव्यमिति किं तर्हि यत्र क्रियमाणे न दोषः तत्र
कर्तव्यमिति क्व क्रियमाणे न दोषः संज्ञाविधौ वृद्धिरादैच् दीर्घः अदेङ्गुणो वृद्धीति तर्हि दी
र्घग्रहणं कर्तव्यं कस्मादेवं नर्थेनास्विमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा न
भवंति तपरे गुणवृद्धी ननु च तः परो यस्मात्सोयं तपरः नेत्याह तादपि परस्तपर इति यदि
तादपि परस्तपरः ऋदोरप् इतीहैव स्यात् यवः स्तवः लवः पव इत्यत्र न स्यात् नैष तकारः क।
अयणादेकस्य बहिशाकित्वादेकशेषाप्रयणाहास्यनेकस्याभिधाननिमित्तभावः बहुव्रीहिवाद्दीचादय

न कर्त्तव्यं

का रे

५२

कै. भा. १८

18

किंदकारइति समासद्वयवादीनंप्रत्याह अथकिंतकारइति नत्वकेवलबहुव्रीहिवादिनोनिष्प्रयोजनं तपरत्व ऋकारस्यानपत्वाद्भिन्नकालानांग्रहणप्रसंगाद्ग्रहणेनाचभेदकत्वानत्रास्याधित्वाभावात् अथवासंदेहार्थमाचविग्रहवार्थमलकारएवंदकारइत्यर्थः तिन्नवादितमितिभाष्य स्यविरोधः तत्रहि

ण मुख

किंदकारेप्रयोजनं अथकिंतकारेपद्यसंदेहार्थः लकारःदकारोपि अथद्यावार्थलका रलर्हिदकारोपि ॥

तिदितिप्रत्ययग्रहणेवादितं इहमाभूतदिवउतद्युभ्यामिति ततोदित्वाप्रयोगेनप्रत्याख्यातं तपर स्त्वेदकारस्तुत्वभूतोनिर्दिश्यतेतेन चकालस्यग्राहकोदकारइत्युक्तं इहचदकाराभ्युपगमेनता लवादिषुदोषःपरिहृतः अत्राहुःथकारस्यानिकोथकारस्यानिकोवादकारोत्रविवक्षितःकस्तर्हिद

ति दि

तरसमानाकृतपइति आकारादिष्वकारादिसदृशावयवाकारल्कारयोरेफलकारसदृशावय।
वौ संप्यत्वेरश्वकारेकारोकारसदृशाः तत्रकेवलवर्णकार्यमवयवेष्वभवतिनवेतिविचारः इहादि
समुदायाश्रयीति ऋल्टयेश्राप्तेश्राइति अवयवानुपीति अइउणऋल्लगीति तत्रसमुदायपरे
निर्देशेसन्निहितत्वाअव्यवयवानान्तरीयकत्वादेजादिसंज्ञानलभंते अवयवपरेनिर्देशेसमुदा।

इदंविचार्यते यएतेषुवर्णेषुवर्णैकदेशावर्णान्तरसमानाकृतयः एतेषामव
यवग्रहणस्याहानवेति कुतःपुनरियंविचारणा इहादिसमुदायाश्रपदिश्यते

योनसंज्ञाभाक् यथाल्टवेल्पादावनच्कस्यस्यहलोङ्यःस्वेनाच्छार्यत्वान्निर्दिष्टोच्कारोन्यत्रप्राप्ताल्येन
निर्देशाद्धलादिसंज्ञांनप्रतिपद्यतेइतिदृष्यत्रेल्पादावनच्कएवयणादेशःप्रवर्तते तत्रासत्यामप्यजा
दिसंज्ञायामस्यादयः समुदायादेशाअपिनांतरीयकत्वादवयवान्निवर्त्तयंति एवंस्थितेअग्नइंद्रइत्या
दैयत्रावयवकार्यप्राप्तौसमुदायकार्यंचनत्रांतरंगत्वातत्रचसमाप्तावाटितत्वात्सम्पत्रावान्यरत्वाखा।

तत्त्वबिन्दुः

ऊन १

कै. भा.
१८
१७

अवयवावगतिपूर्वकत्वाद्धि समुदायावगमस्य समुदायकार्यं बहिरङ्गम् आयादीनां चावकाशः आ आ
यादीति ननु च त्र्यणादेशोऽवयवस्य प्राप्नोति येन नाप्राप्ते इति वा मध्येऽपवादा इति वा यणोऽपवादा आयादयो
वा यकाः स्युः तत्र यथा दध्यत्र दधिशब्दस्य ईकारः सवर्णदीर्घत्वं प्रतिपद्यते एवमेकारस्यावि
प्रतिपद्येत मन्यते आह रेप ओङ् ऐ आजिन्य नावयवानां प्राधान्येनानिर्देशादित्येवं ग्रहणपक्षे शङ्का।

अवयवाश्रयोऽपि अभ्यन्तरश्च समुदायेऽवयवः तद्यथा वृक्षः प्रचलन् सहावयवैः प्रचलति तत्र
समुदायस्थस्यावयवस्यावयवग्रहणेन ग्रहणं स्यान्न वेति जायते विचारणा कश्चात्र विशेषः

तु
बीजमुपन्यस्तं इदानीमग्रहणपक्षे शङ्काबीजमुपन्यस्यते अभ्यन्तरश्चेति तिरोहितत्वादवयवानां समुदा
यकार्यं प्रत्यात्मकार्यस्याप्रयोजकत्वाच्चर्मिवद्वज्ञात्यन्तरयोगाद्गुणेन रसास्वरूपमात्रेण तत्का
र्यप्रवर्तनादित्यर्थः

१८

समानान्तरेति समानशब्देन सर्वाचार्यनिर्देशाद्देका भिधीयंते दणसमानाऽइतिवचनात्तेन सर्वाकार्यं प्रामोती
वर्णैकदेशावर्णग्रहणेन चेन्नस्थ अदेशेण समानाद्राविधिप्रतिषेधः वर्णैकदेशावर्णग्रहणेन चे
न्नस्थ एवे समानाद्राश्रयो विधिः प्राप्नोति सप्रतिषेध्यः अग्रे इंद्र वायो उत्कं अकः सवर्णे दीर्घ
इति दीर्घत्वं प्राप्नोति दीर्घह्रस्वविधिप्रतिषेधः दीर्घह्रस्वाश्रयो विधिः प्राप्नोति सप्रतिषेध्यः
खट्वाल्रूय मल्रूय ह्रस्वस्य पिति कृति तुगभवतीति तुक प्राप्नोति नैषदोषः आचार्यप्रवृत्तिर्ज्ञा
पयति न दीर्घह्रस्वाश्रयो विधिर्भवतीति यदयं दीर्घाच्छे तुकं शास्ति नैतदस्ति ज्ञापकं अ
स्ति ह्यन्यदेतस्य वचने प्रयोजनं किं पदान्ताद्वेति विभाषां वक्ष्यामीति यत्तर्हि योगविभागं करोति
इतरथा हि दीर्घात् पदान्ताद्वेत्येव ब्रूयात् इदं तर्हि विद्धाभिः मालाभिः अतो भिस ऐस् भिस भावः
प्राप्नोति न परकरणसामर्थ्यान्न भविष्यति इदं तर्हि यानावाता अतो लोप आर्द्धधातुक इत्य
कारलोपः प्राप्नोति नव चा त्रापि तपरकरणसामर्थ्यादेव न भविष्यति अस्ति ह्यन्यत्तपरकरणे प्र
योजनं किं सर्वस्य लोपो मा भूदिति अथ क्रियमाणे तपरे ... लोपे कृते नैवं स्यात् किं स्यात् भवति
परलोपस्य स्थानिवत्त्वादसिद्धत्वाच्च एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति नाकारस्याकारस्य
न्यायः असिद्धत्वाच्चेति असिद्धवदत्राभादित्यनेन ॥

स्य २ पर ॐ ये २

के॰ भा॰
२०
20

पत्तहीति नन्वस्मतीति किं त्वेश्राकारस्य स्याकारस्य लोपे कृते द्वयोरकारयोः पररूपस्य बाधत्वं शब्देन वक्तव्या
त्वेदोगायेत्यत्रोतायोनित्याकारलोपप्रसंगात् नैष दोषः सन्निपातपरिभाषया लोपो न भविष्यति
श्राकारद्वयस्य त्यपश्राह्नः कृतो लोपस्यानिमित्तं दीर्घत्वं तु कष्णयेति निपातनाद्भवति एकवर्णादिति

परस्य श्रकारस्य लोपे कृते द्वयोरकारयोः पररूपेणासिद्धं हल्पंस्यानगोदः कंकलदउति प
प्रयत्नितवाचार्थः नाकारस्य स्याकारस्य लोपः स्यादिति अतः ककारमनुबन्धं करोति नै
नदस्तित्समपक उत्तरार्थमेतत्स्यात् हेदशोकपाः परिसृजापत्तदोषरिति पत्तर्हिगापो।
भृगित्यनन्यार्थं ककारमनुबन्धं करोति एकवर्णावच्च एकवर्णाच्च दीर्घो भवतीति वक्तव्यं।
किं प्रयोजनं वाचानवृत्तिर्दीर्घाज्ज्लत्वाणाग्नाभूदिति इह च वाचो निमित्तं तस्यानिमित्तं से
योगान्यानाविति दीर्घाज्ज्लदत्वणाय न्नाभूदिति अत्रापि मामोमाग्रहणाज्ज्ञापकं दीर्घाद्यज्ज्लत्व

श्रवमवसंख्याश्रयोनवाकृ शद्बस्याभावान्निमित्तं कार्यं प्राप्नोती एकवर्णावदित्यतिदेशः क्रियते।
गौनैाग्रहणाज्ज्ञापकमिति सामान्येन तत्र एकवर्णविषयवाश्रयकार्याभावस्य अग्रपदीत्यादावेङः पदा

द्वा २

२० १६

अथवेति नरसिंहवद्ग्रहणेन तद्व्याप्ता हृश्यपास्व प्रत्यभिज्ञानात्तत्वासिध्याप्यय्युपलक्ष्यानां वर्णानां।

अथवा पुनर्नरटच्यते अग्रहणं चेत्लुड्लिपिलादेशविनामेषु ऋकारग्रहणं अग्रहणं चे
त्लुड्लिपिलादेशविनामेषु ऋकारग्रहणं कर्तव्यं तस्मात्लुड्लृहलः ऋकारे चेति वक्त
व्यं इहापि यथा स्यात् आनयतुः आनृयुरिति यस्य पुनर्नरटच्यते द्विहलश्चैव तत्
स्यासिद्धं यस्यापि न गृह्यन्ते तस्याप्येष न दोषः द्विहल्ग्रहणं न करिष्यते तस्मात्तु
ड्भवतीत्येव यदि न क्रियते आटतुः आटुरित्यत्रापि प्राप्नोति अश्नोतिग्रहणं
नियमार्थं भविष्यति अश्नोतेरेवावर्णोपधस्य नान्यस्यावर्णोपधस्येति लादेशे
च ऋकारग्रहणं कर्तव्यं क्लृप्यो रो लः ऋकारस्य चेति वक्तव्यं इहापि यथा स्यात्क्लृ
प्तवानिति यस्य पुनर्नरटच्यते रश्चैव तस्य सिद्धं यस्यापि न गृह्यन्ते तस्याप्येष न दो।
षः समुदायेनास्तित्वं समुदायवाचोपलक्षितानि तत्र वर्णैकदेशेन नास्ति विकीर्षान्तिवशात्तवय

कै॰ भा॰
४१
२१

अविभक्तिक इति तत्र ऋकारनिर्देशसामर्थ्याद्विभागं प्रकल्प्यादेशो विधीयते स्फोटमात्र
मिति जाति स्फोट इत्यर्थः तत आन्तर्य्यतस्तेन फलकारं वर्णसामान्यस्यादेश्यादेशभावेन
अविभक्तिको निर्देशः कृपउः रः लः कृपेरो ल इति अथवा उभयतः स्फोटमात्र
निर्दिश्यते रश्रुतेर्लश्रुतिर्भवतीति विनाम ऋकारग्रहणं कर्तव्यं रषाभ्यां नो णः समानपदे
ऋकाराच्चेति वक्तव्यम् इहापि यथा स्यात् मातॄणां पितॄणामिति यस्य पुनरप्युभयतो णः स
मानपदे ऋकाराच्चेति वक्तव्यं इहापि यथा स्यात् मातॄणां पितॄणामिति यस्य पुनर्दृश्यते
रषाभ्यामित्येव तस्य सिद्धं न सिध्यति यत्तद्रेफात्परं भक्तेः तेन व्यवहितत्वान्न प्राप्नोति मा भूदे
वं अट्कुप्वायेनैवं न सिध्यति वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते ये व्यपवृक्ता अपि वर्णा
भवति यच्चापि रेफात्परं भक्तेः न तत्क्वचिदपि व्यपवृक्तं दृश्यते एवं तर्हि योगविभागः क
रिष्यते रषाभ्यां नो णः समानपदे ततो व्यवाये व्यवाये च रषाभ्यां नो णो भवतीति ततो ट्
श्रीपनेयत्नादिति रेफ ऋके रिति समानाधिकरणे पञ्चम्या अड्व्यवाय इति ऋकारेण यथा दीर्घोऽस्य
तेय वमरकारभागापीत्यर्थः न सिध्यतीति तस्य भागस्य स्फुटस्यानिभामा विषयत्वाज्ज्ञात्यभिव्यक्तिर्दृ

२

२ पश्चादपिन्नमनशब्दंपठति

गुरोष्टेरिति पेकारोगुरुस्तस्यटेरितिसिद्धं तेत्रमायायाश्चयणात्वगुरोरपिस्यानेस्तुनोभवतिदेवदत्तश्शे
ति क्रियतेन्यासएवेति ग्रवश्यकर्त्तव्यतांदर्शयति अपहृतेपिभागयोर्विहृततरत्वात् मयत्व

आचार्यप्रवृत्तिर्ज्ञापयति भवत्स्वकारान्त्राणत्वमिति यदयंत्वं[illegible]त्विषन्ननमनशब्दंप भ्रा१
ठति नैतदस्तिज्ञापकं वृध्यर्थमेतत्स्यात् नान्तमनिः यत्तर्हिस्मातिशब्दंपठति ननुवा
केवृध्यर्थमेतत्स्यात् नबहिरंगात्वृद्धिः अन्तरंगत्वात् असिद्धंबहिरंगमन्तरंगे अथवा
वाउपरिष्टाद्योगविभागःकरिष्यते अतःनोणभवति ततष्कन्दस्यवग्रहणात् अतना
इत्येवसिद्धेनावेचउड्डैतो एतत्त्ववक्तव्ययस्यपुनरदिद्येनेरटयेनेगुरोष्टेरित्येवसिद्धत्वात्तस्य
सिद्धं यस्यापिनगटयेनेतस्याप्येषदोषः क्रियतेन्यासएवतुल्यरूपेसंयोगेद्विव्यंजनः

भेदादिकारोकारयाभ्यामग्रहणात्[illegible]भावात् तुल्यरूपेइति तुल्यरूपावयवत्वात्संयोगात्तुल्य

ह्वा१

रूपः तस्यैकवर्णान्तस्पर्शपरत्वे सिद्धान्तेन वर्णद्वयरूपत्व आप्तस्वारणानुभ्रांतमेकवत्तानमि

विधिः तत्त्वरूपे संयोगो द्विर्व्यंजनं श्रेयो विधिर्न सिध्यति कुक्कुटः पिप्पलकः पितामि
ति पुनरप्युत्पुनर्गटंघेतेन स्पर्शोहाककारो हाकपकारो हानकारो यस्मापि नरटघेतेन तस्या
कै॰ भा॰ २२ 22 क पि हाककारो हापकारो हानकारो कथं मात्राकालोत्र गम्यते न च मात्रिको व्यंजनम
स्ति अनुपदिष्टस्य कथं शंका विज्ञातं असम्बद्धकथं शंका प्रतिपत्तं यद्यपि तावदत्रै
तच्छ्रुकाने वकुर्य्येत त्वात्समानस्य वर्णान्तारहन्तीति उक्तं तत्त्वं संपत्त सम्बल
रः यद्वा कमिति यत्रैतत्समानस्य वर्णान्तारहन्तीति अत्रापि मात्राकालो गम्य
ते न च मात्रिकव्यंजनमस्ति अनुपदिष्टस्य कथं शंका विज्ञातं असम्बद्धकथं शंका प्र

तिपिष्टसमाचारः अत्रापीति सानुनासिक निरनुनासिकद्वा वत्तवर्णा विमर्शः

कौ २२ २

नाव्यपवृक्तस्येति व्यपवर्गो व्यपवृक्तं भेदः तेनाव्यपवृक्तस्याभिन्नबुद्धिविषयस्यैकत्वालंबनज्ञान
ग्राह्यस्य समुदायस्यावयवत्वस्मिन्नाह्निधिः एषा गम्भूतवर्णाविधिर्न भवतीत्यर्थः अव्यपवृक्तस्य
समुदायस्यावयवत्वे सत्यर्थः नहि संभवमात्रेणाकार्याणि क्रियंते। पितयत्र न ह्युद्धिरस्मिन्नतै

नाव्यपवृक्तस्यावयवेन ह्निधिर्यथाद्रुक्षेषु नाव्यपवृक्तस्यावयवस्यावयवाश्रयो विधिर्यथा
याद्रुक्षेषु नाव्यपवृक्तस्यावयवस्यावयवाश्रयो विधिर्यथाद्रुक्षेषु न यथा याद्रुक्षेषु समद
र्पा स्तामिये स्याभवंतीति न समदर्शा रत्निमात्रं काष्ठमग्रावस्थापीयते विषमउपन्या
सः प्रत्यक्षे चैव हि न तत्क्रमि चोद्यते असंभवस्याभावे विधाव
वेत्यर्थः माषान भोक्तव्या इति निषिद्धस्याभिषेश्वपि प्रवर्तनं तेन च न तद्बुद्धित इत्यावेदनं संभावा
त्. समदर्शोति स्वामियेनीशाहृक्ष चांवाचक उपचारात्काष्ठेषु वर्तते तत्र समदर्शा हस्तिका
ष्ठे समदर्शा काष्ठानीति पद्वैरभावान्न तस्याभिधानं असंभव इति अर्द्धं च तद्देशाद्धि वेदि २

के॰भा॰ २३

23

यथा न र्हीति अल्पप्रमाणत्वात्स्पष्टत्वमभवदित्यर्थः अव्यपवृक्तमिति व्यपवर्गस्याभावेनेत्यर्थः य
त्र न र्हीति ऐआ इत्यत्र हि स्फोटः प्रकारप्रतिमासोस्ति विवृतत्वादिति अकारस्य विवृतोपदे

यथा न र्हि समदशप्रादेशमात्रीरारुम्यः समिधोभ्यादधीतेति न समदशप्रादेश
मात्र्यकाष्ठमयान्नावभ्याधीयते अत्रापि प्रतिपदमेवैकमेवोच्यते तेऽल्पस्त्रासंभवोप्रा
वेशंचाःयथा न र्हि तैलं न विक्रेतव्यं मांसं न विक्रेतव्यमिति अपवृक्तं गावः सर्पिषा
श्च विक्रीयंते नेयालेमिनो विस्पष्टेऽशौ च विक्रेतव्यमिति अपवृक्तं स्पृष्टं च न विक्री
यते अव्ययस्य स्पष्टालिपाराः कर्तव्यः अव्यपवृक्ते कामचारः यत्र न र्हि व्यपवर्गोस्ति
क्व च व्यपवर्गोस्ति संध्यक्षरेषु संध्यक्षरेष्वविवृतत्वात् संध्यक्षरेषु यदवर्णं वि
वृततरं तदन्यस्माद्वर्णाद्येयी
स्यादत्र प्रकर्षो विवक्षितस्तदाह विवृततरमिति
तत्र प्रयत्नाभेदादसावर्ण्यापादकत्वेन संध्यक्षरावयवस्य ग्रहणं नास्तीत्यर्थः नदेवमाकारा २

हयवरट् सर्वस्येति सर्वपरोच्चारणक्रियाभेदादेकस्यैव हकारस्य सर्वपरत्वव्यपदेशः शश्छोऽटी।

हयवरट् सर्वेवर्णाः सकृदुपदिष्टाः अयं हकारो द्विरुपदिश्यते सर्वस्यैव परश्च प
दिपुनः पूर्वं ण्वोपदिश्यतपरेपववा क्रमश्चात्र विशेषः हकारस्य परोपदेशः अर्हणोऽर्हः।
ग्रहणं हकारस्य परोपदेशः अर्हणोषु ग्रहणं कर्तव्यं आतोदितिनित्यं हकारदीर्घादटि।
समानपादे हकारे चेति वक्तव्यं महाद्विसः उश्च उश्चवहकारग्रहणं कर्तव्यं आ
तोगाव शश्छोऽटि सत्तादस्लुतादस्लुतेहृशि च हकारे चेति वक्तव्यं इहापि यथा स्या
त् ९ ऊहृयोहसति व्राह्मणोहसतीति मासस्तर्हि पूर्वोपदेशाः पूर्वोपदे
शे किल्व सक्वेसिद्धिः यो सल्
ति हकारपरशकारस्यासंभवं तत्प्रसंगोच्चारितमेतत् उश्चेचेति ॥ राम॰

अशक्यार्थमपिवक्तव्यंमोहमतीतिरोधनार्थं यदिकिंचिति

कै॰ भा॰ २८ २५

ग्रहणानि यदिसर्वोपदेशः किंतद्विधेयं स्निहित्वास्नेहित्वाः स्निह्यति स्नि
ह्यति स्नेहानुपपत्त्याह्लादादितिकिंनप्राप्नोति क्त्वाविधिःक्तस्यविधेयः अ
शुद्धत्वा अलिखत्वा शल्यउत्पत्त्यादनिटःक्त्वाइतिक्त्वानप्राप्नोति उद्विधिःउद्वि
धेयःहदिहि सर्पिहि बलादिल्लवणउत्तरनप्राप्नोति फलग्रहणानिच किं
अहकारणानिस्युः नत्रकोदोषःफलाफली नीहतस्मात् अलाग्याअदाणं
तस्मात्सर्वएवोपदेशश्चः परस्य यदिचकिंचिदत्रमत्राण्युपदेशेप्रयोजनमस्तिन

प्रयोजनार्थोहि वर्णानामुपदेशो नस्वरूपप्रतिपत्त्यर्थमित्यर्थः ॥ २६॥

इद्मिति उभयत्रापि दोषप्रयोजनसद्भावात्यम्नः स्वर्नयतीति एकारोऽत्र प्राप्नोति नस्यत्र सवर्णग्रहण

इदं विचार्य्यते अयंरेफो यकारवकाराभ्यामपूर्वं पवोपदिश्यते दूरयवडिति पर पववाय।
याम्यासमिति कस्मात्र विशेषः रेफस्य परोपदेशोऽनुनासिकद्विर्वचन परसवर्णप्र।
तिषेधः रेफस्य परोपदेशोऽनुनासिकद्विर्वचनपरसवर्णानाम्प्रतिषेधो वक्तव्यः अनुना
सिकस्य स्वर्नयति प्रातर्नयति मातर्नयतियरोऽनुनासिकेऽनुनासिको वेत्यनुनासिकः प्रा
प्नोति द्विर्वचनस्य मरुद्रद्रो भद्रह्रदः परश्च ति द्विर्वचनम्प्राप्नोति

एमकिमरुद्रद इति द्विर्वचने कृते न
स्यात्सिद्धनाद्रो रीति रेफलोपो नास्ति हलोयमामिति लोपस्तु पाक्षिक इतिपद्वेरेफद्वयप्रवणाप्रसङ्गः॥

वि भा. ऊ एं रथेति अनुनासिकेनैव परसवर्णेन भाव्यमिति नियमाभावाद्रेफः प्राप्नोति तस्य चा

इति परसवर्णः

के द. परसवर्णस्य ऊं डं रथेनवनं रथेन अनुस्वारस्य यदि परसवर्णः प्राप्नोति अस्तु तर्हि पूर्वोपदे।

२५ शः पूर्वोपदेशे किन्त्वप्रतिषेधो यलोपवचनञ्च यदि पूर्वोपदेशः किन्त्वप्रतिषेधश्च म् देविन्वा

25 दिदेविषतीति रलो व्युपधादिति किन्त्वम्प्राप्नोति नैष दोषः नैवं विज्ञायते रलः व्युपधादिति

किन्तर्हि रलः अव्युपधादिति किमिदमव्युधादिति अवकारान्तात् व्युपधादिति यलोपव

चनञ्च वक्ष्यामि लोपो वक्तव्यः जीवेरदानुक् जीरदानुः गोधेरः पचेरन्ते यजेरन् वलीति लोपो न

प्राप्नोति नैष दोषः रेफोऽप्यत्र निर्दिश्यते लोपो व्योर्वलीति रेफश्च वलि चेति अथवा पुनरस्तु प

रोपदेशः ननु चोक्तं रेफस्य परोपदेशे अनुनासिकद्विर्वचनपरसवर्णप्रतिषेधः इति अनुनासिक

परसवर्णयोस्तावदप्रतिषेधो वक्तव्यः॥

सिद्धत्वाद्दोरीति रेफलोपो नास्ति॥

रेफोष्मणामिति अनुनासिक परसवर्णविधाने द्विस्थानेऽन्तरतम इतिपरि भाषो प

रेफोष्मणां सवर्णा न सन्ति ॥ ८॥

५० स्थानादोषाभावः नहि रेफस्य एकारोऽन्तरतमो नाप्यनुस्वारस्य रेफः ॥

२६
26

२६

नेमौ रहाविति॥ हकारवद्रेफोपि नकार्यीसर्थः। तत्रैकवाक्यतायां सामान्यविशेषविध्योर्लौकिकव्यवहारादेव शब्दार्थसंबंधपरिज्ञानात्सामान्यविधेर्विशेषविधिर्बाधकः। प्रस
क्तस्य विशेषविधिः। सामान्यविधिस्तु उभयत्र इति रेफस्य कार्यित्वं निमित्तत्वेन बाध्यते। रध्मुरकादेतु तस्यानित्वेननिमित्तत्वमिकः तस्मादिस्नुत्तरस्येत्यादि ज्ञापकान्न बाध्यते।
लक्ष्यस्थितिसपेक्षणाद्वा बाध्यबाधकभावेन न क्वचिदपेक्षानास्ति। यथा चिचीषतीति दीर्घत्वद्विर्वचनयोः। इम इति। विधानादेषां साधुत्वं स्यात् प्रत्याहारप्रतिबद्धं तु कार्यं

द्विर्वचनेपि नेमौ रहौ कार्यिणौ द्विर्वचनस्य। किं तर्हि निमित्तमिमौ रहौ द्विर्वचनस्य तद्यथा। ब्राह्मणमोज्यं तौ माठरकौण्डिन्यौ परिवेविष्टामिति। नेदा
नीं तौ भुंजाते। इदं विचार्यते। इमे अयोगवाहाः न क्वचिदुपदिश्यन्ते श्रूयन्ते च। तेषां कार्यार्थ उपदेशः कर्तव्यः। के पुनरयोगवाहाः विसर्जनीयजिह्वामूली
योपध्मानीयानुस्वार[redacted]यमाः। कथं पुनरयोगवाहाः। यदयुक्ता वहन्ति। अनुपदिष्टाश्च श्रूयन्ते। क्व पुनरेषामुपदेशः कर्तव्यः। अयोगवाहाना
मट्सुणत्वं। अयोगवाहानामट्सूपदेशः कर्तव्यः। किं प्रयोजनं। णत्वं। उरः केण। उरःकेण। उरः पेण। उरःपेण। अभ्यवायइति णत्वं सिद्धं भवति। श
र्षु जश्भावषत्वे। शर्षूपदेशः कर्तव्यः। किं प्रयोजनं। जश्भावषत्वे। अयमुब्जिरुपध्मानीयोपधः पठ्यते। तस्य जश्त्वेकृते उब्जिता उब्जितुमित्येतद्रू
पं यथा स्यात्॥ ॥ ॥ ॥

नप्राप्नोतीति। के पुनरिति। तत्स्वरूपप्रश्नः। कथमिति। प्रवृत्तिनिमित्तप्रश्नः। अयुक्ता इति। अस्यैव हेतुकथनं। अनुपदिष्टाश्चेति। अयुक्ताः प्रत्याहारलक्षणेन। पाठाभा
वादसंबद्धा इत्यर्थः। उपदेशो द्विविधः। पाठो ग्रहणकशास्त्रेण प्रत्यायनं च। सद्विविधोप्येषां नास्तीत्यर्थः। च शब्दो हेतौ। यतोऽनुपदिष्टास्ततोऽयुक्ता इत्यर्थः। क्वचित्तु च शब्देन
पठ्यते। शर्ष्विति। शषु पाठे रुत्वमिति रुत्वं जश्त्वमिति जश्त्वं सिध्यति॥ ॥श्री॥ ॥७॥ ॥

उपध्मानीयादेरिति॥ यदि द्विर्वचने इर्वेत्वकर्त्तव्येऽन्तरङ्गत्वमसिद्धं। अथापि पूर्वत्रासिद्धीयमद्विर्वचन इति सिद्धं सर्वे थोविभ्रिषतीति प्राप्नोति। निपातनादिति। द्विर्वचनं क
र्यं निपातनाद्वाक्यशेषोऽनुमीयते। असिद्धवत्कारणोऽस्तो श्चुरिसत्रो बुभ्रेर्मं इति। तत्र नन्द्रा इति इकारस्य द्विर्वचनमिति पूर्वत्रासिद्धीयमद्विर्वचन इससाप्रहत्वाभत्वस्यासिद्ध

×र्वचननिषेधःकर्त्तव्योऽनतुदि×

यद्युब्भिरूपध्मानीयोपधः पठ्यते उब्भिजिषतीत्युपध्मानीयादेरेवद्विर्वचनं प्राप्नोति। दकारोपधे पुनर्नेन्द्रासंयोगादय इति प्रतिषेधः सिद्धो भव
ति। यदि दकारोपधः पठ्यते कारूपसिद्धिः। उब्भिता उब्भितुमिति। असिद्धे भ उब्भेः। इदमस्तीत्तो श्चुना श्चुरिति ततो वक्ष्यामि। भउब्भेः। उब्भेश्च श्चुनास
न्निपाते भो भवतीति। तन्नर्हि वक्तव्यं। न वक्तव्यं। निपातनात्सिद्धं। किं निपातनं। भुजन्युब्जौ पाण्युपतापयोरिति। इहापि तर्हि प्राप्नोति। अभ्यु
द्गः समुद्गः इति। अकुत्वविषये निपातनं। अथवा नैत उब्भे रूपं गमेरेतद्युपसर्गाड्डो विधीयते। अभ्युद्गतः अभ्युद्गः। समुद्गतः समुद्ग इति। ष
त्वं च प्रयोजनं। सर्पिः खुधनुः खु। शर्व्यवाय इति षत्वं सिद्धं भवति। नुम्विसर्जनीयशर्व्यवायेऽपीति नीयग्रहणं न कर्त्तव्यं भवति। नुमश्चापि तर्हि ग्रह
णं शक्यमकर्तुं। कथं सर्पींषि धनूंषि। अनुस्वारे कृते शर्व्यवाय इत्येव सिद्धं। अवश्यं नुमो ग्रहणं कर्त्तव्यं। अनुस्वारविशेषणं नुम्ग्रहणं। नुमो यो

॥ नुस्वारस्तत्र यथा स्यात् इह मा भूत् पुंस्विति॥ ×विसर्जनी×२ ॥ ॥

त्वादिष्टद्विर्वचनसिद्धिः। अथापि न वाक्यशेषानुमानं निपातनमेव प्रतिपादकं। तथापि दकारोपदेशसामर्थ्याद्द्विर्वचने कृते दकारस्य बत्वं प्रवर्त्तते। अकुत्वविषय
इति। विशिष्टविषयमनुमानमिसर्थः। अवश्यमिति। अनुस्वारस्य शर्व्यवाये पत्वे सिद्धे नुम्ग्रहणं नियमार्थं। नुमो योऽनुस्वारस्तत्रैव यथा स्यादन्यत्र मा भूत् पुं

॥ स्विति॥ ॥ ॥ राम०
३१

अविशेषेणेति ॥ प्रयोजनविशेषमनपेक्ष्य सकलप्रयोजनोद्देशेन यत्र यत्र प्रदेशे प्रयोजनसिद्धिस्तत्र तत्रोपदेशः कार्य इत्यर्थः । उब्रुक इति । उपध्मानीयस्य जश्त्वे संयोग

अथवा अविशेषेणोपदेशः कर्तव्यः । किं प्रयोजनं । अविशेषेण संयोगोपधासंज्ञा प्लुतसिद्धिर्द्विर्वचनं स्थानिवद्भावप्रतिषेधः । अविशेषेण संयोगसंज्ञा प्रयोजनं
उब्रुकः । हलोऽनन्तराः संयोग इति संयोगसंज्ञा संयोगे गुर्विति गुरुसंज्ञा गुरोरिति प्लुतो भवति । उपधासंज्ञा च प्रयोजनं । दुष्कृतं । निष्कृतं । दुष्पीतं निष्पीतं ।
इदुदुपधस्य चाप्रत्ययस्येति षत्वं सिद्धं भवति । नैतदस्ति प्रयोजनं । न इदुदुपधग्रहणेन विसर्जनीयो विशेष्यते किं तर्हि सकारो विशेष्यते ॥ इदुदुपधस्य सकारस्य यो विसर्जनीय
इति । अथवोपधाग्रहणं न करिष्यते । इदुद्भ्यां तु परं विसर्जनीयं विशेषयिष्यामः ॥ इदुद्भ्यामुत्तरस्य विसर्जनीयस्येति । प्लुतो सविधिः प्रयोजनं । वृक्षस्तरति
प्लक्षस्तरति । प्लुतोऽसस्य विधयो भवन्तीसं [illegible] सस्य सत्वं सिद्धं भवति । एतदपि नास्ति प्रयोजनं । निर्दिश्यमानस्यादेशा भवन्तीति विसर्जनीयस्यैव भविष्यति ।
द्विर्वचनं प्रयोजनं । उरःकः । उरःपः । अनचि च । अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं सिद्धं भवति । स्थानिवद्भावप्रतिषेधः प्रयोजनं । यथेह भवति उ
रःकेण उरःपेण सद्भ्वायर इति णत्वं । एवमिहापि स्थानिवद्भावात्प्राप्नोति । वृक्षोरस्केन महोरस्केनेति । तत्रानल्विधाविति प्रतिषेधः सिद्धो भवति ॥ ० ॥

भाषा १

संज्ञायां तस्यापि दुल्वात्संयोगसंज्ञाभावाद्गुरुत्वात्प्लुतो न स्यात् । महोरस्केनेति । पूर्वत्रासिद्धेन स्थानिवदिति निषेधः अचः परस्मिन्पूर्वविधाविसस्य न तु स्थानिव
१ दादेशाद्रुतस्य ॥ ॥ ॥

इदानीमन्यदपि वर्णगतं वस्तु विचार्यते। किं पुनरिति। पक्षद्वयेपि प्रतिवर्णं विभक्त्यनुसन्धिज्ञानं विचारस्य प्रयोजनं। वर्णव्यत्यय इति। एकवर्णस्या [redacted] पगमे

अर्थवन्त इति। शब्दार्थेनार्थनिरूपितसंबंधेन संबंधिन इत्यर्थः। अर्थदर्शनादिति। अर्थविषयप्रतीतिजननादित्यर्थः। तथाचैवं प्रयोगः। वर्णाः अर्थवन्तः अर्थप्रतीतिजनकत्वादेकवर्णधात्वादिवदिति वर्णपक्षकं अर्थमेवं प्रसाधकं अर्थप्रतीतिजनकत्वं हेतुकमनुमानमिति भावः। तत्र हेतोः पक्षवृत्ति

किं पुनरिमे वर्णा अर्थवन्त आहोस्विदनर्थकाः। अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्। धातव एकवर्णा

अर्थवन्तो दृश्यन्ते। एति। अध्येति। अधीत इति। प्रातिपदिकान्येकवर्णान्यर्थवन्ति। आभ्यां। एभिः। एषु। प्रत्यया एकवर्णा अर्थवन्तः। औपगवः

कापटवः। निपाता एकवर्णा अर्थवन्तः। अ अपेहि। इ इन्द्रं पश्य। उ उत्तिष्ठ। आ अपक्राम। धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानाम

र्थदर्शनान्मन्यामहे अर्थवन्तो वर्णा इति। वर्णव्यत्यये चार्थान्तरगमनात्। वर्णव्यत्यये चार्थान्तरगमनान्मन्यामहे अर्थवन्तो वर्णा इति। कू

पः सूपो यूप इति। कूप इति सककारकेण कश्चिदर्थो गम्यते। सूप इति ककारापाये सकारोपजने चार्थान्तरं गम्यते। यूप इति ककारसका

रापाये यकारोपजने अर्थान्तरं गम्यते। तेन मन्यामहे यः कूपे कूपार्थः स ककारस्य यः [redacted] सूपे सूपार्थः स सकारस्य। यः यूपे यूपार्थः स यका

रस्येति। वर्णानुपलब्धौ चानर्थगतेः। वर्णानुपलब्धौ चानर्थगतेर्मन्यामहे अर्थवन्तो वर्णा इति। वृक्षः ऋक्षः कांडीरः आंडीरः। वृक्ष इति

सवकारेण कश्चिदर्थो गम्यते ऋक्ष इति वकारापाये सोर्थो न गम्यते। कांडीर इति सककारेण कश्चिदर्थो गम्यते आंडीर इति ककारापाये सोर्थो

तस्यैव ककारस्यैव। अन्वयव्यतिरेकौ। अनुवृत्तिव्यावृत्ती अनुविधत्ते अनुकरोति अर्थावसायो अर्थबोधः ककारानुवृत्तिनिमित्तं वर्तते ककारव्यावृत्तौ च स्वयमपि व्यावर्तत इत्यर्थः। ९

न्योपगमो व्यत्ययः। सककारस्येति। तस्यैवान्वयव्यतिरेकावनुविधत्ते अर्थावसाय इत्यर्थः। वर्णानुपलब्धौ चेति। अर्थान्तरावगमात्प्रकृतोर्थो न गम्यत इति

॥ विवक्षितं॥ ॥ ०ः

= आध्येयेत्यामिति अत्रैवं प्रयोगः पृथगनुपलभ्यमानार्थकाः संघातपञ्चकावर्णाः पृष्ठः अर्थवत्वं आद्यं संघातार्थवत्वं हेतुः तत्रो तोत्प्रयोजकतनाशंकापदिसमुदायार्थे अथवार्थं अभिचारीस्या प्रवयवार्थपूर्वकोनस्यादि निते केशापरितदिभ्यलवयवार्थसमुदायार्थयोः कार्यकारणभावमाद्यपेयादीति =

इतरस्त्वर्थोवगत्स भावं मनेनोक्तमिति मत्वापृच्छति। किं तर्हीति। साधीय इति॥ परमतापेक्षया प्रकर्षः प्रयोज्यते। यथा न किंचिदयं करोति उक्ते कश्चिदाह सुतरामयं कोतीति। एवं तर्हीति। प्रकृतोर्थो न गम्यते इत्यर्थः। तस्यार्थ इति। वर्णस्य परं प्रति वर्णेनामर्थवत्त्वमसिद्धमिति कथं तस्येति वर्णाः परामृश्यन्ते इत्याह। सोर्थ इति। प्रकृतोर्थ इत्यर्थः।

मात्रे २४ अर्थांतरं तु गम्यते ४१ ती २

किं तर्ह्युच्यते ऽनर्थगतेरिति। न साधीयो ह्यत्रार्थस्य गतिर्भवति। एवं तर्हीदं पठितव्यं स्यात् वर्णानुपलब्धौ चातदर्थगतेरिति। किमिदमतदर्थगतेरिति। तस्यार्थस्तदर्थः। तदर्थस्य गतिः तदर्थगतिः न तदर्थगतिः अतदर्थगतिः। अतदर्थगतेरिति। सत्तर्हि तथा निर्देशः कर्तव्यः। न कर्तव्यः उत्तरपदलोपोत्र द्रष्टव्यः। तद्यथा। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। खरमुखः। एवमतदर्थगतेरनर्थगतेरिति। संघातार्थवत्त्वाच्च। संघातार्थवत्त्वाच्च मन्यामहे अर्थवन्तो वर्णा इति यदेषां संघाता अर्थवन्तः [redacted]। येषां ह्यवयवा अनर्थवन्तः समुदाया अपि तेषामर्थवंतः। तद्यथा। एकश्चक्षुष्मान्दर्शने समर्थः तत्समुदायश्च शतमपि समर्थं। एकश्च तिलस्तैलदाने समर्थः तत्समुदायश्च खारीशतमपि समर्थम्॥ ॥ ॥

× तदर्थस्य गतिः तदर्थगतिः न तदर्थगतिः अतदर्थगतिः अतदर्थगतेरिति अथवा सोर्थस्तदर्थः ×

उष्ट्रमुख इति गतार्थत्वादप्रयोग एव द्वितीयमुखशब्दस्य लोपोभिधीयते। अत्र हि उष्ट्रो मुखमस्येसेव विग्रहः। न च प्राणी प्राण्यन्तरस्य मुखं भवतीति विशिष्टावयवत्निरुष्ट्रशब्दः सादृश्यात्सु खे विज्ञिनष्टि। एवमिहाप्यनर्थगतेरित्यत्रार्थशब्देन प्रकृतोर्थ उच्यते। न त्वर्थमात्रमित्यर्थः॥ ॥ ॥

न लोपादीनीति॥ अवृणां विभक्तेर्न भवति। यतो यदेवावयवानां प्रातिपदिकसंज्ञा प्रवर्त्तते तदेव समुदायस्यापि। तत्र तदन्तर्गतत्वाद्विभक्तेर्लुका भवितव्यं। समासग्र
हणे न च तुल्यजातीयस्य स्वतंत्रावयवसमुदायस्य प्रातिपदिकसंज्ञा निवार्यते [redacted] न त्वर्थवत्समुदायमात्रस्य येनैवार्थेन समुदायार्थवत्त्वं तेनैव तदवयवानामपी
ति विभक्त्युत्पत्तिश्चोद्यते। अत्र परिहारमाह। संघातस्येति। वृक्ष इत्यस्यैकत्वे विभक्त्या द्योत्यते। तच्चैकमिति सैकविभक्तिरुत्पद्यते। यथा बहवो द्रष्टारः दृश्यमर्थमे

येषां पुनरवयवा अनर्थकाः समुदायाश्चापि तेषामनर्थकाः। तद्यथा। एकोऽपि धो द्रष्टोनेः समर्थेऽस्ति तत्समुदायश्च शतमप्यसमर्थः। एका च सिक
ता तैलदाने असमर्था तत्समुदायश्च खारीशतमप्यसमर्थं। यदि तर्हीमे वर्णा अर्थवन्तः अर्थवत्कृतानि प्राप्नुवन्ति। कानि। अर्थवत्प्रातिपदिकमिति
प्रातिपदिकसंज्ञा। प्रातिपदिकादिति स्वाद्युत्पत्तिः। सुबन्तमिति पदसंज्ञा। तत्र को दोषः। पदस्येति नलोपादीनि प्राप्नुवन्ति। धनं वनमिति। संघात
स्यैकार्थ्यात्सुबभावो वर्णात्। संघातस्यैकत्वमर्थः तेन वर्णात्सुबुत्पत्तिर्न भविष्यति। अनर्थकास्तु प्रतिवर्णमर्थानुपलब्धेः। अनर्थकास्तु
वर्णाः। कुतः। प्रतिवर्णमर्थानुपलब्धेः। नहि प्रतिवर्णमर्था उपलभ्यन्ते। किमिदं प्रतिवर्णमिति। वर्णं वर्णं प्रति प्रतिवर्णम्॥ ॥

केनैव प्रदीपेन पश्यन्ति। सा चोत्पद्यमाना समुदायादेवान्तरेण सर्वोनुग्राहिण्युत्पद्यते। समुदायद्विवचनवत् पदसंज्ञा तु समुदायस्यैव भवति न प्रत्येकं यस्मात् प्रत्ययवि
धिरित्यनुवर्त्तनाद् सुबन्तत्वात्। अनर्थकास्त्विति। धात्वादिव्यतिरिक्ता वर्णाः पक्षी क्रियन्ते। अन्यथा शास्त्रविरोधः प्राप्नोति। किमिदमिति। असमासशङ्कया प्रश्नः। स राम०
मासेन तत्तरं। तेनैव वीप्सा द्योतिते ति द्विर्वचनं न भवति॥ ॥ ॥ ३३

=अनैकांतिकत्वमिति वर्णव्यत्यये चेत्यादिना क्रमेणान्वयव्यतिरेकाभ्यामनैकांतिकत्वं व्यभिचारित्वमित्यर्थः।१=

वर्णव्यत्यये ति। यदुक्तं वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगमनेरिति तस्यानैकांतिकत्वमुद्भाव्यते। उभयमित्याहेति। यत्रान्वयव्यतिरेकाभ्यामर्थेव

वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्। वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनान्मन्यामहे अनर्थका वर्णा इति। वर्णव्यत्यये। कृतेस्तर्कुः। कसेः
सिकताः। हिंसेः सिंहः। वर्णव्यत्ययो नार्थव्यत्ययः। अपायो लोपः। घ्नन्ति घ्नन्तु अघ्नन्। वर्णापायो नार्थापायः। उपजनस्त्वागमः। लविता। लवितुं। वर्णो
पजनो नार्थोपजनः। विकार आदेशः। घातयति। घातकः। वर्णविकारो नार्थविकारः। यथैव वर्णव्यत्ययापायोपजनविकारा भवन्ति तद्वदर्थव्यत्य
यापायोपजनविकारैर्भवितव्यं। नचेहृतदद्भुतं। अतो मन्यामहे अनर्थका वर्णा इति। उभयमिदं वर्णेषूक्तं। अर्थवन्तोऽनर्थकाश्चेति च किमत्र न्याय्यं।
उभयमित्याह। कुतः। स्वभावतः। तद्यथा। समानमीहमानानां चाधीयानानां केचिदर्थैर्युज्यन्ते अपरेन। न चेदानीं कश्चिदर्थवानिति कृत्वा सर्वैर
र्थवद्भिः शक्यं भवितुं। कश्चिद्वानर्थक इति कृत्वा सर्वैरनर्थकैः। तत्र किमस्माभिः शक्यं कर्तुं यद्धातुप्रत्ययप्रातिपदिकनिपाता एकवर्णा अर्थवन्तः अतोऽन्ये
ऽनर्थका इति। स्वाभाविकमेतत्। कथं यदेष भगवता वर्णानामर्थवत्तायां हेतुरुपदिष्टः। अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानाम ना
र्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगमनेः संघातार्थवत्त्वाच्चेति।। ॥ ॥ ॥

त्ता प्राकृतेऽकस्पिनं तत्रैवासावभ्युपगंतव्यानर्थके सर्थः।। ॥श्री॥ ॥ श्री॥ ॥

भा०कै०प्र० संघातांतरराणीति। नन्वुक्तं। नकूपस्य सूपयूपानामन्वयोर्थस्य विद्यते। अतो र्थांतरवाचित्वं संघातस्यैव गम्यत इति। एतस्यापीति। दृष्टाद्यतद्दर्थेन गुणेन गुणिनोर्थे
३४ वत्तासु गुणवद्दृष्टांगवच्चेति। आचारादिति। आचारो व्यवहारः। तद्धि मूषिकादेरिति यएन कृतः। अप्रधानत्वादिति। प्रधानाम प्रधान सन्निधौ प्रधानमेव कार्यो गाण

34

संघातांतराण्येवैतान्येवंजातीयकानि अर्थांतरेषु वर्त्तन्ते। कूपः सूपो यूप इति। यदि हि वर्णो व्यस्य यत्नतम र्थांतरगमनं स्यात् दूषिकूः कूपार्थः सूपेस्या
त्सूयार्थश्च कूपे कूपार्थश्च यूपे यूपार्थश्च कूपे यूपार्थश्च सूपे। यतस्तु खलु न किंचित् कूपस्य वा सूपे सूपस्य वा कूपे यूपस्य वा सूपे अतो मन्यामहे
संघातांतराण्येतान्येवंजातीयकान्यर्थांतरेषु वर्त्तन्त इति। इदं खल्वपि भवतां वर्णानामर्थवत्त्वं ब्रुवतां साधीयो नर्थकत्वं द्योतितं। यो हि मन्यते य
ः कूपे कूपार्थः स ककारस्य यः सूपे सूपार्थः सकारस्य यो यूपे यूपार्थः स यकारस्येति। उपशाद्भस्त्वस्यानर्थकः स्यात्। नत्वेदमपरिहृतं संघाता
र्थवत्वाच्चेति। एतस्यापिप्रातिपदिकसंज्ञायां परिहारं वक्ष्यति। अइउण् ऋलृक् एओङ् ऐऔच्। प्रत्याहारे नुबंधानां कथमज्ग्रहणेषु न। यएते
तेः प्रत्याहारार्था अनुबंधाः क्रियंते एतेषाम ज्ग्रहणे नग्रहणं कस्मान्न भवति। किंचस्यात्। दधिणकारीयति मधुणकारीयति। इको यणचीति य
णादेशः प्रसज्येत। आचारात्। किमिदमाचारादिति। आचार्याणामुपचारात्। नैतेषामाचार्याश्च कार्याणि कृतवंतः। अप्रधानत्वात्। अप्रधानत्वाच्च। न खल्वप्ये [illegible]
×सूपार्थश्च यूपे×६ ९तेषामक्षुप्राधान्येनोपदेशः क्रियते। क्वतर्हि हल्षु। कुत एतत्॥×कूपस्य वा यूपे यूपस्य वा
प्रयोजकमितिपरार्थो नाम अनुबंधानाम च संज्ञा न प्रवर्त्तत इत्यर्थः॥ ॥श्री॥ ॥ ॥ ॥ ॥ ॥ एम० ३४

शैलीति। शीलेमवाशैलीसमवुधानपूर्विकाप्रवृत्तिः। यथा लोके ब्राह्मणैः सह ब्राह्मणो भोज्यते क्षत्रियैः सह क्षत्रिया इति। एवमिहाप्याचार्येण वर्णा निर्दिष्टा इत्यर्थः। लोपश्चेति।
परत्वान्नित्यत्वाद्वा। आदिरिंत्येनेत्यनेनाचां संज्ञाविधानकाले अनुबंधानां लोपाद्दर्शनात्रिधानाद चां संज्ञा न प्रवर्त्तेत। अनुबंधा ह्युच्चारणार्था एव संति। इत्संज्ञाप्रतिबद्धं कार्यमसंत एव प्रतिपा
द्यंति। स्वतस्तु न किंचित्कार्यं प्रतिपद्यंते। ऊकालोज्झिति। सिद्धे च योगविभागेन कालविशेषावच्छिन्नस्याच्त्वं नियम्यते। ततोऽनुबंधानामूकालत्वाभावादच्त्वाभावः। एव

एषाह्याचार्यस्य शैली लक्ष्यते। यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति। अचोऽस्तु हलो हल्सु। लोपश्च बलवत्तरः॥ लोपः खल्वपि तावद्भवति॥ ऊकालो
ज्झिति वा योगस्तत्कालानां यथा भवेत्। अचां ग्रहणमच्कार्यं तेनैषां न भविष्यति। अथवा योगविभागः करिष्यते। ऊकालोच्। उऊउ३ इत्येवंकालोऽज्भ
वति। ततो ह्रस्वदीर्घप्लुतसंज्ञश्च भवति। ऊकालोच्। एवमपि कुक्कुट इत्यत्रापि प्राप्नोति। तस्मात्पूर्वोक्त एव परिहारः। एष एवार्थः। अपर आह। ह्रस्वादीनां
प्राप्यावत्त्वादेव योगोऽस्तु। अच्कार्याणि यथा स्युः। तत्कालेष्वेव तु कार्याणि। अथ किमर्थमनन्त्यानामणामुपदेशः क्रियते। इह संयंता सँवत्सरः यँ
ल्लोकं तँल्लोकमिति परसवर्णस्यासिद्धत्वादनुस्वारस्यैव द्विर्वचने। तत्र परस्य परसवर्णे कृते तस्य यण्ग्रहणेन ग्रहणात्पूर्वस्यापि परसवर्णो यथा स्या
त्। नैतदस्ति प्रयोजनं। वक्ष्यत्येतत्। द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यमिति। यावता सिद्धत्वमुच्यते परसवर्ण एव तावद्भवति। परसवर्णे तर्हि कृते
१ तस्य यग्रहणेन ग्रहणाद्द्विर्वचनं यथा स्यात्॥ ॥ ॥

मपीति। काणककेतरुपदेशान्मात्रिकस्याच्त्वं मन्यते। अत्र च यद्यप्ययं परिहारोऽस्ति द्वावेतौ ककारौ न च वर्णद्वये नैका जातिर्व्यज्यते इति। तथापि पूर्वमेव मात्राकालोऽनुगम्य
ते न च मात्रिकं व्यंजनमस्तीत्युक्तत्वात्पुनरिह नोक्तः। अथ किमर्थमिति। अणुदित्सवर्णस्येति कस्मान्न कृतमिति प्रश्नः। इण्ग्रहणे ग्रहणार्थं त्वं तस्थानामत्रावश्य
१ कृतेष्य उपदेशः गीर्धिंसाद्यौ मूर्द्धन्यो यथा स्यादिति॥ ॥ ॥

भा०कै० प्र० ३५ 35

ननु च भेद इति । श्रुतिकृतोऽस्त्येव भेदः सूक्ष्मत्वात्तु उपलक्ष्यः । नैतदस्ति । ज्ञापकत्वमस्य विघटयति । आचार्योपदेशपारंपर्यात्तु ज्ञायते अनुवर्त्तते विभाषेति । तस्मात्त्रिव्यंजनसं

मा भूत् द्विर्वचनं । ननु च भेदो भवति । सति द्विर्वचने त्रियकारकं असति द्विर्वचने द्वियकारकं । नास्ति भेदः । सत्यपि द्विर्वचने द्वियकारकमेव । कथं । हलो यमां यमि लोप इत्येवमेक एव लोपेन भवितव्यं । एवमपि भेदः । सति द्विर्वचने कदाचिद्द्वियकारकं कदाचित्त्रियकारकं । असति द्वियकारकमेव । स एष कथं भेदो न स्यात् । यदि नित्यो लोपः स्यात् विभाषा च स लोपः । यथा भेदस्तथास्तु । अनुवर्त्तते विभाषा शरोऽचि यद्वार्यं स यं द्विलं । यदयं शरोऽचीति द्विर्वचनप्रतिषेधं शास्ति । तज्ज्ञापयत्याचार्यः । अनुवर्त्तते विभाषेति । कथं कृत्वा ज्ञापकं । नित्ये हि तस्य लोपे प्रतिषिद्धार्थो न कश्चित्स्यात् । यदि नित्यो लोपः स्यात् प्रतिषेधवचनमनर्थकं स्यात् । अस्त्वत्र द्विर्वचनं । ऊरोऽम् रि सवर्णो इति लोपो भविष्यति । पश्यति त्वाचार्यः विभाषा स लोप इति । नो द्विर्वचनप्रतिषेधं शास्ति । नैतदस्ति ज्ञापकं । नित्येऽपि तस्य लोपेऽस्य प्रतिषेधो वक्तव्यः । यदेतदचो रहाभ्यामिति द्विर्वचनं लोपापवादः स विज्ञायते । कथं । पर इत्युच्यते । एतावन्तस्त्रयः । यदुत्तरो वा यमो वा । यदि चात्र लोपः स्याद्द्विर्वचनमनर्थकं स्यात् । किं तर्हि तयोर्योगयोरुदाहरणं । परकृते द्विर्वचने त्रिव्यंजनः संयोगः । प्रवर्त्तते त्वादिसः । इहेदानीं कर्त्तो हर्त्ते नि द्विर्वचनसामर्थ्याल्लोपो न भवति । एवमिहापि लोपो न स्यात् कर्षति हर्षतीति । तस्मान्नित्येऽपि लोपे वक्तव्यः सप्रतिषेधो वक्तव्यः । तदेतदत्यंतसंदिग्धं वर्त्तते आचार्याणां विभाषानुवर्त्तते न वेति ॥ ॥ श्री ॥ ॥ श्री ॥ ॥

यो । श्रवणाया एणुदिति णाकारेणाप्रसारः कृतो न च कारेणोतिस्थितं ॥ ॥ श्री ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ राम० ३५

हा०

लणः॥ ॥संदेहो भवतीति। किं प्रसासन्निराश्रीयते। यथाप्राप्तिरिति संदेहः॥ नहि केऽपर इति। नन्वल्पो पान रुपानत्केनि ह्रस्वे कर्त्तव्ये न होध इस्यासिद्धत्वादस्ति केऽपरनो ह

लणः॥ ॥अयं णाकारो द्विरनुबध्यते। पूर्वश्चैव परश्च। तत्राणग्रहणेषु णग्रहणेषु च सन्देहो भवति पूर्वेण वा स्युः परेण वेति। कतमस्मिंस्तावदण्
ग्रहणे सन्देहः। द्रुलोपे पूर्वस्य दीर्घोऽण इति। असंदिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्। नहि द्रुलोपे परेणाः संति। ननु चायमस्ति। अत्रात ढ
आढ इति। एवं तर्हि सामर्थ्यात्पूर्वेण न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्। द्रुलोपे पूर्वस्य दीर्घो च इस्येव ब्रूयात्। अथ वैतदपि न
ब्रूयात्। अचो ह्येतद्भवति। ह्रस्वो दीर्घः प्लुत इति। अस्मिंस्तर्ह्यण्ग्रहणे संदेहः केऽण इति। असंदिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्। न
हि के परेणाः संति। ननु चायमस्ति णोऽकानोकेति। एवं तर्हि सामर्थ्यात्पूर्वेण न परेण। यदि हि परेण स्यादण्ग्रहणमनर्थकं स्यात्। के च इसे
व ब्रूयात्। अथ वैतदपि न ब्रूयात्। अचो ह्येतद्भवति ह्रस्वो दीर्घः प्लुत इति। अस्मिंस्तर्ह्यण्ग्रहणे संदेहः। अणोऽप्रगृह्यस्यानुनासिक इति। असं
दिग्धं पूर्वेण न परेण। कुत एतत्। पराभावात्॥ ॥ ॥ ॥

कारः॥ अत्रा रुः नमुनइस्य त्रने तियोगविभागेन धत्वादीनामसिद्धत्वाभावात्तेषु च कृतेषु हकारादीनामभावः॥ ॥ तथा गीर्कौ सारेफः॥ ॥ ॥७४॥

नहिपदांतारिति॥ ननुच भोभगोइत्यत्राश्ग्रहणस्य प्रयोजनं वक्ष्यते। वृक्षवृकरोतीत्यत्र हलिसर्वेषामिति लोपो माभूदिति तल्लक्षणमुच्यते नहि पदांतारिति। उच्य
ते। अप्रगृह्यस्येति पर्युदासेनाच एवानुनासिकेन भाव्यं ननु हलइत्युक्ते न हि पदांताद् कार्यभाज इत्यर्थः। अचोप्रगृह्यस्येति। हलो हि न भाव्यमित्यत्राश्ग्रहणसा
मर्थ्यात्पूर्वेणेति स्थितं। तत्र वृक्षं वृश्चतीति क्विपि कृते वृक्षवृश्च माचष्टइति णिचि टिलोपे च कृते वृक्षवयते क्विपि कृते वृक्षवृइति भवति। क्विपि तु कौलपं कौ विधिप्र

नहि पदांतात्पराः परे ऽणः संति। ननु चायमस्ति। कृत्नं हत्नं। एवं तर्हि सामर्थ्यात्पूर्वेण न परेण। यदि हि परेण स्यात् अणग्रहणमनर्थकं स्या
त्। अचोप्रगृह्यस्यानुनासिक इत्येव ब्रूयात्। अथ वैनदपि न ब्रूयात्। अचएव हि प्रगृह्या भवंति। अस्मिंस्तर्ह्यणग्रहणे सन्देहः। उर
ण्रपरइति। अ संदिग्धं पूर्वेण न परेण। कुत एतत् पराभावात्। नह्युः स्थाने परे ऽणः संति। ननु चायमस्ति। कर्त्रर्थं हर्त्रर्थमिति। किंच
स्यात्। यद्यत्र रपरत्वं स्यात्। द्वयोरेफयोः श्रवणं प्रसज्येत। हलोयमांयमि लोप इत्येवमेकस्यात्र लोपो भविष्यतीति विभाषा स लोपः वि
भाषा श्रवणं प्रसज्येत। अथेतर्हि निसो लोपः ऐरीति। पदांतस्येत्येवं सः। नशक्यः सपदांतस्येत्येवं विज्ञातुं। इह हि लोपो न स्यात्। जर्गे धेले
११ ऽ। अजर्घाः। पास्पर्द्धाः। अपास्पा इति॥ ॥ ॥

ति च न स्थानिवद्दिति निषेधात्संप्रसारणप्रसंगः। लोपो व्योर्वलीति लोपप्रसंगश्च। क्विचि तु स्थानिवद्भावाद्वल् निमित्तो लोपो न भवति। हलि सर्वेषामित्यनेन न तु
लोपे क्रियमाणे पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवत्त्वनिषेधाद्वलोपः प्राप्नोश्यग्रहणानुवृत्त्या निवर्त्यते। अजर्घा इति। गृधेर्यङ्लुगागमे भ्यासस्य कृते लङि। सिपि
१ शब्दस्तु क्विगुणरपरत्वमिव लोप भष्भावजश्त्वरत्वरलोपदीर्घत्वे सु रूपं॥ ॥ ॥

इह पितर्हीति। धातुग्रहणे न हि लिंगेन। धातोरेव परत्वं निवर्त्तितं। धातोस्तु रपरत्वे सत्यसत्त्वान्न प्राप्नोतीति प्रश्नः॥ इह पीति। तस्माद्धातुग्रहणस्य सप्रयोज
नत्वान्न ज्ञापकत्वमित्यर्थः सवर्णे इति। अचीकृतदिति ऋकारस्य ऋकार एव यथा स्यात् ऋकारो मा भूदित्येवमर्थं तपरत्वं क्रियते। यदि च पूर्वेण णकारेण णग्रहणं स्या

इह तर्हि मातॄणां पितॄणामिति रपरत्वं प्रसज्येत। आचार्यप्रवृत्तिर्ज्ञापयति नात्र रपरत्वं भवतीति यदयमृत इद्धातोरिति धातुग्रहणं करोति। क
थं कृत्वा ज्ञापकं। धातुग्रहणस्यैतत्प्रयोजनं इह मा भूत्। मातॄणां पितॄणां इति। यदि चात्र रपरत्वं स्याद्धातुग्रहणमनर्थकं स्यात्। रपरत्वे कृते ऽनन्
त्यत्वादित्त्वं न भविष्यति। पश्यति त्वाचार्यः नात्र रपरत्वं भवतीति ततो धातुग्रहणं करोति। इह पितर्हीत्वं न प्राप्नोति। चिकीर्षति जिहीर्षतीति।
मा भूदेवं। उपधायाश्चेत्येवं भविष्यति। इह पितर्हि प्राप्नोति मातॄणां पितॄणामिति। तस्मात्तत्र धातुग्रहणं कर्त्तव्यं। एवं तर्हि सामर्थ्यात्पूर्वेण
न परेण। यदि परेण स्यात् अणग्रहणमनर्थकं स्यात्। उरण्रपर इत्येव ब्रूयात्। अस्मिंस्तर्ह्येषग्रहणे संदेहः। अणुदित्सवर्णस्य चाप्र
त्यय इति। असंदिग्धं परेण न पूर्वेण। कुत एतत्। सवर्णेऽणग्रहणं तपरे ह्युक्तं। यदयमुकृदित्सकारे तपरकरणं करोति तज्ज्ञापयत्याचार्यः
॥ परेण न पूर्वेणेति॥ ॥ ॥ ॥

ह्रकारेण णत्वाद्वित्त्वकालस्य ग्राहक एव न भवतीति ऋकारेणैव स्थानिनां प्यादेशः प्रसज्जतीति किं तपरत्वे नाक्षतं तत ज्ञापकं परेण णग्रहणस्य॥
॥ ॥श्री॥ ॥श्री॥ ॥

भा०कै०प्र०
३८
37

ऋदिचतत्स्र इति ॥ ऋदिति न चतस्रः। चतुर्थी हि मात्रा तत्र ऋदिति। किं पुनरिति। वर्णोत्सर्जितवर्णोच्छेदः। वर्णान्तरमनुबन्धः किं न क्रियत इत्यर्थः। व्याख्यानत इति। न्या

इण्ग्रहणे यु तर्हि संदेहः। उपसंदिग्धं परेण न पूर्वेण। कुत एतत्। य्वोरन्यत्र परेणेत्यस्मात्। यत्रेच्छति पूर्वेण संप्रत्ययग्रहणं न तत्र करोतीति य्वोरिति।
नच्चगुरु भवति। कथं कृत्वा ज्ञापकं। तत्र विभक्तिनिर्देशो संप्रत्ययग्रहणे ऋदिचतत्स्रो मात्राः। प्रत्याहारग्रहणे पुनस्तिस्रो मात्राः। सोयमेवं ल
घीयसान्यासेन सिद्धे सति यदुरीयां सयत्नमारभते तज्ज्ञापयत्याचार्यः परेण न पूर्वेणेति। किं पुनर्वर्णोत्सन्नाविवार्यणकारो द्विरनुब
ध्यते। एतज्ज्ञापयत्याचार्यः भवत्येषा परिभाषा व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। उपाणुदित्सवर्णस्य पूर्वेणाणाय लंपरिहा॰
हणं परेणेण्ग्रहणमिति व्याख्यास्यामः॥ ॥ अमङ्णनम्॥ झभञ्॥ ॥ किमर्थमिमौ मुखनासिकावचनावनुबध्येते। न
ञकार एवानुबध्येत। कथं यानि मकारे ग्रहणानि हलो यमां यमि लोप इति। सं तु ञकारेण हलो यमां यमि लोप इति। नैवं शक्यं। ऋका
रभकारपरयोः पिऋकारभकारयोर्लोपः प्रसज्येत। न ऋकारभकारौ ऋकारभकारयोस्तः। कथं पुमः खय्यम्पर इति। एतदप्यस्तु ञकारेण
पुमः खय्यम्पर इति। नैवं शक्यं। ऋकारभकारपरे पिहि खपिरः प्रसज्येत। न ऋकारभकारपरः खयस्ति॥ ॥ ॥

यादृगमाद्याशक्तिरनुसरणीये त्यर्थः॥ ॥ झभञ्॥ ॥ न ऋकारे इति भकारस्य परं हन्त स्य ज श्लेन भाव्यमिति तस्याभावः। उऊ ऋकारः संयोगान्तस्येति एम०
लुप्यते इति तस्याप्यभावः॥ ॥श्री॥ ॥ ३८

सन्तु तावदिति। उद्देशानुदेशाभ्यां संख्यासाम्याद्यथासंख्येन लब्धे यस्यागमस्यागमी विद्यते स प्रवर्त्तते तेनाप्य इत्यर्थः। किमिदमिति। अक्षरसमाम्नाय इति व्यवहा-
राद्यो वा इमां स्वरशोऽक्षरश इन्द्रियोक्तत्वात्प्रश्नः॥ अक्षरं न क्षरमिति। क्रियाशब्दोयं नित्यस्यार्थस्य वाचक इति दर्शयति। अत्र श्लोकः क्षरतेर्वा विनाशार्थस्य
नञ्पूर्वस्य रूपं। तच्चाक्षरं तत्त्वपरमार्थतो नित्यं। व्यवहारनित्यतया तु वर्णपदवाक्यस्फोटानां जातिस्फोटस्य वा। अश्नोतेर्वेति। सरन्प्रत्ययस्यानुबन्धलोपे कृ-

प्रयोगे नित्यत्वं

कथं ङमो ह्रस्वादचि ङमुण्नित्यमिति। एतदप्यस्तु अकारेण ङमो ह्रस्वादचि ङमुण्नित्यमिति। नैवं शाकपरि ऋकार मकारयोरपि हि पदान्तयोरु-
कार मकारावागमौ स्याताम्। न ऋकार मकारौ पदान्तौ स्तः। एवमपि पञ्चागमास्त्रय आगमिनः वैषम्यात्संख्यातानुदेशो न प्राप्नोति। सन्तु तावद्येषामाग-
मानामागमिनः सन्ति। ऋकार मकारौ पदान्तौ न स्त इति कृत्वाऽऽगमावपि न भविष्यतः। अथ किमिदमक्षरमिति। अक्षरं न क्षरं विद्यात्। न
क्षीयते न क्षरतीति वाक्षरं। अश्नोतेर्वा सरोऽक्षरं। अश्नोतेर्वा पुनरयमौणादिकः सरन्प्रत्ययः। अश्नुत इत्यक्षरं। वर्णं वाहुः पूर्वसू-
त्रे। अथवा पूर्वसूत्रे वर्णस्याक्षरमिति संज्ञा क्रियते। किमर्थमुपदिश्यते। अथ किमर्थमुपदेशः क्रियते॥ ॥ ॥

तेऽप्यनुकरणं सर इति। तत्रार्थमश्नुते व्याप्नोतीत्यक्षरं पदं वा कंवा। वर्णं वाहुरिति। रूढिरियं वर्णे सेत्यर्थः। पूर्वसूत्र इति। व्याकरणान्तरे वर्णोऽक्षरमिति
निवचनात्। किमर्थमिति। वर्णानां साधुत्वसंप्रतिपाद्यत्वात्सदसैव साधुत्वान्वाख्यानात्प्रश्नः॥ ॥श्री॥ ॥

वर्णज्ञानमिति॥ वर्णा येन शास्त्रेण ज्ञायंते तद्वाचो विषयः शास्त्रेण वा विधीयते। आख्यायते। शास्त्रेण तस्याः परिज्ञानादित्यर्थः॥ यत्र चेति। ब्रह्म वेदः॥ प्रवर्त्ते
ते। तस्य च शास्त्रं विषयः लौकिकानां वैदिकानां च शास्त्रं विषय इत्यर्थः॥ तदर्थमिति। शास्त्रप्रवृत्त्यर्थमित्यर्थः। इष्टबुध्यर्थमिति। कलादिदोषरहितवर्णज्ञा
नार्थमित्यर्थः। लघ्वर्थमिति अनुबंधकरणार्थमित्यर्थः। वाक्समाम्नाय इति। एतावद्भिरेव वर्णैर्वाग्व्यवहार इत्यर्थः। पुष्पितः फलित इति। दृष्टादृष्टफला

वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्त्तते। तदर्थमिष्टबुध्यर्थं लघ्वर्थं चोपदिश्यते। सोयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलि
तश्चंद्रतारकवत्प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति। मातापितरौ चास्य स्वर्गे लोके महीयेते
॥ ॥ इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥ ॥ ॥ ॥
जलि

भ्यामभ्युदयनिःश्रेयसाभ्यां च। चंद्रतारकवदिति। अनादित्वान्नित्यत्वं वाग्व्यवहारस्य सूचयति। ब्रह्मराशिरिति। ब्रह्मतत्त्वमेव वाग्रूपतया प्रतिभाती
त्यर्थः। सर्ववेदेति। सर्ववेदाध्ययनकृतस्य पुण्यस्य यत्फलं तत्प्राप्नोतीत्यर्थः। मातापितराविति। माहात्म्यातिशयः शास्त्रस्य प्रसाद्धारमात्रफलाख्यानद्वा
रेणान्वाख्यायते। महीयेते इति। महीयशब्दः कंड्वादिषु गतः॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैयटकृते प्रथमस्याध्यायस्य प्रथमे पादे द्वितीयमा राम०
पूजेनेइत्यर्थः।१ ह्निकं॥ ॥ संवत् १८ २२ ॥ ॥ ३८

वृद्धिरादैचः कुत्वं कस्मान्न भवतीति। अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनिर्दिष्टियं यथा व्यक्तिसत्त्वाच्च सर्वसंज्ञानां लौकिकत्वादादैच्छब्दस्यानुकरणशब्दत्वा

वृद्धिरादैचः कुत्वं कस्मान्न भवति। चोः कुः पदस्येति। भत्वात्। कथं भसंज्ञा। अयस्मयादीनि छन्दसीति। छन्दसी सुच्यते। न चेदं छन्दः॥
छन्दोवत् सूत्राणि भवन्ति। यदि भसंज्ञा वृद्धिरादैजदेङ्गुण इति जश्त्वमपि न प्राप्नोति। उभयसंज्ञान्यपि छन्दसि दृश्यन्ते॥
न यथा। स सुष्टुभा स ऋक्वता गणेन। पदत्वात् कुत्वम्। भत्वाज्जश्त्वं न भवति। एवमिहापि पदत्वाज्जश्त्वं भत्वात् कुत्वं [redacted]
[redacted] न भविष्यति॥ ॥ ॥

जातिशब्दत्वाद्वा शास्त्रप्राप्तिरस्तीति प्रश्नः। तत्र कुशब्दः पंचसु वर्गेषु अप्रसक्तरूपो वा चक्रत्वेन विनियुक्त इति। शब्दस्वरूपे प्रवर्त्तिनिमित्ते भावप्रत्ययः॥
छन्दोवदिति॥ न वैशेषिकसूत्राणि॥ अपितु गलाद्याकरणसूत्राण्येव॥ इष्टिश्चेयं छन्दोवदिति॥ ॥

भा० कै० प्र० किंपुनरिति। उभयथा शास्त्रे दर्शनात्सन्देहः। येचरो षसंमगान्त्रष्ट्रः॥ उत्तरपदस्ये सेवमिति। तत्र हि वृद्धौ सर्वेचे लुच्यमाने वृद्धिमात्रस्योत्तरपदत्वाभावात्सामर्थ्याद् वृद्धिम
३९ दुत्तरपदं ग्रहीष्यत इत्यतिदिश्यमानमुत्तरपदग्रहणं सामर्थ्यादुत्तरपदाधिकारमवगमयति। वृद्धेर्निमित्तं यस्मिन्निति। निमित्तशब्दोपादानसामर्थ्याद्यधिकरणप

39

किंपुनरिदं तद्भावितग्रहणं वृद्धिरिसेवं येत्राकारै कारौ काणमासं नेतेषां ग्रहणमाहोस्वित् आदैज्मात्रस्य किंचातः। यदि तद्भावितग्रहणं शालीयो
मालीय इति॥ वृद्धिलक्षणाः छोनप्राप्नोति। आम्रमयं शालमयं वृद्धिलक्षणो मयडागमप्राप्नोति। आम्रगुप्तायनिः। शालगुप्तायनिः। वृद्धिलक्षणाः फि
ञ्नप्राप्नोति। अथादैज्मात्रस्यग्रहणं। सर्वोभासः सर्वेभासः इत्युत्तरपदवृद्धौ सर्वेचे सेषविधिः प्राप्नोति। इहतावती भार्या यस्य तावद्भार्यः यावद्भार्यः वृद्धिनि
मित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोति। अस्तु तर्हि आदैज्मात्रस्यग्रहणं। ननु चोक्तं सर्वोभासः सर्वेभास इत्युत्तरपदवृद्धौ सर्वेचे सेषविधिः प्राप्नोतीति। नैषदो
षः। नैवं विज्ञायते उत्तरपदस्य वृद्धिरुत्तरपदवृद्धिरुत्तरपदवृद्धाविति कथं तर्हि। उत्तरपदस्ये सेवं प्रकृत्य या वृद्धिस्तद्वत्युत्तरपदे इत्येवं विज्ञायते। अथ व
श्रंपेचैत देवं विज्ञेयं। तद्भावितग्रहणे सत्यपि इहप्रसज्येत। सर्वकारकः सर्वकारक इति। पदमुच्यते। इहतावती भार्या यस्य तावद्भार्यः यावद्भार्य इति।
वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः प्राप्नोतीति। नैषदोषः। नैवं विज्ञायते। वृद्धेर्निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तस्येति। किं तर्हि। वृद्धेर्निमित्तं यस्मि
न्सोयं वृद्धिनिमित्तः। वृद्धिनिमित्तस्येति। किं च वृद्धेर्निमित्तं। योसौ ककारो ञकारो णकारो वा॥ ॥ ॥ ॥

स्येव कुर्वीहि गम्यते। अन्यथा वृद्धेस्तद्धितस्ये सेवब्रूयात्। वृद्धिनिमित्तत्वाच्च तद्धितस्य तद्धित एव वृद्धिशब्देनाभिधास्यते। अथवा वृद्धेः संबंधी यस्त एम०
द्धित इति वैयधिकरण्येन संबंधमाश्रयिष्यते। योसौ ककार इति। कञ्नेणेषु सत्सु वृद्धिर्भवतीति तेषामेव निमित्तत्वम्॥ ॥ ॥ ३९

अथवेति। निमित्तशब्दोपादानादेवाश्रितत्वं कुत्वसंख्ययोर्वृद्धिशब्दः समस्यते वृद्धीनां निमित्तमिति। संज्ञाधिकार इति। वार्त्तिकं। तस्य व्याख्यानमथ संज्ञे सेवमिति। अथशब्दः संज्ञायाः प्रस्तावद्योतनार्थः। वृद्ध्यादीनामिति। संप्रसयय इत्येतदपेक्षया कर्मणि षष्ठी। वृद्ध्यादयः संज्ञात्वेन यथा प्रतीयेरन्नित्यर्थः। यथा लोक इति। कात्यायनेनाहं प्रसये लोको दृष्टांतत्वेनोपात्तः। भाष्यकारस्तु वाक्याध्याहारेणानर्थके लोकं दृष्टांतत्वेन योजयति। बहुस्तन्त्रमिति। बहुव्रीहिः प्रकरणं चास्य पदार्थः। समाहारे द्विगुर्वा। अर्थवन्ति

अथवायः कृत्स्नायाद्वृद्धेर्निमित्तं। कृत्स्नकृत्स्नायावृद्धेर्निमित्तं। यत्तद्याणामाकारैकारौकाराणां। संज्ञाधिकारः संज्ञासंप्रसयार्थः। अथ संज्ञे सेवं प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः। किं प्रयोजनं। संज्ञासंप्रसयार्थः। वृद्ध्यादीनां शब्दानां संज्ञे सेष संप्रत्ययो यथा स्यात्। इतरथा ह्यसंप्रसयो यथा लोके। अक्रियमाणे हि संज्ञाधिकारे वृद्ध्यादीनां संज्ञा इत्येष संप्रत्ययो न स्यात्। इद मित्रानीं बहुस्तन्त्रमनर्थकं स्यात्। अनर्थकमित्याह। कथं यथा लोके। लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते। अर्थवन्ति तावत्। देवदत्तगामभ्याज शुक्लां दण्डेन। देवदत्तगामभ्याज कृष्णामिति। अनर्थकानि। दशदाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः अधरोरुकमेतत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति संज्ञासंज्ञिसंदेहश्च। क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्यः। कुतो ह्येतत्। वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति। न पुनरादैचः संज्ञा वृद्धिशब्दः संज्ञी इति। यत्तावदुच्यते संज्ञाधिकारः कर्त्तव्यः संज्ञासंप्रसयार्थ इति। न कर्त्तव्यः॥ ॥

चेति। यथा लोकेऽर्थवन्ति प्रयुंक्ते एवमनर्थकान्यपीत्यर्थः। यावदाप्तत्वमाचार्यस्य न साधितं तावदनर्थकत्वशंका। कृटिति समन्वयानवगमाद्वा। दशदाडिमानीति। पदार्थानां समन्वयाभावादानर्थक्यं॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥ॐ॥

आचार्योचारादिति। आचार्याणां व्यवहारादित्यर्थः। वृद्धिशब्दः संज्ञेति। वृद्धिशब्दस्य प्रत्यायनशक्तिर्व्याख्यानेनैव प्रकाश्यते। यथा दैत्यानां वर्णो नामेति वर्णत्वं। अपर इति॥

आचार्योचारात्संज्ञासिद्धिः। किमिदमाचार्योचारादिति। आचार्याणामुपचारात्। यथा लौकिक वैदिकेषु। तद्यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति। तयोरुपचारादन्येऽपि जानन्तीयमस्य संज्ञेति। वेदेऽपि याज्ञिकाः संज्ञां ऽस्फ्यो यूपश्चषाल इति। तत्र भवतामुपचारादन्येऽपि जानन्तीयमस्य संज्ञेति। एवमिहापि। इहैव तावत्केचिद्व्याचक्षाणा आहुः। वृद्धिशब्दः संज्ञा आदैचः संज्ञिन इति। अपरे पुनः सिचि वृद्धिरित्युक्त्वा आकारैकारौकारानुदाहरन्ति। ते मन्यामहे यया प्रत्याय्यन्ते सा संज्ञा ये प्रतीयन्ते ते संज्ञिन इति॥ ×कुर्वंति×३॥ ॥७॥ ॥

×आचार्याचारात्संज्ञासिद्धिर्भविष्यति×५

प्रदेशार्थाः संज्ञा [illegible] भिव्यक्तिः संज्ञा सूत्राणां प्रदेशार्थत्व व्यवस्थेति भावः॥ ॥ श्री ॥७॥ ॥

अनाकृतिरिति। आकृत्या सह चर्योद्देशेन लक्ष्यते। तेनायमर्थः। वृद्धिशब्द एकत्वात्संज्ञा। आदैचां बहुत्वात्संज्ञित्वं लाघवार्थं हि संज्ञाकरणं। यथा सर्वादीनि सर्वनामानी
त्यनेकस्यैका संज्ञा क्रियते न त्वेकस्यानेका संज्ञा प्रयोजनाभावात्। आकृतिमत इति। अवस्थाभेदेष्वपि समवायमिति प्रत्यभिज्ञानिमित्तं देवदत्तत्वादिकं सामान्यमस्ती

यदप्युच्यते। क्रियमाणेऽपि संज्ञाधिकारे संज्ञासंज्ञिनोरसंदेहो वक्तव्य इति संज्ञासंज्ञ्यसंदेहश्च संज्ञासंज्ञिनोश्चासंदेहः सिद्धः कुत आचार्याचारादेव उक्त आ
चार्याचारः। अनाकृतिः। अथवा अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः। लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते। लिंगेन वा। अथ
वा किंचिल्लिंगमासज्य वक्ष्यामीत्थंलिंगा संज्ञेति। वृद्धिशब्दे च तल्लिङ्गं करिष्यते नादैच्शब्दे। इदं तावदयुक्तं यदुच्यते आचार्याचारादिति। किमत्रायुक्तं।
तमेवोपालभ्यागमकं ते सूत्रमिति तस्यैव पुनः प्रमाणीकरणमित्येतदयुक्तं। अपरितुष्यन्खल्वपि भवाननेन परिहारेणानाकृतिर्लिंगेन वेत्याह॥

साकृतिमत इत्युक्तं। लिंगेन वेति। कत्वादिना वर्णारोपेण इत्यर्थः॥ तमेवोपालभ्येति। यो हि सूत्रकारमुपालभतेऽगमकं ते सूत्रमिति स कथं वृत्तिकारादीन्प्रमाणे
नाश्रयत इत्यर्थः॥ अपरितुष्यन्निति। त्वयापि परिहारान्तरं ब्रुवता आचार्याचारेण प्रमाणत्वेनाश्रित इत्यर्थः॥ ॥ ॥ ॥

तच्चापीति। लिंगेन वेत्सेत द्वक्तव्यमपि सत्यर्थे। अन्वनाकृतिः संज्ञेत्येतन्न्यायसिद्धत्वान्न वक्तव्यं। अपवैतर्हीति। एवं सती सत्यर्थेः। ङकारादिष्वनुबंधेषु कत्वादिकमासं
श्यते। ततस्तेषां संज्ञात्वे सति ङाद्यात्मनेपदमितिकरिष्यते। संज्ञा स्वसंज्ञिनं प्रसाप्य स्वयं निवर्तेत इति संज्ञालोपश्च न वक्तव्यो भवत इत्यर्थः। प्रमाणभूत इति। प्रामाण्यं प्रा

तच्चापि वक्तव्यं। यद्यप्येतदुच्यते। अथ वै तर्हि इत्संज्ञा न वक्तव्या लोपश्च न वक्तव्यः। संज्ञालिङ्गमनुबंधेषु करिष्यते। न च
संज्ञायाः निवृत्तिरुच्यते स्वभावतः संज्ञिनं प्रत्याय्य संज्ञा निवर्तते। तेनानुबंधानामपि निवृत्तिः सिद्ध सेवं। अपाणिनीयं
तु भवति। यथान्यासमेवास्तु। ननु चोक्तं संज्ञाधिकारः कर्तव्यः संज्ञासंप्रत्ययार्थ इतरथा ह्यसंप्रत्ययो यथा लोक इति।
न चैवं लोके तथा व्याकरणे। प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्रं प्रण
यति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण ॥ ×भविष्यति·×३ ॥
यथा२

णः भूप्राप्तावित्यस्मात् घञादेति णिजभावे सति रूपं। वृत्तिविषये च प्रमाणशब्दः प्रामाण्ये वर्तते। दर्भपवित्रेति। प्रमादाभावं दर्शयति। प्राङ्मुख इति। प्राच्या अभ्युदयहे
तुत्वात्। महतेति। मनःप्रणिधानं दर्शयति। एतच्च सर्वं मागमाद्बोद्धव्यं॥ ॥श्री ॥ ॥ ॥

एवमानर्थक्ये परिहृते संज्ञासंप्रत्ययाय प्रश्नान्तरात्तिप्रश्नमुखेन प्रक्षिपति। किमत इति। कतमयोरनयोरिति-आदैच्छब्दस्य द्वन्द्वत्वादनयोरिति द्विवचननिर्देशः। आदैच इति। ने
पांच द्वन्द्वनिर्देशो यमादैच्छब्द इत्यर्थः। प्रयोगनियमार्थमिति। आदैज्वृद्धिरिति प्रयोगो मा भूदित्यर्थः। नेहेति। प्रयुज्यत इति प्रयोगस्तस्य सूत्रस्य पदस्य प्रयुज्यमानस्य नियम
मो नारभ्यतेऽपि तु पदावयवस्य प्रकृतिप्रत्ययागमादिरूपस्य लोके च केवल एव वृद्धिशब्दः प्रयुज्यत इति न तस्यानेन नियमः क्रियते। लोके प्रयुक्तानां हीदमनुशासनं। य

×अतः संज्ञासंज्ञिनोर्वेद· × १ प्रकृतिपाठे × २

किमतो यद्रशक्यं। कुतो नु खल्वेतत्संज्ञासंज्ञिनावेवेति। न पुनः साध्वनुशासनेऽस्मिन्शास्त्रे साधुत्वमनेन क्रियते। कतमनयोः साधुत्वं।
कथं वृद्धिरस्याय विशेषेणोपदिष्टः। तस्मात्संज्ञासंप्रत्ययः। आदैचोऽप्यक्षरसमाम्नाये उपदिष्टाः। प्रयोगनियमार्थं तर्हीदं स्यात्। वृद्धिशब्दा
त्परमादैचः प्रयोक्तव्या इति। नेह प्रयोगनियम आरभ्यते किं तर्हि संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसंबन्धो भवति। तद्य
था। आहर पात्रं पात्रमाहरेति। आदेशास्तर्हीमे स्युः। वृद्धिशब्दस्यादैच आदेशाः। षष्ठीनिर्दिष्टस्यादेशा उच्यन्ते। न चात्र षष्ठीं पश्यामः॥

षष्ठीनिर्दिष्टस्येति। स्थानशब्दोऽर्थवाची। तिष्ठत्यस्मिन्शब्द इति स्थानं। न च वृद्धिशब्दार्थमादैचो वक्तुं शक्तास्तेनात्र षष्ठ्यर्थो भावादिति। तास्मर्थे। तथा हि षष्ठ्यमावेऽपि तदर्थे
सद्भावाद्भवत्येव स्थान्यादेशभावो यथा नाभिनभं चेति। परस्त्री परशुं चेति॥ ॥ छ॥ ॥ श्री॥ ॥

भा०कै०प्र० आगमा अपीति। अत्राप्यर्थोऽपेक्ष्यते। अनागमकानामर्थे सागमका इत्यर्थः। लिङ्गे नचेति। दृश्यविशेषप्रतिपन्नयेटकारादिलिङ्गे तत्रक्रियत इत्यर्थः। इदं खल्वपीति। वि
४२ शेषणविशेष्यभावनिराकरणे न संज्ञापक्षं स्थापयति। देवदत्तः पचतीत्यत्र सामानाधिकरण्यं न त्वेकविभक्तित्वं। गौरश्व इत्यत्रैकविभक्तित्वं न तु सामानाधि
42 करण्यमित्युभयोरुपादानं। संज्ञासंज्ञिनोरप्यत्र विशेषणविशेष्यत्वं प्रसिद्धमप्रसिद्धं वेत्युभेदेनोपादानं। तच्च सामानाधिकरण्यं प्राहुः केचिदिच्छन्ति। द्वाभ्यां शब्दा
योरेव १

आगमास्तर्हीमे स्युः। वृद्धिश्च वृत्सादैच्च आगमाः॥ आगमा अपि षष्ठीनिर्दिष्टस्यैवोच्यन्ते। लिङ्गे नचु। नचात्र षष्ठी न खल्वप्यागम
लिङ्गं पश्यामः। इदं खल्वपि भूयः सामानाधिकरण्यमेकविभक्तित्वं च द्वयोश्चैतद्भवति। कयोर्विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा।
तत्रैतस्याद्विशेषणविशेष्ये इति। तच्च न द्वयोर्हि प्रतीतपदार्थकयोर्विशेषणविशेष्यभावो भवति। न चादैच्छब्दः प्रतीतपदार्थकः॥ त
॥ स्मात्संज्ञासंज्ञिनावेव॥ ॥ ४ भवति ४ १ ॥

भ्यां भिन्नप्रवृत्तिनिमित्ताभ्यामेकस्याधिकरणस्याभिधेयस्य प्रतिपादनाद्विशेषणविशेष्यार्थप्रतिपादनाच्च विशेषणविशेष्यत्वं। अन्ये तु नीलोत्पलमिति प्रवृत्ति
निमित्तयोर्जातिगुणयोरेकमधिकरणमाश्रय इति सामानाधिकरण्यं विशेषणविशेष्यभावं चार्थयोरेव मन्यन्ते। न चादैच्छब्द इति। न ह्यस्य कश्चिल्लौकिकोऽर्थः प्रसिद्ध इत्य प्र०
॥ र्थः ॥ ॥ ॥ ४२

आवर्त्तिन्य इति॰ देवदत्तादिशब्दो हि द्वानादिमन्ति पादनाय आवर्त्तते॰ अथवेति॰ सससति वा संज्ञिनि बुध्या विषयीकृते शब्देन पूर्वं निर्दिष्टे संज्ञाप्रवर्त्तने इत्यर्थः। तत्र
प्लादेरुः गुणादसादावदेङ् इत्यादयः संज्ञिनो गुणादयः संज्ञाः। इह तु मंगलार्थोन्यथा पाठक्रमः। आर्थस्त्वन्यं क्रमः। अन्ये तु हेतवो भविष्यन्ति॥ अथैकएकालिति परिभाषा न सं
सिद्धि॰

तत्र त्वेतावान्संदेहः कः संज्ञी का संज्ञेति। स चापि कसंदेहः। यत्रोभे समानाक्षरे॥ यत्र त्वन्यतरल्लघु सा संज्ञा॥ यद्गुरु स संज्ञी॥ कुत एतत्॥ लघ्वर्थं हि
संज्ञाकरणम्॥ तत्राप्ययं नावश्यं गुरुलघुतामेवोपलक्षयितुमर्हति॥ किं तर्हि॥ अनाकृतिताम पि। अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः॥ लो
केपि ह्याकृतिमतो मांसपिंडस्य देवदत्त इति संज्ञा क्रियते॥ अथवा आवर्त्तिन्यः संज्ञाः भवन्ति॥ वृद्धिशब्दश्चावर्त्तते नादैचाद्यः॥ तद्यथा इतरत्रा
पि देवदत्तशब्द आवर्त्तते। न मांसपिण्डः॥ अथवा पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा॥ कुत एतत्॥ सतो हि कार्यिणः कार्येण भवितव्यं॥ तद्यथा इ
तरत्रापि सतो मांसपिंडस्य देवदत्त इति क्रियते॥ कथं वृद्धिरादैजिति॥ एतदेकमाचार्यस्य मंगलार्थं मृष्यतां॥ माङ्गलिक आचार्यो महतः शास्त्रौघस्य मंग
लार्थं वृद्धिशब्दमादितः प्रयुंक्ते॥ मंगलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि आयुष्मत्पुरुषकाणि च भवन्ति अध्येतारश्च वृद्धियुक्ताः स्युरिति।
सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा॥ अदेङ्गुण इति यथा॥ दोषवान्खल्वपि संज्ञाधिकारः। अष्टमे पि हि संज्ञा क्रियन्ते तत्रापीदमनुवर्त्से
संज्ञा॰
×तस्य परमाम्रेडितमिति×

त्या इति नास्ति व्यभिचारः। अथैकः शब्देनैकाकीकृष्यते इत्यनेन नियमेन ग्रहणे प्राप्ते नियमः क्रियते॥ ॥श्री॥ ॥ ॥०॥

ऽख्यानमिति । अन्तरेणापि संज्ञाशब्दप्रयोगं लोकव्यवहारवत् संज्ञासंज्ञिसंबन्धः सिध्यतीत्यर्थः ॥ सतो वृद्ध्यादिष्विति । विधौ चायं दोषो नानुवादे वृद्धिर्यस्येत्यादौ चरि-
तत्र संज्ञा

अथवा आख्यानेयं यत्नः क्रियते ॥ नहीदं लोकाद्विद्यते ॥ यदीदं लोकाद्विज्ञायेत ततो यत्नार्हं स्यात् ॥ तद्यथा अगोज्ञाय कश्चिद्गां सक्थनि क-
र्णे वा गृहीत्वोपदिशति अयं गौरिति ॥ न चास्मै आचष्टे ॥ भवति चास्य संप्रत्ययः ॥ तत्रैतत्स्यात् कृतस्तत्र पूर्वैरभिसंबन्ध इति ॥ इहापि कृतः पूर्वै-
रभिसंबन्धः । कैः आचार्यैः ॥ तत्रैतत्स्यात् ॥ यस्मै तर्हि संप्रत्युपदिशति ॥ तस्याकृत इति ॥ लोके हि ध्यादिषु संज्ञाभावान्तराश्रये इतरेतराश्र-
यत्वादप्रसिद्धिः ॥ सतः संज्ञिनः संज्ञाभावात् तदाश्रयैः संज्ञिनि वृद्ध्यादिष्वितरेतराश्रयत्वादप्रसिद्धिः ॥ का इतरेतराश्रयता ॥ सतामादैचां सं-
ज्ञया भवितव्यं संज्ञया चादैचो भाव्यन्ते ॥ तदितरेतराश्रयं भवति ॥ इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते ॥ तद्यथा नौर्नावि बद्धा ने-
×इयमस्य संज्ञेति×४×पि ह्ययमस्मै संप्रत्युपदिशति तस्याकृतः अपतनकृतः इहापि कृतो द्रष्टव्यः ॥ सतो×३× संज्ञाश्रये×२॥ तरत्राणाय भवति ॥

विधानुपपत्तिः

नार्थत्वात् मृजेर्वृद्धिरित्यादौ वृद्धिशब्देन गादेशः प्राप्नोति ॥ ॥ श्री ॥ ॥ श्री ॥ ॥

ननु च मोऽद् इति। नौशकटस्यामिमन्तरेणान्तरप्राप्तिरितरेतराश्रयेति चोद्यं सामर्थ्यं नत्रानुप्रवेशेन चोत्तरं। सिद्धं त्विति। न हि मृजेरप्यर्वे ऽप्याकारो भाव्यते किन्तु म
जावुपदिष्टे मार्ष्टी सादी नाम साधुबुद्धिः प्राप्नोतीति तेषां साधुत्वान्वाख्यानं क्रियते। प्रत्येकमिति। यद्यपि निःसंशयशास्त्रं नैतदपि प्रवर्तते तथापि न्याय्यमुत्सादना

ननु च मोः इतरेतराश्रयापि कार्याणि दृश्यन्ते॥ तद्यथा॥ नौः शकटं वहति॥ शकटं च नावं वहति॥ अन्यदपि तत्र किंचिद्भव
ति॥ जलं स्थलं वा॥ स्थले शकटं नावं वहति। जले नौः शकटं वहति॥ यथा तर्हि त्रिविष्टब्धकं॥ तत्रापि तत्तः सूत्रकं भवति॥ इदं पुन
रितरेतराश्रयमेव॥ सिद्धं तु नित्यशब्दत्वात्॥ सिद्धमेतत्॥ कथं॥ नित्यशब्दत्वात्॥ नित्याः शब्दाः नित्येषु शब्देषु सतामादैचां संज्ञा
क्रियते॥ न संज्ञयाऽऽदैचो भाव्यंते। यदि तर्हि नित्याः शब्दाः किमर्थं शास्त्रं॥ किमर्थं शास्त्रमिति चेत्। निवर्तकत्वात्सिद्धं॥ निव
र्तकं शास्त्रं॥ कथं॥ मृजिरस्मैऽविशेषेणोपदिष्टः। तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता॥ तत्रानेन निवृत्तिः क्रियते॥ मृजेरक्ङित्सु
प्रत्ययेषु मृजिप्रसंगे मार्जिः साधुर्भवतीति॥ प्रत्येकं गुणवृद्धिसंज्ञे भवत इति वक्तव्यं। किं प्रयोजनं॥ समुदाये मा भूतामिति॥०॥

योपन्यासः॥ समुदाये मा भूतामिति॥ अन्यथा मृजेर्वृद्धिरित्यादौ समुदायस्यादेशः प्राप्नोति। समुदायावयवसन्निधौ ह्यतात्पर्यम् कस्यचनांतरीयकत्वमि
ति विचार्यते॥ " " "

अन्यत्रेति॥ यत्र साध्यासमुदायप्रतिपत्तिरितियत्नाभावेनैवं वर्तीत्यर्थः। ननु सहग्रहणं नियमार्थं स्यात्समुदायस्यैव समाससंज्ञा यथा स्यात् स्यान्न्यावयवानामिति॥ नैतदस्ति॥
उभयत्रतासंप्लवोभावाद्युगपदुभयत्र प्रसंगाभावात्किंतु त्वमेव सहग्रहणं स्यान्न्यत्रसमुदायेतासर्थे नास्तीत्यस्यार्थस्य उभे अभ्यस्तंसहेसत्रसहग्रहणं वार्त्तिककारस्य
कर्त्तव्यत्वेन प्रतिं॥ भाष्यकारस्तु भेदग्रहणस्यैतत्प्रयोजनं स्यापयिष्यति॥ प्रत्यवयवंचेति॥ अत्रवाक्यशब्देन वाक्यार्थः फलमुच्यते। तच्च देवदत्तादीनां भोजनं॥ तस्य चैतदे

अन्यत्रसहवचनात्समुदायेसंज्ञाप्रसंगः अन्यत्र सहवचनात्समुदायेहद्धिगुणसंज्ञयोरप्रसंगः॥ यत्रेच्छति सहभूतानांका
र्यंकरोतितत्रसहग्रहणं॥ तद्यथा॥ सहसुपा॥ उभे अभ्यस्तंसहेति॥ प्रत्यवयवंचवाक्यपरिसमाप्तेः॥ प्रत्यवयवं वाक्य
परिसमाप्तिर्दृश्यते॥ तद्यथा॥ देवदत्तयज्ञदत्तविष्णुमित्राभोज्यंतामिति॥ नचोच्यतेप्रत्येकमिति॥ प्रत्येकंचभुञ्जिःपरि
समाप्यते॥ ननुचायमप्यस्तिसमुदायेवाक्यपरिसमाप्तिरिति॥ तद्यथा॥ ॥ ॥

इष्टांतः१

वद्रूपंयत्प्रत्येकं परिसमाप्यासंपद्यते। अन्नादनादिरूपत्वात्तत्प्रिफलत्वाच्च भोजनस्य। नाद्यक्रियातुसमुदायेसमाप्यते। गीतादिक्रियासमुदायरूपत्वात्तस्याः
संयोगसंज्ञात्वन्वर्थत्वात्समुदायेप्रवर्त्तते॥ हृद्धिसंज्ञानुलक्ष्येपृथगादैचांदर्शनान्मात्वादीनां चेति लिङ्गाच्च प्रत्येकं व्यवतिष्ठते॥ ॥ ॥ राम०
४४

म गर्ग

गर्गोः शतं दंडं नामिति ॥ अत्र शतस्येप्सिततमत्वात्प्राधान्यं पादानस्यानं प्राप्नोति गर्गाणां कर्मे ॥ नचगुणभेदे प्रधानस्य भेद इति शतदण्डनं समूहे परिसमाप्यते ॥ अर्थिनश्चेति ॥ शतस्य प्राधान्यं प्रतिपाद्यते ॥ इदं परायां हि चोदनायां शतस्य प्राधान्यमतो वा क्यादवगम्यते ॥ अथ तत्रान्तरेणेति ॥ न्यायादन्वर्थत्वाच्च एमास संज्ञायाः समुदायपरिसमाप्तौ सिद्धायां योगविभागार्थं तत्र सहग्रहणं स्थितं मितितत्रान्तरेणेत्युक्तं ॥ अथ किमर्थमिति ॥ किमाकृति पक्षे भिन्नकाल

गर्गोः शतंदण्डं [redacted] नामिति ॥ अर्थिनश्चराजानोहिरण्येन भवन्ति ॥ नचप्रत्येकं दंडयंति ॥ सत्येतस्मिन्दृष्टान्तेयदितत्रसहग्रहणं क्रियते ॥ इहापि प्रत्येकमिति वक्ष्यमम ॥ अथतत्रान्तरेणसहग्रहणं करोति ॥ इहापिनार्थः प्रत्येकमितिवचनेन ॥ अथ किमर्थमाकारस्तपरः क्रियते ॥ आकारस्य तपरकरणं सवर्णार्थं ॥ आकारस्य तपरकरणं क्रियते ॥ किंप्रयोजनं ॥ तपरस्तत्कालस्येतितत्कालानां सवर्णानां ग्रहणाय यथास्यात् ॥ केषां उदात्तानुदात्तस्वरितानां । किंच कारणं न स्यात् ॥ भेदकत्वात्स्वरस्य ॥ ० ॥

× सवृत्तानां कार्यं × ३ × सवर्णार्थं × २

ग्रहणार्थं

निवृत्सर्थमपगृक्तिपक्षेगुणान्तरयुक्तानामिति प्रश्नः ॥ आकारस्येति ॥ आकृतिः पदार्थो भेदका इति दर्शनेयद्गुणस्ये चाणान्तगुणस्यैव संज्ञाप्रसंगेगुणान्तरयुक्तानामपि संज्ञाप्रतिपत्त्यर्थं तपरकरणमि [redacted] सर्थः किंच कारणमिति ॥ अभेदकाहि गुणाः ॥ मुंडेनहिकृते चौर्ये कुंतलिलावस्थायामपि चौरोयमिति

भगुणा २ ९ अपरिग्रपत इति प्रश्नः ॥ ॥ ॥

भेदकत्वादिति ॥ सर्वेगुणसंग्रहार्थं गुणग्रहणं कर्त्तव्यमित्यर्थः । एकोयमिति ॥ उदकत्वजातियोगाद्द्वैकत्वं न विवक्षितं किं तर्हि विशिष्टभाजनस्थमेकमुदकद्रव्यं तदेव
च गुणान्तरयोगादन्यत्वेन लोके व्यपदिश्यते ॥ उभयमिति ॥ आम्नाय शब्दा नियतस्वरा इति वेदे [redacted] गुणानां भेदकत्वं ॥ लोके तूभयथा व्यवहारः । गोपिङ्गो हि व

भेदका उदात्तादयः । कथं पुनर्ज्ञायते भेदका उदात्तादय इति । एवं हि दृश्यते लोके ॥ य उदात्ते कर्त्तव्ये अनुदात्तं करोति खण्डिकोपाध्यायस्त
स्मै चपेटां ददाति अन्यत्त्वं करोषीति ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति । भेदकत्वाद्गुणस्येति वक्तव्यं । किं प्रयोजनं । आनुनासिक्यं नाम गु
णः तद्भिन्नस्यापि ग्रहणं यथा स्यात् । किं च कारणं न स्यात् । भेदकत्वाद्गुणस्य ॥ भेदका गुणाः । कथं पुनर्ज्ञायते भेदका गुणा इति ॥ एवं
गुणाः हि दृश्यते लोके । एकोयमात्मा उदकं नाम । तस्य भेदादन्यत्वं भवति । अन्यदिदं शीतं अन्यदिदमुष्णमिति ॥ ननु च भोः अभेदका
अपि गुणा दृश्यन्ते ॥ तद्यथा ॥ देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वामाख्यां न जहाति । तथा बालो युवा वृद्धः वत्सो दम्यो बली वर्द्द
इति ॥ उभयमिदं गुणेषूक्तं । अभेदका भेदका इति ॥ किं पुनरत्र न्याय्यं । अभेदका इत्येव न्याय्यं । कुत एतत् ॥ यदयमस्थिदधिस
क्थ्यक्ष्णामनङुदात्त इत्युदात्तग्रहणं करोति । यदि भेदका गुणाः स्युः उदात्तमेवोच्चारयेत् ॥ ॥

त्वार्थं यथा मेदा तत्क्रयविक्रयादिषु मूल्यादि भेदाद्भेदेन व्यवह्रियते ॥ स एवायमिति प्रत्यभिज्ञाना द्भेदेनापीति प्रश्नः ॥ किं पुनरिति ॥ अत्रेति शास्त्रे ॥ ॥ ॥
॥श्री॥ ॥श्री॥ ॥

उदात्तमेवेति ॥ तस्माद्गुणरहितस्योच्चारणमात्रान्तरीयकत्वादुच्चार्यमाणोऽपि गुणः प्रयत्नमन्तरेण न विवक्ष्यत इत्यर्थः ॥ यद्येवं कथमन्यत्रोक्तमुदात्तनिपातनं क
रिष्यत इति यावता तत्राप्यविवक्षा प्राप्नोति ॥ नैष दोषः ॥ तत्रापि स्थानेऽन्तरतमवचनाद्देशस्य यः स्वरः स प्राप्नोति तस्मिन्नुच्चारयितव्ये उदात्तोच्चारणं प्रयत्नेन विवक्षा
र्थं विज्ञायते ॥ एवमनुनासिकस्य प्रयत्नाधिक्येनोच्चारणं तद्विवक्षार्थमेव ॥ उञः ऊँ इति यथा ॥ अनेकालस्तु ॥ एकश्रुत्या सूत्राणि पठ्यन्ते इति क्वचिदुदात्तोच्चारणं

यदि तर्ह्ययमेदकागुणाः अनुदात्तादेरन्तोदात्तात्त्वं च प उच्यते तत्स्वरितादेः स्वरितां [redacted] तात्त्वं प्राप्नोति ॥ नैष दोषः ॥ आश्रीय
माणेगुणे भेदको भवति ॥ तद्यथा ॥ शुक्लमालभेत कृष्णमालभेत ॥ तत्र यः शुक्लः आलब्धव्ये कृष्णमालभते न हि तेन यथो
क्तं कृतं भवति ॥ असंदेहार्थस्तर्हि तकारः ॥ हे ज्ञि सुच्यमाने हि संदेहः स्यात् किमिमावैचावेवाहोस्विदाकारोऽप्यत्र निर्दिश्यत इति ॥ संदे
हमात्रमेतद्भवति ॥ सर्वसंदेहेषु चेदमुपतिष्ठते ॥ व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति ॥ त्रयाणां ग्रहणमि
ति व्याख्यास्यामः ॥ अन्यत्रापि तत्प्रयमेवं जातीयकेषु संदेहेषु न किंचिद्यत्नं करोति ॥ तद्यथा ॥ औतोम्शसोरिति ॥ ॥ ॥

तद्विवक्षार्थमिति ॥ अनुदात्तादेरिति ॥ अनुपलक्षणार्थोऽनुदात्तश्रुतिः स्यादिति प्रश्नः ॥ उत्तरत्वज्ग्रहणमेव कुर्यादित्यभिप्रायः ॥ व्याख्यानत इति ॥ प्रत्येक
वृद्धिमित्याद्युदात्तत्वेमालादीनां चेति मालाशब्दस्य वृद्ध्यर्थत्वादुपादानस्याकारप्रश्लेषनिश्चय इत्यर्थः ॥ ॥ ॥ ॥
शिवे १

भा०कै०प्र० ४६ 46

इदं तर्हीति। ननु भाष्यमानत्वादेवं चोऽत्र यथाह कात्यायनः विष्यंति॥ नैतदस्ति॥ न ह्यत्र संज्ञाविधावादेवं चोमायंते। किं तत्र एजिः उ एत्वात्त्रिमात्रचतुर्मात्राणां ग्रहणात्संज्ञा
प्रसंगाद्वृद्धिगुणविधौ च तेषामपि प्रसंगात्तन्निषेधाय तपरत्वं॥ एवं स्थिते चोदयंति। यद्येवमर्थस्तकारस्तेनाकारस्य संबंधाभावात्कथमादित्से तपरं॥ उच्यते॥ तात्पर्यैर्गो

इदं तर्हि प्रयोजनं॥ आंतर्येण त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशा मा भूवन्निति॥ खट्वा इंद्रः खट्वेंद्रः। खट्वा उदकं
खट्वोदकं॥ खट्वा ईषा खट्वेषा। खट्वा ऊढा खट्वोढा। खट्वा एलका खट्वैलका॥ खट्वा ओदनः खट्वौदनः। खट्वा ऐतिकायनः खट्वैतिका
यनः। खट्वा औपगवः खट्वौपगव इति॥ अथ क्रि यमाणेपि तकारे कस्मादेव त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मा
त्रा आदेशा न भवंति॥ तपरस्तत्कालस्येति नियमात्। ननु तः परो यस्मात्सोयं तपरः। नेत्याह। तादपि परस्तपरः। यदि तादपि परस्त
परः ऋदोरबिति इहैव स्यात्। यवः स्तवः लवः पव इत्यत्र न स्यात्। नैष तकारः। कस्तर्हि। दकारः। किमत्र दकारे प्रयोजनं। अथ किं
तकारे। यद्यसंदेहार्थस्तकारः दकारोपि। अथ मुखसुखार्थस्तकारः दकारोपि॥ वृद्धिरादैच्॥ ॥ ॥

तिप०
जर्थेत्वं तकारस्योच्यते आनुषंगिकं त्वाकारार्थत्वं तकारस्योच्यते। ज्ञापकद्वारेणाकारप्रश्लेषे विज्ञायमाने प्रतिपत्तिगौरवं भवतीति सत्यपि तकारे आकारस्वरूपप्रतिपत्तिः स्प राम०
ष्टा भवतीति तकारसहितेनाकारस्यासंदिग्धानुकार्यप्रतिपादनार्थत्वाद्द्विमात्रस्योतस्त्वमादित्से तपरं सिद्धम्॥ ॥ ॥ ४६

इको गुणवृद्धी॥ इग्ग्रहणमिति॥ वक्ष्यमाणज्ञापकवशा[redacted]दाकारादि निरासादिकएव गुणप्रभविष्यत इति प्रश्नः॥ आसंध्यक्षरेति॥ आकारादीनांस्थानित्वस्य निवृ-
त्त्यर्थमितिभावः॥ आकारस्यांगांत्यस्य वृद्धिविधावभावाद्विशेषाभावाच्चाकारस्य चातो लोप इति लोविधानादाकारस्य गुणप्रसंगमुदाहरति॥ यातेति॥ म्लायतीति॥ एचां द्विमात्रत्वा
इकौ २

इको गुणवृद्धी॥ इग्ग्रहणं किमर्थम्॥ इग्ग्रहणमात्संध्यक्षरव्यंजननिवृत्त्यर्थम्॥ इग्ग्रहणं क्रियते किं प्रयोजनं॥ आकारनिवृत्त्यर्थं संध्यक्ष-
रनिवृत्त्यर्थं व्यंजननिवृत्त्यर्थं च॥ आकारनिवृत्त्यर्थं तावत्॥ याता वाता॥ आकारस्य गुणः प्राप्नोति॥ इग्ग्रहणान्न भवति॥ संध्यक्षरनिवृत्त्यर्थं
॥ म्लायति॥ म्लायति॥ संध्यक्षरस्य गुणः प्राप्नोति इग्ग्रहणान्न भवति॥ व्यंजननिवृत्त्यर्थं॥ उंभिता॥ उंभितुं॥ व्यंजनस्य गुणं प्राप्नोति॥
इग्ग्रहणान्न भवति॥ आकारनिवृत्त्यर्थेन तावन्नार्थः॥ आचार्यप्रवृत्तिर्ज्ञापयति नाकारस्य गुणो भवतीति॥ यदयमातोनुपसर्गे कइति
ककारमनुबंधं करोति॥ कथं कृत्वा ज्ञापकं॥ कित्करणे एतत्प्रयोजनं कितीत्याकारलोपो यथा स्यात्॥ यदि चाकारस्य गुणः स्यात् कित्क-
रणमनर्थकं स्यात्॥ गुणे कृते द्वयोरकारयोः पररूपेण सिद्धं रूपं स्यात् गोदः कंबलद इति॥ पश्यति त्वाचार्यः नाकारस्य गुणो भवतीति॥
ततः ककारमनुबंधं करोति॥ ॥

विशेषात् प्रयत्नाधिक्याभावादेकारो पदेशेप्येकारो गुणः स्यात्॥ उंभितेति॥ मकारस्यो ष्ठ्यत्वादोकारो गुणः स्यात्॥ पररूपेणेति॥ अतो लोपस्तु न भवति॥ आर्द्धधातुको-
पदेशे यदकारांतं तस्य लोपविधानात्॥ ॥श्री॥ ॥७॥ ॥

भा०कै०प्र० ४७ 47 उपदेशसामर्थ्यादिति। प्रतिपत्तिलाघवार्थमेवारम्भे वोपदिष्टो दिसर्थः। पदद्वयं जनेरिति॥ यद्येवं मिदेर्गुणो विधीयमानो ज्ञापकेन व्यंजनस्य निरस्तत्वादिग्ग्रहणाभावाच्च सर्वो
देशः प्राप्नोति। मिदरुर्मिदिरिसाश्रयणादिकारस्य भविष्यतीत्यदोषः। यत्तावदिति। विशेषप्रतिपादनाय सकलज्ञापकाक्षेपः। केचिदाहुः॥ टकः किल्वेन ज्ञापकेनाका

संध्यक्षरनिवृत्त्यर्थेनापि नार्थः॥ उपदेशसामर्थ्यात्संध्यक्षरस्य गुणो न भविष्यति॥ व्यंजननिवृत्त्यर्थेनापि नार्थः। स्वा
चार्यप्रवृत्तिर्ज्ञापयति न व्यंजनस्य गुणो भवतीति॥ यद्वयं जनेर्ईशास्ति। कथं कृत्वा ज्ञापकं॥ इत्करणमेतत्प्रयोजनं इती
ति इल्लोपो यथा स्यात्। यदि व्यंजनस्य गुणः स्यादित्करणमनर्थकं स्यात्। गुणेन कृते त्रयाणामकाराणां पररूपेण सिद्धं
रूपं स्यात्। उपर्यु जोम उरजइति। पश्यति त्वाचार्यः। न व्यंजनस्य गुणो भवतीति। ततो जनेर्ईशास्ति॥ नैतानि संति ज्ञा
पकानि॥ यत्तावदुच्यते॥ कित्करणं ज्ञापकं। नाकारस्य गुणो भवतीति॥ उत्तरार्थमेतत्स्यात्॥ नुंदश्लोकयोः शमिन्जापनुदोरि
ति॥ यत्तर्हि गापोष्टगितिकंकारमनुबंधं करोति॥ x अनन्यार्थं x॥ ॥ ॥ ॥

रनिवृत्त्यर्थत्वेनिराकृते यदप्युच्यत इति ज्ञापकाक्षेपोऽयं पच्छायां न शुष्माति। तस्मादार्थेन क्रमेण सर्वेज्ञापकभंगोपन्यासं कृत्वा यथासंभवं ज्ञापकसमर्थनं कर्त्तव्य राम० ४७
॥ म॥ ॥ ॥

ऽआयादयोपीति। ऐकारोच्चाररगास्याविकृततरूपश्रवणार्थत्वादितिभावः। यं विधिमिति। ऽआयादेशस्यैकारएवनिमित्तमिति। ऽआयादेशोनबाध्यते। नहित्स्यापिसेवंपाठःशक्यः कर्तुं। लयास्त्वायतइतिरूपासिद्धिप्रसंगात्। बाध्यत्वेतिनिपातनच्चात्वंगुणावच्चबाधिष्यते। पररूपेणेति॥ रूपग्रहणस्येदमेवप्रयोजनंयादकारपररूपंनादृजेवयथास्यादिति॥

आदि

यदप्युच्यते॥ उपदेशसामर्थ्यात्तंसंध्यक्षरस्यगुणोनभविष्यतीति॥ यदियद्यत्तंसंध्यक्षरस्यप्राप्नोतितत्तदुपदेशसामर्थ्याद्बाध्यते॥ ऽआयादयोपितर्हिनप्राप्नुवंति॥ नैषदोषः॥ यंविधिंप्रत्युपदेशोऽनर्थकः सविधिर्बाध्यतेयस्यतुविधेर्निमित्तमेवनासौबाध्यते। गुणंचप्रत्युपदेशोनर्थकः॥ ऽआयादीनांपुनर्निमित्तमेव॥ यदप्युच्यतेजनेर्ईवचनंज्ञापकंनव्यंजनस्यगुणोभवतीति। सिद्धेविधिरारभ्यमाणोज्ञापकार्थोभवति। नचजनेर्गुणेनसिद्ध्यति॥ कुतोह्येतत्। जनेर्गुणउच्यमानऽअ[redacted]कारोभवति। नपुनरेकारोवास्यादोकारोवेति। ऽआंतर्यतोऽर्धमात्रिकस्यव्यंजनस्यमात्रिकोऽकारोभविष्यति। एवमप्यनुनासिकःप्राप्नोतिपररूपेणशुद्धोभविष्यति। एवंतर्हिगमेरप्ययं दोषवक्तव्यः गमेश्चगुणउच्यमानेऽओकारःप्राप्नोति। तस्मादिग्ग्रहणंकर्तव्यं॥ ×आंतर्यत× ॥ ॥

गमेरप्ययमिति। सप्रसंगांजनेर्ईइस्तोऽन्येष्वपिदृश्यतइसत्रद्रोनुवर्त्तमानोगमेरपिविधीयतइसज्ञापकंरित्वमितियंजननिर्दसर्थेसूत्रंस्थितं॥ ॥

संज्ञयेतिगुणवृद्ध्योर्नुवृत्तस्यैव गुणवृद्ध्योरिकः सिद्धत्वात् द्वितीयं गुणवृद्धिग्रहणमाश्रितगुणवृद्धिशब्दव्यापार[redacted]र्थं विज्ञायते। तेन गुण इत्येवं योगगुणः वृद्धिरित्येवं यावृ
द्धिरिति विज्ञायते। अथवा गुणवृद्धिमात्रग्रहणे गुणवृद्ध्यधिकारादेव सिद्धे पुनर्गुणवृद्धिग्रहणं गुणवृद्धिशब्दव्यापाराश्रयार्थं विज्ञायते। अदेङ्गुणमिति॥ पूर्वसूत्रे सं[redacted]
ज्ञिसंबंधायोपात्तो पादृशो वृद्धिशब्दस्तादृश एवोत्तरत्रानुवर्त्तते इत्यदेङ्गुणमित्युक्तं॥ ते नैतन्न चोदनीयं। वृद्धिशब्दो नुवर्त्तमान आदैच इत्यस्योपनीसादैचां गुणसंज्ञामा

यदीग्ग्रहणं क्रियते। द्योः पंथाः स इममिति एते पीकः प्राप्नुवंति॥ संज्ञयाविधाने नियमः। संज्ञयायेविधीयंते तेष्वेव नियमः। किं वक्तव्यमेत
त्। न हि। कथमनुच्यमानं गंस्यते। गुणवृद्धिग्रहणसामर्थ्यात्॥ कथं पुनरंतरेण गुणवृद्धिग्रहणमिकोगुणवृद्धीस्यातां॥ प्रकृतं गुणवृद्धि
ग्रहणमनुवर्त्तते। क्व प्रकृतं॥ वृद्धिरादैजदेङ्गुण इति। यदि तदनुवर्त्तते। अदेङ्गुणो वृद्धिश्चेत्यदेङां वृद्धिसंज्ञाप्राप्नोति संबंधमनुवर्ति
गुण२ ष्यते। वृद्धिरादैच् अदेङ्गुणः वृद्धिरादैच्। ततइकोगुणवृद्धी। वृद्धिग्रहणमनुवर्त्तते। आदैज्ग्रहणं निवृत्तम्। अथवा मंडूकगतयो
अधिकाराः। यथा मंडूका उत्प्लुत्योत्प्लुत्य गच्छंति तद्वदधिकाराः। अथवा एकयोगः करिष्यते वृद्धिरादैजदेङ्गुणः ततइकोगुणवृद्धी नचैक
"योगेनुवृत्तिर्भवति॥ " " "

ती
मोति॥ संबंधमिति। संबध्यत इति संबंधं। कर्मणि घञ्॥ नपुंसकस्या[redacted]मिधेयत्वाच्च पुंसकनिर्देशः॥ आदै ज्ग्रहणं संबद्धं वृद्धिग्रहणमदेङ्गुण इत्यत्रानुव
र्त्तते। तेनादेङ्भिर्न संबध्यते। इह त्वनुवर्त्तते आदैचो जहाति। कांतारे तरणायसार्थस्येव सार्गोपादाने। अथवेति। वृद्धिशब्दस्येहाकांक्षावशात् उपस्थानं नत्वदेङः सत्राश्र
यवैकयोग इति। एको भवतिर ध्याक्रियते वृद्धिरादैजदेङ्गुणो भवतीत्येकवाक्यत्वं संपद्यते। यद्यपि प्रतिकालेभवति क्रियाभिद्यते तथाप्येककालामति पत्तिरित्यादैचां
"बहुत्वाद्वृद्धिसंज्ञा अदेङः संबद्धा गुणसंज्ञेति नास्ति वृद्धिसंज्ञाया अदेङ्भिः संबंधः॥ "

तरस्यासत्य स्मिन्निति सूत्रस्य नभाष्यमयप्रधान विरोधसत्यात कैयटे पूर्ट·

अथवान्यवचनादिति॥ यथा कप्रत्ययेनाण् बाध्यते॥ असंदिग्धत्वादनवकाशत्वात्तासर्यो चकविधेरणस्क विपर्यासात्। एवमदेङ्गुण इत्यत्र वृद्धिग्रहणमनुवर्त्तते न संदिह्यते किमुत्तरार्थं वेहास्यानुवृत्तिरथेहापीति। सावकाशा च वृद्धिसंज्ञा तासर्यवचनात्तिं गुणसंज्ञानुतासर्यादसंदेहान्निरवकाशत्वाच्च वृद्धिसंबंधमदेङ्गुं बाधते। प्रत्ययसंज्ञानु संज्ञिविशेषेण संयुक्ताधिकारे सोऽवविधीयमानाकृत्यादिसंज्ञाविषयेऽपि प्रवर्त्तते॥ अथवेति॥ विभाषा तिलमाषेत्यत्र उमाभंगयोर्धान्यत्वात्तत्र प्राप्तौ चोदितायां खत्र

अथवान्यवचनाच्चकारणकरणात्प्रकृतापवादो विज्ञायते यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति॥
अन्यस्याः संज्ञाया वचनाच्चकारस्यानुकर्षणार्थस्याकरणात्प्रकृतायाः वृद्धिसंज्ञायाः गुणसंज्ञा बाधिका
भविष्यति॥ अथवाव ष्य सेतत्। अनुवर्त्तन्ते च नाम विधयो न चानुवर्त्तनादेव भवंति॥ किं तर्हि य
त्नाद्भवंतीति॥ अथवा उभयं निवृत्तं तदपेक्षिष्यामहे॥ ×यथोत्सर्गेण प्रसक्तस्यापवादो बाधको भवति× ॥

ग्रहणानुवृत्तिराश्रिता। अनुवर्त्तमानस्य खल्वन्यत्वाभावाद्व्रीहिशाल्यादिभिर्न संबध्यते। अपितु विभाषाग्रहणायत्नेन तिलादिभिरेव संबध्यते। तथेहापि वृद्धिग्रहणमदेङ्गुण इत्यत्रानुवर्त्तमानमपि यत्नाभावाददेङ्भिर्न संबध्यते। इह तु उत्तरेण वृद्धिग्रहणं यत्नो भवति॥ अथवेति॥ अपेक्षालक्षणं लौकिकमधिकारमाश्रयति। समुदायस्य चापेक्षायां नास्येतदनंतरस्य विधिर्वा भवति प्रतिषेधो वे [illegible] ति गुणस्यैवापेक्षा युक्तेति समुदायस्य भेदाभावात्॥ ॥ ॥

भा० कै० प्र० किंपुनरिति॥ उभयथा संभवादेकदेशेनाक्षेपः। तत्राङ्गस्य गुण इति षष्ठी निर्दिष्टात्तिङ्गादलोऽन्त्यस्येत्युपतिष्ठते गुणश्श्रुत्या तिक इति। तत्र यदि पूर्वमिकोऽङ्गं विशेष्यते इगङ्गं तदाङ्गस्य
४६ इति गुणो भवतीति स च भवन्नलोऽन्त्यस्येसंसस्य भवति तदा सोऽस्य शेषो भवति। यदा त्वङ्गस्येति पूर्वमेवान्त्यमलं षष्ठी नीयते। इकोऽङ्गान्त्यस्य गुण इति। पश्चादिकोऽलोऽन्त्यविशेषणत्वे तदा चायं त
49 स्य विशेषणत्वाच्छेषो भवति। अथ त्वङ्गस्येति गुणवृद्धि विधौ न स्थाने षष्ठी किं तर्हि इग्रूपेक्षयावयवषष्ठी। तदा स्थाने षष्ठ्यभावादलोऽन्त्यस्येत्यस्यानुपस्थानमिति तदपवादप
क्षो भवति॥ अप्राप्तस्यानुमानमेव हि बाधो वचनेन प्राप्तस्य बाधायोगात्। ततश्चाङ्गावयवस्य यत्र तत्र स्थितस्येको गुणवृद्धी इत्यर्थः संपद्यते। समुच्चयस्त्वसंभवान्नोपन्यस्तः॥

किंपुनरयमलोऽन्त्यशेषः॥ आहोस्विदलोऽन्त्यापवादः। कथं चायं तच्छेषः स्यात् कथं तदपवादः। यद्येकं वाक्यं तच्चेदं चा
अलोऽन्त्यस्य विधयो भवन्ति। इको गुणवृद्धी। अलोऽन्त्यस्येति॥ ततोऽयं तच्छेषः। अथ नानावाक्यं। अलोऽन्त्यस्य विधयो भ
वन्ति इको गुणवृद्धी अन्त्यस्य वा अनन्त्यस्य वेति॥ ततोऽयं तदपवादः॥ कश्चात्र विशेषः॥ ॥ ॥

नहि युगपच्छेषस्य पर्यायसंभवस्ततः स्थानेयोगोऽवयवयोगश्चेति। विकल्पोऽपि न भवति। एकत्वात्षष्ठ्यर्थस्य। तस्मात्तच्छेषतदपवादपक्षावेवात्र शंकितौ॥ यद्येकमिति॥ अनेन
योगव्यवहितयोरप्येकस्मिन्कार्यप्रदेशे सत्त्वनिमित्तसन्निधापितयोरङ्गाङ्गिभावाद्विशेषणविशेष्यभावादेकवाक्यत्वोपपत्तिः। अथ नानेति॥ अङ्गस्येतीगपेक्षायामवयवष एम०
ष्ठ्याश्रितः स्थानित्वात्तद्विशेषणत्वादङ्गस्यानुपस्थानमलोऽन्त्यस्येत्यस्य। ततश्चानयोर्भिन्नविषयत्वान्नानावाक्यत्वम्॥ ॥ ॥ ४९
त१

वृद्धिगुणाविति। मिदादीनामनिगंतत्वादल्लोंस्यसेसेतदंगमिग्ग्रहणं नसन्निपातनीतितेषुप्रदेशेषु इग्ग्रहणं कर्त्तव्यं। दोषांतरमप्याह। सर्वादेशप्रसंगश्चेति॥ अंगस्येसे

वृद्धिगुणावल्लोंस्यसेतिचेन्मिदिमृजिपुगंतलघूपधच्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं॥ वृद्धिगुणावल्लोंस्यस इतिचेत्मिदिमृजिपुगंतलघू
पधच्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणं कर्त्तव्यं॥ मिदेर्गुणः इक इतिवक्तव्यं। अनेनसत्वादिन प्राप्नोति॥ मृजेर्वृद्धिः इक इतिवक्तव्यं। अनेनस
त्वादिन प्राप्नोति॥ पुगंतलघूपधस्यगुणः। इक इतिवक्तव्यं। अनेनसत्वादिन प्राप्नोति। ऋच्छेर्लिटिगुणः इक इतिवक्तव्यं। अनेनसत्वादि
न प्राप्नोति॥ ऋदृशोङि. गुणः इक इतिवक्तव्यं। अनेनसत्वादिन प्राप्नोति॥ क्षिप्रक्षुद्रयोर्गुणः इक इतिवक्तव्यं। अनेनसत्वादिन प्राप्नोति॥
सर्वादेशप्रसंगश्चानिगंतस्य॥ सर्वादेशश्चगुणोऽनिगंतस्यप्राप्नोति॥ याता। वाता। किंकारणं॥ अल्लोंस्यस्येतिषष्ठीचैवस्थानेयोगसमिकमुपसं
क्रांता॥ अंगस्येतिचस्थानषष्ठी॥ तद्यदिदानीमनिगंतमंगंतस्यसर्वादेशः प्राप्नोति॥ नैषदोषः॥ ॥

तन्निर्देशेनसर्वांगेषुव्याप्रियते। तत्रइगंतेष्वेवाल्लोंस्यस्य विधिः। अन्यत्रतुषष्ठ्यांसेत्यनुपसंहारणद्याता वातेतिसर्वादेशोगुणः प्राप्नोति॥ ॥ ॥

भा०कै०प्र० यथैव हीतिग॰ अंगस्येति षष्ठ्युच्चारितैवांसमलंनी तेतिनास्या अपरं रूपमस्तीति नास्ति सर्वो देशगुणप्रसंगः॥ पूर्वोपेक्षोयमिति॥ मिदादिष्विग्ग्रहणं कर्तव्यमित्यस्यैवार्थे हेतु

५०

50

यथैव घल्लोंसस्येति षष्ठी अंगसमिकमुपसंक्रान्ता एवमंगस्येसपि स्थानषष्ठी॥ तद्यदिदानीमनिर्गतं अंगं तत्र षष्ठ्येव नास्ति कुतो गुणः कुतः सर्वोदेशः॥ एवं तर्हि नायं दोषसमुच्चयः॥ पूर्वापेक्षोयं दोषः॥ ह्यर्थे चायं चः पठितः॥ मिदिमृजिपुगंतलघूपधर्छिदृशिक्षि प्रक्षुद्रेष्विग्ग्रहणं सर्वो देशप्रसंगोह्यनिर्गतस्येति॥ मिदेर्गुण इति वचनात् सस्यन॥ अंगस्येति वचनादिको न॥ उच्यते च गुणः सर्वो देशः प्राप्नोतीति॥ एवं सर्वत्र॥ अस्तु तर्हि तदपवादः॥ इग्लक्षणस्येति चेज्जुसिसार्वधातुकार्द्धधातुकह्रस्वाद्योर्गुणेष्वनंतरप्रतिषेधः॥ इग्लक्षणस्येति चेज्जुसिसार्वधातुकार्द्धधातुकह्रस्वाद्योर्गुणेष्वनंतरप्रतिषेधो [redacted]
वक्तव्यः॥ जुसिगुणः सयथेह भवति अजुहवुः अबिभयुः॥ एवमनेनिजुः पर्यवेविषुरित्यत्रापि प्राप्नोति॥ सार्वधातुकार्द्धधातुकयो गुणः सयथेह भवति कर्त्ता नयति तरति भवति एवमीहिताईहितुईहितव्यमित्यत्रापि प्राप्नोति॥ ॥ ॥

तेनेदमुपात्तमित्यर्थः॥ उच्यते चेति॥ मिदेरिति चोदनायां॥ इग्लक्षणस्येति॥ यद्यंगस्येतीगपेक्षया अवयवषष्ठी तदा लोंसस्येसस्य निमित्ताभावादनुपस्थानं स्थानषष्ठी हि तस्यो पस्थाननिमित्तं ततस्थानेगाभावयवस्थां सस्थानं सस्यवेको गुणः प्राप्नोतीति दोषः॥ ॥ एम० ५०

ह्रस्वस्य गुण इति॥ समानन्यायत्वादेतदुक्तं। अंगस्यावयवयोर्ह्रस्वस्तस्य गुण इति। न त्वत्र परिभाषोपतिष्ठते निर्दिष्टस्थानिकत्वात्॥ अन्ये त्वाहुः॥ अत्र परिभाषो
पस्थाने सति ह्रस्वेनेति विशेष्यते। ह्रस्वस्य यो गुणो यथा स्यात् दीर्घस्य माभूदिति॥ ओर्गुण इत्यत्रापि स्थाने उपस्थानमनंतस्यापि उकारस्य गुणार्थं न॥ असति त्वस्या उपस्था
नेंगस्येति स्थानषष्ठी स्यात्। अंगं चोकारेण विशेष्येत इत्युकारांतस्यैव गुणः स्यात्॥ पुगंतेति॥ भेत्तेत्यादौ गुणे सिद्धे पुनः श्रुतिर्नियमार्थे तिपुगंतलघूपधस्येहि तेत्यादौ न भवि

ह्रस्वस्य गुणः स यथेह भवति। हे अग्ने हे वायो इति। एवं हे अग्निचित् हे सोमसुत इत्यत्रापि प्राप्नोति॥ जसि गुणः स यथेह भवति॥
अग्नयो वायव इति। एवं अग्निचितः सोमसुत इत्यत्रापि प्राप्नोति॥ ऋतो ङि सर्वनामस्थानयोर्गुणः स यथेह भवति। कर्त्तरि क
र्त्तारौ कर्त्तार इति। एवं सुकृति सुकृतौ सुकृत इत्यत्रापि प्राप्नोति॥ घेर्ङिति गुणः स यथेह भवति॥ अग्नये वायवे इति॥ एवमग्नि
चिते सोमसुते इत्यत्रापि प्राप्नोति॥ ओर्गुणः स यथेह भवति बाभ्रव्यो मांडव्य इति॥ एवं सुसुत सौसुत इत्यत्रापि प्राप्नोति। [redacted]
नैष दोषः॥ पुगंतलघूपधग्रहणमनंतस्य नियमार्थं। पुगंतलघूपधग्रहणमनंतस्य नियमार्थं भविष्यति॥ पुगंतस्य लघूपध
॥स्यैवानंतस्य नान्यस्यानंतस्येति॥ ॥ ॥

ष्यति॥ नापि हे अग्निचित् इत्यादौ उभयनियमाश्रयणादिति भावः॥ ननु भेत्तेत्यत्र इकारस्य ह्रूपयतीति पकारस्य यथा स्यादिति विपर्ययेमेतत्स्मात्। नैतदस्ति॥ पुकि
अपि तु पुगंतो लघ्वी उपधा लघूपधा ततः समाहारद्वंद्वनिर्देश इत्यस्य गुणेन न भाव्यम्॥ ॥७॥ ॥

भा॰कै॰प्र॰ प्रकृतस्येति। एकेन वाक्येन न नियमद्वयस्य लाभः प्रकृतस्यैव गुणस्य नियमः स्यात् पुगंतलघूपधस्यैव सार्वधातुकार्द्धधातुकयोरिति नतु सार्वधातुकार्द्धधातुकयोरेव पुगंतलघूपधस्ये
५१ ति॥ अथापीति। अनंतरस्य विधिर्वेति परिभाषा यदि नाश्रीयते इत्यर्थः॥ अथापीति। अभ्युपगमवादे नोच्यते। आरंभसामर्थ्यात् आश्रयेण वा। एकस्मिंस्तु वाक्ये नियमद्व
यं न लभ्यते॥ अनेनिजुरिति। अत्र लघूपधं चांगं सार्वधातुकं चास्तीति जुसि चेति गुणः प्राप्नोति॥ हेतुरित्यपि चर्व्यं बुद्ध्य इत्यादौ चाल घूपधत्वादनेन सर्वगुणोऽपि हतः

प्रकृतस्यैव नियमः स्यात्। किंच प्रकृतं॥ सार्वधातुकार्द्धधातुकयोरिति॥ तेन न भवेदिह नियमान्न स्यात् ईहिता ईहितुं ईहितव्यमि
ति॥ ह्रस्वाद्योर्गुणो नियतः सोऽनंतरस्यापि प्राप्नोति॥ अथाप्येवं नियमः स्यात्। सार्वधातुकार्द्धधातुकयोरेव पुगंतलघूपधस्ये
ति॥ एवमपि सार्वधातुकार्द्धधातुकयोर्गुणो नियतः सोऽनंतरस्यापि प्राप्नोति॥ ईहिता ईहितुं ईहितव्यमिति॥ अथाप्युभयतो नि
यमः स्यात्। पुगंतलघूपधस्यैव सार्वधातुकार्द्ध [redacted] धातुकयोः सार्वधातुकार्द्धधातुकयोरेव पुगंतलघूपधस्येति॥ एवमपि
जुसि गुणो नियतः सोऽनंतरस्यापि प्राप्नोति॥ अनेनिजुः पर्यवेविषुरिति॥ एवं तर्हि नायं तच्छेषः नापि तदपवादः। अन्यदेवे
''दं परिभाषान्तरमसंबद्धमनया परिभाषया॥ ॥ ॥

एवं तर्हीति॥ परस्परानपेक्षयोः स्वनिमित्तप्रयुक्तसन्निधानयोर्द्वयोः परिभाषयोः मदेशेषु स्वकार्यप्रतिपादनं। तत्र क्वचिदेकविषयसन्निपातो भवति नैतावता राम॰
तापरस्परापेक्षा भवतीत्यर्थः॥ अन्यदेवेति। अंतरशब्दो विशेषवाचीत्यन्यांतरशब्दयोरविरुद्धः प्रयोगो पर्यायत्वात्॥ ॥ ॥ ॥ ५१

चयनमिति। अल्लोंऽस्य परिभाषायाः प्रयोजनाभावादत्रानुपस्थानमित्याशयः। चायक इति। कथमिक्परिभाषात्रोपतिष्ठते। यावता तावइति स्थानी निर्दिष्टः अत्राकुः। अच
इत्यस्यांगविशेषणतया उपयोगादचः स्थानित्वाभावाद्वृद्धिग्रहणेन लिंगेनेक्परिभाषात्राप्युपतिष्ठत एव॥ मेघतीति। इक इति च नादि काऽस्य प्राप्नोति॥ अल्लोंऽस्येति

परिभाषांतरमिति मल्लाकोष्ठीयाः पठंति। नियमादिको गुणवृद्धी भवतो विप्रतिषेधेनेति॥ यदि चायं तच्छेपः स्यात्तेनैव तस्यायुक्तो वि
प्रतिषेधः। अथापि तदपवादः। उत्सर्गापवादयोरप्ययुक्तो विप्रतिषेधः। तत्र नियमस्यावकाशः। राज्ञः क च॥ राजकीयं। इको गुण
वृद्धी इत्यस्यावकाशः। चयनं। चायको लवनं लावक इति॥ इहोभयं प्राप्नोति मेद्यति मार्ष्टीति॥ इको गुणवृद्धी इत्येतद्भवति विप्रतिषेधे
न॥ नैष युक्तो विप्रतिषेधः विप्रतिषेधे परमित्युच्यते पूर्वेषां यं योगं परो नियमः॥ इष्टवाची परशब्दः। विप्रतिषेधे परं यदि
ष्टं तद्भवतीति॥ एवमप्ययुक्तो विप्रतिषेधः। द्विकार्ययोगो हि विप्रतिषेधः। नावश्यं द्विकार्ययोग एव विप्रतिषेधः किं तर्ह्यसंभवोऽपि
१ स चात्राप्यचा संभवः॥ कोऽसावसंभवः॥ ×न चात्रैको द्विकार्ययुक्तः×॥ ॥

इति॰१
वचनादकारस्य। नैष युक्त इत्यादि इत्यर्थः। ययोः शपक्षे च परिभाषयोः पौर्वापर्ये न तु कार्यकालतायां। द्विकार्ययोग इति। द्वाभ्यां कार्याभ्यां योगस्यैतिषेधविषयत्वाद्वि
प्रतिषेधः। नावश्यमिति॥ द्विकार्ययोगत्वाभावे केवलोऽप्यसंभवो विप्रतिषेध इत्यर्थः॥ ॥श्री॥ ×स्थानिनः सविप्र×१ ॥ ॥

इह तावद्वृद्धित्वादीर्घत्वं यत्रप्यनेन तदेव विधीयते। एत्वं च ऋत्वनन्तरो। न च संभवोस्ति यत्तद्वयोः स्थेन स्थेन निमित्ते नान्तर्यं स्यात्॥ इहेदानीमिति। मिदेरि सेकाषष्ठी य द्यवयव
संबंधेन देकारस्य गुणेन भाव्यं। अथ स्थानषष्ठी तदा त्वोः सस्येति वचनाद्दकारस्य। न चास्ति संभवो युगपदुभयोर्गुणस्येत्यर्थः। एवमपीति। यदीदं नारभ्येत गुणाद्वृद्धीकस्य

इह तावद्वृक्षेभ्यः प्लक्षेभ्यः एकः स्थानी द्वावादेशौ॥ न चास्ति संभवः यदेकस्य स्थानिनो द्वावादेशौ स्यातां। इहेदानीं मे द्युतिमे द्युतः मे
द्युतिति द्वौ स्थानिनौ एक आदेशः। न चास्ति संभवः द्वयोः स्थानिनोरेक आदेशः स्यादिति सेषोऽसंभवः। स एतस्मिन्युक्तो विप्रतिषेधः।
एवमप्ययुक्तः। द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति। अनवकाशश्चायं योगः। ननु चेदानीमेवास्यावकाशः कॢ
प्तः चयनं चायकोल्लवनं लावक इति॥ अत्रापि नियमः प्राप्नोति। नाप्राप्ते नियमेयं योग आरभ्यते। यावता च नाप्राप्ते नियमे
यं योग आरभ्यते तत्तस्यापवादोयं योगो भवति॥ उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः। अथापि कथंचिदिको गुणवृद्धी इत्यस्याव
काशः स्यात्। एवमपि यथेह विप्रतिषेधादिको गुणो भवति। मे द्युतिमे द्युतः मे द्युतीत्येवमिहापि प्राप्नोति अनेनिजुः पर्यवेविषुरिति॥
एवं तर्हि वृद्धिर्भवति गुणो भवतीति यत्र ब्रूयात् इक इति तत्रोपस्थितं द्रष्टव्यम्। किं कृतं भवति। द्वितीया षष्ठी प्रादुर्भाव्यते। तत्र कामचारः गृह्य
माणेनेकं विशेषयितुं इका वा गृह्यमाणं। यावता कामचारः॥ ॥४न्नसंभवे४६॥

स्यातां। अचलोः सस्येति चेद्येन नाप्राप्तिन्यायेन तदपवादत्वाद्विप्रतिषेधानुपपत्तिरित्यर्थः। एवं च कौष्ठीयमतमसंबद्धपरिभाषानरैष्वनोपपद्यते॥ एवं तर्हीति। प्रदेशा
र्थत्वादनयोः परिभाषयोर्गुणत्वासरस्परेण संबंधाभावात्प्रदेशवाक्यपर्यालोचनया चाकाशार्थेस्यावस्थानमित्यर्थः॥ पक्ष १॥ ॥

अपचेति। तच्छेषपक्षोक्तदोषपरिहारः। क्षिप्रक्षुद्रयोरपीति॥ अत्र च योगविभागः क्रियते स्थूलादीनां यणादिपरं लुप्यते। ततः पूर्वस्य च गुणः। अत्र च स्वरितत्वात् क्षि
प्रक्षुद्रशब्दावनुवर्त्येते स्थूलादयो निवृत्तास्तेषां तु यणादिलोपे सत्येव गुण इति गुणो भवति। अपि द्वन्द्वाद्यादिस्य सिद्धत्वमनित्यत्वान्न भवति॥ तत्र क्षिप्रक्षुद्रयोश्चा
पण१

इहतावन्मिदिरिम इतिपुगन्तलघूपधच्छिदशिक्षिप्रक्षुद्रेषु गणस्य गुणे नेकं विशेषयिष्यामः। एतेषां यइगिति॥ इहेदानीं जुसि सार्वधातुका
र्द्धधातुकह्रस्वाद्योर्गुणो षिकागत्य मा गां विशेषयिष्यामः। एते पां गुणो भवति इकः इगन्तानामिति॥ अथ वा सर्वत्रैवात्रस्थानी निर्दिश्य
ते॥ इहतावन्मिदे रित्सविभक्तिको निर्देशः। मिदएः मिदेः मिदेरिति अथवा षष्ठी समासो भविष्यति॥ मिदइः मिदिः मिदेरिति। पुगन्त
लघूपधस्येति नैवं विज्ञायते। पुगन्ताङ्गस्य लघूपधस्य चेति। कथं तर्हि पुक्त्विङ्गतः पुगन्तः लघ्वी उपधा लघूपधा पुगन्तश्च लघू
पधाच पुगन्तलघूपधं पुगन्तलघूपधस्येति। अवश्यं चैतदेवं विज्ञेयं। अङ्गविशेषणे सति हम्पसज्येत॥ भिनत्ति छिनत्तीति॥ अ
छे। पिप्रश्लिष्टनिर्देशोयं। अच्छति अऋ ऋतां अच्छत्य्त्तामिति। दृशोः पियोगविभागः करिष्यते। ऋदृशि गुणः। ततो दृशोश्चाङ्गुणो
भवति उ। सेवा क्षिप्रक्षुद्रयोरपि यणादिपरं गुणश्च नीयतासिद्धं। सोयमेवं सिद्धे सति यत्पूर्वग्रहणं करोति तस्यैतत्प्रयोजनं इको यथास्याद्धने
कोमाभूदिति॥ ४:। दशे ४२ ॥

दिः पकारो दकारश्चतस्माद्यणादेः परं लुप्यते तस्मादेव च यणादेः पूर्वस्य गुण इति सिद्धं क्षेपिष्ठः क्षोदिष्ठ इति। यणादिपरमिति पञ्चमी समासः। यदि तर्हि पुगन्तलघू
पधस्येति स्थानी निर्दिश्यते। तच्छेषपक्षाश्रयणाच्चात्रे करिभापानो प्रतिष्ठते तदस्य गुणस्य अनिग्लक्षणत्वात् भिनत्ति छिनत्ति मिसादौ क्ङितिचेति गुणनिषेधो न प्राप्नोति। यथा
लेगवायन इति॥ नैष दोषः॥ क्नुसनोः किद्विधानाज्ज्ञापकात् अनिग्लक्षणेपि लघूपधगुणे संप्रतिषेधो भविष्यति॥ ०॥

गुणविधाविति। क्वचिन्निर्दिश्यत इति न श्रोयवहितेन संबंधः। क्वचिन्निर्दिश्यत एव। श्रोर्गुण इत्यादौ॥ मृजेर्वृद्धिरिति॥ अत्र सूत्रे मिमत स्थान्यनुपादानादलो ऽन्त्यपरिभाषया

अप्राप्य वृद्धिग्रहणं किमर्थं॥ किं विशेषेण वृद्धिग्रहणं चोद्यते न पुनर्गुणग्रहणमपि। यदि किंचिद्गुणग्रहणस्य प्रयोजनमस्ति वृद्धिग्रहणस्या पि तद्भवितुमर्हति॥ को वा विशेषः। अयमस्ति विशेषः॥ गुणविधौ न क्वचित्स्थानी निर्दिश्यते। तत्रावश्यं स्थानिनिर्देशार्थं गुणग्रहणं कर्तव्यं॥ वृद्धिविधौ पुनः सर्वत्रैव स्थानी निर्दिश्यते॥ अचो ञ्णितीति। अत उपधायाः तद्धितेष्वचामादेरिति॥ अत उत्तरं पठति। वृद्धिग्रहणमुत्तरा र्थं॥ वृद्धिग्रहणं क्रियते। किं प्रयोजनं। उत्तरार्थं क्ङिति प्रतिषेधं वक्ष्यति स वृद्धेरपि यथा स्यात्। क्व चेदानीं क्ङित्प्रत्यये गुणवृद्धेः प्रसंगः। ण्या वेनाञ्णितीत्युच्यते। तच्च मृज्यर्थं। मृजेर्वृद्धिरविशेषेणोच्यते। सा क्ङिति मा भूत्॥ मृष्टः। मृष्टवानिति। इहार्थं चापि मृज्यर्थे वृद्धिग्रहणं कर्तव्यं। मृजेर्वृद्धिरविशेषेणोच्यते। से कोयथा स्याद् निको मा भूदिति। मृज्यर्थमिति चेद्योगविभागात्सिद्धं। मृज्यर्थमिति चेद्योगविभागः क रिष्यते॥ मृजेर्वृद्धिरचः। ततो ञ्णिति। ञ्णिति चवृद्धिर्भवति॥ अच इत्येव। यद्यचो वृद्धिरुच्यते। न्यमार्ट्। अटोऽपि वृद्धिः प्राप्नोति॥ अ
॥ टितो ऽन्ते। किमुक्तं अपनं स विकारे समुदेशस्य कार्यं भवतीति॥ ॥ ॥

तस्यैव स्यादित्यर्थः। अटो ऽपीति। नन्वडागमात्पूर्वमेव परत्वाद्वृद्धिर्भविष्यतीति लक्षणस्य प्रवृत्तत्वादरिकृते पुनर्लक्षणं न प्र[redacted]वर्तिष्यते। एवं तर्हि
॥ विप्रतिषेधानपेक्षयैवात्र चोद्यपरिहारावुक्तौ॥ ॥ ॥

अचिकीर्षदिति। पूर्वविप्रतिषेधाद् अतो लोपो यथा चिकीर्षक इत्यादौ। अयासीदिति। परत्वादत्र सिगिटोः कृतयोरनंतरत्वादाकारस्य नास्ति वृद्धिप्रसंग इति यद्यपि परिहा

वृद्धिप्रतिषेधानुपपत्तिरिक्प्रकरणात्॥ वृद्धेस्तु प्रतिषेधो नोपपद्यते। किं कारणं। इक्प्रकरणात्। इग्लक्षणयोर्गुणवृद्ध्योः
प्रतिषेधः। न चैवं सति मृजेरिग्लक्षणा वृद्धिर्भवति। तस्मान्मृजेरिग्लक्षणा वृद्धिरेषितव्या। एवं तर्हि इहान्यैव प्रकरणं मृजेरजा
दौ संक्रमे विभाषा वृद्धिमारभंते। परिमृजंति। परिमार्जंति। परिममृजतुः। परिममार्जतुरित्याद्यर्थं। तदिहापि साध्यं। तस्मि
न्नाद्ये योगविभागः क्रियते। मृजेर्वृद्धिरचो भवति। ततो चिक्ङिति। अजादौ क्ङिति मृजेर्वृद्धिर्भवति। परिमार्जंति। परिमार्जंतु। दे०
किमर्थमिदं। नियमार्थं। अजादावेव क्ङिति नान्यत्र। क्वान्यत्र मा भूत्। मृष्टः। मृष्टवानिति। ततो वा। वा चिक्ङिति मृजेर्वृद्धिर्भव
ति। परिमृजंति। परिमार्जंति। परिममृजतुः। परिममार्जतुरिति। इहार्थमेव तर्हि सिज्ग्रहणं कर्तव्यं। सिचि वृद्धिर
विशेषेणोच्यते। सेको यथा स्यात् इदनिकोर्मा भूदिति। कस्य पुनरनिकः प्राप्नोति। आकारस्य। अचिकीर्षीत्। अजिहीर्षी
त्॥ नैतदस्ति। लोपोऽत्र बाधको भविष्यति। आकारस्य तर्हि प्राप्नोति। अयासीत्। अवासीत्। नास्त्यत्र विशेषः। सत्यां वृद्धाव
सत्यां वा। संध्यक्षरस्य तर्हि प्राप्नोति। नैव संध्यक्षरमंतमस्ति॥ ॥ ॥ ॥

रोऽस्ति तथापि विशेषाभावेन परिहृतत्वान्नाश्रितः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॐ

भा॰कै॰प्र॰ ५४ 54

उदवोढमिति॥ ढलोपादी नाम सिद्धत्वात्पूर्वं हलंतलक्षणा वृद्धिस्ततो ढलोपादिषु कृतेषु [redacted] ढलोपस्या सिद्धत्वादोकारस्य न भविष्यति। गोशब्दाद्दाचारे क्विपि कृते ऽगवीदिति सं
ध्यक्षरमन्त्यमस्ति न स्य कस्माद् वृद्धिर्न भवति॥ उच्यते॥ सिचि वृद्धिरित्यत्र धातुग्रहणमनुवर्तत इग्धातो रिसतन्त्रौ परे शिके धातुग्रहणार्थमनुवर्तनं तदिसहो षः लक्षणं हीति॥ ने
टीति लक्षणामविशेषेण वृद्धिग्रहणमात्रस्य निषेधं कथयतीति ध्वनतीत्युच्यते। योऽस्य यत्नं कथयति ध्वनतीत्युच्यते। एवमिहापि ऽस्या एव वृद्धेर्निषेध इति

ननु चेदमस्ति ढलोपे कृते उदवोढां। उदवोढं उदवोढेति॥ नैतदस्ति॥ असिद्धो ढलोपः। तस्यासिद्धत्वान्नैतदंतं भवति। यं जनसात
र्हि प्राप्नोति। अमैत्सीत्। अच्छैत्सीत्। हलंतलक्षणा वृद्धिर्बाधिका भविष्यति। यत्र तर्हि सा प्रतिषिध्यते नेटीति। अकोषीत् अ
मोषीत्। सिचि वृद्धेरप्येष प्रतिषेधः। कथं॥ लक्षणं हि नाम ध्वनति। भ्रमति मुहूर्तमपि नावतिष्ठते। अथवा सिचि वृद्धिः पर
स्मैपदेष्विति सिचि वृद्धिः प्राप्नोति। तस्या हलंतलक्षणा वृद्धिर्बाधिका। तस्या अपि नेटीति प्रतिषेधः। असिद्धपुनः क्वचिदन्यत्रा
पि अपवादे प्रतिषिद्धे उत्सर्गोऽपि न भवति। असौ साह॥ सुजाते अश्वसूनृते। अध्वर्यो अद्रिभिः सुतं मुक्रं ते अन्यदिति॥
॰ पूर्वरूपेमपि निषिद्धे यादयोऽपि न भवंति॥ ॥ ॥

नास्ति व्यक्तिः। स्यादेतत्॥ प्रतिषेधस्यैक निषेध्ये चरितार्थत्वात्पुनः प्रतिषेधांतरे प्रवृत्तिर्न स्यादिसाह। भ्रमतीति। सर्वत्र व्याप्नोयत इत्यर्थः। स्यादेतत्। यावदेक निषेधोऽस्य
व्यापारस्तावदेव वृद्धिर्नीयो विधिः प्रवृत्तस्य च निषेधो व्याकुलं कृतं मिसाह। मुहूर्तमिति। उभयत्रापि व्यापारान्नैकत्र विश्राम्यतीत्यर्थः। तस्मादपीति। अपि शब्दात्सिचि वृद्धेरपि। असौ सा
हेति॥ नान्तः पादमव्यपर इति पाठमाश्रित्यैवमुक्तं। यद्येवं वृक्षा विसत्रनादिची सने न पूर्वे सवर्णे दीर्घे निषिद्धे वृद्धेरपि निषेधप्रसंगः॥ नैष दोषः। संघोद्वादेशो पकारदंनं
भशनः२ ॰ न रसैनादिचीति निषेधात्॥ x दिसा x ॥ एम॰ ५४

अंतरंगत्वादिति। उवङादेशः सिच मेरा पे क्षते। वृद्धिस्तु सिच्यरस्मैपदे। लुप्तनिर्दिष्ट इति। लोपो व्योर्वलीति भावः॥ किमत्र प्रमाणमिति चेत्। अभ्यियुक्तस्मरणमेव॥ ति

उत्तरार्थमेवेति। अयं भावः। अचैवी दिसादेवाथकांतरावाधितस्मेवन्यनुवी दिसारो क्रितिचेनिवा [redacted] थकांतरबाधितस्यापि गुणस्य विषयसद्भावमात्रेण नाभावबाधेनाचै [redacted] पीति चतुर्थ्यनुवी दिसारो पवलादु वज्ज्मपि दिधीयेत

उत्तरार्थमेव तर्हि सिजर्थे वृद्धिग्रहणं कर्तव्यं। सिचिवृद्धिरविशेषेणोच्यते। सा कृतिमाभूत्॥ न्यनुवीत्। न्यधुवीत्। नैतदस्ति प्रयोजनं। अंतरंगत्वादत्रोवङादेशे [redacted] कृते। नेत्सत्वाद् वृद्धिर्न भविष्यति। यदि तर्हि सिच्यंतरंगं भवति। अकार्षीत्। गुणे कृते रपरत्वे चानेसत्वाद् वृद्धिर्न प्राप्नोति॥ माभूदेवं हलंतस्येत्येवं भविष्यति। इह तर्हि न्यस्तारीत्। न्यदारीत्। गुणे कृते रपरत्वे चानेसत्वाद् वृद्धिर्न प्राप्नोति। हलंतलक्षणायाश्च नेटीति प्रतिषेधः। माभूदेवं। लांतस्येत्येवं भविष्यति। इह तर्हि अलावीत्। अयावीत्। गुणे कृते। वादेशे चानेसत्वाद् वृद्धिर्न प्राप्नोति। हलंतलक्षणायाश्च नेटीति प्रतिषेधः। माभूदेवं। लांतस्येत्येवं भविष्यति। लांतस्येत्युच्यते। न चेदं लांतं। लांते सत्रवकारोपि निर्दिश्यते। किं वकारो न श्रूयते। लुप्तनिर्दिष्टो वकारः। यद्येवं माभवानवीत्। माभवान्मवीत्। अत्रापि प्राप्नोति। अविमव्योर्नेति वक्ष्यामि। तत्कर्तव्यं। न कर्तव्यं। णिश्विभ्यां तौ नियमात व्यौ यद्यप्येतदुच्यते। अथवैतर्हि णिश्व्योः प्रतिषेधो न वक्तव्यो भवति। गुणे कृते। यादेशे चयांतानां नेत्येवं प्रतिषेधो भविष्यति॥ ॥ ॥

मन्यते निमित्तः। अंतस्यनप्राप्नोतीत्येनेनांतस्य व्यंजनस्य प्राप्नोतीति शिष्टांत नस्यापि नास्यपदि।५=
नत्येवं भविष्यती ति हलंतलक्षणमहध्याबाधनाच्च व्यंजनस्य सिचि वृद्धिर्न पिनभविष्यतीति शेषांतस्यावपनावश्तिमादः।५=

श्विभ्यामिति॥ णिश्विग्रहणमकृत्वा अविमवीप्रतिषेधार्थं वक्तव्यौ एवं सति गौरवाभावः॥ नियमात व्याविति॥ मेरोः हृत्वा परिवर्तनीयाविसर्थः॥ ॥ ॥

मा०कै०प्र०
५५

नसिचीति। न्यायार्थं दप्येतत्सिध्यति। येननाप्राप्तिन्यायेनांतरंगस्य वृध्या बाधनात्। प्रयोजनं च चिरिजिर्यो येड्लुगंतानां चनयसादीनां अचिरणीत्। अजिरणीत् अनेनायीत्। अचेचायीत्। इसादौ सिचि वृद्धिः। अस्य यथा गुणयादेशयोः कृतयोर्यान्तलावृद्धिप्रतिषेधः स्यात्। षष्ठ्याइति ॥ स्वनंतत्रमिदं गुणवृद्ध्यो विधायकमिति पूर्वः पक्षः।

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति। नसिच्यंतरंगं भवतीति॥ यदयमतोहलादेर्लघोरिसकारस्य ग्रहणं करोति। कथंकृत्वा ज्ञापकं। अकारग्रहणस्यैतत्प्रयोजनं। इह माभूत्॥ अकोषीत्। अमोषीत्। यदि सिच्यंतरंगं स्यात् अकारग्रहणमनर्थकं स्यात्। गुणे कृते अलघुत्वाद्वृद्धिर्न भविष्यति। पश्यतिलाचार्यः। नसिच्यंतरंगं भवतीति। ततो अकारग्रहणं करोति॥ नैतदस्ति ज्ञापकं। अस्यान्यदेतस्य वचने प्रयोजनं॥ किं। यत्र गुणः प्रतिषिध्यते तदर्थमेतत्स्यात्। न्यकुटीत्॥ न्यपुटीत्॥ यत्र र्हि णिश्व्योः प्रतिषेधं शास्ति तेन नेहांतरंगमस्तीति दर्शयति। यच्च करोत्यकारस्य ग्रहणं लघोरिति कृतेपि। तस्मादिग्लक्षणा वृद्धिः तस्मादिग्लक्षणा वृद्धिरास्थेया। षष्ठ्याः स्थानेयोगत्वादिदिङ्कृतिः। षष्ठ्याः स्थानेयोगत्वात्सर्वेषां इकां निवृत्तिः प्राप्नोति॥ अस्यापि प्राप्नोति। दधि। मधु। पुनर्वचनमिदानीं किमर्थं स्यात्। अन्यतरार्थं पुनर्वचनं। अन्यतरार्थमेतत्स्यात्। सार्वधातुकार्द्धधातुकयोर्गुण एवेति॥ ॥ ॥

अन्यतरार्थमिति। ननु निकोपि यथा स्यादिति विध्यर्थं स्यात् नतु नियमार्थं। नियमाद्विधेर्बलीस्त्वात्। एवं मन्यते द्वितीयं गुणवृद्धिग्रहणमनुवर्त्तते। तेन तद्विपदे शेषु इकइत्यस्योपस्थानान्नास्त्यनिकः प्रसंगः॥ ॥ ॥ रा०म०
५५

प्रसारणे चेति॥ तुल्यन्यायत्वादुपन्यासः॥ इग्यणः इत्यत्र यण इति स्थाने षष्ठी। तेन यणः स्थाने इग्भवतीति स च संप्रसारणसंज्ञ इति वाक्यार्थः स्यात्॥ वाक्यभेदेन च कार्यद्वयं
विधीयते॥ कर्त्तृ हर्त्तृ इति॥ अन्तरतमस्याभावात्सर्वेष्वणः पर्यायेण प्राप्नुवन्ति। सिद्धमिति॥ स्थानेऽन्तरतमे षष्ठी निर्वर्तयति। तेन यत्र षष्ठी तत्रैवास्यामुपस्थानं। अगस्य वच्यादीनां
अन्तरङ्गत्वादोरित्यादेः॥ इमावपीति। स्वरितत्वादनयोरनुवृत्तिर्भिन्नयोगस्थत्वात्संबन्धाभावः॥ अथ वेति॥ षष्ठीस्थाने योगे तत्र योगविभागः करिष्यते। षष्ठीपदेन
तदनुवर्तते न यत्र षष्ठी तत्रोपतिष्ठते इत्यर्थः॥ तत्र योगस्थत्वादनयोरेवापेक्षा नान्येषां। ततः स्थानेयोगे इति। षष्ठी सेनरुपतिष्ठते। अथ वेति। अन्यतरार्थे पुनरिति वचनात्ष्व

प्रसारणे च॥ प्रसारणे च सर्वेषां यणां निवृत्तिः प्राप्नोति॥ अस्यापि प्राप्नोति॥ याता वाता पुनर्वचनमिदानीं किमर्थं स्यात्॥ विषयार्थं पु-
नर्वचनं॥ विषयार्थमेतत्स्यात्। वचिस्वपियजादीनां किसेवेति। उरण् परे च। उरण् परे च [redacted] सर्वेषां अकाराणां निवृत्तिः प्राप्नो-
ति। अस्यापि प्राप्नोति॥ कर्त्तृ। हर्त्तृ॥ सिद्धं तु षष्ठ्यधिकारे वचनात्॥ सिद्धमेतत्॥ कथं॥ षष्ठ्यधिकारे इमे योगाः कर्त्तव्याः॥ एकस्तावत्क्रियते।
तत्रैवेमावपि योगौ षष्ठ्यधिकारमनुवर्तिष्येते॥ अथवा षष्ठ्यधिकारे इमौ योगावपेक्षिष्यामहे॥ अथ वेदं तावदयं प्रष्टव्यः॥ सार्वधातुकयोर्गुणो आर्द्धधातुक
भवतीति॥ इह कस्मान्न भवति। याता। वाता॥ इदं तत्रापेक्षिष्यते। इको गुणवृद्धी इति। यथैव तर्हि इदं तत्रापेक्षिष्यते। एवमिहापि तदपेक्षिष्यामहे। सा-
र्वधातुकार्द्धधातुकयोरिको गुणवृद्धी इति॥ ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्यास्य प्रथमे पादे तृतीयमाह्निकम्॥
ध्याय

रूपमेवं संबन्धः कर्त्तव्यः यत्र गुणवृद्धिशब्दाभ्यामुच्चारणेन गुणवृद्धी विधीयेते तत्रेकुपतिष्ठत इति॥ अन्यथा याता वातेत्यादिषु विध्यर्थत्वे संभवति कथमन्यतरार्थं स्यात्पुनर्वचनं स्या-
दित्युच्येत। अवश्यकर्त्तव्यायामेकवाक्यतायैवापेक्षा तु॥ तेनैकरूप एवार्थो न तु वाक्यभेदेन स्थानेऽन्तरतमे पारतन्त्र्ये च तदपेक्षिष्यामह इति। अस्य स्थानेऽन्तरतमे निरसितुमित्यर्थः॥ ॥
इत्युपाध्यायजय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे प्रथमाध्यायस्य प्रथमे पादे तृतीयमाह्निकं॥ ॥१॥ ॥१॥ ॥

वापेक्षायां २

भा० कै० प्र०
५६
56

नधातुलोपआर्द्धधातुके॥ गुणवृद्ध्योः प्राप्तयोरयं निषेधो न तु तदुणभावादिकयरिमापायाः दीधीवेवीटामिति चकारसंबद्धपरिभाषाप्राप्तनिषेधे स्यात् गच्छतस्तस्य धातोर्लोपे गुणवृद्धिप्रसंगाभावादनर्थको निषेधः स्यादिति सामर्थ्याद्धातुलेकदेशलोपोऽत्र धातुलोपोऽभिमतः। अवयवक्रियापि समुदाये व्यपदेशदर्शनात्। यथा पटोदग्ध इति। अथवा समुदायशब्दोऽवयवेतद्रूपारोपाद्वर्तते॥ धातुग्रहणमिति॥ उपसर्जनस्यापि यथा परामर्शस्तथाके चांशव्याख्यानाभिसत्त्रप्रतिपादितं॥ विनापिधातुग्रहणेन लोपविशेषणमार्द्धधातुकग्रहणं विज्ञास्यते अनुबंधलोपस्य चानैमित्तिकत्वाद्भवितेति गुणनिषेधो न भविष्यतीति प्रश्नः। सिद्धान्ते तु गुणवृद्धिविशेषणमा

नधातुलोपआर्द्धधातुके॥ धातुग्रहणं किमर्थं। इहमाभूत्॥ लूञ्। लविता लवितुं॥ पूञ्। पविता। पवितुं॥ आर्द्धधातुक इति किमर्थं त्रिधा बद्धो वृषभो रोरवीति। किं पुनरिदमार्द्धधातुकग्रहणं लोपविशेषणं। आर्द्धधातुकनिमित्ते लोपे सति ये गुणवृद्धी प्राप्नुत इति। आहोस्विद्गुणवृद्धिविशेषणमार्द्धधातुकग्रहणं। धातुलोपे सत्यार्द्धधातुकनिमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति॥ ॥
सेननमवत४१

र्द्धधातुकग्रहणमिति भिप्रायः। अनुबंधो न धातेकदेशः। यस्मादुपदेश एवेत्संज्ञा प्रयोगे तु लूशब्दस्यैव धातुसंज्ञः केवलमसौ निर्लकार्यं लमते। लूशब्दस्य हि क्रियावाचित्वमिति तस्यैव धातुसंज्ञा युक्ता। रोरवीति॥ सत्यार्द्धधातुकग्रहणे शब्दवत्वादन्यपदार्थस्य बहुव्रीहिरसंदिग्धोपवृत्तिनान्यथा। क्रमेण सूत्रप्रत्याख्यानायार्द्धधातुकस्य चलोपविशेषणत्वे धातुग्रहणानर्थक्यप्रतिपादनाय प्रस्तुतग्रहणोपन्यासः। किं पुनरिति। आर्द्धधातुकं लोपविशेषणं गुणवृद्धिविशेषणं वा। बहुव्रीहिग्रहणेनोभयविशेषणं वेति प्रश्नत्रयसं एम०
तीर ग्रहणं१ ९ भवतस्प्रश्नः॥ ग्रहणं ॥ ॥ ५६

प्रेद्ध इति। नन्वाद्गुणोऽनिग्लक्षण इति तन्निषेधो न भविष्यति। परिहारान्तराभिधानार्थे तन्नाश्रितमित्यदोषः। बहिरङ्ग इति। यदा पूर्वं प्रत्ययः पश्चादुपसर्गयोगस्तदा प्रतिषेधोऽन्त-
रङ्गः। यदा तु पूर्वमुपसर्गयोगस्तदा गुणोऽन्तरङ्गः पश्चात्प्रत्ययोत्पत्तौ निषेधो बहिरङ्गः। सर्वथा बहिरङ्गस्यासिद्धत्वादिष्टसिद्धिः। ननु नाजानन्तर्ये इति निषेधान्नायं परिभाषाप्र-
वृत्तिः। यत्र कार्यविधावानन्तर्येणाचोराश्रयणं तत्र निषेधादनुपस्थानं परिभाषायां यथाऽक्षद्यूरिति। नत्रेही कोयणाचीति वचनादिग्वोराश्रयणां। अस्मिंस्तु प्रतिषेधस-
रङ्गः। गुणस्तु बहिरङ्ग

किं चातः। यदि लोपविशेषणं उपेद्धः प्रेद्धः अत्रापि प्राप्नोति। अथ गुणवृद्धिविशेषणं क्नोपयतीत्यत्रापि प्राप्नोति॥ यथेच्छसि तथास्तु॥ अस्तु लो-
पविशेषणं कथं। उपेद्धः प्रेद्ध इति। बहिरङ्गो गुणोऽन्तरङ्गः प्रतिषेधः। असिद्धं बहिरङ्गमन्तरङ्गे यद्येवं नार्थो धातुग्रहणेन। इह कस्मान्न भवति। लू-
त्वा। लविता। लवितुं। आर्धधातुकनिमित्ते लोपे प्रतिषेधः। न चैष आर्धधातुकनिमित्तो लोपः॥ अथवा पुनरस्तु गुणवृद्धिविशेषणं। ननु
चोक्तं। क्नोपयतीत्यत्रापि प्राप्नोति। नैष दोषः। निपातनात्सिद्धं। किं निपातनं। चेलेक्नोपेरिति॥ परिगणनं कर्तव्यं॥ यङ्यक्क्यवलोपे प्र-
तिषेधः। यङ्यक्क्यवलोपे प्रतिषेधो वक्तव्यः। यङ्। बेभिदिता। मरीमृजः। यक्। कुषुभिता मगधकः। क्य। समिधिता दृषदकः। वलोपे।
ऽजीरदानुः। किं प्रयोजनं॥ ॥ ॥

तेनास्य चोराश्रयणमित्यदोषः। यङ्यक्क्यवलोप इति। व इत्यत्राकारोऽपि विवक्षितः। तेन धातुपाठे योऽकारान्तः पठितस्तस्य ग्रहणं। अन्यथा त्विविः कथं निवार्येत। बेभि-
दितेति। बेभिद्य इत्यस्माद्यङन्तात्तृच्। यस्य हल इति यलोपः। मरीमृज इति। यङोऽचि चेति यङो लुक्। कुषुभ मगध शब्दौ कण्ड्वादिगणे पठितौ धातू ताभ्यां यक्। ण्वुल्तृचौ। यस्य
हल इति यलोपः। समिध् दृषद् शब्दाभ्यां क्यजन्ताभ्यां प्रत्ययः। क्यस्य विभाषा इति यलोपः॥ ॥श्री॥ ॥ ॥

नुम्लोप इति। नुमिति नकारस्य पूर्वाचार्यसंज्ञा। उपबर्हणमिति। तृहि बृहि इति इदित्वान्नुम्। बृंहेरच्यनिटीति वा णिचि नलोपः। आस्तेमाणमिति। आस्तेमाणमित्यस्य ष्ठिवेरेषप्रत्य
ते। तत्र नञ्पूर्वात्ष्ठिवेर्मनिन् प्रत्ययः। ऊठादेशः। छान्दसत्वान्न भवति। पुरिगणने सति धातुग्रहणं न कर्तव्यं भवति इह अनुबन्धलोपः प्रयोजनत्वेन पठितः। इक्प्रकरणादि

नुम्लोपश्वित्यनुबन्धलोपे प्रतिषेधार्थं। नुम्लोपे श्वित्यनुबन्धलोपे च प्रतिषेधो मा भूदिति। नुम्लोपे—अभाजि। रागः। उपबर्हणं। श्विवेः। आस्ते
माणं। अनुबन्धलोपे। लूञ्। लविता। लवितुं॥ यदि पुरिगणनं क्रियते। स्पृदः। प्रश्नथः। हिमश्रथ इत्यत्र पि प्राप्नोति॥ वक्ष्यते तत्र। निपातना
त्स्पृदादिष्विति। तत्र हि पुरिगणनं कर्तव्यं। न कर्तव्यं। नुम्लोपे कस्मान्न भवति। इक्प्रकरणान्नुम्लोपे वृद्धिः। इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषे
धः। नचैषेग्लक्षणा वृद्धिः। यदीग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। स्पृदः। प्रश्नथः। हिमश्रथ इत्यत्र न प्राप्नोति। इह च प्राप्नोति। अ
वोदः। एधः। ओद्म इति। निपातनात्स्पृदादिषु। निपातनात्स्पृदादिषु प्रतिषेधो भविष्यति। न च भविष्यति। यदीग्लक्षणयोर्गुणवृ
द्ध्योः प्रतिषेधः। श्वित्यनुबन्धलोपे कथं। प्रत्ययाश्रयत्वादन्यत्र सिद्धं। आर्धधातुकनिमित्ते लोपे प्रतिषेधः। नचैष आर्धधातुकनिमि
त्तो लोपः। यथार्धधातुकनिमित्ते लोपे प्रतिषेधः। जीरदानुः। अत्र न प्राप्नोति। रकि ज्यः संप्रसारणं। जे तज्जीवेरूपं। रकोऽन ज्यः संप्रसारणं भव
ति। यावता चेदानीं रकि जीवेरपि सिद्धं भवति। कथमुपबर्हणं। बृंहिः प्रकृत्यन्तरं। कथं विज्ञायते बृंहिः प्रकृत्यन्तरमिति॥ ॥

ति। तेन यत्रेकपरिभाषा स्यात् तत्र निवृत्तये या प्रियते तत्रायं निषेधः। प्रत्ययाश्रयत्वादिति। लोपविशेषणमार्धधातुकग्रहणमित्यर्थः। जीरदानुरिति। वर्णनिमित्तो वका
रलोपो न प्रत्ययनिमित्तः। रकि ज्य इति। एवं च जीरे वक्रग्रहः सिद्ध्यति। बहुव्रीहित्वाच्च जीरदानुशब्दे रेफाकार उदात्तः। बृहिरिति। बृहि वृद्धावितिपाठात्॥ ॥

हह १

मेघतन इति गुणे णिलोपश्चार्द्धधातुकनिमित्त इति पक्षद्वयेपि दोषः अपवादविषयपरिहारश्चांतरंगेपि गुणोत्र न प्रवर्त्तेत इत्युपन्यासः कथं तर्हीति वरुत्री हैससे व्रा

अचीति हि लोप उच्यते। अनजादावपि दृश्यते। निवृह्यते। अनिटीति चोच्यते। इडादावपि दृश्यते। निबर्हिता॥ निबर्हितुमिति। अजादावपि न दृश्यते। बृंहयति। बृंहकः॥ तस्मान्नार्थः परिगणनेन॥ यदि परिगणनं न क्रियते। मेघितेछेघते। अत्रापि प्राप्नोति॥ नैष दोषः॥ धातुलोप इति नैवं विज्ञायते। धातोर्लोपो धातुलोपो धातुलोप इति। कथं तर्हि धातोर्लोपो यस्मिन्निदं धातुलोपं धातुलोप इति॥ तस्मादिग्लक्षणा वृद्धिः। यदि तर्हि इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। पापचकः। पापठकः। मगधकः। दृषदकः। अत्र न प्राप्नोति। अल्लोपस्य स्थानिवत्त्वात् अकारलोपे कृते तस्य स्थानिवद्भावात् गुणवृद्धी न भविष्यतः॥ अनारंभो वा अनारंभो वा पुनरस्य योगस्य न्याय्यः। कथं बेभिदिता कुषुभिता स्निधिता इति। अचो यकारलोपे कृते तस्य स्थानिवद्भावात् गुणो नास्ति। यत्र हलचो रादेशः। लोलुवः। पोपुवः। मरीमृजः। सरीसृप इति। अत्र यकारलोपे कृते तस्य स्थानिवद्भावात् गुणवृद्धी न भविष्यतः॥ लुकि कृते न प्राप्नोति। इदमिह संप्रधार्यं। लुक् क्रियतामल्लोप इति। किमत्र कर्तव्यं। परत्वादल्लोपः। नित्यो लुक्। कृतेप्यल्लोपे प्राप्नोत्यकृतेपि प्राप्नोति॥ लुगप्यनित्यः। कथं। अन्यस्य कृते प्राप्नोति। अन्यस्याकृते। श मरीमृजकः ५

×द्धी न भविष्यतः। यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः। कथं स्थानिवद्भावो× ॥ शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति॥ ॥

ई धातुकनिमित्तत्वं लोपस्य गुणवृद्ध्योश्चाश्रितमिति मेघते इत्यादौ भिन्ननिमित्तत्वाद् गुणो निषिध्यते। यत्र हलचो रादेश इति। लुका लस्लोप इ- लुप्यत इत्याशयः।

" अत्रापीति। कृते यकारलोपे एकदेशविकृतमनन्यवद्भवतीति यकारोपसंज्ञो भवत्येवेति भावः। नित्यो लुगिति। लुक्शास्त्रप्रवृत्तिर्नित्या॥०॥

र॰प्रस॰

भा०कै०प्र० ५८ 58

कागर

अनवकाश इति॥ नाप्राप्ते लोपे लुगारंभात्। सावकाश इति। भिन्नविषयौ लुग्लोपौ अकारस्य लोपो यकारस्य लुक्। ततश्च नास्ति येन नाप्राप्तिन्यायः। अपापीति। यञोऽचि चेत्यनेन यकारस्य लुग्विधानात् यञः इति निर्दिष्टस्य विवक्षितत्वादवयवे चयञ् व्यपदेशस्य गौणत्वादिति भावः। समानाश्रय इति। तुल्यकालत्वादिति भावः। नोनावेत्य

नलुबकुल [redacted] य हणानुहसा अनैमिमिजिकोंतरंगोलुक्यागेव प्रत्ययोत्पत्ते भवति॥ निकुचितइति। किल संयोगेन नलोपे सति उपध

द्वि०

अनवकाशस्तर्हि लुक्॥ सावकाशो लुक्। कोऽवकाशः। अवशिष्टः। अप्यापि कथं चिदनवकाशो लुक्तस्मादेवमपि न दोषः। अल्लोपे योगविभाग

ः करिष्यते। अतो लोपः। ततो यस्य। यस्य च लोपो भवति। अत इत्येव। किमर्थमिदम्। लुकं वक्ष्यति तद्बाधनार्थम्। ततो हलः। हल उत्तरस्य यस्य च लो

पो भवति॥ इह तर्हि परत्वाद्योगविभागात् ह्लालोपः लुकं बाधेत। कष्टो नोनावर्हष्भोय दीदं। नोनूयते नैनावं समानाश्रयो लुग्लोपेन बाध्यते॥

कथ्य समानाश्रयः। यः प्रत्ययाश्रयः। अत्र च प्रागेव प्रत्ययोत्पत्ते लुग्भवति। कथं स्पर्द्धः। प्रश्रयः। हिमश्रथः। जीरदानुः। निकुचित इति

उक्ते शेषे किमुक्तं। निपातनात्स्पर्द्धादिषु। [redacted]। एकिज्यः संप्रसारणं निकुचिते षु उक्ते किं सच्चिपातलक्षणो विधिरनिमित्तं तद्वि

॥घातस्येति॥ ॥ ॥

त्वमिति निमित्तमकित्वस्य न भवति। यदि तर्ह्येकारलोपः क्रियते तदा जंगम इ सन्त स्य स्थानिवद्भावा उपधालोपः प्राप्नोति। नैष दोषः॥ अनदीति प्रतिषेधात्। अनर्थ

कोऽयमङिति चेत्। लोपस्यापि तर्ह्यप्राप्तिः॥ अजादौ प्रत्यये तस्य विधानात्। ननु लोलुवादिष्ववरादयः स्थानिवद्भावेन न सिध्यंति तेषां स्थान्यदर्शनात् [redacted] त्वं भवमात्रेणाप्यति एम० ५८

॥देशो भवतीत्यदोषः॥ ॥७॥ ॥८॥ ॥

क्ङिति च॥ क्ङिति प्रतिषेध इति। इक इत्यनुवर्त्तते गुणवृद्धी इति च। तत्र यदीक् क्ङितीत्यनेन विशेष्यते क्ङिति परतो य इगिति तदा तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषो-
पस्थानान्निर्दिष्टग्रहणस्य चानन्तर्यार्थत्वाच्चितं स्तुतमित्यादावेव निषेधः स्यात् न तु भिन्नं भिन्नवानिति तन्निमित्तग्रहणं कर्त्तव्यं। यदा तु क्ङिद्ग्रहणं गुणवृद्धिविशे-
षणं तदा परसप्तम्या अप्रसंग एव नहि विहितयोर्निषेधः। अपि तु निमित्तयोरेवेति परिभाषानुपस्थानान्निमित्तसप्तम्येव क्ङितीति भवति क्ङिन्निमित्ता हि तयोः

क्ङिति च॥ क्ङिति प्रतिषेधे तन्निमित्तग्रहणं॥ क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्त्तव्यं। क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवत इति वक्तव्यं।
किं प्रयोजनं। उपधारोरवीत्यर्थं उपधार्थं रोरवीत्यर्थं च। उपधार्थं तावत्। भिन्नः। भिन्नवानिति। किं पुनः कारणं न सिध्यति। क्ङितीत्यु-
च्यते। यत्र क्ङित्यनन्तरो गुणभाव्यस्ति। तत्रैव स्यात्। चितं। स्तुतं। इह तु न स्यात्। भिन्नः। भिन्नवानिति॥ ननु च यस्य गुण उच्यते तं
क्ङित्परत्वेन विशेषयिष्यामः। पुगन्तलघूपधस्याङ्गस्य गुण उच्यते तच्चात्र क्ङित्परं॥ पुगन्तलघूपधस्येति नैवं विज्ञायते पुगन्तस्या-
ङ्गस्य लघूपधस्य चेति। कथं तर्हि। पुकि यदङ्गं पुगन्तः लघ्वी उपधा लघूपधा पुगन्तश्च लघूपधा च पुगन्तलघूपधं पुगन्तलघू-
पधस्येति। अवश्यं चैतदेवं विज्ञेयं। अङ्गविशेषणे सति इह प्रसज्येत। भिनत्ति। छिनत्तीति॥ ॥ ॥

प्रवृत्तिः। उपधारोरवीत्यर्थमिति। उपधाया अपीकः प्रतिषेधार्थं रोरवीतेर्यङ्निमित्तप्रतिषेधनिवृत्त्यर्थम्। अत्र हि तिपि निमित्ते गुणो न यङ्निमित्तः। ननु
चेति॥ आकांक्षया पुगन्तलघूपधस्येति सन्निधानं मन्यते। तथा हि। क्ङिति गुणवृद्धी न भवत इत्युक्ते कस्येत्याकांक्षायां यस्य प्राप्ते इत्यस्ति पुगन्तलघूपधस्यापेक्षा
। अथवा क्ङितीति सप्तमीग्रहणमत्र सत्येनाङ्गस्य विधाप्यते तत्र च क्ङिति भिन्नमित्यादौ लघूपधस्यानन्तर्यात्सिद्धो निषेधः। लघूपधस्येति तत्समुदायनिर्देशा-
((देव पवस्य चेको व्यवधानात्तस्य स्थैर्ये वा प्राप्तिरित्यर्थः॥ तन्निमित्तपदस्य पिदुष्टनामाह॥ ||

शाचरं. ते दोष इति। सार्वधातुकनिमित्तस्य गुणस्य निषेधे पिल्लघूपधलक्षणनिषेधाप्रसंगः इत्यर्थः। रियति पियतीति। रि पि गतौ धि धारणे इति तुदादौ पाठः। ह्नुतो ह्नुय इति। यथै
वादिप्रभृतिभ्यः शप इति शब्निवर्त्यते एवमकारोपि निषेधे न निवर्त्यते स्यादाशयः। न मित्तलक्षणोयं गुणो न भवतीति निषेधाप्रसंगः। सत्यम्॥ परिहारान्तरसंभवान्नै
तदाश्रितं॥ प्रसक्तस्येति॥ सामान्यलक्षणेन विशेषलक्षणपरामर्शेन यस्मात्पुनर्विशेषलक्षणपरामर्शो नाद्यत्स्वरूपेणानभिनिर्वृत्तं तस्य निवृत्तिः क्रियते।
परमार्थतस्तूत्सर्गापवादयोरेकवाक्यतया मध्यमानुमानेन बाध इति सिद्धान्तः। चित्तमित्यादौ च प्रसक्तानभिनिर्वृत्तगुणनिषेधे वचनस्य चरितार्थत्वाद्ध्नुतो ह्नुय इति भूता

ऐरवीत्यर्थम्॥ त्रिधाबद्धो वृषभो रोरवीति॥ यदि तन्निमित्तग्रहणं क्रियते॥ शाचरं. ते दोषः॥ रियति। पियति। धियति। प्रा उ ह्नुवत्। प्रास्तुस्तुव
त्॥ अत्र न प्राप्नोति॥ शाचरं. तस्यान्तरंगलक्षणत्वात्॥ अन्तरंगत्वादत्रेयङ्उवङोः कृतयोरलुपधात्वाद्गुणो न भविष्यति॥ एवं क्रियते चे
दं तन्निमित्तग्रहणं। न च कश्चिद्दोषो भवति॥ इमानि च भूयस्तन्निमित्तग्रहणस्य प्रयोजनानि॥ ह्नुतो ह्नुयः। उपोयते। औयत। लौयमानिः।
पौयमानिः। नेनिक्त इति॥ नैतानि सन्ति प्रयोजनानि॥ इहतावत् ह्नुतो ह्नुय इति। प्रसक्तस्यानभिनिर्वृत्तस्य प्रतिषेधेन निवृत्तिः श
क्या कर्त्तुं॥ अयं धातूपदेशावस्थायामेवाकारः। इह चोपोयते औयत लौयमानिः पौयमानिरिति। बहिरंगे गुणवृद्धी। अन्तरंगः प्रतिषेधः
। असिद्धं बहिरंगमन्तरंगे। नेनिक्त इति परस्तपेण व्यवहितत्वान्न भविष्यति॥ ॥ ॥

कारनिवृत्तावव्यापारः। अदिप्रभृतिभ्य इत्यनेन लुगसंभवाभावात्तन्नेव प्रक्रियादशायां शब्निवर्त्यते। नन्वेवं भवत इत्यादौ प्रसक्तोऽनभिनिर्वृत्त एव शवकारः कस्मादनेनन
निवर्त्यते। नैष दोषः॥ शब्भवतीत्यस्यां चोदनायां गुणरूपेण चोदनान्वायं गुणनिषेधविषयः॥ उपोयत इति। वेञो यकि सम्प्रसारणे कृते उभयपदाश्रितत्वाद्बहिरंगो गु
णः। औयत इत्यादौ बहिरंगा अयत्वाद्वृद्धिर्बहिरंगा। नेनिक्त इति। किं स्थानेऽङ्गस्य विशेषणाद् इ उ. संज्ञकार्यित्वात्पूर्वं प्रश्नः॥ उत्तरं त्वभ्यासकार्यित्वात्तस्य च पररूपेण व्यव एम०
॥ धानादिति॥ ॥ ॥ ५९

धातुं क्ङित्सरल्लेनेति। न धातुलोप इत्यत्रोपसर्जनेऽपि धातौ धातुग्रहणमात्रस्य स्वरितत्वादिहानुवृत्तिरित्यर्थः। यदीति। क्ङित्सनंतरस्य धातोर्गुणवृद्धी न भवत इति वाक्यार्थे मत्वा प्रश्नः। धातोरेवेति। धातोर्विहितस्य क्ङित्सनंतरस्येति मत्वा प्रश्नः॥ धातोर्विहित इति। धातोर्विहिते क्ङित्सनंतरे यो धातुर्विकारस्तस्य प्रतिषेध इत्यर्थः। अथवेति। यत्र गुणवृद्धी विधीयेते तत्र क्ङिति नेत्युपतिष्ठत इत्येवमियं परिभाषा भवति। तत्र पुगंतलघूपधस्य सन्नाम्ना उपस्थाने सति येन नाव्यवधानमिति भिन्नमित्यादौ निषेधो भविष्य-

उपधार्थेन तावन्नार्थः। धातोरिति वर्त्तते। धातुं क्ङित्सरल्लेन विशेषयिष्यामः॥ यदि धातुर्विशेष्यते विकरणस्य न प्राप्नोति। चिनुतः। सुनुतः। लुनीतः। पुनीत इति। नैष दोषः। विहितविशेषणं धातुग्रहणं धातोर्यो विहित इति। धातोरेव तर्हि न प्राप्नोति। नैवं विज्ञायते धातोर्विहितस्य क्ङितीति। कथं तर्हि धातोर्विहिते क्ङितीति। अथवा कार्यकालं संज्ञापरिभाषं। यत्र कार्यं तत्र द्रष्टव्यं। पुगंतलघूपधस्य सुपस्थितमिदं भवति। क्ङिति नेति। अथवा यदेतस्मिन्योगे क्ङिद्ग्रहणं तदनवकाशं तस्यानवकाशत्वाद्गुणवृद्धी न भविष्यतः॥ अथवाचार्यप्रवृत्तिर्ज्ञापयति भवत्युपधालक्षणस्य प्रतिषेध इति। यदयं त्रसिगृधिधृषिक्षिपेः क्नुः। इको झल्। हलंताच्चेति क्नुसनौ कितौ करोति। कथं कृत्वा ज्ञापकं। कित्करणे एतत्प्रयोजनं गुणः कथं न स्यादिति। यदि चात्र गुणप्रतिषेधो न स्यात् कित्करणमनर्थकं स्यात्। पश्यति त्वाचार्यो भवत्युपधालक्षणस्यापि गुणस्य प्रतिषेध इति। ततः क्नुसनौ कितौ करोति॥ " "

ति। अथवेति। मा भूत्परिभाषा तथापि प्रतिषेधस्य प्रतिषेध्यापेक्षायां यावंतो यादृशाः प्रतिषेद्धव्यास्तावंतः प्रतिषेध्यसूत्राणीति पुगंतलघूपधगुणे प्रतिषेध्येऽनवकाशः प्रतिषेधो व्यवहितेऽपि प्रवर्त्तते। अथवा यथोद्देशपक्षाश्रयेण भाष्यं। तथा हि प्रधानान्यात्मसंस्कारायसन्निधीयमानानि गुणाभेदं प्रयुंजत इति यदेतस्मिन्नित्युक्तं। अथवेति। लिंगान्निर्दिष्टांगविकला तस्मिन्निति परिभाषा प्रतिष्ठित इत्यर्थः। अनेकपरिहारोपन्यासो न्यायव्युत्पादनार्थः॥ " "

न्ति

भा॰कै॰प्र॰ ६० 60 बहिरंग इति। ततश्चासिद्धत्वान्निषेधानुपपत्तिरित्यर्थः। अथवेति। ननु वृकूबीत्यर्थमुभयविधेषुणायार्द्धधातुकग्रहणं स्यादिति कथमनवकाशत्वम्। उच्यते। विनाप्यार्द्ध
धातुकग्रहणे नवृकु ब्रीहि लभ्यते यथेकाचो ह्रेइत्यत्र गोरवीसत्रानेमित्ति कत्वाद्योपस्य गुणनिषेधः। पूर्वेण न प्राप्नोतीत्यार्द्धधातुकग्रहणसामर्थ्यात्तत्रांतरप्राप्तोपि निषे
धो बाध्यतइत्यर्थः। यङ्लि मित्तस्य निषेधो तरंगत्वाद्बाध्यते न सार्वधातुकनिमित्तइति गोरुत इत्यादौ निषेधो भवत्येव। एतच्च सां दसत्वमभ्युपेत्य यङ्लुको भाष्यकारेण

गोरवीत्यर्थे नापि नार्थः। क्ङिती लुच्यते। न चात्र क्ङितं दि. तेवाप श्यामः॥ प्रत्ययलक्षणेन प्राप्नोति। न लुमतात स्मिन्निति प्रत्ययलक्षण
प्रतिषेधः। अथापि लुमतांगस्य लुच्यते एवमपि न दोषः। कथं। न लुमतालुमतां लुक्अंगाधिकारः प्रतिनिर्दिश्यते। किं तर्हियो सौ लु
मतालुप्यते तस्मिन्पदेंगतस्य यत्कार्यं तन्न भवतीति। अथाप्यंगाधिकारः प्रतिनिर्दिश्यते एवमपि न दोषः। कथं कार्यकालं संज्ञा
परिभाषं। यत्र कार्यं तत्र द्रष्टव्यं। सार्वधातुकार्द्धधातुकयोर्गुणो भवतीत्युपस्थितमिदं भवति क्ङितिनेति। अथवा छांदसमेतत्। द
ष्टानुविधिश्छंदसि भवति। अथवा बहिरंगो गुणो [redacted] तरंगः प्रतिषेधः। असिद्धं बहिरंगमंतरंगे। अथवा पूर्वस्मिन्योगे यदार्द्धधा
तुकग्रहणं तदनवकाशं तस्यानवकाशत्वाद्गुणो भविष्यति। इह कस्मान्न भवति। लैगवायनः कामयते। न द्वितकाम्योरिकप्रकर
णात्। इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैते इग्लक्षणे॥ ॥

क्ङिमात्रविषयत्वेतुयङ्लुको वृकूनिप्रयोजनान्यार्द्धधातुकग्रहणस्य संभवंति। नोनोर्ति। [redacted] दोदोर्ति। दोधोर्ति। जोहोर्ति। मोमोर्ति। इत्यादिषु तुवी उवी धुवीत्या
दिष्वपि यङ्लुकि तिपि वकारछकारयोरात्योपइति लोपे कृते सत्यार्द्धधातुकग्रहणेवरुब्रीहावुपाश्रिते न धातुलोप इति गुणनिषेधः प्राप्नोति स मा भूदित्येवमर्थमार्द्धधातुकग्रहणं स्यात्। अनेन चात्र व्यवधानान्नास्ति निषेध इति प्रयोजने कथमनवकाशं स्यात्। इग्लक्षणयोरिति। इकइत्येवं येगुणवृद्धी तयोर्निषेध इत्यर्थः॥०॥ पाम॰ ६०

सति॰

लकारस्येति॥ अनुबंधर इत्संज्ञकस्य लोपात्स्थानिनि तन्निमित्ते सन्निधीयत इत्यसन्निधावितिनिषेधो न प्रवर्तते। पिच्चडि॰त्त्वं भवतीति डि॰च्चपित्त्वं भवतीतिभाष्यकारस्य कल्पनं नवा न्तेकारस्येति दोषोपन्यासः। कथं निसंवडि॰त इति। ननु डि॰तो लकारस्येति तत्रार्थः स्थितो ननु डि॰त आदेशस्येति। अन्यथा पचावः पचेतीति लोपः स्यात् एवं मन्यते। यासु टो डि॰त्वेन ज्ञापकेन स्थानिनि एव लकारस्य डि॰त्वं व्यपदेश उच्छिद्यते। ड॰कारोच्चारणं तु लुङ् लङ् लृङ् इत्येषां दोषविशेषणार्थं स्यात्। डि॰तो यदिति। स्थानिवद्भावेन लादेशो डि॰तियत्कार्यं प्रवृत्तस्य तच्च भवतीति ज्ञाप्यते ननु स्थानिन एव डि॰त्वं व्यपदेश उच्छिद्यते॥ अन्यथा निसंवडि॰त इति निर्विषयं स्यात्। यासुटः एवेति। डि॰तो यत्कार्यं तद्यासुटो न किंचि

लकारस्य डि॰त्त्वादादेशेषु स्थानिवद्भावप्रसंगः। लकारस्य डि॰त्त्वादादेशेषु स्थानिवद्भावः प्राप्नोति। अचिनवं असुनवं अकरवं लकारस्य डि॰त्त्वादादेशेषु स्थानिवद्भावप्रसंग इति चेद्यासुटो डि॰द्वचनात् सिद्धं। यद्ययं यासुटो डि॰द्वचनं शास्ति। तज्ज्ञापयत्याचार्यो न डि॰दादेशाः डि॰तो भवंतीति। यद्येतज्ज्ञाप्यते कथं निसंवडि॰त इत्युक्तमिति। डि॰तो यत्कार्यं तद्भवति डि॰ति यत्कार्यं तन्न भवति। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। यासुटः एव डि॰द्वचनात्। अपर्याप्तश्चैव हि यासुट् समुदायस्य डि॰त्वे डि॰त्त्वं चैनं करोति। तस्यैतत्प्रयोजनं डि॰तो यत्कार्यं तद्यथा स्यात् डि॰ति यत्कार्यं तन्मा भूदिति। कृ॰तिच॥ ॥ ॥

दतिदेशव्यप तिकिं नु डि॰ति यत्कार्यं विधीयते संप्रसारणादिकं तदतिदिश्यते। तच्च स्थानिवद्भावात् स्यादतिदेशोऽनर्थकः स्यादिस तिदेशः क्रियमाणो डि॰ति यत्कार्यं तदभावस्यैव ज्ञापकः। अपर्याप्तश्चेति। समुदायस्य डि॰त्वव्यपदेशे कर्तव्ये यासुडसमर्थः। यासुट् एव त्वनेन डि॰त्त्वं क्रियते न समुदायस्य। कृ॰तिचेत्यत्र तन्निमित्तग्रहणस्य प्रत्याख्यातत्वादगुणनिमित्तेपि यासुटि डि॰तिगुणनिषेधः सिध्यति। यदि समुदायस्य स्थानिवद्भावेन डि॰त्कार्यं मम भविष्यत् यासुटो डि॰त्त्वं न व्यधास्यत् विहितं तु ज्ञापयति। डि॰ति यत्कार्यं तल्लादेशे न भवतीति केषांचिस्थाठः स्तपर्याप्तश्चैव ही ति॥ तत्रावयवडि॰त्त्वद्वारेण समुदाये डि॰त्त्वं विधीयत इति व्याख्येयं॥ एवं हि कृ॰तीति निमित्तसप्तमीपक्षेपि गु

भा० कै० प्र० ६१
61

दीधीवेवीटां॥ छंदोविषयत्वादिति। भाषायामेतयोः प्रयोगाभावात्॥ दृष्टानुविधित्वाच्चेति। यद्यपि भाषायामपि दृष्टमेवानुविधीयते सिद्धे शब्दार्थसंबंध इति न्यायात्
तथाप्यादीध्यनमित्यादिप्रयोगश्छंदसि नास्ति दृष्टस्यैव छंदस्यनुविधानमित्यर्थः। ननु छंदस्येव दृष्टानुविधानमिति। अथ दृष्टानुविधिरित्यस्यायमर्थः॥ गुणश्छंद

दीधीवेवीटां॥ किमर्थमिदमुच्यते गुणवृद्धी मा भूतामिति। आदीध्यनं। आदीध्यकः। आवेव्यनं। आवेव्यकः। अयं योगः शक्योऽकर्तुं
म्। कथं। दीधीवेव्योश्छंदोविषयत्वात् दृष्टानुविधित्वाच्च छंदसः। आदीधेद्दीध्युरिति गुणप्रदर्शनादप्रतिषेधः। दीधीवेव्योश्छंदोविष
यो। दृष्टानुविधिश्छंदसि भवति। दीधीवेव्योश्छंदोविषयत्वाद्दृष्टानुविधित्वाच्च छंदसः। आदीधेद्दीध्युरित्यत्र च गुणस्य दर्शनादप्र
तिषेधः। अनर्थकः प्रतिषेधः अप्रतिषेधः। प्रजापतिर्वै यत्किंचिन्मनसा आदीधेत्। होत्राय वृतः कृपयन्नदीधेत्। आदीध्युर्दी
ध्याणे कृतासः॥ भवेदिदं युक्तमुदाहरणं आदीधेदिति। इदं त्वयुक्तं आदीध्युरिति। अयं जुसि गुणः प्रतिषेधविषय आरभ्यते स य
नैष दोषः २ थैव क्ङिति चेत्येतं बाधते। एवमेनमपि बाधेत। जुसि गुणं प्रतिषेधविषय आरभ्यमाणस्तुल्यजातीयं प्रतिषेधं बाधते। कश्च तु
ल्यजातीयः प्रसंगाश्रयः आश्रयस्थायी। अथवा येन नाप्राप्ते तस्य बाधनं भवति। न चाप्राप्ते क्ङिति चेत्येतस्मिन्प्रतिषेधे जुसि गुण आ
प्रकृता रभ्यते। अस्मिंस्तु पुनः प्राप्ते चाप्राप्ते च। यदि तर्ह्ययं योगो नारभ्यते॥ ॥

सिद्धे प्रयतेन तु सर्वत्र गुणनिषेध इति। आदीधेरिति। लङ् व्यत्ययेनेति प्रा। आदीध्युरिति। जक्षित्यादयः षडिति सम्प्रसारणत्वाज्जुसादेशोऽप्रकृतसाश्रयस्थायमिति॥ प्र म० ६१
ततश्चांतरंगत्वादनेनैव भाव्यमित्यर्थः। येन नाप्राप्त इति॥ कार्यविशेषचिंतापेक्षायामयं न्यायो न तु कार्यसामान्यं बाध्यमित्यस्यापेक्षायां न्यायावतारः॥ ११॥
मेत

कथं दीध्यदिति। लेट्ति पद्वत्तस्य लोपः परस्मैपदेष्विति इकारस्य लोपः लेटोडाटाविसदृशागमः॥ वपन्त्यप्रत्यये नेति। श्यपनोरि. त्याद्गुणाभावः। यीवर्णयोर्दीधीवेव्योरिति ईकारलोपः॥ क्वचित्तु शब्प्रत्यये नेति पाठः। तत्र शप्युरि. त्याद्गुणाभावः। एरनेकाच इतियणादेशः॥ इदितिवर्त्तमाने इति। नेडु शिकृती सतः। पिपठिषतेः क्विप्। अतोलोप इसकारलोपः षत्वस्यासिद्धत्वात्ससजुषोरुरितिरुत्वं। पूर्वत्रासिद्धे न स्थानिवदितिअल्लोपस्य रुत्वे स्थानिवद्भावाभावः। आगमिति। आगस्य स्पर्नुवर्त्तनादंगाधिकारविहितं पदरूपान्तरमिदं। नदेव निवार्यते इदेवयथास्यादिति नियमेनेनसर्थः। वोरुपधाया इति चदीर्घत्वं नांगं यन्तु ग्रहोत्तिदिदीर्घ इति दीर्घत्वं तद्वचना

कथं दीध्यदिति। दीध्यदिति च अपन्त्यप्रत्यये न दीध्यदिति च अपन्त्यप्रत्ययेन भविष्यति। इटश्चापि ग्रहणाच्च कर्मकर्त्तु। कथमरुणि पुमरणिषं करणि ताभ्यो रणिताभ्य इति। आर्द्धधातुकस्येडु लादेरित्यत्र इदित्यनुवर्त्तमाने पुनरिड्ग्रहणात्स प्रयोजनं। इदइदेवयथा स्यात् यदन्यत्प्राप्नोति तन्माभूदिति। किं चान्यत्प्राप्नोति। गुणः। यदि नियमः क्रियते। पिपठिषतेरप्रत्ययः पिपठीः दीर्घत्वं न प्राप्नोति। नैष दोषः। आंगयत्कार्यं तन्नियम्यते न चैतदांगं। अथवा आसिद्धं दीर्घत्वं तस्यासिद्धत्वान्नियमो न भविष्यति॥ ॥ ॥

द्भविष्यति। पिपठिषि त्रास्त एकुलानीसत्वलकारलोपस्य स्थानिवद्भावात्कल्लं तत्वाभावात्तुममावस्तेन पिपठी षीतिकथं सांतमहतः संयोगस्येति दीर्घत्वमिति न चोदनीयं। क्वौविधिं प्रति न स्थानिवदिति सर्वोप्यवस्थापयिष्यते॥ ननु क्वौलुप्तं न स्थानिवदिति॥ अथ देति। इडेवेत्यस्मिन्नियमे दीर्घत्वस्यासिद्धत्वान्नास्ति नियमेन व्यावृत्तिः। तत्तस्य शास्त्रदृष्ट्या अविकृतत्वात् एवं प्रयोगं न तु विकृतः॥ अल्लावींसूत्रं तु सिन्लोपस्य कादेशे सिद्ध इस सिद्धत्वनिषेधवचनात्सवर्णदीर्घत्वं भवति॥ ॥

हलोनंतराःसंयोगः॥ ॥कथमिति॥किमंतरशब्दस्य नञा बहुव्रीहिः अथ अंतराशब्दस्येति प्रश्नः॥ अंतरं विवरं वर्णोऽन्यकालस्तस्य येः अविद्यमाना इति प्रमध्येये
षामन्ये वर्णाः अविद्यमाना इत्साधेयस्य निषेधो नत्वाधारस्य॥ अवग्रह इति॥ अर्द्धमात्राकालोऽवग्रह इष्यते॥ अर्द्धमात्राकालं स्थित्वा वर्णांतरं समुच्चार्यते॥ तत्र गुरोरन्न
त इति सुप्तेन न भवेत्॥ नैव दोष इति। दोषनिवृत्तये संज्ञा क्रियते प्रयोजनाभिनिर्हत्तये वा इह चोभयाभावः अधिकरणवृत्तेर्हेरान्तूनतसंबंधाभावात्। विचार्यमाणता

×अनंतरा इति×

हलोनंतराः संयोगः॥ कथमिदं विज्ञायते। अविद्यमानं अंतरं एषामिति। आहोस्विद्विद्यमाना अंतरा एषामिति॥ किं चातः। यदि विज्ञा
यते अविद्यमानं अंतरं एषामिति अवग्रहे संयोगसंज्ञा न प्राप्नोति। अप्स्विसप्सु इति विद्यते ह्यत्रांतरमिति॥ अथ विज्ञायते अविद्यमाना
अंतरा एषामिति न दोषो भवति॥ यथा न दोषस्तथास्तु। अथवा पुनरस्तु अविद्यमानं अंतरं एषामिति। ननु चोक्तं। अवग्रहे संयोगसं
ज्ञा न प्राप्नोति॥ अप्स्विसप्सु इतिति विद्यते ह्यत्रांतरमिति॥ नैव दोषो न प्रयोजनं॥ संयोगसंज्ञायां सहवचनं यथान्यत्र। संयोगसंज्ञा
यां सहग्रहणं कर्तव्यं। हलोनंतराः संयोगः सह इति वक्तव्यं। किं प्रयोजनम्॥ सहभूतानां संयोगसंज्ञा स्यात् एकैकस्य मा भूदिति॥ य
थान्यत्र। तद्यथा। अन्यत्रापि यत्रेच्छति सहभूतानां कार्यं करोतीति तत्र सहग्रहणं तद्यथा। सहसुपा। उभे अभ्यस्तं सहेति॥ ॥

मिसादौ तु वाक्यस्येरिसत्त्वं तेनेन गुरोरनृत इति। अप्स्व्यशब्दे दोष इति चेत् नैवंविधे विषये प्रक्लृप्तस्वयवस्यावग्रहं परकाराः कुर्वंति॥ अप्सुयोनिरित्यादावपि समा
सघटकपदानामन्तोऽवगृह्यते इति सुशब्दान्स्वस्यनास्त्यवग्रहः॥ संयोगसंज्ञायामिति॥ वृद्धिसंज्ञावदानन्तर्यव्यवस्थितानां हलां प्रत्येकं संयोगसंज्ञाप्राप्नोति॥ ॥

किं च स्यादिति। हयोः एतन्नज्यर्थे एकैकस्यापि संयोगसंज्ञायां गुरुसंज्ञाप्रतिषेधकार्येऽसि ऽद्विरिति प्रसङ्गः॥ निर्यायादिति॥ प्रतिषेधप्रकारः संयोग इत्येतत्प्राप्तिः॥ ननु समुदायस्या
पि संज्ञित्वेऽचो रहाभ्यां द्वे इति यकारस्य द्विर्वचने कृते कस्मादेत्वं न भवति। यथा स्त्रेयादिति। एत्वे कृते यस्य द्विर्वचनासिद्धमिति द्विर्वचनस्यासिद्धत्वान्नायं दोषः। शङ्केति। ककारे
ऽल्लि परतः ककारः संयोगो भवत्यादिश्चेति लोपप्रसङ्गः। संयोगाविति। कथं पुनर्द्वे त्वानुपसर्जनार्थस्य द्वित्वावगतिरिति चेत्। आदिग्रहणसामर्थ्यात्। अन्यथा संयोगा

किं च स्यात्। यद्येकैकस्य संयोगसंज्ञा स्यात्। इह निर्यायात्। निर्वायात्। वान्यस्य संयोगादेरित्येत्वं प्रसज्येत। इह च संहृषीष्ट अतश्च संयोगादेरिती
ट् प्रसज्येत। इह च संह्रियत इति गुणो ऽर्तिसंयोगाद्योरिति गुणः प्रसज्येत। इह च दृषत्करोति समित्करोति संयोगान्तस्येति लोपः प्रसज्येत। इ
ह च शक्नावस्तीति स्कोः संयोगाद्योरन्ते चेति लोपः प्रसज्येत॥ इह च निर्यातो निर्वातः संयोगादेरातो धातोरिति निष्ठानत्वं प्रसज्येत॥ नैष
दोषः॥ यत्तावदुच्यते इह तावन्निर्यायात् निर्वायात्। वान्यस्य संयोगादेरित्येत्वं प्रसज्येतेति। नैवं विज्ञायते। संयोग आदिर्यस्य सोऽयं संयोगादिः
संयोगादेरिति। कथं तर्हि संयोगाद्यादिर्यस्य सोऽयं संयोगादेरिति। एवं तावत्सर्वमङ्गं परिहृतं। यदप्युच्यते। इह च दृषत्करोति समित्करोति संयो
गान्तस्येति लोपः प्रसज्येतेति। नैवं विज्ञायते संयोगोऽन्तो यस्य तदिदं संयोगान्तं संयोगान्तस्येति। कथं तर्हि संयोगावेतावस्य तदिदं संयोगान्तं संयोगान्तस्येति॥
गादिः संयो॰
रिति बहुवचनं स्यात्। संयोगास्सरेफ आकारस्तदन्तस्याङ्गस्यैत्वमिति स यत्नाभावात्॥ संयोगावेताविति। अत्रापि संयोगान्तलोप इत्येवं योगे न पदस्य विशेषणात्तदन्तविधौ लब्धे
न ग्रहणमाश्रितसंख्याभेदः संयोगो यथा गास्येनेत्येवमर्थो विज्ञायते॥ ॥श्री॥ स॰ सं॰ ॥श्री॥ ॥

भा०कै०प्र० ६३ 63 संयोगाद्योरिति॥ षष्ठीसमासश्चाश्रीयते इत्यर्थः। संयोगाद्योरिति द्विवचननिर्देशः। स्कोर्द्वित्वान्न समीपयोरपि हलोर्द्वित्वात् तेनायमर्थः। हलि परतोऽयं संयोगः प्रदर्शने च यः सं
योगं तस्यादिः समीपोऽयं ककारः सकारश्च तयोर्लोपः इति। न चैवं सति शक्तावुक्तेः सत्त्वलोपः प्राप्नोति। संयोगादेरनन्त इत्यत्रापि संयोगादावन्त इत्येवं संयोगस्यापि पदस्याकारान्तं द

यदप्युच्यते। इह च शक्ता वृत्तेति स्कोः संयोगाद्योरिति लोपः प्रसज्येतेति। नैवं विज्ञायते संयोगावादी संयोगादी संयोगाद्योरिति। कथं त
र्हि संयोगस्यादी संयोगादी संयोगाद्योरिति। यदप्युच्यते॥ इह च निर्यातो निर्वात इति संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं प्रसज्येते
ति नैवं विज्ञायते संयोगस्यादिर्यस्यासौ संयोगादिः संयोगादेरिति। कथं तर्हि संयोगावादी यस्य सोऽयं संयोगादिः संयोगादेरिति। कथं कृत्वा
एकैकस्य [redacted] संयोगसंज्ञा प्राप्नोति। प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति। न यथा वृद्धिगुणसंज्ञे प्रत्येकं भवतः। ननु चायमप्यस्ति दृष्टान्तः स
मुदाये वाक्यपरिसमाप्तिरिति। तद्यथा। गर्गाः शतं दण्ड्यन्तामिति। अर्थिनश्च राजानो हिरण्येन भवन्ति। न च प्रत्येकं दण्डयन्ति। सत्येतस्मिन् दृ
ष्टान्ते यदि तत्र प्रत्येकमित्युच्यते इहापि सहग्रहणं कर्तव्यम्। अथ तत्रान्तरेण प्रत्येकमिति वचनं प्रत्येकं गुणवृद्धिसंज्ञे भवतः इहापि विनार्थः सहग्र
हणेन॥ ॥ ॥ ॥

तावद्वातोर्नत्वमिति सिद्धे त्वादिग्रहणं द्वित्वसंख्याश्रयणार्थं॥ कथं कृत्वेति॥ संयोगसंज्ञाया अन्वर्थत्वात् संयुज्यतेऽस्मिन्वर्णा इति समुदायः संयोग इत्यस्याश्र प्र० ६३
यणात् सहग्रहणं कर्तव्यमित्यर्थः॥ ॥श्री॥ ॥श्री॥ ॥ ॥

हर०

सविशेष

आहोस्विदिति॥ द्वयोरित्यस्य नाश्रयणाद् बहूनामेवेत्यर्थः। यथा पपाचेत्यत्र समुदायस्य द्विर्वचनं नावयवस्यैकाचः। यदा तु द्वयोरेव हलोर्ग्रहणं तर्ह्यनन्तरयोर्द्वयोर्भवत्से वृहल्ल इति ज्ञानौ नि
र्दिशात। मं के निमग्न शिनशो र्जलीति नु मिक्ते नेन सज्ञानां संयोगसंज्ञा न तु सज्जयोरिति तस्लोपाप्रसंगः। निर्म्लेयादिति। यः संयोगो नासावंगादिः पश्चांगादिर्गकारात्ककारस्य

अथ यत्र बहूनामानंतर्य्यं किं तत्र द्वयोर्द्वयोः संयोगसंज्ञा भवति आहोस्वित् विशेषेण। कश्चात्र विशेषः। समुदाये संयोगादिलोपो मस्जेः॥ समुदाये संयोगादिलोपो मस्जेर्न सिद्ध्यति मङ्क्ता मङ्क्तुं। इह च निर्म्लेयात् निग्लायात् निर्म्लेयात् निर्ग्लायात्। वान्यस्य संयोगादेरित्येत्वं न प्राप्नोति। इह च संस्वरिषीष्ट अत एव संयोगादेरिति एत्वं न प्राप्नोति॥ इह च संस्वर्यते गुणोर्तिसंयोगाद्योरिति गुणो न प्राप्नोति॥ इह च गोमान्करोति। यवमान्करोति। संयोगांतस्य लोप इति लोपो न प्राप्नोति इह च निर्म्लानो निर्ग्लान इति संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं न प्राप्नोति। अस्तु तर्हि द्वयोर्द्वयोः संयोगः। द्वयोर्हलोः संयोग इति चेद् द्विर्वचनं। द्वयोर्हलोः संयोग इति चेद् द्विर्वचनं न सिध्यति॥ इन्द्रमिच्छति इन्द्रीयति। इन्द्रीयतेः सन्॥ इन्दिद्रीयिषति। नन्द्राः संयोगादय इति द्विर्वचनं न प्राप्नोति। न वाज्विधेः। न वा एष दोषः। किं कारणं। अज्विधेः। न्द्राः संयोगादयो न द्विरुच्यंते। अजादेरिति वर्जनेन॥

मुदायो नासौ संयोगः। इन्दिद्रीयिषतीति। अत्र द्वौ संयोगौ नद्रौ दरौ च। तत्र दकारस्य संयोगादित्वाद् द्विर्वचननिषेधप्रसंगः। न वाज्विधेरिति। अजाश्रयः प्रतिषेधविधिः।
अजादेरिति कर्मधारयः। ते नाचः परे। नन्तरा न्द्रा न द्विरुच्यंते। इन्द्रशब्दे तु नकारे णत्वं हि तत्वात् द्विरुच्यत एव॥ ॥ ॥

इकारो

अविद्यमानमिति॥ बहूनां चानंतराले समुदायद्विर्वचनवत् बहूनामेव संयोगसंज्ञा न द्वयोर्द्वयोः। अविद्यमाना इति। मध्येयत्र्यपेक्षः द्वयो[redacted]रेव मध्ये भवतीति संसर्गो
बुद्धिप्रयोगस्यापि विशेषावगतिहेतुत्वात् ह्रुषु द्वयोर्द्वयोः संयोगसंज्ञा मा भूदिति प्रश्नः॥ द्वयोस्त्वेवान्तरेति। अन्तरान्तरेणयुक्ते इति द्वितीया कस्मादत्र न भवति॥ उच्यते॥ य
दा मध्यापेक्षया नियतावधिरूपताविवक्ष्यते तदा च मां चान्तराकमंडलुः इत्यत्रान्तराएव बवखवद्भिरवंतरे इति तदा द्वितीया। यदा तु नियतावधित्वं न विवक्ष्यते अपितु संबंध
मात्रं न दा षष्ठ्येव भवति तदा हि न ज्ञायते किं तयोरेवावधित्वं उतान्यसहितयोरिति अवधिनियमाभावाद्द्वितीयायुक्तग्रहणान्नियतावधिविवक्षाविषयायाः
अभावः। यान्हीति। एषामिति बहुवचनं निर्देशादिति न बोद्धव्यं। बहुत्वस्याविवक्षणात्। अन्यथा शिक्षेत्यादौ द्वयोर्न स्यात्॥ तस्माद्योसावंतरा सद्द्वयोर्भव

अप्ययथेवं बहूनां संयोगसंज्ञा अथापि द्वयोर्द्वयोः किं गतमेतदियता सूत्रेण आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्त्तव्यं। गतमित्याह। कथं
यदा तावद्बहूनां संयोगसंज्ञा तदैवं विग्रहः करिष्यते। अविद्यमानमंतरमेषामिति। यदा द्वयोर्द्वयोः संयोगसंज्ञा तदैवं विग्रहः करिष्यते। [redacted]
अविद्यमाना अंतरा एषामिति। द्वयोस्त्वेवान्तराकश्चिद्विद्यते वा
न वा। एवमपि बहूनामेव प्राप्नोति। यान्हि भवतानंत्रषष्ठ्याप्तिनिर्दिशाति एतेषामन्येन व्यवायेन भवितव्यं। अस्तु तर्हि समुदाये संज्ञा।
ननु चोक्तं। समुदाये संयोगादिलोपो न सिध्यतीति। नैष दोषः। वक्ष्यत्येतत् अंतसामर्थ्यं मन्वो मिर्दनुषंगसंयोगादिलोपार्थमिति॥ अथवा विशेषण
संयोगसंज्ञा विज्ञास्यते द्वयोरपि बहूनामपि तत्र द्वयोर्यासंज्ञा तदाश्रयो लोपो भविष्यति॥ ॥ ॥

द्वयो तिनवेतियदुक्तं तत्रोच्यते। यदा द्वयोरंतरा न भवतितदा बहूनां अंतरा इति तेषामेव प्राप्नोति॥ यदा हि बहूनां मध्ये भिन्नजातीयोऽन्यो भवति तदा मा भूत्। तदभावे तु भवत्येव यथे
व बहूनां संज्ञया समुदायद्विर्वचनवद्विसर्थः। अंसात्स्वेइति। तद्धातुषग[redacted]लोपार्थे मवश्यं वक्तव्यं। अंसाद्यचः परेतु मिसनुषंगात्तान्मथ्न इत्यत्र नलोपो न स्यात्। हलोऽपि
संयोगे इति लोपे तस्मात्सिद्धत्वादनुषंगात्तमेव स्यात्। अविशेषणेनेति। बहुवचनंतोद्ध्वयोर्द्वयोरपि भवति बहूनामपीत्यपि ज्ञानी मृविशेषः। कार्यार्थत्वात्संयोगसंज्ञाया विशेषाभावा राम० ६४
नकार० इदेकया संज्ञया सर्वेषामनुग्रहात्सिद्धा द्विर्वचनेन वैषम्यं विसृष्टं॥ ॥ ॥

बहूनां संनिधौ बहूनामेव संयोगसंज्ञेऽस्मिन्पक्षे स्पाशीयमाणोमस्त्रे दोषोऽस्याद्यूर्वेद इति परिहृतः। अशेषान्दोषान्परिहर्तुमाह। परस्युच्यत इति। पाठक्रमादार्थक्रमो बलीयानिति मत्त्वेरस्यात्पूर्व इ। स स्पानन्तरमिदं द्रष्टव्यं। निर्लेपादिस्पादिषु यद्यपि त्रयो हलः संनिहितास्तथापि कार्यार्थत्वात्संज्ञाया द्विषु च कार्याभावादंशपदधात्ववयवसंयोगस्य तेषु लक्षणेषु स्पाश्रितत्वात्स मुदाये कार्याभावे चावयवानां स्वकार्याभावात्‌ द्वयोरेव संज्ञा प्रवर्त्तत इति भाष्यार्थः। व्याख्यानान्तरमत्र क्लिष्टत्वा

तेषु

परस्युच्यते इह च निर्ग्लायात्‌ निर्ग्लेयात्‌ निर्ग्लापात्‌ निर्म्लेयात्‌। वाम्यस्य संयोगादेरितीत्वं न प्राप्नोतीति। श्वंगे न संयोगादिं विशेषयिष्यामः श्वंग

स्य संयोगादेरिति। एवं तावत्सर्वं मा गंपरिहृतं। परस्युच्यते इह च गोमान्करोति यवमान्करोतीति संयोगान्तस्य लोप इति लोपो न प्राप्नोतीति। परे

ष भि २ न संयोगांतं विशेषयिष्यामः पदस्य संयोगान्तस्येति। परस्युच्यते इह निर्ग्णो नो निम्लीनः संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं न प्राप्नोतीति। धातु

ना संयोगादिं विशेषयिष्यामः धातोः संयोगादेरिति। स्वरानन्तर्हितवचनं। स्वरैरनन्तर्हिता हलः संयोगसंज्ञा भवन्तीति वक्तव्यं। किं प्रयोजनं व्यव

हितानां मा भूत्‌ पचति पनसं। ननु चानन्तरा इत्युच्यते। तेन व्यवहितानां न भविष्यति। इह समानन्तर्यं व्यवहितेऽपि व्यवहितेऽप्यनन्तरशब्दो दृश्यते।

तद्यथा अनन्तरा एविमौ ग्रामावित्युच्यते। तयोश्चैवान्तरा नद्यश्च पर्वताश्च भवंति यदि तर्हि व्यवहितेऽप्यनन्तरशब्दो भवति स्वानन्तर्यवचनमिदा

नीं किमर्थं स्यात्‌ स्वानन्तर्यवचनं किमर्थमिति चेदेकप्रतिषेधार्थं। एकस्य हलः संयोगसंज्ञा मा भूदिति किं च स्यात्‌ यद्येकस्य हलः संयोगसंज्ञा

॰ स्यात्‌ इयेष उवोष इजादेश्च गुरुमतोऽनृच्छ इत्याम्प्रसज्येत॥ ॥ ॥

त्वोक्तं पचति पनसमिति। हल इति वचनाद्वा सह सकारमकारयोर्मा भूत्संज्ञा तयोरेव तु प्राप्नोति ततश्च सलोपप्रसंगः॥ एकप्रतिषेधार्थमिति॥ अन्तरा इत्यने

न संज्ञाया विषयो निर्दिश्यते यत्रानंतरव्यवहारस्तत्र संज्ञा न चैकाकिन्यनन्तरव्यवहार इति भावः। एकप्रतिषेधस्य च प्रयोजनं इयेषेत्यादाविजादेर्गुरुमतो नि वृत्तिः

॰ गुरुमद्वचनमियायेत्यादिनिवृत्त्यर्थं स्यात्॥ ॥ ॥

वृषलकुलमिति यद्यपि ब्राह्मणकुलमपि तयोर्व्यवधायकं तथापि भिन्नजातीयमव्यवधायकमिति यदुक्तं तदनेन निरस्यते। ग्रामशब्दोयमिति। केचिदर्थभे
देन शब्दभेदमिच्छन्ति भिन्नाभिज्ञानं तु सामान्यनिबन्धनं अन्ये त्वेकशब्दत्वं। [redacted] तत्र चानेकशक्तियोगः एकशक्तित्वं वेति दर्शनविकल्पः। तत्र यदाए
कशब्दत्वपक्षः तदा तद्यं सारण्यक इति भाष्यं शक्तिभेदादुपचरितभेदमाश्रित्यं भेदपक्षे तु ग्रामशब्दोयं बह्वर्थ इति भाष्यं अभिन्नसामान्यनिमित्तं कृत्वा व्यवसा

नवातज्जातीयव्यवायात्‌ नवाएषदोषः किं कारणं अतज्जातीयस्य व्यवायात्‌ अतज्जातीयकं हि लोके व्यवधायकं भवति। कथं पुनर्ज्ञायते अ
तज्जातीयकं लोके व्यवधायकं भवतीति एवं हि कश्चित्कञ्चित्पृच्छति अनन्तरे एते ब्राह्मणकुले इति स आह नानन्तरे वृषलकुलमनयोरन्तरे इति। किं
पुनः कारणं क्वचित्तज्जातीयकं व्यवधायकं भवति। क्वचिन्न सर्वे त्वेव ह्यतज्जातीयकं व्यवधायकं भवति कथं नन्तराविमौ ग्रामाविति। ग्राम
शब्दोयं बह्वर्थः अस्त्येव शालासमुदाये वर्तते। तद्यथा ग्रामो दग्ध इति। अस्ति वाटपरिक्षेपे वर्तते। तद्यथा ग्रामं प्रविष्ट इति अस्ति मनुष्ये
षु वर्तते तद्यथा ग्रामो गतो ग्राम आगत इति अस्ति सारण्यके ससीमके सस्थण्डिलके वर्तते। तद्यथा ग्रामो लब्ध इति तद्यः सारण्यके स
सीमके सस्थण्डिलके वर्तते तमभिसमीक्ष्यैतत्प्रयुज्यते अनन्तराविमौ ग्रामाविति सर्वे त्वेव ह्यतज्जातीयकं व्यवधायकं भवति॥ ॥

याश्रयं। तद्यः सारण्यक इति तत्र च ग्रामशब्दार्थेन नद्यादीनां पर्वतानां चान्तर्भावाद्व्यवधायकत्वाभावात् आनन्तर्यं ग्रामयोरुच्यते। ग्रामे नाध्येयमिति तत्र तु ग्रा
मशब्दो वाटपरिक्षेपवृत्तिः अशुचौ देशे अध्ययनप्रतिषेधः नतु तस्य योगात्। ततः सीमन्यधीयत एव॥ ॥श्री॥ ॥

मुखनासिकावचनोऽनुनासिकः। आरंभात्वात् समाहारद्वन्द्वे क्लीबत्वेन भाव्यं। अवचनमिति न समासाश्रयणे यो न संगच्छत इति प्रश्नः॥ किमिदमिति। निपातनादिति। संगेनास्य लौकिकशब्दस्य साधुत्वं क्रियते। निपातनानां च बाधकत्वान्मुखनासिकवचनमिति न भाव्यं। अबाधकपक्षे तु भाव्यमेव। ईषद्वचनमिति। भागस्य मुखेनोच्चारणं भागस्य नासिकया अस्मिन् पक्षे मुखनासिकवचन इत्यपि भवति यो हि ईषदुच्यते स उच्यते एव। यथेषच्छुक्लोऽपि शुक्ल एव। मुखद्वितीयेति। मुखसहाये सत्यर्थे। तत्र नासिकामुखसाहचर्यान्मुखशब्देनोच्यते। मुखं च तत्र नासिका च मुखनासिका सा वचनमस्येति। मुखोपसंहितेति। मुखस्य च नासिकायाश्च यदन्तरालं स्थानं तत्र मेवानुनासिकस्य दर्शयति। तत्र सामीप्यान्मुखं च तत्र नासिका चेत्युभाभ्यामन्तरालं व्यपदिश्यते। परसंस्कारपक्षे मुखनासिकापदनिरपेक्षं वचनमित्येतत्सर्वं लिंगसर्वनामनपुंसकाश्र-

मुखनासिकावचनोऽनुनासिकः। किमिदं मुखनासिकावचन इति॥ मुखं च नासिका च मुखनासिकं मुखनासिकं वचनमस्य सोऽयं मुखनासिकावचनः यद्येवं मुखनासिकवचन इति प्राप्नोति निपातनाद्दीर्घत्वं भविष्यति अथवा मुखनासिकमावचनमस्य सोऽयं मुखनासिकावचनः [redacted] अथ किमिदमावचनमिति ईषद्वचनमावचनं किंचिन्मुखवचनं किंचिन्नासिकावचनं। मुखद्वितीया वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः॥ मुखोपसंहिता वा नासिका वचनमस्य सोऽयं मुखनासिकावचनः॥ ॥ ॥

येन संस्क्रियते। पश्चात् स्त्रीत्वस्य पदांतरसंबंधेन प्रतीयमानत्वाद् बहिरंगत्वात् ह्रस्वस्य न भवति। यदा तु स्त्रीत्वाश्रयेण वचनीति पदं व्युत्साद्यते तदा मुखनासिकावचनीक इति भवत्येव। अत्र चानेकं दर्शनं अनुनासिकस्य पूर्वः परो वा भागो मुखेनोच्चार्यते भागो नासिकया तत्र नासिकावचनेन भागानुरागवशात् मुखवच[redacted]नोऽपि भागो नासिकावचन इव लक्ष्यते। यथा संपृक्ते सत्त्वानुनासिक्ये काराणुरागाद् कटोऽनुनासिक इव प्रतिभाति। अत्र च पक्षे आसाद्वासितम्यायो नास्ति भागस्यैव मुखेन नासिकया चोच्चारणात् न तु समग्रस्य। अन्येषां तु दर्शनं मुखनासिकान्तरालं स्थानं तत्र मेवानुनासिकस्येति। अत्रापि नास्ति आसाद्वासितम्यायः पदान्तु सर्वे एव वर्णा मुखेनोच्चार्यन्ते नासिकया च तदा प्रसाद्वासितम्यायेन भाष्यकारो मुखग्रहणं प्रसाधयेत् ... एवं या च पक्षः स्पष्ट

[illegible]

यमानुस्वाराणामिवेतिप्रासादवासिन्यायानवतारपक्ष इतिभावः ॥ तत्रविधिमरेशेषुयमानुस्वाराएवादेशाःस्युःविंदुनोरनुनासिकःस्यादित्यादिषुत्वनुवाद
मरेशेषुयमानुस्वाराणामसंभवादप्रतिपत्तिःस्यात् । कचटतपानामितिपक्षमितिचकारलोपप्रसंगः ओदनयणिसनुनासिकस्यक्किऊलोःक्रिती

अथमुखग्रहणंकिमर्थं । नासिकावचनोनुनासिकइतीयत्युच्यमानेयमानुस्वाराणामेवप्रसज्येतमुखग्रहणेपुनःक्रियमाणेनदोषो
भवति । अथनासिकाग्रहणंकिमर्थंमुखवचनोनुनासिकइतीयत्युच्यमानेकचटतपानामेवप्रसज्येत नासिकाग्रहणेपुनःक्रियमाणे
नदोषोभवति मुखग्रहणंशक्यमकर्तुंकेनेदानीमुभयवचनानांभविष्यतिप्रासादवासिन्यायेन तद्यथाकेचित्प्रासादवासिनःकेचिद्भूमिवासिनःकेचि
दुभयवासिनः । येप्रासादवासिनोगृह्यंतेप्रासादवासिग्रहणेन । येभूमिवासिनःगृह्यंतेतेभूमिवासिग्रहणेन[redacted]
येउभयवासिनोगृह्यंते तेप्रासादवासिग्रहणेनभूमिवासिग्रहणेनच । एवमिहापिकेचिन्मुखवचनाःकेचिन्नासिकावचनाःकेचिदु
भयवचनाः । तत्रयेमुखवचनागृह्यंतेतेमुखग्रहणेनयेनासिकावचनागृह्यंतेतेनासिकाग्रहणेनयउभयवचनागृह्यंतएवंतेमुखग्रहणेन
नासिकाग्रहणेनच । भवेदुभयवचनानांसिद्धं ॥ यमानुस्वाराणामपिप्राप्नोति नैवदोषोनप्रयोजनं । इतरेतराश्रयंतुभवतिको इतरेतराश्रयतासतो
नुनासिकस्यसंज्ञयाभवितव्यंसंज्ञयाचनामानुनासिकोभाव्यतेतदेतदितरेतराश्रयंभवति इतरेतराश्रयाणिचकार्याणिनप्रकल्पंते अनुनासिकसंज्ञा
यांइतरेतराश्रयेउक्तंकिमुक्तंसिद्धंतुनित्यशब्दत्वादितिनित्याःशब्दानित्येषुचशब्देषुसतोऽनुनासिकस्यसंज्ञाक्रियतेनसंज्ञयानुनासिकोभाव्यतेयदितर्हि
र्हिनित्याःशब्दाःकिमर्थंशास्त्रमितिचेन्निवृत्त्यर्थंकल्पान्तिर्हिदंनिवर्तकंशास्त्रंकथंअाउ-स्यापविशेषेणोपदिष्टाःननुनासिकंतस्यसर्वेत्रानुनासि
कबुद्धिःप्रसक्तातत्रानेननिवृत्तिःक्रियतेछंदस्यपिपरतःआउ-अननुनासिकस्यप्रसंगेअनुनासिकंसाधुर्भवतीति ॥ ॥ ॥
तिदीर्घप्रसंगःप्रासादवासिन्यायेनेति । अयंन्यायःक्रियाशब्देष्वेवनतूदिशब्देषुनैवदोषइति । अनुवादेतावद्यमानुस्वाराणामसंभवःविधावप्यंतरतम्यान्मुखवच

तुल्यास्यप्रयत्नं सवर्णम् ॥ चत्वारोऽत्र पक्षाः संभवन्ति द्वंद्वगर्भो बहुव्रीहिः ॥ त्रिपदो बहुव्रीहिः ॥ तुल्यास्यशब्दयोस्तत्पुरुषस्ततो बहुव्रीहिः ॥ आस्यप्रयत्नशब्दयोस्तत्पुरुषस्ततो ब-
हुव्रीहिरिति ॥ तत्र द्वंद्वगर्भे बहुव्रीहिरिति पक्षे वार्णिकस्यावतार इति तमेव भाष्यकारः पूर्वं दर्शयति ॥ तुलया संमितमिति ॥ खुस स्वर्थमेव तुल्योपादीयते रूढिशब्दस्त्व-
यं सदृशपर्यायः यथा प्रवीणः कुशलं प्रतिलोमोऽनुलोम इत्यवयवार्थाभावः एवं तुल्यशब्दोऽपि ॥ किं पुनरास्यमिति ॥ किं मुखमथ यत्नं प्रभवं वा ताल्वादिकं स्थानमिति प्रश्नः ॥
लौकिकमिति ॥ यन्मुखपर्यंते देवतेस्यादिवत्प्रसिद्धमित्यर्थः यद्यपि ताल्वादिकमपि लौकिकमास्यं तथापि तत्र योगवशादास्यशब्दो वर्तत इति रूढिरिति न तत्प्रसिद्धमिति मु-

तुल्यास्यप्रयत्नं सवर्णम् ॥ तुलया संमितं तुल्यं आस्यं च प्रयत्नश्च आस्यप्रयत्नं तुल्यास्यं तुल्यप्रयत्नं च सवर्णसंज्ञं भवति किं पु-
नरास्यं लौकिकमास्यं ओष्ठात्प्रभृति प्राक्काकलकात् कथं पुनरास्यं अस्यन्त्यनेन वर्णानित्यास्यं अन्नमेतदास्यन्दत इति
॥ १ वा आस्यं ॥ ॥ श्री ॥ ॥

खमेव प्रसिद्धत्वाल्लौकिकमित्युक्तं न तस्यैव वचमायम्या द्रूहणात्युक्तमित्यर्थः ओष्ठादिति ॥ काकलकं नाम ग्रीवाया मुन्नतप्रदेशः कथं पुनरिति यदि निमित्तवशात्प्रवर्तते त-
नस्ताल्वादिष्वपि प्रवर्त्तिष्यत इति प्रश्नः अस्यन्त्यनेनेति सत्यपि निमित्ते रूढिवशान्मुख एव वर्त्तते न ताल्वादिष्वित्यर्थः कुरुत्पुट इति करणे ण्यत् अस्यन्नमत्र वर्णाभिव्यक्तिस्फो-
टपक्षेऽभिव्यक्तिं यान्ति स्फोटपक्षे तूत्पत्तिः अन्नमेतदिति आङ्पूर्वात्स्यन्दतेरन्येष्वपि दृश्यत इति डः एतदास्यं कर्म अन्नं कर्तृ आस्यन्दते द्रवीकरोतीत्यन्नपक्षे पे-
॥ १ णमुखस्य द्रवत्वोत्पादनात् ॥ ॥ ॥

कः प्रयत्न इति॥ किं प्रयतनं प्रयत्नः = प्रथमप्रारंभो यत्नस्येति प्रश्नः॥ भावसाधन इति भावेऽभिधेये नङ्प्रत्ययः क्रियते तेन नशब्दस्य भावः साधनं भवति॥ किमास्योपादाने इति॥ =आस्य एव सर्ववर्णानां निष्पाद इति भावः नासिकापि न वा स्याद्वर्णोत्पत्तिनिमित्तं किं तर्हि =आस्यान्तस्त्वमेव वितनतमस्ति नत्वं वक्तारे स्वा नासिकान्तस्थां वायुरभिघाताद्वर्णो

=प्रयत्नः प्रयत्नः प्रयतनं प्रयत्नः प्रश्नोयतते भावसाधनो नङ्प्रत्ययः यदि लौकिकमास्य॥ किमास्योपादाने प्रयोजनं सर्वेषां हि तत्तुल्यं वक्ष्यसे तत्प्रयत्नविशेषणमास्योपादानमिति सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसंगः प्रयत्नसामान्यात् सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसंगो भवतिज वगरदशां किंकाराणां प्रयत्नसामान्यात् एतेषां हि समानः प्रयत्नः सिद्धं त्वास्ये तुल्यदेशप्रयत्नं सवर्णं सिद्धमेतत्कथं =आस्येयेषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति वक्तव्यं॥ ॥

सन्निः विसर्जनीयस्यैकीयमते नो रस्य त्वात्सावर्ण्ये भावेऽपि न दोषः वक्ष्यतीति नास्य परीक्षावसर इति भावः सवर्णसंज्ञायामिति द्वंद्वे प्रयत्नस्यास्येनाविशेषणान्मुखप्रयत्नयोस्तुल्यत्वाद्भिन्नस्थानानामपि प्रसंगः भाष्ये शाकारः प्रसाहारपाठवशात्पठितः =अत्र प्रत्याहारे जवगरदशानां प्राप्नोतीत्यर्थः शकारस्य तु विवृतत्वात्स्पर्शानां (स्पष्टत्वात्प्रसंग एव न तत्र उर्जरसादौ रुरोरीति लोपप्रसंगः॥ ॥

=समास्य ग्रहणेऽपि विसर्जनीयस्योरस्य त्वेनासत्वाद्यथा सावर्ण्याभावे न दोषस्तथा सत्यास्य ग्रहणे सावर्ण्यभावेऽपि न दोषः अन्यथामतां न नेष्टासंभवाद्विपातेगसंप्रभावइति भावः॥२=

प्र० ६७

एवमपीति॥ आस्ये येषां तुल्यो देश इत्यास्येन देशो विशेष्यते तत्र व्यभिचाराभावादास्येन देशस्य विशेषणमयुक्तमिति सन्देहः॥ प्रयत्नविशेषणमिति॥ तस्य संभवव्यभिचा
रसद्भावादित्यर्थः॥ बाह्यप्रयत्नस्तु दशाच्चत्वारः॥ आभ्यंतरास्तु स्पृष्टेषत्स्पृष्टतासंवृततविवृततारव्याः॥ बाह्यं त्वास्यादिति॥ काकलकस्याधस्तादुपजत्रुस्थान

शालना·मला २ मत्व १

एवमपि किमास्योपादाने प्रयोजनं सर्वेषां हि तत्तुल्यं प्रयत्नविशेषणमास्योपादानं। सन्ति ह्यास्यात् बाह्याः प्रयत्नाः तेह्यपिता भवंति तेषु सत्स्वपि सव
र्णसंज्ञा सिद्धा भवति के पुनस्ते विवारसंवारौ श्वासनादौ घोषवदघोषता अल्पप्राणता महाप्राणतेति तत्र वर्गाणां प्रथमद्वितीया विवृतकंठाः श्वासानुप्रदानाः अघो
षाश्च एके अल्पप्राणाः इतरे महाप्राणाः तृतीयचतुर्थाः संवृतकंठाः नादानुप्रदाना घोषवंतः एके अल्पप्राणाः अपरे महाप्राणाः यथा तृतीया
स्तथा पंचमाः॥ आनुनासिक्यं वर्ज्जमानुनासिक्यमेषामधिको गुणः॥ एवमप्यवर्णस्य सवर्णसंज्ञा न प्राप्नोति बाह्यं ह्यास्यात् स्थानमवर्णस्य सर्वमु
खस्थानमवर्णमेके इच्छंति एवमपि व्यपदेशो न प्रकल्पते। आस्ये येषां तुल्यो देश इति व्यपदेशिवद्भावेन व्यपदेशो भविष्यति सिध्यति सूत्रं तर्हि
भिद्यते। यथान्यासमेवास्तु ननु चोक्तं सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसंगः प्रयत्नसामान्यादिति॥ ॥ ॥

(स्तेधर्मैवर्णितिः)

मवर्णमेके इच्छंतीति सतीति च बाह्यदेशासंभवे तद्व्यवच्छेदायास्येन देशो विशेष्यते इति प्रश्नः॥ सर्वमुखेति अवर्णो निष्पन्नो सर्वमेव मुखं व्याप्रियत इति तस्य बाह्यस्थानता
एवमपीति अवर्णस्यास्यमेव देशो न त्वास्ये देशः॥ व्यपदेशिवद्भावेनेति॥ सर्वावस्थायुक्तमास्यमास्यशब्देनोच्यते देशशब्देन तु विशिष्टैवावस्थावर्णोत्पादनहेतुः तत्र बु
॥ द्विकृतमेदाश्रयेण व्यपदेशः॥ ॥ ॥

भा०कै०प्र० ६८ 68 नहीति ॥ प्राग्यमकल्पितं रूपमित्यर्थः यौगिकस्य तु व्यवहितस्य ग्रहणं । स्थानमिति ॥ ताल्वादिकारणमिति स्पृष्टतादि जिह्वाया अग्रोपाग्रमध्यमूलानि वा यद्येवं प्रयत्नग्रह
णं न कर्तव्यं तस्याप्यास्ये भवत्वाद्ग्रहणे न ग्रहणान्तं सत्यमेतत् प्रत्येकं तु व्यापारं निरासार्थमुभयोरुपादानं तेन द्वयोस्तुल्यत्वे सवर्णसंज्ञा भवति । अविशेषितइति । आ
स्ये नेत्यर्थः इदं द्वयपक्षे एवास्थितइतिप्रश्नः ततश्च बाह्याः प्रयत्ना न सन्त्याः स्युः ॥ प्रारंभो यत्नस्येति । अत्र स्पर्शवं स्पृष्टतादयश्चत्वारः प्रस्थानमूर्द्धनि स्पृतिहते निहते प्राणा स्पृष्टतयते:
स्येवायं । विवारादयो बाह्या एकादश प्रयत्ना उत्पद्यन्ते स्वमपीति । संध्यक्षरेषु प्रथमभागस्याकारेण साहश्यात्सवर्णसंज्ञा प्राप्नोतीति प्रश्नः प्रश्लिष्टावर्णाविति ॥ नाज्झ

नैष दोषः ॥ नहि लौकिकमास्यं किं तर्हि तद्धितान्तमास्यं आस्ये भवमास्यं शरीरावयवाद्यत् किं पुनरास्ये भवं स्थानं करणं च स्वमपि प्रयत्नः
अविशेषितो भवति । प्रयत्नश्च विशेषितं कथं न हि प्रयतनं प्रयत्नः किं तर्हि प्रारंभो यत्नस्य प्रयत्नः यदि प्रारंभो यत्नस्य प्रयत्नः एवमप्य
वर्णस्य एङोश्च सवर्णसंज्ञा प्राप्नोति प्रश्लिष्टवर्णावेतौ अवर्णस्य तद्धैं चोश्च सवर्णसंज्ञा प्राप्नोति विवृततरावर्णावेतौ एतयोरेव तर्हि मि
थः सवर्णसंज्ञा प्राप्नोति नैतौ तुल्यस्थानौ ॥ उदात्तादीनां तर्हि सवर्णसंज्ञा न प्राप्नोति अभेदका उदात्तादयः ॥ ॥

यद्विवेकोस्ति यां सदकवदित्यर्थः अवर्णस्येति । विभागो नास्तु लक्ष्य इति प्रश्नः ततश्च नाक्षमितियस्येति लोपप्रसंगः एतयोरिति ततश्च एतऐ इऔ ओकारेपि स्यात् माख्य
मानस्यापि क्वचित्सवर्णग्रहणादर्शनात् । अभेदका उ इति लिंगेन प्रतिपादितेन शास्त्रे एते स्वशब्दोपादानमंतरेण कार्येषु भिद्यंत इति तेन प्रारंभभेदेपि उदात्तादीनां मिथः सवर्ण राम० ६८
संज्ञा भविष्यति ॥ ॥ श्री ॥ ॥ ७ ॥ ॥ श्री ॥ ॥ ७ ॥

यत्समानमिति॥ स्पृष्टत्वस्य समानत्वाद्वर्ग्योरणं बाह्यप्रयत्नभेदेपि सवर्णसंज्ञा भविष्यति किं सतीति॥ स्पृष्टताद्यभेदाद्विवारादिभेदेपि यथा भवति तथा स्पृष्टतादिभेदेपि विवारा
द्यभेदात्प्राप्नोतीति प्रश्नः। सत्येवेति। ऋ ऌ री ॡ इत्येवान्यथा ब्रूयात् यथासंख्यनिरासार्थं तत्र सवर्णग्रहणं कृतं शिशा ढी स त्रुउकारस्य ढकारे परतो लोपार्थे। यदि च यत्र सर्वं
समानं तत्रैव सवर्णसंज्ञा स्यात् उकारढकारयोर्भेदात् सवर्णत्वं नास्तीति सवर्णग्रहणमनर्थकं स्यात् सर्वमिति वर्णानां प्रथमद्वितीयाद्यस्संज्ञा शिक्षायां पठितम घोष

अस्माकं अथवा किं तेन एतेन॥ आरंभो यत्नः स प्रयत्न इति प्रयतनमेव प्रयत्नः तदेव तद्धितांतमास्यं यत्समानं तदाश्रयिष्यामः किं सति भेदे स
तीत्याह। सत्येव हि भेदे सवर्णसंज्ञया भवितव्यं कुत एतत् भेदाधिष्ठाना हि सवर्णसंज्ञा। यदि हि यत्र सर्वं समानं तत्र स्यात् सवर्णसंज्ञावचनम
नर्थकं स्यात्। यदि तर्हि सति भेदे किंचित्समानमिति कृत्वा सवर्णसंज्ञा भविष्यति। शकारछकारयोः षकारठकारयोः सकारथकारयो
ः सवर्णसंज्ञा प्राप्नोति एतेषां हि सर्वमन्यत्समानं करणवर्जं एवं तर्हि प्रयतनमेव प्रयत्नं तदेव हि तद्धितांतमास्यं न त्वयं द्वंद्वः आस्ये
च प्रयत्नश्च आस्यप्रयत्नमिति किं तर्हि विपरोयं बहुव्रीहिः तुल्य आस्ये प्रयत्न एषामिति अथ पूर्वस्तत्पुरुषः ततो बहुव्री
हिः तुल्य आस्ये तुल्याः तुल्यास्यः प्रयत्न एषामिति अथवा परस्तत्पुरुषः ततो बहुव्रीहिः आस्ये प्रयत्नः तुल्य आस्यप्रयत्न ए

आस्यप्रयत्नः
त्वादिकरणं तु मिन्त्र वर्ग्याणां स्पृष्टत्वादूष्मणां च विवृतत्वात् सति सवर्णत्वे निष्ठ्छ्यन्निष्ठुरं निष्ठ्यानमिति ऊरोरुरीति लोपः प्राप्नोति॥ छद्मनो निष्क्रांतमिति
प्रादिसमासः अनचि चेति षकारस्य द्विर्वचनं तुल्यास्य इति तद्धितांत आस्यशब्दो न स्वांगवाच्येव सम्मुखमस्तकादिसलुङ्गु भवति॥ तद्धितांतत्वस्य शब्दस्याश्रयणसाम
र्थ्याद्वास्य रसेकत्वं विवक्षितं तेन एकस्मिन्नेव स्थाने ययोस्तुल्यः प्रयत्नः इसाश्रीयते अथवेति मप्पूर्वस्य सकादित्वात्पूर्वं तो न रपदस्तत्पुरुषः॥ ॥

=तदास्य यं सवर्णत्वं अन्यस्य प्रयत्नापेक्षया तुल्यास्यप्रयत्नत्वं ततोन्यस्य प्राप्नोति स्यात् [illegible] तिभावः।१= भिन्नमर्यादिति रेफस्य तुल्यास्यप्रयत्नत्वाभावात् ऋवर्णं पञ्चधा प्रयतमाङ्गीकारेण तुल्यास्यप्रयत्नत्वाभावात् सावर्ण्यमसिद्धेरिति भावः।२=

भा॰ कै॰ प्र॰ तस्येति॥ यत्र द्वौ निमित्ताभिसंबंधार्हौ योयस्येति अन्यथा वर्णान्तरापेक्षया तुल्यास्यप्रयत्नत्वेन सवर्णसंज्ञा स्यात् तदा अयमन्यस्यापि कार्यं प्राप्नोति स्त्रां रं मस्त्के रेफोष्म

६९ णां निवृत्त्यर्थः स्यात् तस्यावचनमिति। तस्येत्यप्यनुकरणशब्दः तस्येत्यस्यावचनमित्यर्थः सवर्णसंज्ञावचनमिति नचरेफोष्मणां निवृत्त्यर्थं वचनं रेफस्यापि रेफः

69

तस्य तस्येति तु वक्तव्यं किं प्रयोजनं। योयस्य तुल्यास्यप्रयत्नः स तस्य सवर्णसंज्ञो यथा स्यात् अन्यस्य तुल्यास्यप्रयत्नः अन्यस्य सवर्णसंज्ञो माभूत् तस्यावचनं वचनप्रामाण्यात् तस्येति न वक्तव्यं अन्यस्य तुल्यास्यप्रयत्नोन्यस्य सवर्णसंज्ञः कस्मान्न भवति वचनप्रामाण्यात् सवर्णसंज्ञावचनसामर्थ्यात् यदि ह्यन्यस्य तुल्यास्यप्रयत्नोन्यस्य सवर्णसंज्ञः स्यात् सवर्णसंज्ञावचनमनर्थकं स्यात्। संबंधिशब्दैर्वा तुल्यं संबंधिशब्दैर्वा पुनस्तुल्यमेतत् तद्यथा संबंधिशब्दाः मातरि वर्तितव्यं पितरि शुश्रूषितव्यमिति। नचोच्यते स्वस्यां मातरि स्वस्मिन् पितरीति। संबंधाच्चैतद्गम्यते यायस्य माता यश्च यस्य पितेति एवमिहापि तुल्यास्यप्रयत्नं सवर्णमित्यत्र संबंधिशब्दावेतौ तत्र संबंधादेतद्गन्तव्यं यत्प्रतियत् तुल्यास्यप्रयत्नं तत्प्रति तत्सवर्णसंज्ञं भवतीति॥ ॥

×भवस्येव·एवम् अमुष्यस्य·एवं×१

सवर्णो वचनसामर्थ्याद्दोषं परिहृत्य शास्त्रन्यायेन परिहर्तुमाह। संबंधिशब्दैरिति तुल्यास्यप्रयत्नशब्दस्य संबंधिशब्दत्वात्तत्समानार्थोपि प्रदेशवाक्ये प्रयु- एम॰

क्तः सवर्णशब्दः संबंधिशब्दः यथा तुल्याय कन्यां दद्यात् इत्युक्ते न शूद्रेण तुल्याय ब्राह्मणः कन्यां ददाति अपि त्वात्मना तथेहापीत्यर्थः॥ ॥ ६९

=एवमिति आद्यमते पञ्चधा प्रयतमाङ्गीकारे सजातीयः सवर्णः सन्मते विजातीयो दीर्घकारादिः सवर्णो भवत्येवेति भावः।२=

=ऋलोरिति सवर्णग्रहणं सिद्धत्वादिति भावः। ऋंपक्षमिति-दीर्घग्रहणमनुवर्त्तत इत्युक्तौ ॠसेति भावः।४=

अकारऌकारयोरिति॥ स्थानभेदान्न प्राप्नोतीत्यारंभः ॥ अत्र चानयोरेव श्रुतत्वान्मिथः सवर्णसंज्ञा विज्ञायते न त्वेतयोरन्येन सहेति बोद्धव्यं॥ वक्ष्यमेतदिति। तत्र ऌवावचन
मित्यत्र दीर्घ इत्यनुवर्त्ततेन त्र ऌति ऌ शब्दे विकल्पिते अप्राप्त एव पक्षे दीर्घो भविष्यति स च भवन् ऌवर्णस्य दीर्घाभावादृवर्णस्यांतरतमो दीर्घ ॠकारो भविष्यति। तत्सव
र्ण इति यद्यविधाय सवर्णसंज्ञां तत उच्यते अपगमात्रस्य ऌति तत्कार्यं स्यात् इत्यू ॠकार इति। तस्माद्विधेया सवर्णसंज्ञा ॥ अत इति वक्ष्यामीति॥ ॠकारस्य अकार ए
व सवर्ण इति अस्येव भविष्यति ततः ऌति अत इत्येवं इदं चासवर्णार्थं तेन ऌति रूपद्वयं सिद्धं तेन संहितायां अकारे होतृ आकार इति रूपं संहिताया मपि अस क
इति शाकल्याभावे होतृकारो होतृकार इति॥ तन्न वक्तव्यमिति॥ द्वावप्येतौ दीर्घौ ॠ ॡ इति॥ तत्र ॠ ॠ कल्प कृतिभावे एतदेव रूपं शाकल्याभावे होतृकारो होतॄ

अकारऌकारयोः सवर्णविधिः॥ अकारऌकारयोः सवर्णसंज्ञाविधेया होतॢकारः होतृकारः किं प्रयोजनं अकः सवर्णे दीर्घ इति दीर्घत्वं यथा
स्यात् नैतदस्ति प्रयोजनं वक्ष्यत्येतत् सवर्णे दीर्घत्वे ॠति ॠ वावचनं ऌति ऌ वावचनमिति तत्सवर्णो यथा स्यात् इह माभूत् इत्यू ॡ कारः म
ॡकार इति यदेतत्सवर्णदीर्घत्वे ॠतीति एतदत इति वक्ष्यामि ततः ऌतिऌकारे परतः ऌकारो वा भवतीति अत इत्येवं तन्न वक्तव्यं भवति अवश्यं तद् वक्तव्यं ऋ
कालोऽज् ह्रस्वदीर्घप्लुत संज्ञो भवतीत्युच्यते। न च ॠकारऌकारौ वाज स्ति ॠकारस्य ऌकारस्य चाचत्वं वक्ष्यामि तच्चावश्यं वक्तव्यं प्लुतो यथा स्यात् होतॄ
१ ॠकारः होतृकारः होतॄ ३कार इति होतॢकारः होतृकारः होतॢ३कार॥ ॥ ॥

=ऊकालोज्ज्ञिति योगविभागेन ऊकालस्यैवाच्संज्ञाविधानादिति भावः।२=

कार इति रूपद्वयं ऌकारे संहितायां संहितायां च शाकल्ये होतॢकार इति शा + कारे कदाचित् ॠ दीर्घः कदाचित् ॠ ऌकारेपि ॠ ॡ इत्येतौ भविष्यतः स सांसवर्ण
संज्ञाया मिति भावः॥ न चेति॥ अर्द्धतृतीयमात्रत्वादिति केचिदाहुः अन्ये तु ईषत्स्पृष्टकरणत्वादनयोः ॠकारऌकारयोः श्रुतिकृतत्वात्तत्ताभ्यां तयोरग्रहणादनत्वमाहुः अचं
वक्ष्यामीति सत्सवर्णे दीर्घसंज्ञानयोर्भविष्यति येषां तु मतमर्द्धतृतीयमात्रावेताविति तेषांमते सत्सवर्णे द्विमात्रत्वाभावादेतयोः दीर्घसंज्ञा न प्राप्नोति तस्माद्द्विमात्रावे
वैतावक्षुपगंतव्यौ तच्चावश्यमिति तिलयापि ॠ वावचनं ऌवावचनमिति ब्रुवतास्त्वे मनयोर्वक्तव्यं अन्यथा विधानमात्रमेवानयोः स्यात् नाचकार्यं प्लुतः सहितत्वे
लेनाभ्यां त्रिमात्रयोरविसावर्ण्यो रूह णा सति प्लुतसंज्ञा भवतीति प्लुत सिद्धिः ॥ ॥ ॥

भा०कै०प्र० किंपुनरिति ॥ एकैकस्मिन्संहितायांशाकल्याभावपक्षेॠपृद्वयंस्याद्यंतच्चोभयथापिसिध्यतितत्रसवर्णसंज्ञायामसत्यांयथासिध्यतितथापूर्वमेवोक्तंसत्यांतुयथासिध्यतित
७० थोच्यतेइहद्वयोर्ऋकारयोरेकद्वयप्रयुक्तत्वाद्विहतत्वाच्चकदाचिदेकद्वयप्रयुक्तऋभवतिकदाचिद्विहतऋकारःऌकारेपिकदाचिदृकारांतरतमऋद्दकारःकदाचितॢकारांत
70 रतमऌकारइतिसाम्यमुभयोःपक्षयोःलपरत्वमिति ॥ व्याख्यास्यामीत्यर्थः रपरइत्यत्ररइतिलइतितिलकाराकारेणाप्रत्याहारआश्रीयतेनत्वांतरतम्यादकाररेफात्पर

किंपुनरत्रन्यायः। सवर्णसंज्ञावचनमेवन्यायःदीर्घेलंचैववृद्धिसिद्धंभवतिस्वपिचऋकारग्रहणेऌकारग्रहणंसन्निहितंभवति[redacted]ऋसकःख
ढ्‌ ऋश्यमालऋश्यः इदमपिसिद्धंभवति खट्वाऌकारे[redacted]मालऌकारइतिवास्तुप्यापिशल्लेः उपर्कारीयतिउपार्कारीयतिइदमपिसिद्धंभ
वतिउपऌकारीयतिउपाऌकारीयतियदिनहिऋकारग्रहणेऌकारग्रहणंसन्निहितंभवतिउरण्‌परःऌकारस्यापिरपरत्वंप्राप्नोतिऌकारस्यलपरत्वंवक्ष्या
मितच्चावश्यंवक्तव्यंअसत्यांसवर्णसंज्ञायांविधास्यतेदेवससांरेफवाधनार्थंभविष्यति इहतर्हिरषाभ्यांनोणःसमानपदइत्यत्रऋकारग्रहणंचोदि
तंमातृणामितिसेवमर्थंतदिहापिप्राप्नोतिक्लृप्यमानेपश्येति अध्यासत्सामपिसवर्णसंज्ञायामिहकस्मान्नभवतिप्रक्लृप्यमानेपश्येतिचुटुतुलशर्व्य
वायेनेतिवक्ष्यामिअपरआहत्रिभिश्चमध्यमैर्वर्गैर्लशसैश्चव्यवायेनेतिवक्ष्यामिवर्णैकदेशाश्चवर्णग्रहणेनगृह्यंतइतियोसौऌकारेलकारःतदाश्रयं
यःप्रतिषेधोभविष्यतियद्येवंनार्थोरषाभ्यांणत्वेऋकारग्रहणेनवर्णैकदेशाश्चवर्णग्रहणेनगृह्यंतइतियोसौऋकारेरेफःतदाश्रयंणत्वंभविष्यति ॥०॥
ऌकारस्यलपरः ॥ असत्सामितिअसत्सांसवर्णसंज्ञायांउरण्‌परइत्यत्र ऌकारग्रहणंकर्त्तव्यंभवतिप्रक्लृप्यमानमितिक्लृसचइतिणत्वप्रसंगःत्रिभिश्चेति ॥ पूर्वस्मा
दयंविशेषःपूर्वत्रशरंतर्भूतोपिषकारःसाक्षात्सत्वनिमित्तत्वाद्व्यवधायकत्वेननाश्रीयते इहतुतस्याउपादानमेव वर्णैकदेशइति अवयवस्यस्वव्यापारानिवर्त्तनात् अ राम०
ग्रहणपक्षेतुस्थान्यादेशाकृतिगणत्वात्सत्वाभावःऋदितांऌदितांचभेदेनानुबंधनिर्देशात्भेदेनचोपादानादनुबंधकार्येषुपरस्परग्रहणाभावात्तेनऋणभावः ॥ ॥ ७०

नाज्झलौ ॥ अकारहकारयोरिकारशकारयोश्च तुल्यस्थानप्रयत्नत्वात्सवर्णसंज्ञा प्राप्ता निषिध्यते अत एव च निर्देशादचामज्भिः हलां हल्भिः सवर्णत्वनिषेधः ॥ अज्झलौ रिति ॥ प्रकृतत्वात्सवर्णसंज्ञाया इति बोध्यं शकारप्रतिषेध इति द्विवचनान्तस्य समासो भेदाधिष्ठानत्वात्सवर्णसंज्ञायाः ॥ इकार इति अत्र हि सूत्रे जितीकारो गृह्यमाणः सवर्णं गृह्णातीति शकारस्यापि ग्रहणमस्ति स्वात्मनि क्रियाविरोधादत्रैव सूत्रे इहेन व्याप्रियत इति सवर्णत्वनिषेध इकारशकारयोर्नास्ति यस्येति चेत्सा दौ तु शकार इकारेण न गृह्यते अनेन सवर्णत्व

शकारस्य

नाज्झलौ ॥ अज्झलोः प्रतिषेधे शकारप्रतिषेधो ऽज्झल्त्वात् अज्झलोः प्रतिषेधे शकारेण सवर्णसंज्ञायाः प्रतिषेधः प्राप्नोति किं कारणं अज्झल्त्वात् अच्चैव हि शकारो हल्च कथं तावदच्त्वं इकारः सवर्णग्रहणेन शकारमपि गृह्णातीत्येवमच्त्वं हल्त्वमुपदेशाद्धल्त्वं तत्र को दोषः तत्र सवर्णलोपे दोषः तत्र सवर्णलोपे दोषो भवति परश्शतानि कार्याणि झरो झरि सवर्ण इति लोपो न प्राप्नोति ॥ ॥ ॥

निषेधात् इह तु स्वात्मनि व्यापारे नास्ति अस्ति च पूर्वेण सवर्णत्वमिकारशकारयोरिति भावः प्रकल्प्य चापवादविषयमिति न्यायो ऽत्र नास्ति अपवादस्यैवासंपन्नत्वात् ॥ परश्शतानीति शतात्पराणि शतादधिकानीत्यर्थः कर्तृकरणे कृता बहुलमिति बहुलवचनात्समासः ॥ पारस्करादित्वात्सुडागमः सकारस्य श्चुत्वं अनचि चेति द्विर्वचनं झरो झरीति लोपाप्रसंगात्त्रिशकारकसंयोगश्रवणप्रसंगः शरोऽच्यनचि चेत्सत्यमिकारेण शकारो न गृह्यते अनेन सवर्णत्वनिषेधादिति शकारस्य द्विर्वचनं ॥ ॥

सिद्धमनच्त्वादिति ॥ तत्र प्रत्याख्यानसाधारणमुक्तं प्रयत्नभेदादृऌतोः सवर्णसंज्ञायाः प्राप्तिरेव नास्तीत्यर्थः ॥ वाक्ये इति ॥ भवतु वा तुल्यास्यप्रयत्नत्वं तथापीकारेण शका
रो न गृह्यते सवर्णसंज्ञाया अस्मिन् सूत्रे अनिष्पन्नत्वात् अस्मिन्नहि सूत्रे निष्पन्ने सत्यपवादविषयपरिहारेणेष्टे विषये सवर्णसंज्ञा प्रवर्तते न त्वेतत्सूत्रनिष्पत्त्यवस्थायां
ततश्चाङ्गभूप्रदेशे संज्ञाप्रत्याहारसवर्णत्वेषु निष्पन्नेष्वणुदित्सवर्णस्य चेत्येतदस्य चाविस्तारादिषु प्रवर्तते न त्वङ्गभूप्रदेशादिषु नापि स्वात्मनि तत्र चात्र सूत्रेऽङ्गानिष्पत्त्या अ

सिद्धमनच्त्वात् ॥ सिद्धमेतत् कथं अनच्त्वात् कथमनच्त्वं स्पृष्टं करणं स्पर्शानां ईषत्स्पृष्टमन्तःस्थानां विवृतमूष्मणां ईषदित्येवानुव
र्तते स्वराणां च विवृतं ईषदिति निवृत्तं वा वाक्यापरिसमाप्तेर्वा वाक्यापरिसमाप्तेर्वा पुनः सिद्धमेतत् किमिदं वाक्यापरिसमाप्तेरिति वर्णानामु
पदेशस्तावत् उपदेशोत्तरकाला इत्संज्ञा इत्संज्ञोत्तरकाल आदिरन्त्येन सहेतेति प्रत्याहारः प्रत्याहारोत्तरकाला सवर्णसंज्ञा सवर्णसंज्ञोत्तरका
लमणुदित्सवर्णस्य चाप्रत्यय इति सवर्णग्रहणं एतेन समुदितेन वाक्ये नान्यत्र सवर्णानां ग्रहणं भवति न चात्रेकारः शकारं गृह्णाति
यद्येवं नार्हि इकारः शकारं न गृह्णाति एवमीकारमपि न गृह्णीयात् तत्र को दोषः कुमारी ईहते कुमारीहते अकः सवर्णे दीर्घत्वं न प्राप्नोति नैष
दोषः ॥ यदेतदकः सवर्णे दीर्घ इत्यत्र प्रत्याहारग्रहणं तत्र इकार ईकारं गृह्णाति शकारं न गृह्णाति ॥ ॥

अणुदिदित्यस्याप्रवर्तनादिकारेण शकारस्याग्रहणात् सवर्णत्वं शकारयोः सिद्धं एवमीकारोऽप्यत्रेकारेण न गृह्यत इतीकारशकारयोः सवर्णत्वमस्तीति कुमारीशेत इ
त्यत्र सवर्णदीर्घत्वं प्राप्तं अचीत्यनुवृत्त्या निवार्यते तत्र अकग्रहणात् कुर्मः प्रवर्तते अक्नेति विषयविभागदर्शनाय चोद्यं करोति यद्येवं तर्हीति इकारस्य त्वत्राग्राह
कत्वं दृष्टमित्यकः सवर्णे दीर्घ इत्यत्रापि माभूदिति प्रश्नः ॥ ॥

अनङ्गमेव वाक्यापरिसमाप्त्यास्साध्यते न तु प्रयत्नभेदेनेत्याह ॥ अपर आहेति । अस्मिन्पक्ष इति एकत्र हि साध्ये हेतुविकल्पो भवति इह तु साध्यभेदः ॥ सिद्धे रनङ्गं हेतुरनङ्गत्वं वा
क्यापरिसमाप्तिः ॥ एतच्चेति ॥ अस्त्वेवायं हकारग्रहणमित्याशङ्कायाः स्थानिवत्त्वे कृते शेषाश्रयः हाहात् प्रतिज्ञाविकल्पार्थो वा प्राग्वृद्धेरित्यर्थः ॥ ननु चेति । श्रुतिकृतं भेदमभ्युपगम्य उच्यते स

सिद्धमनच्त्वात्

अपर आह अच्कृतौ प्रतिषेधे शकारप्रतिषेधो ऽच्कृत्वात् अच्कृतौ प्रतिषेधे शकारस्य शकारेण सवर्णसंज्ञायाः प्रतिषेधं प्राप्नोति किं कारणं अच्कृत्
त्वात् अच्चैव हि शकारो हल्त्वं कथं तावदच्त्वं इकारः सवर्णग्रहणेन शकारमपि गृह्णातीति एवमप्यच्त्वम् हल्त्वं तु चोपदेशाद्धल्त्वं । तत्र को दोषः तत्र सवर्णलो
पे दोषः तत्र सवर्णलोपे दोषो भवति परः शतानि कार्याणि शकारेण सवर्ण इति लोपो न प्राप्नोति सिद्धमेतत् कथं अनच्त्वात् कथमनच्त्वं वाक्यापरिसमा
प्तेर्वा उक्तौ वाक्यापरिसमाप्तिः अस्मिन्पक्षे वेसेतदसमर्थितं भवति एतच्च समर्थितं कथं अस्त्वेवा शकारस्य शकारेण सवर्णसंज्ञा मा वा भूत् ननु चोक्तं प
रः शतानि कार्याणि शकारेण सवर्ण इति लोपो न प्राप्नोतीति मा भूल्लोपः ॥ ननु च भेदो भवति सति लोपे द्विशकारं असति लोपे त्रिशकारं नास्ति भेदः अस
सति लोपे द्विशकारमेव कथं विभाषा द्विर्वचनं एवमपि भेदः असति लोपे कदाचिद्द्विशकारं कदाचित्त्रिशकारं सति लोपे द्विशकारमेव स एष कथं भेदो न स्या
त् यदि नित्यो लोपः स्यात् विभाषा तु स लोपः यथा भेदस्तथास्तु ॥ इति श्री प्रथमस्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकं ॥ ॥ ॥

एष कथं भेदो न स्यात् इच्छेदः भेद एवेत्यर्थः ॥ इतर आह स्याद्वे यदि नित्यो लोपः स्यात् ॥ विभाषा तु स लोप इति ॥ ततो नास्ति भेद इत्यर्थः द्विर्वचनमपि विभाषा यो नुनासि
केनुनासिको वेत्यनुवर्तनात् ह्लोपेपि रुयो हो न्यतरस्यामित्यनुवर्तनादित्यर्थः ॥ इति महामहोपाध्याय जैयटपुत्रकैयटकृते भाष्यप्रदीपे प्रथमस्य प्रथमे पादे चतुर्थमाह्निकं ॥ ॥

ईदूदेद्द्विवचनं प्रगृह्यम्॥ किमर्थमिति॥ ईदूतोरनण्त्वाद्भिन्नकालनिवृत्त्यर्थेनोपपद्यते तपरत्वं। उदात्तादीनां त्वभेदकत्वाद्गुणान्तरयुक्तानां सवर्णानां ग्रहणार्थमपि नोपप
द्यते॥ जातिपक्षे त्विदीर्घोच्चारणसामर्थ्यात्वाधिक्याद्ध्रस्वानां न भविष्यति प्लुतानां चेष्यत एवेति द्रष्टव्या घातं प्रसुतत तपरत्वं कृतो नेति प्रश्नः॥ तपर इति॥ व्यक्तिपक्षो मे दकारस्य गुण
द्भिभावः केषामिति। प्लुतानामग्रहणप्रसंगात्प्रश्नः। उदात्तेति॥ कश्चिदनुनासिकग्रहणमप्यस्ति न गुणप्रसंगेनोच्चारितं न हि प्रगृह्योनुनासिकः संभवति अणोऽप्र
गृह्यस्यानुनासिक इति निषेधात्॥ प्लुतानां त्विति॥ व्यक्तिपक्षोऽदर्यं दोषो न तु तपरत्वात्॥ अप्रसिद्ध इति॥ शास्त्रासिद्धेँ श्रयणात्प्लुतं बुद्धावसत्त्वं प्रगृह्यत्वे विधीयमाने
श्रवण

ईदूदेद्द्विवचनं प्रगृह्यं॥ किमर्थमीदादीनां तपराणां प्रगृह्यसंज्ञोच्यते। तपरस्तत्कालस्येति तत्कालानां सवर्णानां ग्रहणं यथा स्यात्। के
षां॥ उदात्तानुदात्तस्वरितानां॥ अस्ति प्रयोजनमेतत्। किन्तर्हीति॥ प्लुतानां तु प्रगृह्यसंज्ञा न प्राप्नोति। किं कारणं। अतत्कालत्वात्। न हि प्लु
तास्तत्कालाः अप्रसिद्धः प्लुतः तस्यासिद्धत्वात्तत्काला एव भवन्ति। सिद्धः प्लुतः स्वरसन्धिषु। कथं ज्ञायते। यदयं प्लुतः प्रकृत्येति प्लुतस्य प्रकृति
भावं शास्ति। कथं कृत्वा ज्ञापकं। सतो हि कार्यिणः कार्येण भवितव्यं। किमेतस्य ज्ञापने प्रयोजनं। अप्लुतादप्लुत इत्येतन्न वक्तव्यं भवति॥

द्विमात्रविषया बुद्धिः प्रवर्त्तते॥ तथा हि वक्ष्यति॥ अप्रसिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं चेति। यदयमिति॥ अप्रसिद्धत्वे प्लुतं प्रकृत्येवमाश्रण
योगात्कार्यित्वेनाश्रयणात् अप्रसिद्धत्वाभावोनुमीयते। सामान्येन स्वरसंधिप्रकरणविषयं सिद्धत्वं ज्ञाप्यते॥ न तु प्रकृतिभाव एव यथा रोरुत्वं एवासोत्सर्गोसापवादं च प्रकर
णमिति प्रकृतिभावेपि प्रगृह्यत्वहेतुके सिद्धत्वमुच्यते। किमेतस्येति॥ प्रकृतिभाव एवाश्रयासिद्धत्वमस्तिति प्रश्नः॥ इतरो लाघवं दर्शयति॥ अप्लुतादिति। सिद्धे हि प्लु
॥ते॰ तो ती ति त परत्वादप्रसंगः॥ ॥ ॥

किमत इति॥ यथोद्देशे संज्ञापरिभाषे प्रगृह्यसंज्ञा स्वरसंधिप्रकरणमध्यपतिता न भवतीति प्रश्नः॥ कार्यकालमिति॥ कार्यकाले त्वादुगुणानां कार्ये स्वच प्रधानत्वात् प्रधानदेशत्वस्य न्याय्यत्वादिति भावः॥ उपस्थिते हीति। उपस्थितमनार्षे इति करणः। अप्लुती इतीसत्र प्लुताश्रये प्रकृतिभावे प्रतिषिद्धे प्रगृह्याश्रयः प्रकृतिभाव इष्यते तदाह॥ पठिष्यतीति॥ यत्र प्रगृह्यसंज्ञा नास्ति स प्लुताश्रयप्रकृतिभावप्रतिषेधविषयः। देवदत्ता३ इति देवदत्ते ति॥ यदि पुनरिति॥ ननु व्यक्तिपक्षाश्रयणात्प्लुतानां न हि ध्वनि तिन पुनस्तपरत्वात्।

किमतो यत्सिद्धः प्लुतः स्वरसन्धिषु॥ संज्ञाविधौ च सिद्धः। तस्यासिद्धत्वात्तत्कालात् एवमत्रं ति॥ संज्ञाविधौ च सिद्धः कथं॥ कार्यकालं संज्ञापरिभाषं॥ यत्र कार्यं तत्र द्रष्टव्यं। प्लुतः प्रगृह्यः प्रकृत्येसे उपस्थितमिदं भवति। ई३ दूदेद्द्विवचनं प्रगृह्यमिति॥ किं पुनः प्लुतस्य प्रगृह्यसंज्ञावचने प्रयोजनं। प्रगृह्याश्रयं प्रकृतिभावो यथा स्यात्। मा भूदेवं। प्लुतः प्रकृत्येलेवं भविष्यति। नैवं शक्यं। उपस्थिते हि दोषः स्यात्। अप्लुतवदुपस्थित इत्यत्र पठिष्यति ह्याचार्यः। बहुवचनं प्लुतकार्यप्रतिषेधार्थं॥ प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसंगोऽन्येन विहितत्वादिति॥ तस्मात्प्लुतस्य प्रगृह्यसंज्ञैषितव्या प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात्। यदि पुनर्दीर्घाणामतपराणां प्रगृह्यसंज्ञोच्यते एवमप्येकार एव एकः सवर्णान्न गृह्णीयात् ईकारोकारौ न ग्रहीष्यातां किं कारणं अनणत्वात्॥ ॥ ॥

अयमत्राशयः॥ आकृतिपक्ष आश्रयिष्यते। दीर्घोच्चारणं च प्रयत्नाधिक्याद्ध्रस्वानां न भविष्यति। प्लुतानां न्तु प्रवर्जिष्यते। एवमपीति॥ अयं भावः॥ आकृतिपक्षे यथा ह्रस्वानां प्रयत्नाधिक्यान्न भवति तथा दीर्घोच्चारणसामर्थ्याद्विशिष्टव्यक्तिस्थैवाकृतिर्गृह्यत इति प्लुतानां न स्यात्॥ यथा स्थूलं गामानयेत्युक्ते न कृशस्यानयनं भवतीति आकृतिपक्षे पि विशिष्टैव [redacted] दीर्घव्यक्तिर्गृह्यते। तथा चानण्त्वादीदूतौ ग्राहकौ न स्यातां॥ ॥ ॥ ॥

=ह्रस्वदीर्घप्लुतसाधारणी आपकमातिरूपीमते [redacted] अणुदित्सूत्रं च प्रयोजनाभावात्ककिष्यत इति पूर्वपक्षाशयः। आकृतिपक्षाश्रयणे [redacted] प्यइउण्सूत्रस्थैरेव स्तुतोक्तरीसाणुदित्सूत्रारंभसामर्थ्यादुदात्तादिभेद साधारणी ह्रस्वादितत्तद्व्यक्तिवृत्तिव्याप्यजातिराश्रीयते तासामपि गुणानां भेदकत्वमसे

आ०कै०प्र० ७३

73

यदि पुनरिति॥ ह्रस्वसाहचर्याद् इकारोऽपि ह्रस्व एव शब्देनाभिधीयत इति ह्रस्वानामिति बहुवचनं। तत्र ह्रस्वनिर्देशे गणात्वाराक्रतिपक्षे वा यत्वाद्विसमाधानात् भिन्नकालानां ग्र
हणं सिध्यतीत्यर्थः। प्लुतभावीति। प्लुतो भावी यस्य सः प्लुतभावी स्थानी प्रकृतः तस्यैव प्रकृतिभावः। ननु प्लुतस्यासिद्धत्वात्स्थान्यपि प्लुतभावित्वात् प्लुतव्यपदेशं कथं ल
भते॥ नैष दोषः॥ प्लुतोऽस्य स भावीति बुध्या कल्पनमेतत्। न च तत्र प्लुतस्यासिद्धत्वं। अन्यथा प्लुतोऽसिद्ध इत्ययमपि व्यवहारो न स्यात्। कार्यकालपक्षमाश्रित्य

यदि पुनर्ह्रस्वानामनपराणां प्रगृह्यसंज्ञोच्यते। नैवं शक्यं। इहापि प्रसज्येत। अ३ कुर्वेहि। अ३त्र। अ३ कुर्वेस्य त्रैतीति॥ तस्माद्दीर्घाणामे
व तपराणां प्रगृह्यसंज्ञा वक्तव्या। दीर्घाणां चोच्यमाना यां प्लुतानां न प्राप्नोति॥ एवं तर्हि किंचिदेतेन यत्नेन यासिद्धः प्लुतः स्वरसं
धिष्विति। असिद्धः प्लुतस्तस्यासिद्धत्वात्तत्काला एव भवन्तीति। कथं यत्नेऽन्त्या पृक्तमुक्तं। प्लुतप्रगृह्या अचीति। प्लुतभावी प्रकृत्ये
त्येवमेतद्विज्ञायते। कथं यत्रास्य योजनमुक्तं क्रियते तन्न्यास एव॥ अ३प्लुतात्प्लुत इति॥ एवमपि यासिद्धे प्रगृह्यकार्ये तत्प्लुतस्य
न प्राप्नोति॥ अणोऽप्रगृह्यस्यानुनासिक इति। एवं तर्हि किंचिदेतेन यत्नेन कार्यकालं संज्ञापरिभाषमिति यथोद्देशमेव सं
ज्ञापरिभाषं। अत्र चासावसिद्धः तस्यासिद्धत्वात्तत्काला एव भवन्ति॥ ॥ ॥

ह॥ एवमपीति॥ तत्रत्वाग्नी३ इत्यत्र प्रगृह्यसंज्ञा अनुनासिकप्रतिषेधे क्रियमाणे प्लुतस्यासिद्धत्वात्प्रगृह्यत्वाभावादनुनासिकः स्यात्॥ यथोद्देशपक्षाश्रयेण परिहारः॥
कथं पुनरयं पक्षो यावता कार्यार्थत्वात्संज्ञापरिभाषस्य कार्यकालतैव न्याय्या। नैष दोषः॥ यदानुद्दिश्य प्रयोजनविशेषं प्रयोजनमात्रमभिसंधाय प्रवृत्तिः
किंचिदनेन प्रयोजनमिति संज्ञापरिभाषं प्रणीयते। तदा संभवत्येवायं पक्षो यथाश्रुतया हि प्रतिपत्रपेक्षः। महावाक्यार्थपर्यालोचनप्रवृत्तप्रतिपत्रपेक्षस्तु का

राम० ७३

कथं पुनरिति। ईदादयो यदि संज्ञिनस्तद्विशेषणं तु द्विवचनं तदा द्विवचनान्तत्वमीदादीनां न संभवतीति द्विवचनानामेवेदादीनां संज्ञया भाव्यं। अथ द्विवचनं संज्ञितद्विशेषणमीदादयस्तदा तदन्तविधिरप्राधानेन प्राधानस्येति ईदाद्यंतं द्विवचनमिति पक्षः। तत्रोभयोरपि पक्षयोर्दोषं दर्शनाम्यन्नः। पचेते इति॥ एकारोऽत्र द्विवचनं न भवति अपि तु तस्यान्तः। वचनादिति। द्विवचनावयवे द्विवचनशब्दो वृत्तिं ष्यते इत्यर्थः। अस्तीति। मुख्ये संभवति गौणस्य ग्रहणमन्याय्यमित्यर्थः। खट्वे इति। अत्रादिवच्चेत्यादिवद्भावादेकारो द्विवचनम्॥ एकस्येति॥ असहायस्येत्यर्थः॥ ईदूतोः केवलयोरेव संभव इति वचनसामर्थ्यात्तयोः सिद्ध्यति। एकारान्तस्य

कथं पुनरिदं विज्ञायते ईदादयो यद्द्विवचनमाहोस्विदीदाद्यन्तं यद्द्विवचनमिति। कश्चात्र विशेषः। ईदादयो यद्द्विवचनं प्रगृह्यास्इतिचेदं तस्य विधिः॥
ईदादयो यद्द्विवचनं प्रगृह्या इति चेत्तदन्तस्य प्रगृह्यसंज्ञा विधेया। पचेते इति। पचेथे इति। वचनाद्भविष्यति। अस्ति वचने प्रयोजनं। किं। खट्वे माले इति२
इति। अस्तु तर्हि ईदाद्यन्तं यद्द्विवचनमिति। ईदाद्यन्तं यद्द्विवचनमिति चेदेकस्य विधिः। ईदाद्यंतं द्विवचनमिति चेदेकस्य प्रगृह्यसंज्ञा विधेया।
खट्वे माले इति। न वाद्यन्तवत्त्वात्। न वा एष दोषः। किं कारणं। आद्यन्तवत्त्वात्। आद्यन्तवदेकस्मिन्कार्यं भवतीत्येकस्यापि भविष्यति। अथ
इति२
एवं तर्हि एवं वक्ष्यामि। ईदाद्यन्तं यद्द्विवचनान्तमिति॥ ॥ ॥

द्विवचनस्य पचेते इत्यादौ संभवात्खट्वे इत्यत्र न सिध्यतीति दोषः। येन विधिस्तदन्तस्येत्यत्र स्व[सा]रूपस्येति नाश्रितमिति दोषोपन्यासः। अथ वेति। प्रत्ययग्रहणे यस्मा
दिति द्विवचनेन तदन्तविधिः। पश्चाद्द्विवचनान्तमीदादिभिर्विशेष्यत इत्ययं तृतीयः पक्षो भवति। ईदाद्यंतं यद्द्विवचनान्तमिति। ननु संज्ञाविधौ प्रत्ययग्रहणे न तदन्तवि
धिभावः। सुप्तिङन्तं पदमित्यत्रांतग्रहणे नज्ञापितत्वादिति कथमेतत्पक्षोपपत्तिः॥ चतुर्थपक्षप्रतिक्षेपाय वक्ष्यत्येवैतद्भाष्यकारः इति नैतद्दूर्ध्वं चोद्यम्॥ दोषान्तरे लो

प्र. उद्योत कैयट ॥०॥

भा० कौ० प्र०
७४
74

लुक्प्रतिषेध इति॥ शेषस्य ङ्यावेवैनैवास्य पक्षस्य निराकरणात् अन्तर्दन्तविधिमात्रोत्रनोक्तः। कुमार्य्यगारमिति। कथं पुनरस्य द्विवचनान्तस्य समासः। यावता वृत्तौ संख्यावि-
शेषो न गम्यते॥ नैष दोषः॥ यथा तावत् क्रीनद्यसाहावारे शेन संख्याविशेषोऽभिव्यज्यते तथेहापि समासे प्रगृह्यसंज्ञायां प्रकृतिभावेन द्वित्वं व्यज्यते इति दोषोपन्यासः। सप्तम्या- स०२
मिति। ईदूतौ सप्तमीत्येव तदन्तविधौ सति प्रत्ययलक्षणेन सोमो गौरी अधिश्रित इत्यादौ सिद्धायां प्रगृह्यसंज्ञायामर्थग्रहणं ज्ञापयति। प्रगृह्यसंज्ञाप्रकरणे प्रत्य-
यलक्षणं न भवतीति। तन्न हीति। अमी ईदाद्यन्तवड्भावानाश्रयणात् यतः तीयः पक्षः परिगृहीतः। तत्र च दोषप्रतिविधानार्थं मर्थग्रहणं कर्त्तव्यं भवतीति सूत्रतो
अधिक ज्ञापकार्थं

ईदाद्यन्तं यद्द्विवचनान्तमिति चेल्लुक्प्रतिषेधः। ईदाद्यन्तं यद्द्विवचनान्तमिति चेल्लुक्प्रतिषेधो वक्तव्यः। कुमार्योरगारं कुमार्य्ये-
गारं। वध्वोरगारं वध्वगारं। एतदीदाद्यन्तं श्रूयते द्विवचनान्तं भवति प्रत्ययलक्षणेन। सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षण-
प्रतिषेधस्य यदयमीदूतौ च सप्तम्यर्थ इत्यर्थग्रहणं करोति तज्ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति। तन्नार्हति
ज्ञापकार्थमर्थग्रहणं कर्त्तुमेवं न कर्त्तव्यं। ईदादिभिर्द्विवचनं विशेषयिष्यामः॥ ईदादिविशिष्टेन च द्विवचनेन तदन्तविधिर्भविष्यति॥
ईदाद्यन्तं यद्द्विवचनं तदन्तमीदाद्यन्तमिति। एवमप्यमुप्लेव स्त्रेशुल्केसंमपघेतं मुत्या सांवत्से इति॥ ॥ ॥

गौरवं भवतीत्यर्थः॥ ईदादिभिरिति॥ अत्र पक्षे कुमार्य्यगारमित्यत्राप्रसंगः। न ह्यत्रेदूदेदन्तं द्विवचनं किं तर्हि औसिति सकारान्तं। तदन्तमिति। द्विवचनान्तं। ईदाद्यन्त-
मिति॥ ईदादिभिः साक्षात्समुदायस्य संबन्धाभावादीदादिविशिष्टेन ईदाद्यन्तमुच्यते नेदाद्यन्तान्तमित्यर्थः॥ अमुत्या स्तामिति। अमुल्केशब्दात् द्विवचनमोनस्य नपुंसकाच्चे-
ति शीभावः। ततः स्त्रिप्रत्ययः। शीशब्दस्य सुप इति लुक्। अस्य च्याविनीत्वं। तत् क्रियान्तत्वात्तु पतस्मात् मपादिति लुक्। अत्र हि शीशब्दे ईकारान्तं द्विवचनं तदन्तमु- राम०
समुदायः प्रत्ययलक्षणेनेति प्रगृह्यसंज्ञा प्राप्नोति। अत्र हीदादिद्विवचनमिति ईदादिशब्देनेदाद्यन्तमुच्यते॥ ॥ ॥ ७४

क्वचित्तु पाठ ईदाद्यं तेच श्रूयन्त इति तत्रैवं व्याख्येयं ईदान्तं च श्रूयते सूत्रे तदन्तविधिरीदादिभिर्द्विवचनस्याश्रीयत इत्यर्थः। यस्त्वयमस्यच्व्याविनीकारः स द्विवचनस्य न कश्चिदिति नन्त
दभिप्रायेण भाष्ये व्याख्येयं। अथापि कथं चिदिति। स्थानिविशेषानपेक्षायां कृताकृतप्रसंगित्वेन लुक्शास्त्रप्रवर्त्तनादित्यर्थः। अथवा नित्यत्वे न बाधकत्वं लक्ष्यते तेनान्तरं
गानपीति न्यायेन शीभावस्य तु लुग्बाधक इत्यर्थः। एवमपि दोष इति। पक्षस्योत्थानमेव नास्तीति तत्सक्षासंभव एव दोषः। अवश्यमिति। यदाश्रयणमयादयं पक्षोंगीकृतः

अत्र हीदादि च द्विवचनं तदन्तं च भवतिप्रत्ययलक्षणेन। अत्राप्यकृते शीभावे लुग्भविष्यति॥ इदमिह संप्रधार्यं लुक्क्रियतां शीभाव
इति किमत्र कर्त्तव्यं परत्वाच्छीभावः नित्यो लुक्। कृते शीभावे प्राप्नोत्यकृतेपि प्राप्नोति। अनित्यो लुगन्यस्याकृते शीभावे प्राप्नोत्यन्यस्य कृ
ते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। शीभावोप्यनित्यः न हि कृते लुकि प्राप्नोति। उभयोरनित्ययोः परत्वाच्छीभावः। शीभावे ॥
[redacted] कृते लुक्॥ अथापि कथंचिन्नित्यो लुक्स्यादेवमपि दोषः। वक्ष्यते तत्। परसंज्ञायामंतग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधि ॥ शे॰
प्रतिषेधार्थमिति। इदंचापि प्रत्ययग्रहणमयंचापि संज्ञाविधिः अवश्यं खल्वस्मिंपि क्षे आद्यन्तवद्भावएषितव्यः तस्मादल्लत्वएवमध्य कौ॰

तस्माद्यंतवद्भावस्मास्मिन्नपि पक्षेऽवश्यमाश्रयणमंगीकृतं॥ अमीइ सत्र हीकारएव द्विवचनं न त्वीकारांतं तस्मादिति। द्वितीयएव पक्षोऽस्त्वित्यर्थः॥ मणीवादीनां प्रतिषे
धो वक्तव्य इति भाष्यवार्त्तिककाराभ्यामपठितत्वादप्रमाणमेतत्। मणीवोष्ट्रस्येति तु प्रयोगो वा शब्दस्योपमानार्थस्य। रोदसीवेत्यादिस्तु छांदसः प्रयोगः॥ छन्दसि तु
॥सर्वे विधयो विकल्प्यन्ते॥ ॥ ॥

मा०कै०प्र० ७५ 75

अदसो मात्॥ मात्प्रगृह्येति॥ अस्मिन्सूत्रे न्यास इत्यर्थः। ऊत्वस्य चेति। चशब्दान्मत्वस्य च। शास्त्रस्यासिद्धत्वाच्च स्थानिलक्षणमेव कार्यं प्राप्नोति ना देशलक्षणमि
त्ययादिप्रसंगः। अमी अत्रासते इत्ययादेशः प्राप्नोति अमू अत्रासाते इत्यावादेशः॥ ननु च क्षिप्रशब्दस्य यत्वाद्बहिरंगाश्रयादयोऽन्तरंगे षीत्वादि षत्वसिद्धा इति पूर्वोभावे कथं पूर्वत्रा
सिद्धमितीत्वादीनामसिद्धत्वं स्यात्॥ नैष दोषः। नाजानन्तर्ये इति बहिरंगपरिभाषानिषेधात्। ननु चेति। यथोद्देशपक्षेऽप्यत्रासिद्धत्वं भविष्यतीत्यर्थः। कार्यका
लपक्षमाश्रित्याह। वचनार्थो हीति। वचनस्य प्रयोजनमित्यर्थः। नैकमिति। अनेककार्येत्यप्यर्थे संज्ञासूत्रं नैकेन प्रयुज्यत इत्यर्थः। अस्य त्वसूत्रमेकेन प्र

×अमी अत्रेत्यत्र एकादेशः।१२×

अदसो मात्॥ मात्प्रगृह्यसंज्ञायां तस्यासिद्धत्वादयावेकादेशप्रतिषेधः॥ मात्प्रगृह्यसंज्ञायां न स्यादीत्वस्य ऊत्वस्य चासिद्धत्वादया
वेकादेशाः प्राप्नुवन्तीति तेषां प्रतिषेधो वक्तव्यः। अमी अत्र। अमू अत्र। अमी आसते। अमू आसाते॥ ननु च प्रगृह्यसंज्ञावचनसाम
र्थ्यादयादयो न भविष्यन्ति। वचनार्थो हि सिद्धे नेदं वचनारब्धं। अस्ति ह्यन्यदेतस्य वचने प्रयोजनं। किं। यत्सिद्धे प्रगृह्यकार्यं तद
र्थमेतत्स्यात्। अणोऽप्रगृह्यस्यानुनासिक इति। नैकं प्रयोजनं योगारम्भं प्रयोजयति। यद्येतावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयादणो प्र
ऽप्रगृह्यस्यानुनासिकोऽदसो नेति॥ ॥ ॥

युज्यते अमुड्डादणित्यादि। तत्रैवायमिति॥ न च तत्रेदं ईदेद्ग्रहणं कर्तव्यं। मा भूदिति वा। यस्माद् अणोऽनुनासिकोऽवसाने विधीयते पूर्वेणाच्च णकारेण प्रत्याहारेणमिति अमो
अमुके अमुकाम्पामित्यादावनुनासिकस्यासंगएवान्तरे वं कार्यकालेऽपि संज्ञापरिभाषे मकरणोलक्षेणाविधीयमाना प्रगृह्यसंज्ञा सर्वप्रगृह्यकार्यार्थासती असि राम० ७५
द्धत्वं बाधिष्यत इत्यर्थः॥ ॥श्री॥ ॥

पद्धिकारो २

विप्रतिषेधाद्वेति॥ अयावेकादेशप्रतिषेधो वक्तव्यः। विप्रतिषेधाद्वा प्रगृह्यसंज्ञेति विकल्पार्थो वा शब्दः। नैकं प्रयोजनमिति सा दृष्टा भाष्यकारेणोक्तो न वार्त्तिककारेणेति न दृ पे
ष्टो विकल्पः। नैष युक्त इति। इष्टसिद्धये इति भावः। करिष्यत इति। आश्रयिष्यत इत्यर्थः॥ इतरस्त्वगृहीताभिप्राय आह॥ सत्र विपर्यास इति। अभिप्रायं प्रकाशयितुमाह॥ एवं तर्हीति।
द्विकार्ययोगो हीति। द्वाभ्यां कार्याभ्यां योयुज्यते स विप्रतिषेधविषयत्वाद्विप्रतिषेधः। असंभवोपीति॥ असंभव एव विप्रतिषेधः स तु कदाचिद्द्विकार्ययोगो भवति कदाचित्केवलो

विप्रतिषेधाद्वा। अथवा प्रगृह्यसंज्ञा क्रियतां अयादयो वेति। प्रगृह्यसंज्ञा भविष्यति विप्रतिषेधेनेति। नैष युक्तो विप्रतिषेधः। विप्रतिषेधे प
रमिसु अनेपूर्वा च प्रगृह्यसंज्ञा परे यादयः। परा प्रगृह्यसंज्ञा करिष्यते। सत्र विपर्यासः कृतो भवति। एवन्तर्हि परैव प्रगृह्यसंज्ञा। कथं कार्यका
लं संज्ञापरिभाषं। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति अयादयो मादिति। एवमप्ययुक्तो विप्रतिषेधः॥
कथं। द्विकार्ययोगो हि विप्रतिषेधः। न चात्रैको द्विकार्ययुक्तः। एचामयादयः ईदूतोः प्रगृह्यसंज्ञा नावश्यं द्विकार्ययोग एव विप्रतिषेधः किं तर्हि
असंभवोपि। स चास्त्यत्रासंभवः। प्रगृह्यसंज्ञाभिनिर्वर्त्यमाना अयादीन् बाधते। अयादयोभिनिर्वर्त्यमानाः प्रगृह्यसंज्ञाया निमित्तं विघ्नन्तीत्ये
षोऽसंभवः। सत्यसंभवे युक्तो विप्रतिषेधः। एवमप्ययुक्तो विप्रतिषेधः सतो हि विप्रतिषेधो भवति न चात्रैत्वोत्वे स्तः। नापि मकारः। उभयमसिद्धं॥ ०॥

कोसावसंभवः। २

पीत्यादि। सति संभवे द्विकार्ययोगत्वात्तु विप्रतिषेधः। यथैकस्य दधातेरडागमद्विर्वचने भवतः अदधादिति क्वचिदेकस्य द्विकार्ययोगाभावेप्यसंभवोस्ति। यथात्र पूर्वाणामिस
त्रनु मुरोः प्रकृतिभावस्य यमन्तयोः परस्परनिमित्तव्याघातात्। अयादीन्बाधत इति॥ प्रकृतिभावविधानात्। निमित्तमिति। ईत्वमूत्वं च॥ ॥ ॥

भा॰कै॰प्र॰
८६
76

आश्रयात्सिद्धत्वमिति॥ प्रगृह्यसंज्ञायां कार्यित्वेनाश्रयणात् असिद्धत्वाभावादीत्वादीनां तेषामयादीनां च विप्रतिषेधो निरूप्यते। तथा हि तत्र नो हि विप्रतिषेधो भवतीति पूर्वपक्षे ईदादीनामेव प्रतिषेधः अप्राप्तिप्रसङ्गः। तत्रायादीनां च यत्नेनालावकः अग्नेऽत्रेत्यत्रावकाशः। ईदादीनां तु यत्रायादीनामप्रसङ्गः सोऽवकाशः। अमी अत्रेत्यत्र अमू अत्रेत्यत्र अमीश्वा इति। अमी अत्रेत्यादावुभयप्रसङ्गे परत्वादीदादय एव भवन्ति। अत्र व्याख्यानान्तरं क्लिष्टत्वान्नोपन्यस्तम्॥ न पुनर्यथैवेति। रोः सुपीत्यस्या

आश्रयात्सिद्धत्वं यथा ऐत्त्वे। आश्रयात्सिद्धत्वं वक्तव्यं। न द्वयथा। रुत्वे आश्रयात्सिद्धो भवति॥ किं पुनः कारणं रुत्वे आश्रया
त्सिद्धो भवति। न पुनर्यथैव रुः सिद्धः तथैवोत्वमप्युच्यते। नैवं शक्यं। असिद्धे ह्याद्गुणाप्रसिद्धिः असिद्धे ह्युत्वे आद्गुणस्याप्रसिद्धिः स्या
त्। वृक्षोऽत्र। प्लक्षोऽत्र॥ तस्मात्तत्राश्रयात्सिद्धत्वमेषितव्यं॥ यथा तत्राश्रयात्सिद्धं भवति। एवमिहाप्याश्रयात्सिद्धत्वं भविष्यति। अथवा प्र
गृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति। अथवा योगविभागः करिष्यते। अदसः। अदसः [redacted] ईदादयः प्रगृह्यसंज्ञा भवन्ती
ति॥ ततो मात्। मात्परे ईदादयः प्रगृह्यसंज्ञा भवन्तीति अदस इत्येव। किमर्थो योगविभागः एकोऽयत्सिद्धे प्रगृह्यकार्यं तदर्थः॥
१ अपयोऽयदसिद्धे॥ ॥ ॥

नन्तरमत्र उत्वमीति वक्तव्यं। एवं चासिद्धत्वं न बाधितं भवति। अत्र पाठक्रमेऽसिद्धत्वस्याप्राप्त्यभावात्। प्लुतस्य चोत्वे सिद्धत्वात्तत्कालत्वाभावादप्लुतादप्लुते इति न राम॰
वक्तव्यं भवति। अथ वेति। यथोद्देशपक्षाश्रयेणोत उच्यते। कार्यकालतायामप्याह। अथवेति। अदस इति संबंधसामान्ये षष्ठी। अदसः संबंधिनः ईदूदेत इति॥ ॥ ८६

अ
इहापीति। अदस्तरा अदस्तमोसा। अमुत्वं। टापा सवर्णदीर्घत्वं। आदिः चाप इ से त्वं। अदे औ दे औ स इति स्थिते अदस इसत्वमादिति विशेषणमाभावात्प्रग्रह्य
संज्ञायां सत्यामयादेशप्रसंगः। अमुकेनेति। अदस इसनेनप्राप्नोति। ए॰ दन्तमिति। ईदूतो रेव स्वरितत्वप्रतिज्ञानादिति भावः। अनन्तु हृन्निरेव निवृत्तिः। यद्येवं माङ्ग्रहणं
नकर्त्तव्यं। ए॰ ङ्ग्रहणनिवृत्तैवामुकेनेत्यत्र प्रसंगात्। नेत्यदति। सतिमाङ्ग्रहणे योगविभागो भवतिनान्यथा। एकयोगे परिहारान्तरम॰ प्याह॥ अप्यर्थेति। मात्रार्थादिति।
मात्रार्थ एव स्यान्नीमशब्दे नोक्तः ईहदर्थे च्छेदूदिति। न चासंकल्पनायामसिद्धत्वं भवति। बुद्धिसंकल्पनायामसिद्धतास्योक्तत्वात्। उक्तं वेति। असिद्धत्वमेवात्र प्रतिषि
भाव२

इहापि न हि प्राप्नोति॥ अमुया अमुयोरिति। किंच स्यात्। यद्यत्र प्रगृह्यसंज्ञा स्यात्तदा प्रगृह्याश्रयः प्रकृतिभावः प्रसज्येत। नैष दोषः। पदा
न्तप्रकरणे प्रकृतिभावः। न चैष पदान्तः। अवमप्यमुकेन अत्रापि प्राप्नोति। द्विवचनमिति वर्त्तते। यदि द्विवचन॰ मिति वर्त्तते अमी अत्रेति न अत्र२
प्राप्नोति। एवं तर्हि ए॰ दन्तमिति निवृत्तं। अथवा हायमदसो मादिति। न च ईत्वोत्वे स्तः। नापि मकारः। तत एवं विज्ञास्यामः। मात्र्योदीदूद्यर्थो
नामिति। उक्तं वा। किमुक्तं। अदस ईत्वोत्वे स्वरे बहिः पदलक्षणे सिद्धे वक्तव्ये प्रगृह्यसंज्ञायां चेति। तत्र सक्तिदोषः। तत्र सकाकारे दोषो भ
वति। अमुकेत्र। नवा ग्रहणविशेषणत्वात्। नवा एष दोषः। किंकारणं। ग्रहणविशेषणत्वात्। न माङ्ग्रहणेन ईदादयो विशेष्यन्ते किं तर्हि ईदादयो वि
शेष्यन्ते मात्परे ईदादय इति॥ ॥

द्धमित्यर्थः। स्वरे इति। अचि॥ बहिष्पदलक्षण इति। द्वितीयपदस्य वस्थित इत्यर्थः। तेनैकपदस्य व्यवस्थिते चि असिद्धे ईत्वोत्वे। तेनामुयोरित्यत्रायादेशो भवत्येव। मुया८
प्रगृह्यसंज्ञायां चेति॥ प्रगृह्यसंज्ञायामेवासिद्धत्वेन सिद्धत्वस्य प्रपंचार्थः पूर्ववाक्योपन्यासः। तत्र सक्तिदोष इति। मात्परं यदीदाद्यं तमिति दोषोपन्यासः। एवं सूत्रे
हितदन्तं ग्रहीतमिति हापि तदन्तस्यैवानुवृत्तिरिति भावः। स्वरितत्वेन शब्दमात्रमनुमीयत इति उत्तरे भिप्रायः। तत्र माङ्ग्रहणेन गृह्यमाणमीदूदेद्विशेष्यते तेनामुकेस
त्रैव्यवधानाद्दोषाभावः। योगविभागे दोषप्रसंगादेदन्तमिति निवृत्तमित्युक्तं एकयोगे तु तन्निवृत्तिः सा संयोजनमिति नवा ग्रहणविशेषणत्वादित्युक्तं॥ ॥

भा० कै० प्र० शे॥ इह कस्मादिति॥ अत्र हि प्रत्यक्षमेव शे इति रूपं प्रयुज्यमानस्य स्येइ सत्र लुगाकारस्यानुबंधसंस्मरणादनुमेयमिति प्रश्नः॥ शेऽर्थवद्ग्रहणादिति॥ स्वं शब्दस्य सेसेवानंतरं
७७ गत्वादहेयत्वाद साधारणत्वाच्च रूपपरिग्रहे सिद्धे रूपवदर्थस्याप्यंगीकरणार्थं रूपग्रहणं कृतं। अत्र च शब्दशास्त्रेऽनर्थकः। सप्तम्येकवचनं तु अर्थवत्। तयोः समुदायोऽर्थान्तरा
77 माऊ औ वादनर्थकः। एवमपीति। अत्र हि मत्वर्थीयसप्तम्येकवचनयोरर्थवतोः समुदायोऽर्थवानेव। अवयवधर्मोऽनुविधानात् समुदायस्येति प्रश्नः। लक्षणेति।

शे॥ ॥इह कस्मान्न भवति काशे कुशे वंशे इति। शेऽर्थवद्ग्रहणात्॥ अर्थवतः शेशब्दस्य ग्रहणं। न चैषोऽर्थवान्। एवमपि हरिशे बभ्रुशे इत्यत्र प्राप्नोति। एवं तर्हि लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं भविष्यति। अथवा पुनरस्त्वर्थवद्ग्रहणे नानर्थकस्येति। कथं हरिशे बभ्रुशे इति। एकोऽत्र विभक्त्यर्थेनार्थवान्। अपरस्तद्धितार्थेन। समुदायोऽनर्थकः॥ शे॥ ॥

प्रतिपदोक्ते हि रूढिनिमित्ता प्रतिपत्तिर्भवति। लाक्षणिके तु लक्षणानुसंधानद्वारेण बहिरंगेति न तस्य ग्रहणं। अथवेति॥ अर्थवत्समुदायस्यापि क्वचिदानर्थक्यं
यथा दशदाडिमादिवाक्यस्य पदार्थानां परस्परमन्वयाभावादिहापि हरिशेशब्दवाच्यार्थगतसंख्याधिकरणशक्तिप्रतिपादनाय प्रवृत्ता सप्तमी न प्रत्ययप्र राम०
तिपाद्येनान्वेतीति शेशब्दस्यानर्थक्यम्॥ ॥ ॥ ॥ ७७
नार्थे

निपात एकाजनाङ्॥ निपात इति किमर्थमिति। निपातस्यैवैकाचोऽर्थवत्त्वात् प्रत्ययस्य केवलस्य प्रयोगाभावादानर्थक्यात् कल्पितरूपत्वात् कल्पनाया अनियमाभावात्प्रश्नः। च
कारान्ते ति। अन्वयव्यतिरेकाभ्यां प्रत्ययस्याप्यर्थवत्त्वमिति भावः। निपातोऽपि केवलो न प्रयुज्यते द्योतकत्वादिति साम्यमेव निपातप्रत्यययोः। अनन्तर इः। अत्रागच्छेत्यपि प्रत्युदा
हरणं॥ एकाजिति किमर्थमिति। एकग्रहणसामर्थ्याद् बहुव्रीहिं मन्यते॥ ततश्च प्रेदं ब्रह्मत्वे सनिष्टनिवृत्तिर्न कृतेति प्रश्नः। तत्पुरुषोऽयमिति॥ अन्तरङ्गत्वाद्बहिः पदार्थप्राधान्या
दिति भावः। नैव दोष इति। ननु पुरोहिरिति हल्नन्तस्य प्रकृतिभावाद्रोहत्वं न स्यात्। नैष दोषः॥ प्रगृह्यसंज्ञायां कृतायामपि कृतत्वात्सकारस्य च कार्यान्तराप्रसंगात्॥ उक्ते तु रूत्वमाश्रया

निपात एकाजनाङ्। निपात इति किमर्थं॥ चकारात्राजहारात्र॥ एकाजिति किमर्थं॥ प्रेदं ब्रह्म। प्रेदं क्षत्रं। एकाजि सूच्यमाने हि अत्रापि प्राप्नोति॥ ए
षोऽपि ह्येकाच्॥ एकाजिति नायं बहुव्रीहिः। एकोऽज् यस्मिन्सोऽयमेकाजिति। किं तर्हि तत्पुरुषोऽयं समानाधिकरणः। एकोऽच् एकाच् एकाजिति। यदि तत्पु
रुषोऽयं समानाधिकरणः। नार्थ एकग्रहणेन। इह कस्मान्न भवति प्रेदं ब्रह्म प्रेदं क्षत्रं। अजेव यो निपात इत्येवं विज्ञायते। किं वक्तव्यमेतत्॥ न हि क
थमनुच्यमानं गंस्यते। अज्ग्रहणसामर्थ्यात्। यदि हि अप्रच्चान्यच्च तत्र स्याद् अज्ग्रहणमनर्थकं स्यात्। अस्ति ह्यन्यदज्ग्रहणस्य प्रयोजनं। किं। अजन्त
स्य यथा स्यात् हलन्तस्य माभूदिति। नैव दोषो न प्रयोजनं। एवमपि कृत एतद्द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोराद्यन्तवदेकस्मिन्निति इयं च न भविष्यति येन विधिस्तदन्तस्येति
न स्येति च इयमिह परिभाषा भविष्यति आद्यन्तवदेकस्मिन्निति इयं चु न भविष्यति येन विधिस्तदन्तस्येति॥ ॥ ॥
त्सिद्धं॥ एवमपीति। अन्यतरनिवृत्त्या अज्ग्रहणस्यार्थवत्त्वादज्मात्रं गृह्यते न तदन्तं निरस्यते विपर्ययस्तु न भवतीति विशेषाभावात्प्रश्नः। पाणिन्युक्तं तत्तान्तादेशौ परिभाषाश
ब्दे नोक्तौ। सावकाशयोरिति। निरवकाशस्य बाधकत्वादेवमुक्तं। तत्र तदन्तविधेरवकाशः ओणावप्यकेलाश्वं पाश्वमिति॥ आद्यन्तवद्भावस्यावकाशः। भिदचोंऽत्यात्परः। ता
नियानीति॥ अत्र हि सा श्रवादन्तग्रहणमस्तीति तदन्तविध्यभावः। समवस्थितयोरिति॥ इह प्राप्तयोः॥ ॥ सामान्या २ ॥ ॥

आचार्यप्रवृत्तिरिति॥ यदि तर्हि लिंगेन तदंतविधिर्निराक्रियते तदा तन्मूलत्वाद्यंतवत्परिभाषा कथं प्रवर्त्तते॥ नैष दोषः॥ आद्यन्तवदित्यस्योपस्थानाय तदंतविधिः प्रथमं सन्निधीयते॥ पश्चात्तु लिंगात्परिसज्यते॥ अथवा लिंगादेजग्रहणं निपातेन विशेष्यते इति तदन्तविधेरभावादतिदेशस्यापि माभूत्प्रवृत्तिस्तत्फलसंपत्स्यतीत्यकं परिभाषाभविष्यतीति॥ एवं तर्हीति॥ संज्ञाया विधीयमानत्वात्प्राधान्यात्तत्संज्ञिनो गुणत्वात्प्रभुनायजेतेतिवत्संख्या विवक्षायां सिद्धायां एकग्रहणमन्यत्र जातिसंप्रत्ययार्थं। समुदायग्रहणाशंका या निरासार्थं ह्येकग्रहणं तापन फलं संपद्यते किं पुनः स्याद्यद्यत्राच्समुदायस्य ग्रहणं स्यात्॥ उच्यते॥ इह अइउ पेहीति समुदायस्यैका संज्ञा स्याच्चावयवा नामेका। द्विर्वचन वदित्संतस्येव प्रकृतिभावाद्यणादेशो न स्यात्॥ पूर्व

आचार्यप्रवृत्तिर्ज्ञापयति। इयमिह परिभाषा भवति॥ आद्यंतवदेकस्मिन्निति। इयं न भवति येन विधिस्तदन्तस्येति। यदंमनादि.
ति प्रतिषेधं शास्ति॥ एवं तर्हि सिद्धे सति यदज्ग्रहणे क्रियमाणे एकग्रहणं करोति तज्ज्ञापयत्याचार्यो नत्र वर्णग्रहणे जातिग्रहणं
भवतीति। किमेतस्य ज्ञापने प्रयोजनं। दंभेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिति यदुक्तं तदुपपन्नं भवतीति। अनादि. निकि
मर्थं। आ उदकांतात् ओदकांतात्। इहकस्मान्न भवति आ एवं नु मन्यसे। आ एवं किलतदिति। सानुबंधकस्येदमाकारस्य ग्रहणं॥
अननुबंधकश्चात्राकारः। कपुनरयं सानुबंधकः। क निरनुबन्धकः। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङित्. नविद्याद्वाक्यस्म

योः स्त्रुस्वरसंधिः स्यात् अच्समुदायपरिग्रहानुरोधाच्च निपातसमुदायोगृह्यते एकनिपातस्याच्समुदायस्याभावात्। अनादि. निकिमर्थमिति।ङि. इदि. तोराका
रयोर्विषयविभागप्रदर्शनाय प्रश्नः। इहकस्मादिति। अनुबंधनिवृत्तौ विशेषापरिज्ञानात्प्रश्नः। अर्थविशेषाद्विशेषावसाय इत्युत्तरं॥ ईषदर्थे आ उष्णं
ओष्णं। आङीषदर्थे इति चोक्तं। क्रियायोगे आ इतः एतः प्राद्युद्धि. सप्त्यते आ मर्यादाभिविध्यो रितिसमासविधौ ङि. निर्दिष्टः। आ उदकांतात् ओदकांता
त् आ इहि छत्राद्दा ह्रि छत्रादिति विनाते नेति मर्यादासहते नेत्यभिविधिः। एवं प्रक्रांतस्य वाक्यस्यान्यथा द्योतनायाकारः प्रयुज्यते। आ एवं नु मन्यसे नैवं पूर्वमभू
स्थाः संप्रतिमन्यसे इति वाक्यार्थ भस्मरूचनायाकार इत्यपरे तथा स्मृतेः स्मृचकश्चाकारः प्रयुज्यते ततः स्मृतार्थो निर्दिश्यते आ एवं किलतदिति॥ ॥ ॥

ओत्॥ निपातसमाहारोयमिति। अनर्थकानामपि निपातानां क्रमीमि उउ इत्यादीनां ह्यर्थेमे ह्यभावे पि निपातसमाहारत्वमुक्तं॥ एवं नहीति। चादिषु तथा पाठादिति भा
वः। ओषु यातमिति॥ आ उ ओ इत्यत्रांतवद्भावाद्भवस्य माङि· ति अनाङि· ति प्रतिषेधः माप्नोति। पर्युदासे तु न दोषः। तत्राङ्गदृश स्योकारस्याङ्‌न सहैकादेश आदि वद्भावादुकार
ग्रहणेन ग्रहणमिति सिध्यसेवं गृत्यसंज्ञा। तस्माच्च प्रयोजनं क्वचिच्छाखायामो अयातमिति पाठे शङ्कितिभावः। अदो भवदिति। एवं तत्वेनात्र निपातत्वं। ऊ र्या द्वितीयत्र निपा

प्र१

दृति१

ओत्॥ किमुदाहरणं। आहो उताहो इति। नैतदस्ति प्रयोजनं। निपातसमाहारोयं। आहउआहो इति। उत आह उउताहो इति। तत्रानां ना
ङि· सेवसिद्धा एवं नत्वेक निपाता इमे॥ अथवा प्रतिषिद्धार्थोयमारंभः। ओषु यातेमरुतः। ओषु यातेहहनी च शंकरी। ओ चित्सखायं सख्याव
वृत्यां॥ ओत इत्यप्रतिषेधः। ओदंतस्य निपातस्य चांतस्य प्रतिषेधो वक्तव्यः। अनदः अदः अभवत् अदो भवत्। नरोभवत्। नवक्तव्यो ल
क्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्य सेत्युं भविष्यति। एवमपि अगो गौः सम्पद्यत गो भवत्। अत्र प्राप्नोति॥ × निपात एकाज × २॥

नाधिकारात्॥ प्रतिषिद्धार्थत्वादस्य कपमत्रप्राप्निरिति चेडुभयार्थत्वाददोषः। तथा ह्योदंतस्य प्रगृह्यसंज्ञा विधीयमाना प्रतिबंधाभावाददोभवदित्यत्रापि भवतु।
ऊँषु यातमित्यत्रापि परत्वादनाङि· ति प्रतिषेधं बाधत इति प्रतिषिद्धार्थत्वमपि स्यादिति को विरोधः। ऊँकारस्य प्रतिपदोक्तस्य ग्रहणमित्युत्तरं एवमपीति। ओकार
स्यात्र प्रतिपदोक्तत्वमस्ति गमेर्डो इति साक्षादुच्चारणात्। यस्य हि साक्षादुच्चारणं नास्ति आ उण इत्यादि सामान्यलक्षणेन यदूपं निष्पाद्यते तल्लाक्षणिकमु
॥च्यते॥ ॥ ॥

भा०कै०प्र० ७९ 79

गइ:२ रूपमित्यत्र१

एवं तर्हीति॥ गुणागतो गौणः। यथा गोशब्दस्य जाड्यादिगुणनिमित्तो र्थो वाहीकः। मुख्यमिव प्रधानत्वान्मुख्यः। तत्र संरूपग्रहणे नार्थेव ऽग्रहणस्य ज्ञापितत्वा
दर्थवतः कार्ये गौणभवितव्यं। स चार्थः प्राथम्यान्मुख्य एव गम्यते। गौणे त्वर्थे प्रयुज्यमानो मुख्यार्थारोपेणैव प्रवर्त्तते। इति प्रतत्त्वगौणोर्थः। तस्माद्वौ
किकोयं न्यायो गौणमुख्ययोरिति। गोभवदिस्तत्र तु जाड्यादिना धर्मेण गोत्वमारोपितमिति गौणत्वमर्थस्य गोभवदिस्तत्रेव तत्तो प्रकृतेः कर्तृत्वं तं घी
भवंति व्यास्त्रणा इति बहुवचनदर्शनात्। प्रकृतो च गोत्वमारोपितं न मुख्यमिति मत्वाभावः। शास्त्राश्रये चेति। स्वार्थे वृत्तात्प्रातिपदिकाद्विभक्त्या वुत्पन्नायां

कार्य

एवं तर्हि गौणमुख्ययोर्मुख्ये संप्रत्यय इति। तद्यथा गौरनुबंध्योजोग्नीषोमीय इति न वाहीकोनुबध्यते। कथं तर्हि वाहीके वृद्ध्यात्वे
भवतः। गौस्तिष्ठति गामानयेति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति॥ शब्दाश्रये च वृद्ध्यात्वे॥ ॥
उत्तः ॐ॥ इह कस्मान्न भवति। प्राहो इति। उताहो इति॥ उत्तरं इत्युच्यते। न चात्रो त्वं पश्यामः॥ उञोयमन्येन सहैकादेशः उञ्ग्रह
णेन गृह्यते॥ आचार्यप्रवृत्तिर्ज्ञापयति नोञ एकादेश उञ्ग्रहणेन गृह्यत इति॥ ॥ ॥

कार्येषु कृतेषु शब्दान्तरसन्निधानात् गौणत्वं प्रतीयते तत्स्य च स्वार्थे समुख्यं पदे यो नास्ति। गौणापेक्षयासंबंधिशब्दत्वान्मुख्यपदे शस्य गौणमावेऽभावा
च्छब्दाश्रये चेत्युक्तं। न त्वत्रार्थो नापेक्ष्यते तत्र यथा श्वेतं छागमालभेतेति गुणद्रव्ययोः श्रौतः क्रियासंबंधः वाक्यीयात्वन्यायात्स्वपरस्परेण। एवं गां वाहीकमा
नयेति पूर्वं क्रियाभिसंबंधापेक्षया विभक्त्या वुत्पन्नायां वाक्यीयात्वन्यायात्सामानाधिकरण्यात् ज्ञौणार्थप्रादुर्भावो भवतीति पदकार्येष्वेयं न्यायो न प्रातिपदि एप० ७९
क कार्येष्वित्युक्तं शब्दाश्रये चेति॥ उत्तः ॐ॥ इह कस्मादिति। निपातसमाहारं मत्वा प्रश्नः॥ ॥० ॥

परत्वमिति। एकादेशे कृते आदिवद्भावात् संज्ञासिद्धिः। इह तु पूर्वत्र यं साध्यं। उ इति। विति। ऊँ इति। न चैवं एकयोगे न सिध्यति। एकयोगे ह्यत्र उञ् इति श्रुतिरादेशो न श्रुतत्वात् संबध्यते न प्रग्र
ह्यसंज्ञया सानिपात एकाजनाङ् इति निषेधात् अभविष्यति। शाकल्यस्य तु संहितायां चादेशे विकल्पिते रूपद्वयं स्यात्। उ इति। ऊँ इति। न तु वितीति दृष्टमाह। उञ इति योगविभा
ग इति। उञ इत्यस्य शाकल्यस्येतौ प्रगृह्यमिति चानुवर्तते तेन त्रप्रगृह्यसंज्ञैव शाकल्यस्य मतेन विधीयते नान्येषामिति स्पष्टं। संतरानुसंधानद्वारेण विभाषा संपद्यते। उ इति

परत्वमोदित्यो दंतस्य निपातस्य प्रगृह्यसंज्ञां शास्ति। नैतदस्ति ज्ञापकं। उक्तमेतत्॥ प्रतिषिद्धार्थो यमारंभ इति। दोषः खल्वपि
स्यात्। यद्युञ्येकादेश उञ्ग्रहणेन न गृह्येत। जानु उ अस्य रुजति। जान्वस्य रुजति। जानूँ अस्य रुजति। मय उञो वो वेति वत्वं न स्या
त्। एवं तर्ह्येकनिपाता इमे॥ अथवा द्वावुकाराविमौ॥ एको ननुबंधः। अपरः सानुबंधः। यो ननुबंधकः न स्वेषु एकादेशः॥
उञ इति योगविभागः। उञ इति योगविभागः कर्तव्यः। उञः शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञा भवति॥ उ इति विति। न
तु ऊँ। उञ ऊँ इत्ययमादेशो भवति शाकल्यस्याचार्यस्य मतेन दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च ऊँ इति। किमर्थो योगविभागः। ऊँ वा
शाकल्यस्य। शाकल्यस्याचार्यस्य मतेन ऊँ विभाषा यथा स्यात्। ऊँ इति। उ इति। अन्येषामाचार्याणां मतेन विति॥ ॥

वितीति। ऊँ इत्यत्र च यदि शाकल्येति नापेक्ष्यते तदा प्रगृह्यस्योञो नित्यमादेशः स्यात्। ततश्च विति ऊँ इत्येते द्वे रूपे स्यातां। तस्माच्छाकल्यग्रहणानुवृत्त्या आदेशविकल्पे
सति त्रीणि रूपाणि सिध्यंतीति॥ ऊँ वा शाकल्यस्येति। शाकल्यश्रुतेरेव कृत्स्नं वाग्रहणेन प्रतिपादयति। एतदेव व्याचष्टे। शाकल्यस्य विभाषा यथा स्यादिति। प्रगृह्यसंज्ञा
दे शाच्चैतेऽत्र यद्यपि पूर्वसूत्रेषु कृत्स्नरूपतया निर्दिष्टा शास्त्रादेशोऽपि च प्रगृह्यशब्दोऽपि वचनोपि धेयः तथापीहोत्र इति षष्ठीनिर्दिष्टशास्त्ररूपपदार्थकः संपद्यते॥ ॥

त्यद्

ईदूतौ च सप्तम्यर्थे॥ ईदूतौ सप्तमीत्येवेति। सप्तमीसहचरितं यदीदूदन्तं सप्तम्यां वा परतस्तत्प्रगृह्यसंज्ञं भवतीत्येवं प्रत्ययलक्षणेन तु प्राप्यायामपि सप्तम्यां सोमो गौरी अधिश्रित इत्यादौ भविष्यति प्रगृह्यसंज्ञेति प्रश्नः। लुप्त इति॥ संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधादसत्यर्थग्रहणे सप्तम्या एव संज्ञिनी ला दसत्याश्च कार्याभावात्प्रत्ययनिमित्तं यत्रान्यस्य कार्यं विधीयते तत्रैव प्रत्ययलक्षणस्य सञ्ज्ञावाञ्छौ गौरी सत्राप्रसंगात् अर्थग्रहणं कृतं। अर्थग्रहणे सत्यर्थे

ईदूतौ च सप्तम्यर्थे॥ ईदूतौ सप्तमीत्येव॥ ईदूतौ सप्तमीत्येव सिद्धं। नार्थो र्थग्रहणेन। लुप्ते ऽर्थग्रहणाद्भवेत्। लुप्तायां सप्तम्यां प्रगृह्यसंज्ञा न प्राप्नोति। किं। सोमो गौरी अधिश्रित इति॥ इष्यते चात्रापि स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थमर्थग्रहणं। ना त्र सप्तमी लुप्यते किं तर्हि पूर्वसवर्णोऽत्र भवति। पूर्वसवर्णे च कृते सावकाशाभावः प्रसज्यते। यदि पूर्वसवर्णः डियाडाद्याभाव प्राप्नोति। एवं तर्हि आहायमीदूतौ सप्तमीति। न चास्ति तत्र सप्तमी ईदूतौ तत्र वचनाद्भविष्यति॥ वचनाद्यत्र दीर्घत्वं। ने दं वचनाल्लभ्यं॥ अस्ति ह्यन्यदेतस्य वचने प्रयोजनं किं॥ ॥ ॥

निमित्तासंज्ञेयं भवति न प्रत्ययस्य वर्णनिमित्तेति लोपेऽपि सिध्यति॥ पूर्वसवर्ण इति॥ सति च पूर्वसवर्णे एकादेशे चादिवद्भावाद्भवतीकारः सप्तमीति सिद्धा संज्ञा। आडाद्याभाव इति। एकादेशं बाधित्वा ऽडामौ स्यातां। वचनादिति। सर्वत्रैव सप्तमीलुप्यत इति वचनसामर्थ्यात् सप्तमीशब्देन सप्तमीसहचरितस्य ग्रहणा न्मुख्यकल्पनासंभवे गौणीकल्पना गृह्यत इत्यस्याश्रयणात्सिध्यतीति भावः॥ ॥श्री॥ ॥श्री॥ ॥

ऽि॰शब्द॰१

मुख्यकल्पनासंभवस्तेवेसा हः॥ पत्रेति॥ सरसीदृग्सन्त्रसरः पाकृतस्यैस्येयाडियाजीकारणमुपसंख्यानमितीकारेकृते भवतीकारः सप्तमीतिनत्वैवस्याच्चतुर्गौरीसत्त्रेतिभा
वः॥ सरसीयदीति। पदीतिसंभावनायां। तस्मात्स्थितमेतत् दृढ्च नात्सर्वेत्रलुप्तायामपि सप्तम्यां भविष्यतीतिनार्थोधर्यग्रहणेन। ज्ञापकमिति॥ ईदूदेदिसन्त्रेतती यच्चतुर्थ
पक्षयोरितिसर्थः॥ ईदूमग्रह्यसंज्ञामकरणे यदि मसयलक्षणंस्यात्तत ईदूतौसप्तमीत्येवसप्तमीसहचरितेसप्तम्यांवा परतो यद्दीइदेतेतत्प्रगृह्यमितिमसयलक्षणेनलु
प्तायामपिसप्तम्यांसंज्ञा भविष्यतिइतिकिमर्थेग्रहणेन तत्क्रियमाणंप्रत्ययलक्षणाभावेसूचयति। संज्ञाविधौप्रत्ययग्रहणेतदंतविधेरभावान्नदंतपक्षस्तत्रनेवस्थित

[redacted] पत्रसप्तम्यादीर्घेत्वमुच्यतेदृतिनप्युक्तं सरसीशयानमिति।
सतिप्रयोजनेइहनप्राप्नोतिसोमोगौरीअधिश्रितइति। तत्रापिसरसीयदि। तत्रापिसिद्धं। कथं। यदिसरसीशब्दस्य प्रवृत्तिरस्ति। अस्तिचलोकेसरसी
शब्दस्यप्रवृत्तिः। कथं दक्षिणापथेमहांतिसरांसिसरस्यइत्युच्यंते। ज्ञापकंस्यात्तदंतत्वेऽपि वेनहिज्ञापयत्याचार्यः नप्रगृह्य संज्ञायां प्रत्ययलक्षणंभव
तीतिकिमेतस्यज्ञापनेप्रयोजनं कुमार्योरगारं कुमार्यगारं वध्योरगारं वध्वगारं प्रत्ययलक्षणेनप्रगृह्यसंज्ञानभवतीति। मावापूर्वेपदस्यभूत॥ अपूर्वपद
वेपदस्यमाभूदितिसेवुमर्थेमर्थेग्रहणं। वाप्यामश्वोवाप्यश्वः नद्यामातिर्नद्यातिरिति। अथक्रियमाणेऽप्यर्थग्रहणेकस्मादेवात्रनभवति। जहत्स्वार्थावृत्ति
रिति। अजहत्स्वार्थायांहिवृत्तौदोषएव। अपजहत्स्वार्थायांचनदोषः॥ समुदायार्थोभिधीयते। ईदूतौसप्तमीत्येवलुप्तेऽर्थग्रहणाद्वेन। इवेस्यचेत्सवर्णो
सावाऽऽगमभावः प्रसज्यते। वचनाद्यत्रदीर्घत्वंतत्रापिसरसीयदि ज्ञापकंस्यात्तदंतत्वेमावापूर्वपदस्यभूत्॥ ईदूतौचसप्तम्यर्थे॥ ॥ ॥
इतिज्ञापनफलानांग्रहमावेति॥ वाप्यश्वोनद्यातिरिति। संज्ञायामितिसमासेकृतेसप्तमीसहचरितमीकारांतंपूर्वपदमितिस्यात्प्रगृह्यसंज्ञेतितदर्थेग्रहणं अर्थेति॥
अपस्तेवात्रसप्तम्यर्थइतिप्रश्नः। जहत्स्वार्थेति। समासस्यैवार्थवत्त्वात्पूर्वोत्तरपदयोर्वर्णवदानर्थक्यात्सप्तम्यर्थोत्रनास्तीत्यर्थः। समुदायार्थइति। वृत्तौहिपूर्वपदंस्वा
र्थमप्यभिधत्तइतिप्रधानार्थमपीतिस्वार्थसंसृष्टस्यप्रधानार्थस्याभिधानात्स्वरूपकवत्स्वार्थस्यविवेकानवगमात्समुदायार्थोवृत्तौसंसृष्टरूपएवाभिधीयते। सप्त
म्यर्थग्रहणेनयावानेवार्थोवाक्येसप्तम्यंतेनाभिधीयतेकेवलोसंसृष्टरूपस्तस्यैवग्रहणमितिसमासेनभवतिप्रगृह्यसंज्ञा॥ ॥ ॥

भा०कै०४०
८१

दाधाघ्वदाप्॥ दाधारूपयोर्घुसंज्ञाविधीयमानारूपांतरयुक्तानां दोदेङ्‌धेटांनप्राप्नोतीत्याह। घुसंज्ञायामिति। किं प्रयोजनमिति। दोदेङ्‌धेटामेजंतानामनुकरणानि व्य
वस्थाप्यालेकृतेदरातियच्छतिदयासनुकरणानां चैकशेषेकृते ह्यानिर्देशात्सिद्धादोदेङ्‌धेटांघुसंज्ञाकृतात्वानां चैषांस्यान्निवृत्त्यर्थेनसिद्धेत्यिप्रश्नः। आत्वभूतानां
मिति। भवतेः प्राप्त्यर्थोदाधरूपाहेतिविभाषितत्वाच्चः कर्तृकर्मणोर्वाप्रत्ययः। आत्वभूतानां आत्वेनचभूतानामाकारांतानाइत्यर्थः। ननुलक्षणेनकृतानांवा इतिविवि
क्षेयं। अस्यायमभिप्रायः। एजंतानुकरणेप्रमाणाभावात् प्रक्रियागौरवाच्च प्रयोगएव येआकारांतास्तेषु प्रयुज्यंते तदनुकरणानामयमेकशेषनिर्देशः सामान्या

दाधाघ्वदाप्। घुसंज्ञायांप्रकृतिग्रहणंशिदर्थं। घुसंज्ञायांप्रकृतिग्रहणंकर्तव्यंदाधाप्रकृतयोघुसंज्ञाभवंतीतिवक्तव्यं। किंप्रयोजनं आलभूतानां
मियंसंज्ञाक्रियतेसाआत्वभूतानामेवस्यात् अनात्वभूतानांनस्यात्। ननुचभूयिष्ठानिघुसंज्ञाकार्याण्यपाद्धातुकेनत्वचेतेआत्वभूतादृश्यंतेशि
दर्थं। शिदर्थेप्रकृतिग्रहणंकर्तव्यंशित्यात्वंप्रतिषिध्यतेतदर्थं। प्रणिदयतेप्रणिधयतीति। भारद्वाजीयाः पठंति। घुसंज्ञायांप्रकृतिग्रहणंशि
द्विकृतार्थं। घुसंज्ञायांप्रकृतिग्रहणंक्रियते। शिदर्थं विकृतार्थंच। शिलुदाहृतं। विकृतार्थंखल्वपिप्रणिदानाप्रणिधानां किंपुनः कारणंनसिध्य
तिलक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्यैवेतिप्रतिपदंयेआत्वभूतास्तेषामेवस्याल्लक्षणेनयेआत्वभूतास्तेषांनस्यात्॥ अथक्रियमाणेपिप्रकृतिग्रह
णेकथमिदंविज्ञायतेदाधाःप्रकृतयइत्साहोस्विद्दाधांप्रकृतयइतिकिंचातः। यदिविज्ञायतेदाधाःप्रकृतयइतिसएवदोषः आत्वभूतानामेवस्यात् अनात्वभू
तानांनस्यात्। अथविज्ञायतेदाधांप्रकृतयइतिअनात्वभूतानामेवस्यादात्वभूतानांनस्यात्। एवंतर्हिनैवंविज्ञायतेदाधाःप्रकृतयइतिनापिदाधांप्रकृत
यइति। कथंतर्हि दाधाघुसंज्ञाभवंतिप्रकृतयश्चैषामिति। तत्तर्हिप्रकृतिग्रहणंकर्तव्यंनकर्तव्यं। इहप्रकृतमपत्यग्रहणमनुवर्तिष्यतेप्रकृतेरित्यतोचसत्रमप्यर्थ
इतितत्तोवक्ष्यामिदाधाघ्वदाप्अपत्यइति। नैवंशक्यंदरातिनासमानार्थोददातिरासतिदाशतिमंहतिप्रीणातिप्रभृतीनाहुः एतेषामपिघुसंज्ञाप्राप्नोतितस्माच्चै
वंशक्यं। नचेदेवंप्रकृतिग्रहणंकर्तव्यमेव। शिदर्थेनावन्नार्थः अवपंततन्मार्थंप्रकृतिग्रहणंकर्तव्यंप्रणिमयतेप्रणिमयतइत्सेवमर्थंतत्सुरस्तादरूप्यतेघुप्रकृतौमा

नुकरणंवादाइतिधाइतिपृथक्पदंनिर्दिष्टमिति। प्रणिदयतइति। घुसंज्ञायांनेगेदेतिणत्वंभवति। लक्षणेति। लाक्षणिके हि लक्षणानुसंधानद्वारेणप्रतिपत्तिर्बहिरंगप्रतिपदो
क्तेत्वंतरंगा। प्रणिदातेति। घ्यतेर्डेरूपं॥ कथमिति॥ दाधाप्रकृतयइतिषष्ठीसमासःकर्मधारयोवा। उभयथाप्यव्याप्तिरितिप्रश्नः। दाधांप्रकृतयइति। दीयतइत्सादावीत्वादेः
आत्वभूतानामिति। दाराहान्मधान्यां। प्रकृतयश्चैषामितिप्रसाससेषामितिलभ्यते। अर्थइति। एतद्द्वितीयंवाक्यंसन्निधानाच्चदाधामर्थेयःवर्ततेसघुसंज्ञइतिप्रकृतीनामपिसि

प्रणिधाने निषेधः।२

प्रणिधाते·

रामं०
८१

=भिन्ननुबंधकेति॰ अत्रभिन्ननुबंधकत्वादेन सर्वथानुबंधकः सानुबंधकापेक्षयान्न्यूनानुबंधकत्वात् स्मात् इति नत्वनुबंधकापरिभाषानुपस्थानं संग्रही नंनवाति॰ येनलक्षणमतिपदोक्तपरिभाषायानिरनुबंधकपरिभाषायाश्चानुपस्थानेपिदाण्देङ्॰ धेटामेवसंज्ञा स्यात्ननुदुदाञ्दुधाञोरपी समानं॰ तत्र॰

प्रनिमिनोतीति। मीनातिमि नोतिदीङां ल्यपि चेत्यात्वविधानाद्भवतिमाप्रकृतित्वमनयोः। गामादाग्रहणेष्विति। अस्मिन्चार्थसद्रैपः पित्वमदाविति प्रतिषेधे सामान्यग्रहणार्थे लिंगं॰ अन्यथास्य लाक्षणिकत्वाद ग्रहणं भविष्यतीति किं प्रतिषेधार्थेन पित्वेन सामान्यापेक्षया च निरनुबंधकइति लक्षणप्रतिपदोक्तयोरिति च परिभाषाद्वयानुपस्थानमिह ज्ञापयतीति धेटो पि सिध्यति। दोदद्घोरिसत्रवाद इत्येतद्वेत्तिहरः सर्थतत् धेटो [illegible] घुसंज्ञां प्रयतिनहिदधानि निहसर्थेद इत्येन दधाते र्हि रिति स्यादेश विधानाद्दाणां मसंगात्॥ समानशब्दानामिति। समानश्रुतीनामित्सर्थः। प्रनिदारयति प्रनिधारयतीति। दद्॰ धङो र्लि चिन्ह त्वाकारे दाधा शब्दौ संपद्येते तौ चार्थवंतौ प्रश्चात्तुरपरत्वं क्रियमाणमा

परिप्रकृतिग्रहणं क्रियते प्रनिमिनोति प्रनि मीनाति इत्यत्रापि माप्नोति॰ यथा क्रियमाणे प्रकृतिग्रहणेइहकस्मान्न भवति प्रनिमाता प्रनिमातुं प्रनिमातव्यमिति॰ आकारांतस्यादितो ग्रहणं [illegible] विज्ञास्यते। यद्येवं तर्हि अक्रियमाणे प्रकृतिग्रहणे आकारान्तस्यदितो ग्रहणं विज्ञायते। एवं क्रियमाणेपि प्रकृतिग्रहणे आकारांतस्यदितो ग्रहणं विज्ञास्यते। विकृतार्थेनापि नार्थः। दोषएवैतस्याः परिभाषायाः लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति गामादाग्रहणेष्वविशेषइति॥ समानशब्दप्रतिषेधः समानशब्दानां प्रतिषेधो वक्तव्यः। प्रनिदारयति। प्रनिधारयति। दाधा घुसंज्ञाभवंतीति घुसंज्ञामाप्नोति। समानशब्दप्रतिषेधो ऽर्थवद्ग्रहणात्। समानशब्दानां प्रतिषेधः अनर्थकः प्रतिषेधो ऽप्रतिषेधः। घुसंज्ञाकस्मान्न भवति। अर्थवद्ग्रहणात्। अर्थवतो दाधो र्ग्रहणं नैतावर्थवंतौ। अनुपसर्गाद्वा अथवा यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा भवंति नचैतौ दाधौ [illegible] प्रतिक्रियायोगः इहापि तर्हि न प्राप्नोति प्रणिदापयति प्रणिधापयतीति। अत्रापि नैतौ दाधावर्थवंतौ नाप्येतौ दाधौ प्रतिक्रियायोगः॥ ॥ ॥

गमभूतत्वादन्यत्वं न करोतीति प्राप्तिः॰ अर्थवद्ग्रहणेनानर्थकस्येत्यस्यार्थस्य स्वंरूपमित्यने न ज्ञापितत्वात्। उरण् रपर इति चाणविधीयमान एव रपरो भवतीति ह क्रियमाण रपर भवतीति दार् धारेरवार्थवत्त्वं न तु तदवयवयोरिति नास्ति घुसंज्ञा। अनुपसर्गाद्वेति। अभ्युपगम्य घुसंज्ञां दोषं परिहरति। घुसंज्ञापेक्षयायस्योपसर्गत्वं तस्मात्परस्य नेर्णो परतो णत्वं विधीयते। अत्र दाधापेक्षया नास्ति प्रशब्दस्योपसर्गत्वं किंतु दारु धारु शब्दापेक्षया इत्सदोषः। इहापि तर्हीति। अत्रापि पुकि कृते एकारांतो

अर्थवद्ग्रहणेति॰ ॥ र्थेवानन केवलौ दाशब्दः पुगंतमेव च प्रत्युपसर्गत्वेन दाशब्दं प्रतीति प्रश्नः॥ ॥ ॥

भा॰कै॰प्र॰ ८२ 82 नवार्थवत इति॥ लब्धात्मकस्य भावस्य निमित्तवशादुपचयापचययोरुपदेशहानिं कुरुतः। यथा देवदत्तस्याङ्गाधिक्याङ्गच्छेदौ। इहाप्यन्तरङ्गत्वात् लब्धात्मनो याण्योर्घुसंज्ञायां पश्चादु
त्पन्नः पुगागमो घुत्वमुपदेशं न निवर्तयति नाप्यर्थवत्त्वमिसरो षः। अनर्थकस्याप्यागमोऽप्युपदेशहानिं न करोति। यथा ससर्पिरेफे आकाराकारयोर्वृद्धिगुणावुपदेशहानिः॥ इ
हत्वर्थवत्त्वोर्येह एणदर्थवत इत्युक्तं॥ यदा च प्रकृत्यर्थः एणविशेष्यते तदायं परिहारः। एवं पृथ्वे विशेषणत्वे तु प्रसदा धौ प्रसत्तुपसर्गे त्वाद्यन्तत्वमित्र्येव॥ तद्गुणीभूत इति। प्रयोग

नवा र्थवतोऽप्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथान्यत्र। नवा एष दोषः किं कारणं अर्थवत आगमस्तद्गुणीभूतः अर्थवद्ग्रहणेन
गृह्यते। यथा अन्यत्र तद्यथान्यत्राप्यर्थवत आगमोऽर्थवद्ग्रहणेन गृह्यते। क्वान्यत्र। लविता चिकीर्षिता इति। युक्तं पुनर्यन्नित्येषु नामश
ब्देषु आगमशासनं स्यात् न नित्येषु नाम शब्देषु कूटस्थैः अविचालिभिर्वर्णैर्भवितव्यं अनपायोपजनविकारिभिः। आगमश्च नाम
पूर्वः शब्दोपजनः। अथ युक्तं यन्नित्येषु शब्देषु आदेशाः स्युः। बाढं युक्तं। शब्दान्तरैरिह भवितव्यं। तत्र शब्दान्तरात् शब्दान्तरस्य प्रतिपत्ति
र्युक्ता। आदेशास्तर्हीमे भविष्यन्ति। अनागमकानां सागमकाः। तत्कथम्॥ ॥ ॥

सम्पादने उपकारक इत्यर्थः। युक्तं पुनरिति। ततश्च नित्येष्वागमविरोधात् द्वारेणादेशविधानाद्वा प्रश्न इह एवार्थेवान्तरा शङ्क्य इति तदवस्थो दोष इति भावः॥ अथ युक्त
मिति। तत्रापि स्थानिनमपनीयादेशः क्रियत इत्यनित्यत्वप्रसंगः॥ यत्रोभयोर्दृष्टो न तत्रैकस्त्यागः। बाढमिति। प्रसंगवाची स्थानशब्दो न निवृत्तिवाची। ततश्च संतत
व प्रयोगे नित्यानां शब्दानां बुध्युन्मज्जननिमज्जनद्वारेण प्रतिपाद्यन्ते। आगमस्तु व्यवस्थितस्य पूर्वः क्रियमाणो नित्यत्वं विहन्यादिति। आदेशास्तर्हीति। इदुवतीत्यनेन द्वा राम॰ ८२
रेणानित्यत्वादेशः क्रियन्ते॥ ॥ ॥

सर्वम् इति॥ आगमा अपीत्यर्थः। सर्वे पदादेशा इति। पदशब्देन न तु प्रकृतिः। नाङ्गं गृह्यते अपि तु कार्यं प्रति यत्स्वमात्मानं प्रतीयमानं प्रकृतिः प्रसज्यादिति तत्सर्वं। एकदेशविकारे हीति। यद्य
पि सर्वे विकारे नित्यत्वं यथा पिठरस्थस्य पयसः पाकादिषु तथापि विकाराभावप्रतिपादनार्थमेतत् बुद्धिविपरिणाममात्रं। स्थान्यादेशागमागमिभावद्वारेणाक्रियत इत्यर्थः।
यद्येवं दाशब्दस्य दाशब्द आदेशः क्रियत इति दाशब्दस्यानर्थकप्रसंगः॥ नैष दोषः। निरन्तरसमर्थेनायादेशेन पक्षे आश्रितः। प्रक्रियायां तु कल्पितायामागमागमिभाव
एव। अन्यथागमादेशयोर्भेदेन व्यवहारो न स्यात्। दीङ इति। उपादीस्त इति स्थिते मीनातिमिनोतीत्यात्वे कृते दारूपत्वादर्थवत्त्वाच्च घुसंज्ञाप्रसंगः। इह खल्विति। एचो

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते। दीङः प्रतिषेधः स्थाघ्वोरित्वे। दीङः प्रतिषेधः स्थाघ्वोरित्वे वक्त
व्यः। उपादास्तास्य स्वरः शिक्षकस्येति। आत्वे कृते स्थाघ्वोरिच्चेतीत्वं प्राप्नोति। कुतः पुनरयं दोषो जायते। किं प्रकृतिग्रहणादाहोस्विद्रूपग्रहणा
त्। रूपग्रहणादित्याह। इह खलु प्रकृतिग्रहणाद्दोषो जायते। उपादिदीपत। सन्निमीमाघुरभलभेति। नैष दोषः। दाप्रकृतिरिसुच्यते न चेयं दाप्र
कृतिः। आकारान्तानामेजन्ताः प्रकृतयः एजन्तानामीकारान्ताः। न च प्रकृतिप्रकृतिः प्रकृतिग्रहणेन गृह्यते। सत्तर्हि प्रतिषेधो वक्तव्यः। न वक्तव्यः।
घुसंज्ञा कस्मान्न भवति॥ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येत्येवं न भविष्यति॥ ॥ ॥

विषय आत्वविधानात् दीङ्शब्द एव दाप्रकृतिरिति दोषः। नचेयमिति। एच एव स्थाने आत्वविधानादित्यर्थः। सन्निपातेति। इकि सन्निपाते नात्वं क्रियते। यदि चात्र घुसं
ज्ञा स्यात् स्थाघ्वोरिच्चेतीत्वं स्यादित्ययं किल सविघातः स्यादिति घुसंज्ञां प्रति नैव आकार आत्मानं दर्शयतीति घुसंज्ञा न प्रवर्तते॥ अत्र केचिदाहुः॥ दीङः स्त्व जादावाते
घुसंज्ञा भवत्येवेति प्रणिदापयतीति णत्वं सिध्यति। अत एव वार्त्तिककारेण स्थाघ्वोरित्वे इति विषयविशेषो निर्दिष्टः। अन्ये त्वाहुः॥ निर्देश एवैजन्तानामनुकरणानामा
त्वे कृते दारूपाणामन्यथा आंचेकशेषे द्वंद्वे च दाधा इति निर्देशाद्दीङो नास्ति प्राप्तिः। न हि तदनुकरणस्यालमस्ति अगुणविषयत्वात्॥ ॥ ॥

मा॰ कै॰ प्र॰
८३
83

दाप्प्रतिषेधइति। दाप्लव न इत्यस्यैव निषेधः स्यादित्यर्थः। अवदातमिति। तत्त्वमत्र प्राप्नोति। प्रकृतं तावदिति। दाप् दैपौ धातू अनुबन्धौ तौ पठितव्यौ। तावत्सैवेति। इत्संज्ञायां सत्यामेव॥
प्रयोगे दाशब्द एवायं पित्कार्ये तुल्य भवते इत्यर्थः। अथ वेति। अनुबन्धानामेकान्तत्वपक्षे उपदेशे एजन्तानामात्व मुच्यमाने दैपो न प्राप्नोतीति ज्ञापको पन्यासः। माङ इति मेङो ग्रहणं न मा
ङः मेङो व्यतीहारे णानिसंयोगात् माङस्तु विवक्षा वृत्त्या द्यतिमिमीत इति कादाचित्कत्वाद्व्यतिहारयोगस्य प्रणिदानं व्यतिहार इत्येकोऽर्थः। उदीचां मेङ इति नु न कृते। एवं हि नानुबन्ध
कृतमिति न त्तापि न स्यात्। अथ वेति। दिवादिषु दाप् शोधन इति पठिष्यत इत्यर्थः॥ ॥ आद्यन्तवदेकस्मिन्॥ एकशब्दोऽसहायवाची। न संख्यावाची। बहुष्वपि व्यवस्थि

मनेजंतत्व

दाप्प्रतिषेधेन दैप्य नेजंतत्वात्। दाप्प्रतिषेधे दैपि प्रतिषेधो न प्राप्नोति। अवदातं मुखं। ननु चात्वे कृते भविष्यति। तथात्वं न प्राप्नोति। किं कारणं। अनेजंतत्वात्। सि
द्धमनुबन्धस्यानेकान्तत्वात्। सिद्धमेतत्। कथं। अनुबन्धा अनेकान्ताः। प्रतिषेधाद्धा। अथवा दाधा घ्वपिदिति वक्ष्यामि तच्चावश्यं वक्तव्यं। अदाबिति ह्युच्यमा
ने इहापि प्रसज्येत। प्रणिदापयतीति। प्रकृतं तावदनेनादाबिति ब्रुवतानतस्य प्रतिषेधो विज्ञातुं। सत्यं तत्रैवमिष्यते। यथान्यासमेवास्तु। ननु चोक्तं दाप्प्रति
षेधेन दैपीति। परिहृतमेतत्। सिद्धमनुबन्धस्यानेकान्तत्वादिति। अथैकान्तेषु दोष एव। एकान्तेषु च न दोषः। आत्वे कृते भविष्यति। ननु चोक्तं तथात्वं न प्रा
प्नोति। किं कारणं। अनेजंतत्वात्। पकारलोपे कृते भविष्यति। नह्ययं तदा दाब्भवति। भूतपूर्वगत्या भविष्यति। एतच्चात्रयुक्तं॥ यत्सर्वेष्वेव सानुबन्धकग्रहणे
षु भूतपूर्वगतिर्विज्ञास्यते। अनैमित्तिको ह्यनुबन्धलोपः तावत्येव भवति। अथ वा आचार्यप्रवृत्तिर्ज्ञापयति नानुबन्धकृतमनेजंतत्वमिति। यदयमुदीचां माङो व्य
तीहार इति मेङः सानुबन्धस्यात्वभूतस्य ग्रहणं करोति। अथवा दाबेवायं न दैब्भवति। कथमवदायतीति शप् न्विकरणो न भविष्यति॥ ॥ आद्यन्तवदेकस्मिन्॥ किमर्थमिदमुच्य
ते। सस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनं। स सस्मिन्यस्मात्पूर्वं नास्ति परमस्ति स आदिरित्युच्यते। स सस्मिन्यस्मात्परं नास्ति पूर्वमस्ति सोऽन्त इत्युच्यते। सस
न्यस्मिन्नाद्यन्तवद्भावादेतस्मात्कारणात् एकस्मिन्नाद्यन्तापदिष्टानि कार्याणि न सिध्यन्ति। इष्यन्ते च स्युरिति। तान्यन्तरेणायत्नेन न सिध्यंतीत्येकस्मिन्नाद्यन्तवद्वचनं। एव

तस्य एकत्वसंख्यास्तीति किमेकस्मिन्निति सने न कृतेऽस्मात्। एकस्मिन्निति सुपमेये सप्तमीनिर्देशात् आद्यन्तवदिति सुपमानात् सप्तम्यता वतिर्विज्ञायते। यथा मथुरावत्साटलिघ्ने प्राका
र इति द्वयोस्तूपमानोपमेययोराधाराधेयसंबन्धप्रतिपादनाय वाक्यं प्रयुज्यते। यदि च तयोर्भिन्नविभक्तित्वं स्यात् उपमानोपमेयभाव एव न गम्येत॥ सर्वाणि देशानां कार्याणि देशस्य
प्राधान्यात् स्यैवेहाश्रयणं। किमर्थमिति॥ व्यपदेशिवद्भावेन सिद्धत्वात् न कर्त्तव्यमित्यर्थः। इतरो मुख्यस्य संभवति गौणो न स्यादित्याह॥ स सस्मिन्निति। आद्यन्तौ शब्दौ विद्येते यस्मि
न् प्रास्तेन तदाद्यन्तवत् तस्य भावात् सर्वजनेन्नादित्यर्थः॥ कश्चिदाद्यन्तभावादिति पाठः॥ ×यौर्थतयाका× ॥

राम॰
८३

तत्र व्यपदेशिवद्वचनमिति॥ सर्वे कार्यं सिध्यर्थं व्यापकं कर्त्तव्यमित्यर्थः। तत्र निमित्तसद्भावान्मुख्यो व्यपदेशो यस्यास्ति स व्यपदेशी यस्तु व्यपदेशहेत्वभावादविद्यमानव्यप
देशः स तेन तुल्यं वर्त्तते कार्यं प्रतीति व्यपदेशिवद्वर्त्ततीत्युच्यते। वृक्षदिति। वृच्यते इति प्रकृते तन्नेति इकारलोपः लेटोऽडाटाविःसडागमः। सिप्कुत्वं। अत्र सकारमात्रं प्रत्ययोन
तु प्रत्ययस्यावयवः सकार इति षत्वं न स्यात्। अवचनादिति॥ अवचनं वचनरहितं लोकविज्ञानं तस्माल्लोकव्यवहारात् इत्यर्थः। इहतावदियायेति इणधातुः प्रयोग
भेदाद्द्विरूपः। एति इतः यंति अयनं आयकः आगात् गमयतीति। तस्यायमेकोऽवयवइवलक्ष्यते। अपश्चार्थवतो धातोरयं वर्णरूपएकोऽच् इति॥ अर्थेस्या

तत्र व्यपदेशिवद्वचनं। तत्र व्यपदेशिवद्भावो वक्तव्यः। व्यपदेशिवदेकस्मिन्कार्यं भवतीति वक्तव्यं। किं प्रयो जनं। एकाचो द्वे प्रथमस्यार्थे। वक्ष्यत्येकाचो
द्वे प्रथमस्येति वुद्ध्रीहिनिर्देशः इति। तस्मिन्क्रियमाणे इहैव स्यात् पपाच। पपाठ। इयाय। आ रे स तत्र न स्यात्। व्यपदेशि[redacted]वदेकस्मिन्कार्यं भव
तीत्यत्रापि सिद्धं भवति। षत्वे चादेशसंप्रत्ययार्थे। वक्ष्यत्यादेशप्रत्यययोरिति वर्णवषष्ठ्येति। तस्मिन्क्रियमाणे इहैव स्यात् करिष्यति। हरिष्यति।
इह न स्यात् इन्द्रो मा वक्ष्यत् सदेवा न्यक्षत्। व्यपदेशिवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धं भवति। स तर्हि व्यपदेशिवद्भावो वक्तव्यः। न वक्तव्यः॥
अपवचनाल्लोकविज्ञानात्सिद्धं। अन्तरेणापि वचनं लोकविज्ञानात्सिद्धमेतत्। तद्यथा। लोके शालासमुदायो ग्राम इत्युच्यते। भवति चैतदेकस्मिन्न
पि एकशालो ग्राम इति॥ ॥ ॥

गोपादानान्यां भवति व्यपदेश एकाजिति। एवं शिलापुत्रकस्य शरीरमित्यनेकक्रियाविषयस्यावस्थातुरिदमेकावस्थायुक्तं शरीरमित्यस्ति व्यपदेशः। एवं सि
प्रप्रत्यय इदं सहितो पि दृष्टो ज्ञोषिषदित्यादौ केवलोपीति तस्यायं सकार इति व्यपदिश्यते लोकनिरूढश्चायं व्यवहार इति लोकवच्छास्त्रेपि व्यवहारार्थो ऽमुख्य
न्यायोऽत्रावतरति॥ ॥श्री॥ ॥श्री॥ ॥

मा० कै० प्र०
८४
84

पदसमुदाय इति॥ पादपर्यायः पदशब्दः। तथा चैकपदा ऋगिति पाद एव विज्ञायते। ननु ऋचः कस्याश्चिदप्येकमेव पदं भवति। अत्राप्यर्थेनेति। पदादीनां योऽर्थः सोऽत्र पदा
र्थ इत्यर्थः। अभेदोपचाराच्चार्थ एव पदादिभिरभिधीयते। अयमेव मे ज्येष्ठ इति। प्रथमरूपतावसायात् मध्यमकार्यकरणाच्च मध्यम इति व्यपदिश्यते। अन्योऽनुजनि
तेति बुध्या कनीयानिति व्यपदिश्यते। अप्रसूतायामिति। बहुकृत्वोऽपि प्रसूता प्रथमपुत्रेण काचिद्धन्यते। तथा यापि प्रसोष्यते सापि काचित्सर्वोऽसन्नेन पुत्रेण हन्य

=[illegible]=

विषम उपन्यासः। ग्रामशब्दोऽयं बह्वर्थः। अस्त्येव शालासमुदाये वर्त्तते। तद्यथा ग्रामो दग्ध इति॥ अस्ति वाटपरिक्षेपे वर्त्तते। तद्यथा ग्रामं
प्रविष्ट इति। अस्ति मनुष्येषु वर्त्तते। तद्यथा ग्रामो गतः। ग्राम आगत इति। अस्ति सारण्यके ससीमके सस्थण्डिलके वर्त्तते। तद्यथा ग्रामो लब्ध इति॥
तद्यः सारण्यके ससीमके सस्थण्डिलके वर्त्तते तमभिसमीक्ष्यैतत्प्रयुज्यते एकशालो ग्राम इति। यथा तर्हि वर्णसमुदायः पदं। पदसमुदाय ऋक्। ऋक्स
मुदायः सूक्तमित्युच्यते। भवति चैतदेकस्मिन्नप्येकवर्णं पदं। एकपदा ऋक्। एकर्चं सूक्तमिति। अत्राप्यर्थेन युक्तो व्यपदेशः। पदं नामार्थः।
ऋङ्नामार्थः। सूक्तं नामार्थः। यथा तर्हि बहुपुत्रे घेत उपपन्नं भवति॥ अयं मे ज्येष्ठः अयं मे मध्यमः। अयं मे कनीयानिति। भवति चैत
देकस्मिन्नप्ययं मे ज्येष्ठः। अयमेव मे मध्यमः। अयमेव मे कनीयानिति। तथा अप्रसूतायामसोष्यमाणायां च भवति प्रथमगर्भेण
(व मे) हतेति॥ ॥ ॥
तेइ त्युभयोरुपादानं नापि प्रसूता नापि प्रसोष्यते कुक्षिस्थेनैव गर्भेण हता प्रथमगर्भेण हतेत्युच्यते। अपत्यपर्यायो गर्भशब्दः स्तेत्र तस्या एव योग्यताध्य
वसानेन भाविगर्भेण हतेति व्यपदेशः। स्त्रीं तरेषु वा बहुपुत्रलेसति आद्यगर्भस्य प्रथमव्यपदेशदर्शनात् तथाविधस्य प्रथमव्यपदेशः॥ ॥

गर्भापेक्षया प्रथम

=नत्र अप्रसूतेता सोष्यमाणेति तस्यां एव कुक्षिस्थगर्भेण हतायां एव २=
(तोभयस)

[illegible]
मतिष्यामि॥१२॥

एम०
८४

अनेनेति॥ बहुकृतोत्यागतः पूर्वोगमनं स्वस्त्वा प्रथममपदेशं तत्तमुख्यं करणे ऐसेवा-आजिगमिषुश्च भावी नागमनानिनु ध्याव्यव स्थाप्यकुर्यो देव प्रथमसव्यवहारः। यस्कस
कृदेवागतः सोपिकरोति प्रथमसव्यवहारमिति प्रतिपादनार्थं मनेस्या नाजिगमिषुरित्युपात्तं। तत्रान्यसंबंधिषु बहुषु मनेषु-आद्यस्य प्रथमव्यवहारदर्शनात्तथा विधत्वात्स्मा
देकस्मिन्नप्यागमने प्रथमव्यवहारः। इदानीं योगं प्रसाख्यातुमाह। अपूर्वेति। यद्यपि बहुष्ववस्थितेषु-आद्यंतशब्दौ प्रयुज्येते तथाप्यपूर्वानुत्तरत्वमात्रमेतयोः प्र
वृत्तिनिमित्तं तच्चैकस्मिन्नपि-अस्तीति नार्थः सूत्रेण। भाष्यकारस्त्वाह। सतित्वन्यस्मिन्निति॥ नह्यनपेक्षितप्रतियोगिनोराद्यंतयोः प्रवृत्तिरित्यर्थः। तस्मादेकस्मिन्नु

तथा-अनेनानाजिगमिषुराहेदं मे प्रथमागमनमिति॥ आद्यंतवद्भावश्चाशक्यो वक्तुं॥ कथं-अपूर्वोनुत्तरलक्षणत्वादाद्यंतयोः सिद्धमेक
स्मिन्। अपूर्वलक्षण-आदिः। अनुत्तरलक्षणोंतः। एतच्चैकस्मिन्नपि भवति। अपूर्वानुत्तरलक्षणत्वात् एतस्मात्कारणा देकस्मिन्नपि
आद्यंतापदिष्टानि कार्याणि भविष्यंति नार्थं आद्यंतवद्भावेन॥ गोनर्दीयस्त्वाह॥ सतित्वन्यस्मिन्निति। कानिपुनरस्य योगस्य प्रयो
जनानि॥ प्रत्यय [illegible] ग्रहणे आदिर्द्युदात्तत्वे। प्रत्ययस्यादिरुदात्तो भवतीति इहैव स्यात्। कर्तव्यं तैत्तिरीयः-औपगवः कापटव इत्यत्र न स्यात्। त्रिसा
आदिवत्प्रयोजनं। ॥ दिर्निसंइहैवस्यात् अहिचुंबकायनिः। आग्निवेश्यः॥ × सप्तमेतत् × २॥

तस्य-आद्यंतव्यपदेशोनास्तीति कर्तव्योयं योगः॥ यद्यपि लौकिकेन व्यपदेशिवद्भावेनाद्यंतव्यपदेश एकस्मिन्नपि सिध्यति। तथापि गौणत्वात्कार्येण न भवितव्यमिति य
त्नोर्थापत्तिः स्यात् प्रतियोगोयमारब्धः। प्रत्यय [illegible] ग्रहणे आद्युदात्तत्वे इति॥ प्रत्ययस्याद्युदात्तत्वं ग्निति चाद्युदात्तत्वं इत्यर्थः। कथं पुनर्भिन्नविभक्तिर्द्वंद्वः। उच्यते॥ प्रत्ययस्या
द्युदात्तत्वं तस्य प्रत्ययो विषय इति प्रत्यये पि तदुच्यते॥ यद्वा ञ्नितियदाद्युदात्तत्वं तत् ञ्नितोपि संबंधि भवति इति नास्ति भिन्नविभक्तित्वं। कर्दोरवित्साद्युदात्तत्वनिवृत्त
यो विलाख्यंगादेकाचोपि प्रत्ययस्याद्युदात्तत्वं भविष्यतीति चेद् कारविषयकमेव लिंगस्यादितीकारोकारयोः प्रत्यययोराद्युदात्तत्वं स्यात् विशेषणार्थं पितकरणं स्यात् तथा

व्यपदेशिवदेकस्मात्॥०॥

भा॰कौ॰प्र॰
८५
४५

गार्ग्य इति॥ अत्र परत्वाद्यस्येति लोपे कृते आदिवृद्धावात् प्रकृते एः घुरूपत्वं न प्राप्नोति स्वरविधौ स्थानिवद्भावप्रतिषेधाच्च नास्ति यच्चं। स्वरविधौ व्यंजनस्याविद्यमानत्वा
न्नास्ति हल्पेक्षमप्यादिवृद्धिं कृतिरिति। क्ङिनोनिलुप्तता दीर्घचनितिकृतस्ताविसेवमर्थं स्यात् सोऽवयवः सप्तम्यन्तं तस्य सप्तम्यइत्यना क्ष्रिस्येन तु उक्तं॥ ज्जोषिषुदिति। लेटि इटई
टीतिच ह्रापकं सिज्विषयमेव स्यादितिसिपरत्वान्नस्यात्। यस्मिन्विधिरिति स्वस्य चरूपस्येति नानुवर्त्तते इति प्रयोजनत्वेनोपन्यासः। अजाद्यादेरिति॥ सूत्रपाठापेक्ष

गार्ग्यः कृतिरिसत्र नस्यात्। बलादेरार्द्धधातुकस्येट्प्रयोजनं। आर्द्धधातुकस्येड्वलादेरिहैवस्यात् करिष्यति। हरिष्यति जोषिषत् मंदिषत् इत्यत्र नस्या
त्। यस्मिन्विधिस्तदादावल्ग्रहणे इति प्रयोजनं वक्ष्यति यस्मिन्विधिस्तदादावल्ग्रहणे इति तस्मिन्क्रियमाणे अचिश्नुधातुभ्रुवां य्वोरियङुवङौ इहैवस्या
त् श्रियः भ्रुवः श्रियौ भ्रुवौ इत्यत्र नस्यात्। अजाद्यादेः प्रयोजनं। आजादीनामिहैवस्यात् ऐक्षिष्ट ऐहिष्ट ऐहत् अक्षैष्ट इत्यत्र नस्यात्॥ अर्थान्तवत्त्वेका
नि प्रयोजनानि। अन्तवद्भिवचनान्तप्रगृह्यत्वे प्रयोजनं। ईदूदेद्द्विवचनं प्रगृह्यं इहैवस्यात् पचेते इति। पचेथे इति। खट्वे माले इत्यत्र नस्यात्। मि
दचोऽन्त्यात्परः प्रयोजनं। इहैवस्यात् कुण्डानि वनानि। तानि यानीत्यत्र नस्यात्। अचो ञ्णिति प्रयोजनं। टित आत्मनेपदानां टेरे इहैवस्यात् कुर्वीते
कुर्वीयेइतिकुरुते कुर्वे इत्यत्र नस्यात्। अलोन्त्यस्य प्रयोजनं। अतो दीर्घो यञि सुपि च इहैवस्यात् घटाभ्यां पटाभ्यां आभ्यामित्यत्र नस्यात् येनविधिस्त
दन्तत्वे प्रयोजनं। अचोयत् इहैव चेयं जेयं एयं अध्येयमित्यत्र नस्यात्। आद्यन्तवदेकस्मिन्काय्यं भवतीत्यत्रापि सिद्धंभवति॥ ॥ ॥

याप्रयोजनत्वोपन्यासः। वार्त्तिककारस्तु जातीनामदासिद्धमित्याह। अन्तवदिति। येन विधिस्तदन्तत्वेइत्यस्य नेनगतेः प्रपंचार्थोयमुपन्यासः। कुरुत इति। अर्थवत्त्वात्य
पदे शिवद्भावान्नशब्दाकारस्यानर्थकत्वादिह प्रयोजनोपन्यासः। आभ्यामिति। अत्र द्वे अन्तवत्त्वे उपयुज्येते। अपकोर्त्तितं संगस्यालोन्त्यस्य दीर्घत्वं भवतीति पृथक्प्रयो
जनोपन्यासः। एयमिति॥ ईङ्गे रूपं इणस्त्विसमितिभवति॥ ॥ ॥

इति २

इहैवस्यात्

राम॰
८५

पूर्वोक्तहेतुनात्वत्राधिसि धपति।

मध्यमपदलोपी समासः इति त्वमनुदस्पति

तमपोप्युपलक्षणं

तरप्तमपौ घः ॥ आतिशायनिकप्रत्ययप्रकरण एव तादीघः पितौ घ इति वा कर्तव्ये प्रकरणोत्कर्षेण संज्ञाकरणं स्वार्थे पित्तरबस्तीति सूचनार्थं । तेनाल्पाच्तरमित्यादि सिद्धं भवतीत्याहुः ॥ नदीतर इति । तरतेः ऋदोरप् । सर्वत्र चानुबन्धाः स्वयं मा प्रापन्नेव कार्यप्रतिहेतुत्वं लभन्त इति घसंज्ञाप्राप्तिः । साहचर्यं चेह व्यवस्थाहेतुः सर्वत्र नाश्रीयते । तथा हि द्विर्द्विश्चतुरिति कृत्वोर्थग्रहणं चतुःशब्दविशेषणार्थं कृतं । अन्यथा द्वित्रिंशब्दसाहचर्याच्चतुःशब्दोपि कृत्वोर्थ एव ग्रहीष्यते इति किं कृत्वोर्थग्रहणेन । अप्रतिषेध इति । न प्रतिषेध इति प्रतिषेधक्रियान आनिषिध्यते । आष्यकारस्तु वस्तु थेवमाचष्टे अनर्थकः प्रतिषेध इति ॥ औपदेशिकमिति । उपदेशः प्रयोजनमस्य तत्रवा भवमौपदेशिकं । यत्रास्येति । अनुबन्धयु

तरप्तमपौ घः । घसंज्ञायां नदीतरे प्रतिषेधः । घसंज्ञायां नदीतरे प्रतिषेधो वक्तव्यः । नद्यास्तरो नदीतरः इति । घसंज्ञायां नदीतरे प्रतिषेधः घसंज्ञायां नदीतरे अप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः । घसंज्ञा कस्मान्न भवति । तरपग्रहणं त्वौपदेशिकं । औपदेशिकस्य तरपो ग्रहणं । न चैष उपदेशे तरप्शब्दः । किं वक्तव्यमेतत् । न हि । कथमनुच्यमानं गंस्यते । इह हि व्याकरणे सर्वेष्वेव सानुबन्धकग्रहणेषु रूपमाश्रीयते । यत्रास्यैतद्रूपमिति । रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगं । तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते । कोसौ । उपदेशो नाम ॥ ॥ न चैष उपदेशे तरप्शब्दः । अथवा अस्त्वस्य घसंज्ञा को दोषः । घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्रसज्येत । समानाधिकरणे घादिष्विष्यते तत् । यदा तर्हि सैव नदी स एव तरः तदा प्राप्नोति । स्त्रीलिङ्गे घादिष्विष्यते तत् । अवश्यं चैतदेवं विज्ञेयं । समानाधिकरणे घादिष्विच्यमाने इह प्रसज्येत । महिषीरूपमिव ब्राह्मणीरूपमिवेति ॥ ॥ बहुगणवतुडति संख्या ॥ संख्यासंज्ञायां संख्याग्रहणं । संख्यासंज्ञायां संख्याग्रहणं कर्तव्यं । बहुगणवतुडतयः संख्यासंज्ञा भवन्ति संख्या च संख्यासंज्ञा भवतीति वक्तव्यं । किं प्रयोजनं । संख्यासंप्रत्ययार्थं एकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्येयेषु संप्रत्ययो यथा स्यात् ॥ ॥ ॥

संख्यासंप्रत्ययार्थं

कमित्यर्थः ॥ ॥ न चैष इति ॥ कात्यनिकमस्य तरप्त्वं न स्वाभाविकमिति दृष्टं । समानाधिकरणेष्विति । आतिशायनिकस्य स्वार्थिकत्वात्समानाधिकरणः । यदा तर्हीति । ननु नीर्लिरिति भवितव्यं । एवं तर्हि नीयतेनेनेति तर इति सामान्येन परं संक्षिप्यते पश्चान्नद्या विशेष्यते इति न दोषः । स्त्रीलिङ्गेष्विति । स्वार्थिकस्य प्रकृतिलिङ्गानुविधानात् स्त्रीलिङ्गः । महिषीरूपमिवेति । इवशब्दोपि नञ्कल्पः । तेनायमर्थः महिषी इवेयमाकृतिरिति । तत्र सुप्सुपेति समासे कृते ह्रस्वत्वं स्यात् ॥ ॥ बहुगणवतुडति संख्या ॥ ॥ संख्यासंप्रत्ययार्थमिति ॥

भा०कै०७० चद्द ८६

ननु चेति॥ यथा पञ्चसु पञ्चदेवत्ते(?) इति लौकिके प्रयोगे त्यज्यन्ते तथैकादिकापि संख्या गृह्यत इत्यर्थः। कृत्रिमाकृत्रिमयोरिति न्यायो यं। तथा हि। सर्वो र्थो भिधानशक्तियुक्तः शब्दो यदा विशिष्टेर्थे संव्यवहाराय नियम्यते तदा तत्रैव प्रतीतिं जनयति नान्यत्र। नदी पौर्णमासीति। इह शास्त्रे नदीति संज्ञाविधाना तत्र संज्ञिनो ग्रहणं प्राप्नं ननु स्वरूपस्य। अशब्दसंज्ञेति निषेधात्। पौर्णमासीति। नियमार्थं पौर्णमास्याग्रहायणीग्रहणमीकारान्तानां स्यादिति चेत्। एवमप्यपौर्णमास्याग्रहायणीभ्य इति वक्तव्यं स्यात्। उकारग्रहणे न च नदीसंज्ञकमेवोकारान्तं पौर्णमास्याग्रहायणीशब्दसाहचर्यादगृह्यते॥ तद्विशेषेभ्य इति॥ गंगादिभ्यः॥ यदयमिति॥ निसाध्यः पाठ इति चेत् व्यवस्थित विभाषया विपाट्शब्दस्य निसप्रसङ्गश्च भविष्यतीत्यदोषः। बहु

नन्वेकादिसंख्या लोके संख्येति प्रतीता तेनास्याः संख्यायदेशेषु संख्या संप्रत्ययो भविष्यति। एवमपि कर्तव्यं किंप्रयोजनं। इतरथा ह्यसंप्रत्ययः कृत्रिमत्वात्। यथा लोके। अक्रियमाणे हि संख्याग्रहण एकादिकायाः संख्यायाः संख्येति संप्रत्ययो न स्यात्। किं कारणं। अकृत्रिमत्वात्। बहुगणादीनां कृत्रिमा संज्ञा। कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति यथा लोके। तद्यथा लोके गोपालकमानय कटजमानयेति। यस्यैषा संज्ञा भवति स आनीयते न यो गाः पालयति। यो वा कटे जातः। यदि तर्हि कृत्रिमयोः कृत्रिमे संप्रत्ययो भवति। नदी पौर्णमास्याग्रहायणीभ्यः अत्रापि प्रसज्येत। पौर्णमास्याग्रहायणीग्रहणसामर्थ्याच्च भविष्यति। तद्विशेषेभ्यस्तर्हि प्राप्नोति गंगायमुनेति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति। तद्विशेषेभ्यो भवतीति॥ ॥ यदयं विपाशःशब्दं शरत्प्रभृतिषु पठति॥ इह तर्हि प्राप्नोति॥ नदीभिश्चेति। बहुवचननिर्देशाच्च भविष्यति। स्वरूपविधिस्तर्हि प्राप्नोति। बहुवचननिर्देशादेव न भविष्यति। एवं च न चेदमकृतं भवति कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय इति न च कश्चिद्दोषो भवति। उत्तरार्थं च। उत्तरार्थं च संख्याग्रहणं कर्तव्यं। ष्णान्ता षट्। षकारनकारान्ता या संख्या या षट्संज्ञा यथा स्यात्। इह मा भूत्। पामानो विप्रुष इति॥ इहार्थेन तावन्नार्थः संख्याग्रहणेन। ननु चोक्तमितरथा ह्यसंप्रत्ययः कृत्रिमत्वाद्यथा लोक इति। नैष दोषः। अर्थात्प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति। अर्थो वा स्यैवं संज्ञकेन भवतीति इदमेवं संज्ञकेन कर्तव्यमिति। आतश्चार्थात्प्र-
प्रकरणाद्वा
वचनेति। अन्यथा आगन्तव्या इत्यादौ प्रत्यर्थं करवचनेन निर्देशस्तथे हापि कर्तव्यः स्यात्। न चेदमकृतमिति। अनाश्रितमित्यर्थः। उत्तरार्थं चेति। अयं हि सूत्रोपात्तः संख्याशब्दः स्वरूपपदार्थकः। उत्तरत्र संज्ञिनिर्देशेन प्रयोजनं। इहार्थेनेति। इहार्थो यस्येति सामान्यविशेषभावान्न पौनरुक्त्यं। आतश्चेति। इतश्चेत्यर्थः। अर्थः सामर्थ्यं। यथा गोपालकमानयेत्यत्र कर्मध्यायविष्यतीतिप्रकरणं हस्तसाधापनोऽसंभवात्संज्ञिनो ग्रहणं प्रस्तावः। यथा भोजनप्रकरणे सैंधवमानयेति लवणे प्रतीतिर्गमनप्रक- भा०प्र० चद्द
रणे त्वश्वे। यावदिति। ऊहितुमसमर्थः। पांसुलपादमिति॥ अचिरोषितं अत एवाप्रकरणं ॥ ॥
प्रकरणं

उभयगतिरिह। किंसंज्ञेयं यस्य कस्यचिन्निर्दिष्टाः स्या उत यत्रेह स्तोस्य विवक्षितः स्यादिति संदेहे बाह्यवतीत्यर्थः। साधीयो वेति। यो मम प्रसिद्धः सोनेन बो
धितः न च ममैवैवं संज्ञकः प्रसिद्ध इत्येवं मन्यते। लोके च गोपालकशब्दः संज्ञिनि नियम्यमानः संज्ञान्तरं निवर्तयति। क्रियानिमित्तं लक्षणं न निरस्यति। तुल्य
जातीयविषय एव हि नियमो भवति। एवमिहापीति। बह्वादय एवात्र संख्यात्वेन प्रकृता इति भावः। न यथा लोक इति। संख्याशब्दो हि बह्वादिषु प्रतिपा
दनाय संज्ञात्वे न विनियुक्तो नैकादिसंख्यानिरासाय अधिकार्थप्रतिपत्त्यर्थत्वादिह संज्ञाकरणस्य। कर्मणि द्वितीयेति। ग्रामं प्राप्नोति पदिकादन

उभयगतिस्तस्य भवति। साधीयो वा यत्रेह स्तं गमिष्यति। यथैव तथ्यर्थो यत्नकरणाद्धा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्य
संप्रत्ययो भवति। एवमिहापि प्राप्नोति। जानाति ह्यसौ बह्वादीनां कृत्रिमा संज्ञेत्कनेति। न यथा लोके तथा व्याकरणे। उभयगतिरि
ह भवति अन्यत्रापि नावश्यकमिहेव। तद्यथा कर्तुरीप्सिततममिति कृत्रिमा कर्मसंज्ञा। कर्मप्रदेशेषु चोभयगतिर्भवति। कर्मणि द्वि
तीयेति कृत्रिमस्य ग्रहणं। कर्तरि कर्मव्यतिहारे इत्यत्राकृत्रिमस्य तथा साधकतमं करणमिति कृत्रिमा करणसंज्ञा। करणप्रदेशे
षु चोभयगतिर्भवति। कर्तृकरणयोस्तृतीयेति कृत्रिमस्य ग्रहणं। शब्दवैरकलहाभ्रकण्वमेघेभ्यः करण इत्यत्राकृत्रिमस्य ॥ ॥

मिहिते कर्मणि संख्यायां द्वितीया विधीयते। न च क्रियायाः संख्या संभवतीति कारकस्य ग्रहणं। कर्तरि कर्मव्यतिहारे इति अत्र धातोः साक्षात्क्रियायां
वृत्तक्रियाया एव ग्रहणं। कलवमेघेभ्यः करणे इति। तत्रादिप्रत्यययोः सर्वधातुसंज्ञा क्रियते। क्रियावाचिनश्च तत्र व्यापारः साधनं उत्पद्यते इति सामर्थ्यात्क्रि
यायाग्रहणं॥ ॥ ॥श्री॥ ॥

विप्रतिषिद्धमिति। द्वंद्वावयवानां शक्त्यनभिधायित्वादधिकरणं द्रव्यं गम्यते। तद्वदतिदेशो[प]मिति। संख्याकार्यातिदेशोऽयमित्यर्थः। यदि हि संज्ञा स्यात् टिघुभादिसंज्ञावदेका
क्षरा क्रियेत। तस्माल्लौकिकार्थाभिधायी संख्याशब्द उपादीयमानोऽतिदेशार्थत्वमस्य बोधयति॥ अथवेति। गुरुसंज्ञाकरणादेका द्यः संख्याशब्दे नप्रदेशेषु न लभ्यंते ति इति

तथा आधारोऽधिकरणमिति कृत्रिमाधिकरणसंज्ञा। अधिकरणप्रदेशेषु चोभयगतिर्भवति। सप्तम्यधिकरणे चेति कृत्रिमस्य ग्रहणं। विप्रतिषिद्धं चानधिकरणवाचीत्यकृत्रिमस्य॥ अथवा नेदं संज्ञाकरणं। तद्वदतिदेशोऽयं। बहुगणवतुडति संख्यावद्भवन्तीति। सत्ते हि वृत्तिनिर्देशः कर्त्तव्यः। नत्वन्तरेण वृत्तिमतिदेशो गम्यते। अन्तरेणापि वृत्तिमतिदेशो गम्यते। तद्यथा। एष ब्रह्मदत्तः। अब्रह्मदत्तं ब्रह्मदत्त इत्याह। तेन मन्यामहे ब्रह्मदत्तवदयं भवतीति॥ एवमिहाप्यसंख्यां संख्येत्याह। संख्यावदिति गम्यते। अथवाचार्यप्रवृत्तिर्ज्ञापयति भवत्येकादिकायाः संख्यायाः संख्याप्रदेशेषु संप्रत्यय इति। यदयं संख्याया अतिशदंताया इति शदंतायाः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकं। न हि कृत्रिमा संज्ञा शदंता वास्ति। ननु चेयमस्ति डतिः। यत्तर्हि शदंतायाः प्रतिषेधं शास्ति। यच्चापि संज्ञायाः प्रतिषेधं शास्ति। ननु चोक्तं उत्तरार्थमेतत्स्यादिति। अर्थवद्ग्रहणेनानर्थकस्येत्यर्थवतस्तिशब्दस्य ग्रहणं। न च डतेस्तिशब्दोऽर्थवान्॥ ॥

संख्या २

गेनाप्यनुमीयते इत्यर्थः। अर्थवत इति॥ ननूभयसंभवे इयं परिभाषोपतिष्ठते। डसंज्ञा च कृत्रिमास्ति। ड ते च तिशब्दो नर्थक एवेति तस्यैव निषेधः स्यादित्य एम०
ज्ञापकस्संज्ञायाः प्रतिषेधः। नैष दोषः। अतिशदंताया इत्युच्चारणकाल एवार्थवत्तिशब्दस्य ग्रहणमिति प्रतीतिरिति ज्ञापकत्वमेवं प्रतिषेधस्य॥ ॥ ८७

अथ वेति। ननु महत्याः संज्ञायाः करणात्तदर्थोनुगतानामुपात्तानामेव संज्ञिनां भवतु संज्ञा। यथा सर्वादीनामेव सर्वनामसंज्ञा न त्वधिकानां। तेन बहुग
णशब्दयोः संघवैपुल्यवाचिनोः संज्ञा माभूदेकादीनां तु कथं स्यात्। नैष दोषः। इहान्वर्थकरणे न तावदनुरूपः संज्ञी सर्वत्राक्षिप्यते तेनैकादीनां ताव
द्भवति। पश्चाद्बहुगणवतुडतीति भूयोपि नियमार्थं व्याख्यायते। अत एव संघवैपुल्यवतोर्बहुगणशब्दयोः संज्ञा न भवति। तद्वदति देशपक्षे

अथवा महतीयं संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं। तत्र महत्याः संज्ञायाः करणे एतत्प्रयो
जनं अन्वर्थसंज्ञा यथा विज्ञायेत संख्यानयेति संख्येति। एकादिकया चापि संख्यायते। उत्तरार्थेनापि नार्थः। संख्याग्रहणेन। इदं प्र
संख्याग्रहण २ कृतेमुत्तरार्थमनुवर्तिष्यते। इदं वै संज्ञार्थं उत्तरत्र संज्ञिविशेषणेनार्थः। न चान्यार्थं प्रकृतमन्यार्थं भवति। न खल्वप्यन्यत्प्रकृतमनु
वर्तनादन्यद्भवति। न हि गोधा सर्पन्ती सर्पणादहिर्भवति। यत्तावदुच्यते। न चान्यार्थं प्रकृतमन्यार्थं भवतीति। अन्यार्थमपि प्र
कृतमन्यार्थं भवति। तद्यथा। शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यन्ते च शालयश्च भाव्यन्ते। यदप्युच्यते न खल्व
प्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति। न हि गोधा सर्पन्ती सर्पणादहिर्भवतीति भवेद्द्रव्येषु तदेवं तत्॥ ॥ ॥

पि परस्परसाहचर्यात्संख्यावाचिनोरेव भूयोपि नियमार्था निर्देशः क्रियते इत्यतिप्रसंगो न भवति। संज्ञिविशेषणेनार्थ इति। इमां नेत्यनेन विशि
ष्टं संज्ञिनं प्रतिपादयितुमुपयोग इत्यर्थः। न चान्यार्थमिति। एकशब्दत्वदर्शनेन इति भावः। भवतु तर्हि प्रतियोगं शब्दभेद इत्याह। न खल्वपीति। यथा गोधा
देशान्तरगमनमात्रेण गोधात्वं न जहाति एवं शब्दोपि रूपान्तरं न गृह्णातीत्यर्थः। अन्यार्थमपीति। पदार्थो नाशक्तिर्वै विस्यात्॥ ॥श्री॥ ॥

शब्दान्तरं

भा०कै०प्र० शब्दस्त्विति॥ स्वरितत्वेन वाक्यान्तरं वाक्यार्थो नु ग्राहिवल्लक्ष्यप्रतिपादनयोग्यमनुमीयते। सादृश्यात्तु तत्त्वाध्यवसाय इत्यर्थः। सापेक्षोयमिति। स्त्रीलिङ्गेन निर्दिष्टः शब्दः

८८ तः। तत्प्रकृतत्वादन्यपदार्थत्वेन संख्यास्वरितत्वेन विनाप्यपेक्ष्यत इत्यर्थः। अध्यर्द्धग्रहणं चेति। वार्त्तिके संख्याग्रहणं कर्त्तव्यमनुवर्त्तते तदपेक्षया समुच्चयार्थश्च

४४ शब्दः विध्यर्थे चेदं। अध्यर्द्धशब्दस्य त्रिभागचतुर्भागादिशब्दवदसंख्यावाचित्वादर्द्धशब्दस्यैकदेशवाचीन संख्यावाची। एकदेशादिशब्दवत्। तस्माधिशब्देन

शब्दस्तु खलु येन येन विशेषेणाभिसंबध्यते तस्य तस्य विशेषको भवति। अथवा सापेक्षोयं निर्दिष्टः क्रियते। न चान्यत्किंचिद

पेक्ष्यमस्ति। संख्यामेवापेक्ष्यामहे। अध्यर्द्धग्रहणं च समासकन्विध्यर्थं। अध्यर्द्धग्रहणं च कर्त्तव्यं। किं प्रयोजनं। समासकन्

विध्यर्थं। समासविध्यर्थं कन्विध्यर्थं च। समासविध्यर्थं तावत्। अध्यर्द्धशूर्प्पं। कन्विध्यर्थं। अध्यर्थकं। लुकि चाग्रहणं।

लुकि चाध्यर्द्धग्रहणं न कर्त्तव्यं भवति। अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायामिति॥ ॥ ॥

समासे कृते यौगिकोर्थः प्रतीयते न संख्या। अध्यर्द्धशूर्प्पमिति। अध्यर्द्धेन शूर्प्पेण क्रीतमिति दिक्संख्ये इत्यनुवर्त्तमाने तद्धितार्थेति समासः। ततः शूर्प्पादञन्य प्र०

तरस्यामित्यत्र प्राप्तोञ। अध्यर्द्धपूर्वेति लुक्॥ अध्यर्द्धकमिति॥ संख्याया अतिशदन्तायाः कन्निति कन्॥ ॥ ५॥ ॥ ८८

द्विगोरित्येव सिद्धमिति॥ समासविध्यर्थमिति संबंधसामान्ये षष्ठी। तेन समासे विधीयमाने समासनिमित्ते वान्यस्मिन्कार्ये विधीयमाने इत्यर्थः। तेन द्विगुनिमित्तो लु
गपि लभ्यते। अन्ये त्वाहुः। अर्धशब्दः संख्यावाच्येव। तथा हि गणपतेरेकोऽर्धं द्वौ तृतीयमिति। तन्मते नियमार्थमर्धशब्दस्यैव संख्यात्वे न ग्रहणं। यथा स्यात् सार्द्धा
दीनां मा भूदिति वाक्यभेदेन च द्वितीयो नियमस्तस्य च समासकन्विध्यर्थं संख्यात्वेन कार्यो नान्यार्थमिति। अधिकषाष्टिक इति। अधिकया षष्ट्या क्रीत इति संख्याविशे

अर्ध२

द्विगोरित्येव सिद्धं। अर्धपूर्वपदश्च पूरणप्रत्ययांतः। अर्धपूर्वपदश्च पूरणप्रत्ययांतः संख्या [redacted] संज्ञो भवतीति वक्तव्यं। किं प्रयोजनं। समासक
न्विध्यर्थमेव। समासविध्यर्थं कन्विध्यर्थं च। समासविध्यर्थं तावत्। अर्धपंचमशूर्पं। कन्विध्यर्थं। अर्धपंचमकं। अधिकग्रहणं चालुकि समासो
त्तरपदवृद्ध्यर्थं। अधिकग्रहणं चालुकि कर्त्तव्यं। किं प्रयोजनं। समासोत्तरपदवृद्ध्यर्थं। समासविध्यर्थं उत्तरपदवृद्ध्यर्थं च। समासविध्यर्थं ताव
त्। अधिकषाष्टिकः। अधिकसाप्ततिकः। उत्तरपदवृद्ध्यर्थं च। अधिकषाष्टिकः अधिकसाप्ततिकः। अलुकीति किमर्थं। अधिकषाष्टिकः अधि
कसाप्ततिकः। बहुव्रीहौ चाग्रहणं। बहुव्रीहौ चाधिकशब्दस्य ग्रहणं न कर्त्तव्यं भवति। संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये इति संख्येये
वसिद्धं। बह्वादीनामग्रहणं। बह्वादीनां ग्रहणं शक्यमकर्त्तुं केनेदानीं संख्याप्रदेशेषु संख्यासंप्रत्ययो भविष्यति॥ ॥ ॥

षणं अधिकशब्दो न संख्येति तद्धितार्थ इति समासः। प्राग्वतेष्ठन्। अलुकीति वचनाल्लुकि कर्त्तव्ये संख्यासंज्ञा नास्तीति अर्धपूर्वेति लुक् न भवति। ततः संख्यायाः संवत्सरसं
त्तुत्तरपदवृद्धिः। ननूत्तरपदवृद्ध्यर्थमिति वचनाल्लुकि न भविष्यति किमलुकीत्यनेनेत्यत आह। सर्वोत्तरेषु अर्थेषु यः प्रत्ययस्तस्य लुगभावस्तत्रैवोत्तरपदवृद्धिः
ख्यस्य चे   वचनं २   ॥स्यात्॥   ष्प२   ॥श्री॥   ॥

भा०कै०प्र० ज्ञापकात्सिद्धमिति॥ एकादिवन्नियतसंख्यावाचित्वं बह्वादीनां नास्तीति ज्ञापकाश्रयः। योगापेक्षमिति। अस्य योगस्य प्रत्याख्यानादेतद्योगापेक्षमिति न बो-
८९ द्धव्यं किंतु योगानपेक्षं तेनेति योगापेक्षं। यदयं वतु उप्रगगण संघस्येति सुकृ। वतोरिड्कुपद्कृतीतिरिटिपरतः। आगमं शास्ति तज्ज्ञापयति भवति संख्याकार्यमि-
89 ति॥ ष्णान्ता षट्॥ ॥षट्संज्ञायामिति॥ प्रकृतिप्रत्ययविभागेन शक्तिपादनं गुणैः अन्वयमुपदेशः। तेन प्रकृतिप्रत्यययोरुपदेशे षकारनकारान्ता संख्या

या

दूर

वतंता१

ज्ञापकात्सिद्धं। ज्ञापकं किं। यदयं वतोरिड्वेति संख्याया विहितस्य कनौ दिटं शास्ति। वतोरेव तज्ज्ञापकं स्यात्। नैसाह। योगापे-
क्षं ज्ञापकं॥ ॥ष्णान्ता षट्॥ षट्संज्ञायामुपदेशवचनं। षट्संज्ञायामुपदेशवचनं कर्तव्यं। उपदेशे षकारनकारान्ता संख्या ष-
ट्संज्ञा भवतीति वक्तव्यं। किं प्रयोजनं। शताद्यष्टनोर्नुम्नुडर्थं। शतानि सहस्राणि नुमि कृते ष्णान्ता षडिति षट्संज्ञा प्राप्नोति। उप-
देशग्रहणाच्च भवति। अष्टानामित्यत्रात्वे कृते षट्संज्ञा न प्राप्नोति उपदेशग्रहणाद्भवति। उक्तं वा किमुक्तं। इह तावच्छतानि
सहस्राणीति सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति। अष्टनो प्युक्तं। किमुक्तम्॥ ॥ ॥

सा षट्संज्ञेत्यर्थः। नुम्नुडर्थमिति॥ अर्थशब्दः प्रयोजनवाची। तत्र नुमि शतानीत्यादौ षट्संज्ञानिवृत्तिः प्रयोजनं। नुटि तु विधीयमाने षट्संज्ञाप्रवृत्तिः प्रयो- राम०
जनं। अष्टानामिति। परत्वान्नित्यत्वाच्चात्वे कृते नुटो प्राप्तिः। कार्यकालत्वात्संज्ञायाः प्रवृत्तेर्नास्त्यंतरंगत्वं॥ ॥ ॥ ८९

अष्टनो दीर्घेति॥ तत्र हि दीर्घग्रहणं अष्टाभिरिति रूपउदात्तत्वविधानार्थं क्रियते यदि च कृतात्वस्य षट्संज्ञा न स्यात् तदा अष्टाभिरिति परत्वात्षट्स्वरो ऽस्तु यो नममिति भवि
ष्यति किं दीर्घग्रहणेन। कृते च तत्र कृतात्वस्यापि षट्संज्ञा ज्ञाप्यते। तत्र प्राप्ता प्रवादहलास्तद्धस्वरो नेन बाध्यते इति दीर्घपक्ष इव अदीर्घपक्षेपि विभक्तेः स्वरः स्यादिति दीर्घ

तत्र

कारांतना आ

अष्टनो दीर्घग्रहणं ज्ञापकं षट्संज्ञायामाकारांतस्यानुरूपमिति। अथवा आकारोऽप्यत्र निर्दिश्यते षकारांतानाकारांताच संख्या षट्संज्ञा भ
वतीति॥ इहापि तर्हि प्राप्नोति सधमादो द्युम्न एकास्ता इति। नैष दोषः एकशब्दोऽयं बह्वर्थः। अस्त्येव संख्यापदं। तद्यथा। एको द्वौ बहव इति। अ
स्त्यसहायवाची। तद्यथा। एकाग्नयः। एकहलानि एकाकिभिः क्षुद्रकैर्जितमिति। असहाया इत्यर्थः। अस्त्यन्यार्थे वर्तते। तद्यथा प्रजामेका
रक्षत्यूर्जमेकेति। अन्ये इत्यर्थः। सधमादो द्युम्न एकास्ताः। अन्या इत्यर्थः। तद्योन्यार्थे वर्तते तस्यैष प्रयोगः। इह तर्हि प्राप्नोति द्वाभ्यामिष्टये
विंशत्या चेति। एवं तर्हि सप्तमे योगविभागः करिष्यते। अष्टाभ्य औश्। ततः षड्भ्यः षड्भ्यश्च यदुक्तं तदष्टाभ्योपि भवति। ततो लुक्। लुक् भव
ति षड्भ्य इति। अथवा उपरिष्टाद्योगविभागः करिष्यते। अष्टन आ विभक्तौ। ततो रायः। रायश्च विभक्तावाकारादेशो भवति॥०॥

ग्रहणं कर्तव्यं। एकास्ता इति। संख्यावाचित्वाभ्युपगमवादी असमयेन वक्तुं वचनं मन्यते। अन्यवाचित्वाश्रयेण तु नमरं इह तर्हीति। द्वाभ्यामिति षट्स्वरः स्यात्।
सप्तम इति॥ अष्टाभ्य इति कृतात्वानुकरणं औश्त्वविधानसामर्थ्याच्च लुङ् विधीयते॥ ॥ ॥

भा० कौ० प्र० १० 70

हलीति। तत इष्टाष्टानामिति नुटि कृते आत्वं भवति। जश्शसोः स्त्वष्टाभ्य इति कृतात्वनिर्देशाज्ज्ञापकादात्वं भवति। कृतात्वस्य हि निर्देशः सप्रयोजनं यत्रात्वं न तत्रौश्त्व
यथा स्यादिति। यदि से ततः कृतात्वनिर्देशस्य प्रयोजनं न स्यात् लाघवार्थमष्टभ्य औश् इत्येव ब्रूयात्॥ यद्येवमिति। हलादावुच्यमानमात्वमौजसोर्न प्राप्नो ति
यत्राक्षार्थस्य साधारण्यं तत्रौश्त्वेन भवितव्यं। तत्रैव चौश्त्वे नात्वमनुमीयत इति जस्य प्यात्वमत्र ज्ञापकान्न प्राप्नोति विभक्तिमात्रे त्वात्वं विधीयमानमौज
सोः सिध्यति। अष्टन आ विभक्ताविसत्रपदं गाधिकारे तस्य तदुत्तरं सचेति न दंतविधिः संज्ञावाद्दुरुवचननिर्देशाभावाद्गुणभूतेऽप्यष्टार्थे आत्वेन भाव्य

हलीत्युभयोः शेषः। यद्येवं प्रियाष्टौ प्रियाष्टा इति न सिध्यतीति यथालक्षणं प्रयुक्ते॥ इति च। द्वंद्व इति ग्रहणाद्धि क्रियते संख्यासंज्ञायां
षट्संज्ञायां च। एकशेषाभावे कर्तुं कथं। यदि तावत्संख्यासंज्ञायां क्रियते षट्संज्ञायां न करिष्यते। कथं। ष्णान्ता षडिति स्वत्र इतीसत्यनुवर्तिष्य
ते। अथवा षट्संज्ञायां क्रियते संख्यासंज्ञायां न करिष्यते इति चेत्तत्र संख्यासंज्ञाप्यनुवर्तिष्यते॥ [redacted]
×प्रियाष्टानौ प्रियाष्टान इति प्राप्नोति·२ १॥ ॥

मित्यत्रापि सिद्धमितीति प्रश्नः। यथालक्षणमिति। यस्य विशिष्टं प्रयोगो न स्मर्येनेनापि प्रयोगनिषेधस्य तिः तद्यथालक्षणमनुगंतव्यं द्वन्मा भूद्दात्वमित्यर्थः॥ ने
वं वा लक्षणमप्रयुक्ते वर्जनेऽप्रयुक्तानामेव लक्षणेनान्वाख्यानात्। इति च॥ यदितावदिति। तत्र वत्तुमाचार्यो न हि तएव इति गृह्यते न नुप्राप्ते इति॥ अथ वेति॥ त एम०
त्रे संख्यासंज्ञायामनुवर्तनेनादन्वर्थत्वाच्चतुरस्याः संख्यासभ्य विषय एव इति गृह्यते तेन त्वौणादिकः॥ ॥ ॥ १०

क्तक्तवतू निष्ठा॥ इहानुबंधाः कार्यार्थमुपादीयंते प्रयोगश्चैषां तु प्रतान्नास्ति। यत्र च सारूप्यं तत्र संदेहः कथमस्यानुबंधकार्यं स्यात् न मस्यतु न कृतं इति पूर्वपक्षा
भिप्रायः। सिद्धांतवादी तु मन्यते अध्रुवेणानुबंधेन नियतसन्निधाना अर्थाः कारककालादयो लक्ष्यंते। तद्दर्शनादनुबंधस्य गौचत लक्षितानां कार्याणां सा

नां

क्तक्तवतू निष्ठा॥ निष्ठासंज्ञायां समानशब्दप्रतिषेधः। निष्ठासंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। लोतो गन्ते इति॥ निष्ठासंज्ञा
यां समानशब्दप्रतिषेधः। निष्ठासंज्ञायां समानशब्दानामप्रतिषेधः॥ अनर्थकः प्रतिषेधोऽप्रतिषेधः। निष्ठासंज्ञाकस्मान्न भव
ति। अनुबंधोन्यत्वकरः। अनुबंधः क्रियते सोन्यत्वं करिष्यति। अनुबंधोन्यत्वकर इति चेन्न लोपात्। अनुबंधोन्यत्वकर इति चेत्
तन्न। किं कारणं। लोपात्। लुप्यते त्रानुबंधः। लुप्ते चानुबंधेनान्यत्वं भवति। तद्यथा कृतरदेवदत्तस्य गृहं अदो यत्रासौ काक इति
उत्पतिते काकेन घंतद्गृहं भवति। एवमिहापि लुप्तेनुबंधेन एः प्रत्ययो भवति। यद्यपि लुप्यते जानाति त्वसौ सानुबंधकस्येयं संज्ञा
कृतेति। तद्यथा इतर न्यायिकतरदेवदत्तस्य गृहं अदो यत्रासौ काक इति। उत्पतिते काकेयद्यपि तद्गृहं नष्टं भवति। अंततस्तमुद्देशं
जानाति॥ ॥ ॥

धुत्वं विज्ञायते। न त्वयदा देवदत्तेन लूनः शालिरिति कश्चित् प्रयुंक्ते तदा तं लक्षणां ज्ञं कर्मभूतकालावगमात् क्तप्रत्ययं मन्यते। यदा तु लोतमालभे
ते तिप्रयोगस्तदा मेषवाची लोतशब्दः। तन्मस्तयांतः प्रयुक्त इति मन्यते॥ ॥ ॥ ॥

भा० कै० प्र०
९१

सिद्धविपर्यास इति। सिद्धो विपर्यासः संशय इत्यर्थः। इदं तद्वृत्तमिति। बुद्धेरनवस्थितत्वमनेन प्रतिपाद्यते। न त्वेतद्द्विर्वचनं। वीप्साद्यर्थाभावात्। प्राकीर्षैति।
अद्य भूतकालोऽस्तीति भावः। दृश्यन्ते ते ति। सिजादीत्यादिशब्दः प्रकारे। तत्र प्रामित्र घटं देवदत्त इति प्रयोगे कर्तृकत्वाद्यवगमाद्धेतुं तस्मायं प्रयोगो न नि

सिद्धविपर्यासश्च। सिद्धश्च विपर्यासः। यद्यपि जानाति संदेहस्तस्य भवति। अयं स्तनशब्दः स्तोतोगन्त इति। अयं स्तनशब्दः स्तनोगोस्ते इति। तद्यथा इतरत्रापि कतरद्देवदत्तस्य गृहं अद इदं चासौ काक इति॥ उत्पतिते पिकाके यद्यपितमुद्देशं जानाति संदेहस्तु तस्य भवति। इदं तद्वृत्तं इदं तद्वृत्तमिति। एवं तर्हि कारककालविशेषात्सिद्धं। कारककालविशेषावुपादेयौ। भूते यस्तशब्दः कर्तरि कर्मणि भावे चेति। तद्यथेतरत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति सो ध्रुवेण निमित्तेन ध्रुवं निमित्तमुपादत्ते वेदिकां पुण्डरीकं वा। एवमपि प्राकीर्षैत्सत्त्र प्राप्नोति। लुङि सिजादिदर्शनात्। लुङि सिजादिदर्शनात्त्र भविष्यति। यत्र तर्हि सिजादयो न दृश्यन्ते। प्राभित्रेति। दृश्यन्ते त्रापि सिजादयः किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। यथैवायमनुपदिष्टान्कारककालविशेषानवगच्छति एवमेनं दृष्यवगंतुमर्हति। यत्र सिजादयो नेति॥ ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे पंचममाह्निकं॥ ॥ ॥

श्यंतस्येति प्रतिपद्यते। अंजिघपिप्सः स इत्यस्य निष्ठासंज्ञा न भवति। उणादीनामव्युत्पन्नत्वाद्धातुलकाद्या अन्यथा निष्ठा च यजनादिसाद्युत्र त्वं स्यात्॥ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य प्रथमे पादे पंचममाह्निकं॥ ॥ ॥ प्र०
९१

सर्वादीनि सर्वनामानि कोयमिति ॥ ननु नपुंसकवद्बहुवचननिर्देशादेव बहुव्रीहिर्निश्चीयते समासांतराशंकानेवास्तीति प्रश्नानुपपत्तिः एवं तर्हि किमयं बहुव्री
हिरेवाहोस्विद्बहुव्रीहितत्पुरुषयोरेकशेषः यथा कृतं तेनेत्यपः कृ एवादिभ्य इति वेति प्रश्नः। तत्र सारूप्यार्थे सर्वेषामसावादिः सर्वादिरित्यत्रादिशब्द उपादीयते न
त्वस्य प्रयोजनांतरमस्तीति तत्र नपुंसकमनपुंसकेनेति वा स्वरभिन्नानां यस्योत्तरस्वरविधिः स शिष्यत इति वा बहुव्रीहेः शेषः वक्ष्यमाणेन न्या
येन विनाप्येकशेषेण सर्वशब्दस्य संज्ञा सिध्यतीति मत्वाह बहुव्रीहिरिति एवमपि संदेहः किं भाष्यमकल्पिको बहुव्रीहिरथ बहुव्रीहितत्पुरुषयोरे
कशेषे बहुव्रीहिरिति पृच्छति कोस्येति तानीमानीति अन्यपदार्थस्य प्राधान्यं प्रदर्श्यते अन्यथा चित्रगुर्गावो यस्येति गवां विशेष्यत्वं तद्गतस्त्वविशे
षणत्वमवगम्यते तथेहाप्यवगम्येत अत्र चार्थे बहुव्रीहिर्नेष्यते यदा तु स्वामिनः प्राधान्यं गवां विशेषणभावस्तदा बहुव्रीहिः अत एव यस्य स चि

सर्वादीनि सर्वनामानि सर्वादीनीति कोयं समासः बहुव्रीहिरित्याह कोस्य विग्रहः सर्वशब्द आदिर्येषां तानीमानीति यद्येवं सर्वशब्दस्य सर्वनामसं
ज्ञा न प्राप्नोति किं कारणं। अन्यपदार्थत्वाद्बहुव्रीहेः बहुव्रीहिरयमन्यपदार्थे वर्तते तेन यदन्यत्सर्वशब्दात्तस्य सर्वनामसंज्ञा प्राप्नोति॥ ०॥

त्रगुरिति स्वामिनः प्राधान्यं प्रदर्श्यते तानीमानीति सर्वनामद्वयोपादानेन प्रत्यक्षविषयत्वादिदं शब्दस्य गणपठितेषु सर्वशब्दस्यांतर्भावात्तद्गुणसंविज्ञानं सूचय
ति तस्यान्यपदार्थस्य गुणा उपलक्षणानि तेषामपि कार्ये संविज्ञानं तद्गुणसंविज्ञानं तत्र चित्रगुरानीयतामिति स्वस्वामिसंबंधः षष्ठ्यर्थ इति स्वविशेषो
पलक्षितस्य स्वामिन एवानयनं न तु गवां दंडी विषाणी आनीयतामित्यत्र तु संयोगसमवायलक्षणेन संबंधेन संबंधिनि कार्ये विज्ञायमाने उपलक्षणस्या
प्यंतर्भावो भवति इहाप्यादिशब्दस्यावयववाचित्वात् उद्भूतावयवभेदः समुदायः समासार्थः। तस्य च समुदायस्य युगपत्प्रयोगाभावात् तदंत
र्भूतानामेव पृथक्प्रयोगत्वात्कार्यार्पितया संज्ञया भवितव्यं इति सर्वशब्दस्यापि सिध्यति यथा देवदत्तशालायां ब्राह्मणा आनीयतामित्युक्ते देवदत्तोपि यदि
" ब्राह्मणो भवति स्वशालास्थश्चेत्तदा सोप्यानीयत एव॥ . ॥ ॥

भा०कै०प्र० ५४२ ९२

णत्वं प्राप्नोतीति राजपुरुषादिवत्संज्ञाशब्दोऽपि शास्त्रप्रक्रियायां संतमसं तं वा: व्ययवार्थे माप्ति समुत्सार्यतइति णत्वप्रसंगः प्रयोगे च सगणत्वाऽपि त्वाश्च नि
त्या एव शब्दाः तत्र संज्ञायां सगणत्वा एव साधवोऽसंज्ञायां त्वगणत्वा एवेति शास्त्रव्यापारात् णत्वं प्राप्नोसेव सर्वो र्थो भिधान योग्यस्य च शब्दस्य शक्ति नियममात्रं संज्ञाकरणमि
ति शब्दार्थे संबंध नित्यत्वस्यापि न विरोधः निपातनादिति लोकेप्ययं णत्वरहित एव प्रयुज्यते तस्यात्र प्रसंगे न साधुत्वं प्रतिपाद्यते किमेतदिति भवत्वस्य

तद्यथा चित्रगु ग्रणीयनामि समुक्ते यस्य ता गावो भवंति स आनीयते न गावः नैष दोषः भवति हि बहुव्रीहौ तद्गुणसंविज्ञानमपि तद्यथा चि
त्रवाससमानय लोहितोष्णीषाः ऋत्विजः प्रचरंतितद्गुण आनीयने तद्गुणश्च प्रचरंति इह सर्वनामानीति पूर्वपदात्संज्ञायामगइति ण
त्वं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः सर्वनामसंज्ञायां निपातनात् णत्वाभावः सर्वनामसंज्ञायां निपातनात् णत्वं न भविष्यति किमेतन्
न्निपातनं नाम अपवादः प्रतिषेधो नाम अविशेषेण किंचिदुक्त्वा विशेषेण नेत्युच्यते तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते इदं न भव
तीति निपातनमप्येवं जातीयकमेव अविशेषेण णत्वमुक्त्वा विशेषेण निपातनं क्रियते तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते इदं न
भवतीति ननु च निपातनाच्चाणत्वं स्यात् यथा प्राप्तं च णत्वं किमन्ये प्येवं विधयो भवंति॥ ॥ ॥

[redacted] साधुत्वं णत्वप्रतिषेधे त्वस्य तास्यो भावादि कल्यः प्राप्नोतीति भावः। इतरं प्रतिषेधे न साम्प्रत्यं प्रतिपादयितुं पर्य
नुयुंक्ते अपवाद इति सर्वत्रैव ह्यपवादस्यानुमानं बाधः निपातनं चापि णत्वाभावस्यानुमानमिति भावः ननु चेति प्रतिषेधस्य हि निवृत्त्या वेव तात्पर्यं निपात उ०प्र०
नस्य तु तद्रूपसाधुत्वप्रतिपादने ननु रूपांतर निवृत्ता विति भावः॥ ॥ ॥ ५४२

इकोयणचीति॥ यणोहि साधुत्वं प्रतिपाद्यते। न स्थिति; हृत्निरीत्यर्थः षष्ठ्यात्रेति ततश्चसंहिताविषये साधावि इकोऽप्रयोगः इकः षष्ठीनिर्देशेन प्रतिपाद्यते यथा दर्भा
णां स्थाने शरैः प्रस्तरितत्वमिति न तत्र दर्भाः प्रस्तीर्यन्ते। इहतर्हीति विकल्पः प्राप्नोतीति भावः समुच्चयस्तु न भवति। एकेन परदेशस्यावेष्टव्यत्वात् द्वात्तु मावे धातुक
योश्चार्याभिधाने एकेनैव साहाय्यकृत्यस्य संपादनात्। शवादेशा इति श्यपनश्नुशिलुकशाशापकं स्थानिवद्भावाभावस्तेन करोतीत्युप्रत्ययस्यापित्वादनुदात्तत्वं न

इहेकोयणचीति वचनात् यणस्यात् यथा माप्रश्चेक श्रूयेत नैष दोषः अस्त्यत्र विशेषः षष्ठ्यात्र निर्देशः क्रियते षष्ठी च पुनः स्थानिनं निवर्त्तय
ति इहतर्हि कर्त्तरि शप् दिवादिभ्यः श्यन्निति वचनाच्छ्यन्स्यात् यथा माप्रश्च शप् श्रूयेत नैष दोषः शवादेशाः श्यन्नादयः करिष्यन्ते तन्न तर्हि
शपोग्रहणं कर्त्तव्यं न कर्त्तव्यं प्रकृतमनुवर्त्तते क्व प्रकृतं कर्त्तरि शबिति तद्वै प्रथमा निर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः दिवादिभ्य इत्येषा पंचमी
शबिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति प्रत्ययविधिरयं न च प्रत्ययविधौ पंचम्यः प्रकल्पिका भवंति नायं प्रत्ययविधिः वि
हितः प्रत्ययः प्रकृतश्चानुवर्त्तते इहतर्हि अव्ययसर्वनाम्नामकच् प्राक् टेरिति वचनाच्चाकच् स्यात् यथा माप्रश्च कः श्रूयेत नैष दोषः नाप्रा
प्तेहि के कजारभ्यते स कः बाधको भविष्यति निपातनमप्येवं जातीयकमेवं नाप्राप्ते तस्मिन्निपातनमारभ्यमाणं तद्बाधकं भविष्यति। यदि तर्हि निपात
नान्यप्येवं जातीयकानि भवंति समस्तते दोषो भवति इहान्ये वैयाकरणाः समस्तते विभाषा लोपमारभंते समाहितं ततयोर्वेति सततं संततं सहितं सं

भवति कुर्वतीत्यत्र शप् श्यपनोर्नित्यमिति नुमागमोऽपि न भवति श्नपादित्यधिकाराद्वा रुधादिभ्यः श्नमित्यत्र रुधादीनां श्रुतत्वात्तेषामेवात्मादचः परः श्नम् भवति न तु
शपः परः यथा च भ्रस्जोरोपधयोरमन्यतरस्यामिति रमागमो रोपधयोर्निवर्त्तकः एवं शपः श्नम् इहतर्हीति देशभेदाद्विरोधाभावे पिकाकाचोरेकार्थत्वाद्विकल्प
(९ एवचोद्यते नतु समुच्चयः॥ ॥ ॥

भा०कै०प्र०
९३
93

कर्त्तव्योऽत्र यत्न इति॥ लुंपेदवश्यमः कारं यं ह्लो को न्याय्यमवश्यं पठितव्यः तेनैव सततं संततमिति च सिध्यति न तु निपातनेनेत्यर्थः। संततमिति चानभिधानात्क्तांतस्य
प्रयोगाभावः पुराणशब्देन पुरातनशब्दस्य बाधः प्राप्तः पृषोदरादित्वान्न भवति संज्ञोपसर्जनीभूतानामिति येपि विषयांतरे दृष्टाः त एवेमामवस्थां प्राप्ता इति
विवक्षया च्विप्रत्ययनिर्देशः सर्वो यदेहीति पदकार्येषु गौणमुख्यन्यायो न तु प्रातिपदिककार्येष्विति शङ्काप्रयेच वृद्ध्यात्वे इत्यत्रोक्तमिति प्रसिद्ध्यप्रसिद्धिवशात्तत्सम
वत्वपीहसन्नोक्तः समासकृत्तद्धिताव्ययसर्वनामासर्वलिंगा जातिरेकद्व्योपनिवेशिनी संज्ञेसेतरदनपेक्ष्य संज्ञाप्रतिषेधः तत्रत्यपेक्षिते परया पूर्वोसंज्ञा वाध्यत इति संज्ञासं
अत्यादयइति· नयासर्वनामसंज्ञाया वाधनात्स्य संगाभावः इति सर्वाये ति प्रोक्तिसमासोयं बहुव्रीहौ संज्ञाप्रतिषेधात् प्रयोजनं सर्वनामाव्ययसंज्ञाया मिति तदंतविधिः परमसर्वस्मादित्या

कर्त्तव्योऽत्र यत्नं बाधकामेवहि निपातनानि भवंति॥ संज्ञोपसर्जनप्रतिषेधः संज्ञोपसर्जनीभूतानां सर्वादीनां प्रतिषेधो वक्तव्यः सर्वो नाम कश्चित्तस्मै सर्वाय देहि इति सर्वाय देहि [redacted] सकथं कर्त्तव्यः पाठात्पर्युदासः पठितानां संज्ञाकरणं पाठादेव पर्युदासः कर्त्तव्यः अपठितानां संज्ञा कर्त्तव्या सर्वादीनि सर्वनामसंज्ञानि भवंति संज्ञोपसर्जनीभूतानि न सर्वादीनि किमविशेषेण नेत्याह विशेषेण च किं प्रयोजनं सर्वाद्यानंतर्येकार्यार्थं सर्वादीनामानंतर्येण यदुच्यते कार्यं तदपि संज्ञोपसर्जनीभूतानां माभूदिति किं प्रयोजनं डतरादीनां मद्भावे इति कांतमिदं ब्राह्मणकुलं कतरत्कतरद्ब्राह्मणकुलमिति॥ ॥ इति॥

घ्यर्थेश्चाश्रितः पाठादिति यथा निडोगोत्रादीनी सत्रकुत्सनाभीक्ष्ण्यग्रहणं गोत्रादिपाठविशेषणं तथेहापि सर्वादिसंनिवेशो विशेष्यते असंज्ञोपसर्जनीभूतानि सर्वादी[redacted]निगणसन्निविष्टानि नाम्नानीत्यर्थः किमविशेषेणेति किं यत्सर्वेषां सर्वादीनां सर्वनामकार्यं तदर्थमेवेति प्रश्नः विशेषेण चेति चशब्दाद्विशेषेणेत्य
र्थः। यद्गणपाठोपलक्षितं विधिष्टं कार्यं सर्वनामः अद्डुतरादिभ्य इत्यादि तदर्थमपि पाठविशेषणमित्यर्थः। यत्तु कार्यं युष्मदस्मद्भ्यां ङसोशित्यादि स्वरूपमात्राश्रयं न संनि
वेशापेक्षं तदविशेषेण भवति तत्र हि न गणपठितयोर्युष्मदस्मदोर्निर्देशो ऽपितु गणादिकयोः॥ ॥ ॥ राम० ९३

अनुपसर्जनादिति ॥ ननु प्रधानेन तदन्तविध्यर्थो योग आरब्धव्यः कौंभकारेय इति यथा स्यादिति । न चाणिति ल्ढुहृगां तद्धितोप्यणस्तीति नैनदस्ति स्त्रीप्रत्य
येत्वानुपसर्जनेनेति तदादिनियमाभावात्कारशब्दात् टिड्ढेपि विहिते कुंभकारीशब्दात्स्त्रीभ्यो ढगिति ढग्भविष्यति । अनुपसर्जन अ अदिति सौ लुगिति षष्ठ्या लु पं सु २
भ२ कु अ अ इति अकारेणाकारान्तौ विशेष्येते अकारान्तस्वरौ यावकारान्तौ तावनुपसर्जनस्येत्यर्थः पंचम्या अदित्यस्यं तु युष्मदस्मद्ज्ञापमनकारान्ताभ्यां
विधीयत इति परिभाषानुपस्थानादुपसर्जनाभ्यामपि भवति स्वद्रादीनाम इसयमकारान्तस्य रस्य हलन्स्थाने विधीयत इस्मकारान्तरो अकारो भवतीति परिभा

स्वद्रादिविधौ च स्वद्रादिविधौ च प्रयोजनं अतिक्रान्तोयं ब्राह्मणीमतिब्राह्मण इति संज्ञाप्रतिषेधस्ताद्वन्तवक्तव्यः उपरिष्टाद्योगविभागः
करिष्यते पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायां ततो संज्ञायामिति सर्वादीनि इत्येवं यान्युक्तानि तानि असंज्ञायां तानि द्रष्टव्यानि
उपसर्जनप्रतिषेधश्च न कर्तव्यः अनुपसर्जनादित्येष योगः प्रत्याख्यायते तमेवमभिसंभंत्स्यामः अनुपसर्जन अ अदिति किमिदं अ अ इ-
ति अकारान्तौ शिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ यद्येवमतियुष्मदस्मदिति न सिध्यति प्रश्लिष्टनिर्देशोयं अनुपसर्जन अ अ इति भ
१ अकारान्तात् अकारान्तौ शिष्यमाणावनुपसर्जनस्य द्रष्टव्यौ ॥ ॥

षोपस्थानादिति तदिसत्र न भवति एवं त्वनुप्रियौ द्वावस्येति बहुव्रीहौ कृते अकारान्तादविधानात्परिभाषानुपस्थानादत्वं प्राप्नोति तदोसः सावितिचसत्वं विशेषितमित्यु
पसर्जनस्यापि प्राप्नोति तत्रायं समाधिः स्वद्रादीनाम इस्तत्र स्वद्रादिषु परिभाषोपस्थानादनुपसर्जनानां तेषां ग्रहणं तत्साहचर्याद्दृशब्दोऽपि तथाविध एव गृह्यते
सत्वविधौ च तथाविधानामेवानुवृत्तिरित्यत्रापि न दोषः अतिसर्वाय इत्यादौ त्वविशेषकार्यमपरिहृतमेव ॥ ॥ भ२ ॥

मा॰कौ॰पृ॰ ९४
९५

गत्यमाणविभक्तौ रिति गत्यमाणानां सदादीनां इतरादीनां चार्थद्वारेण संबंधिनीया विभक्तिस्तदर्थं गतसंख्याक्रमादिवाचिनीत स्यादित्सर्थः ॥ यद्येवमिति गत्यमा
णाद्याविहिता विभक्तिरित्येवं संबंधं मन्वानस्य प्रश्नः ॥ आर्थसंबंधोत्र गृहीत इत्युत्तरे ऽभिप्रायः ॥ यद्येवं पंचकाः शकुनय इति कनः स्वार्थिकत्वात् जसो लुक् प्राप्नोति
उच्यते कनि कृते शब्दांतरत्वात् तत्वाभावान्नायं षट्संज्ञक इत्यदोषः ॥ युष्मदस्मद्भ्यां ङस॰ सोपि सत्रत्वं योगेन विभक्तिर्विशेष्यत इत्युपसर्जनाभ्यामपि सिध्यति प्रियस

अथवा अंगाधिकारे य उच्यते गत्यमाणविभक्तौ स्तद्भवति ॥ यद्येवं परमपंच परमसप्त षड्भ्यो लुगिति लुङ् प्राप्नोति नैष दोषः षट्प्रधान ए
ष समासः इह तर्हि प्रियसप्ताब्राह्मणेन अनङ् प्राप्नोति ॥ सप्तमीनिर्दिष्टे य उच्यते प्रकृतविभक्तौ न तद्भवति यद्येवं अतितत् अतितदौ अ
तितद इति अत्वं प्राप्नोति तच्चापि वक्तव्यं ॥ न वक्तव्यं इह तावदद्दुतरादिभ्यः पंचभ्य इति पंचमी अंगस्येति षष्ठी तत्राशक्यं विविभक्तित्वात् इ
तरादिभ्य इति पंचम्यांगं विशेषयितुं तत्र किमन्यच्छक्यं विशेषयितुमन्यदतो विहितात् प्रत्ययात् इतरादिभ्यो यो विहित इति इहेदानीमस्थिद
धिसक्थ्यक्ष्णामनङ् उदात्त इति सदादीनामो भवतीति अस्थ्यादीनामित्येषा षष्ठी अंगस्येत्यपि सदादीनामित्यपि षष्ठी अंगस्येत्यपि त
त्रकामचारः गत्यमाणेन वा विभक्तिं विशेषयितुं अंगेन वा यावता कामचारः इह तावदस्थिदधिसक्थ्यक्ष्णामनङ् उदात्त इत्यंगेन विभक्तिं विशे

ष्येति सक्थिशब्दः शकटावयववचनोत्रेति बहुव्रीहौ सक्थ्यक्ष्णोरिति समासांतो न कृतः प्रकृतविभक्ताविति अंगार्थे संबंधिन्यां विभक्ताविसर्थः तच्चा
पीति गत्यमाणविभक्तौ रिति सप्तमीनिर्दिष्टे य उच्यत इति च इतरादिभ्यो यो विहित इति अर्थद्वारकं विधानमाश्रयितव्यं तेन परमकतरदित्यत्रापि भवति युष्म
दस्मद्भ्यां ङ॰ सोपि सत्रत्वं प्रकरणोंगेन विभक्तिर्विशेष्यते अर्थद्वारेणां युष्मदस्मद्भ्यांतु परत्वमात्रेणेसापि युष्मद्रिसादावपि कार्यं भवति ॥ ॥ एम॰ ९४

अपतिसदृतिशोभनः सदृतिप्रादिसमासः नञ्समासेप्यसः अपटु अकतरदितिभवति सर्वेषांयानीति स्वविषयापेक्षयासर्वनामत्वंबोद्धव्यंयथागोत्वादेः स्वविषयापेक्षं सर्वगतत्वंनत्वेतानिसर्वादीनिपरस्परपर्यायतांयांतिभिन्नार्थत्वात् एतेषांचापीतिततश्च सर्वस्मिन्नोदनइत्योदनशब्दस्यापिसर्वनामकार्यंप्राप्नोति सामानाधिकरण्यात् नयोः ननुप्रतिनियतवस्तुभागाभिनिवेशित्वाच्छब्दानांसर्वत्वमोदनशब्देननाभिहितंओदनत्वमपि सर्वशब्देनेतिकुतोऽयंप्रसंगः तत्रेदंदर्शनं सर्वशब्दोपिओ

अस्वह्याद्दिमिरनडः अंगस्यविभक्तावनङ्भवति॥ अस्वह्यादीनामिति इहेदानीं [redacted] सदादीनामोभवतीतिगृह्यमाणेनविभक्तिंविशेषयिष्यामः अंगेनाकारंसदादीनांविभक्तावोभवति अंगस्येतियद्येवमतिसः अत्वंनप्राप्नोति नैषदोषः सदादिप्रधानएषसमासः अथवानेदंसंज्ञाकरणंपाठ विशेषणमिदंसर्वेषांयानिनामानितानिसर्वादीनि संज्ञोपसर्जनेविशेषेऽवतिष्ठेतेयद्येवंसंज्ञाप्रयययत्वात्येतत्रापि प्राप्नोति सर्वनाम्नः स्मै इत्यापि सर्वनाम्नः स्मुदितित्यन्वर्थग्रहणंतत्रविज्ञायते सर्वेषांयन्नामतत्सर्वनामसर्वनाम्नउत्तरस्यङेःस्मैभवति सर्वनाम्नउत्तरस्यामःसुडुभवति यद्येवं सकलंकृत्स्नंजगदित्यत्रापिप्राप्नोति एतेषांचापिशब्दानामेकैकस्यस्वविषयःतस्मिन्तस्मिन्विषयेयोयःशब्दोवर्ततेतस्यतस्मिंस्तस्मिन्निर्गमा पर्यवः नस्यसर्वनामकार्यंप्राप्नोति एवंतर्ह्युभयमनेनक्रियतेपाठश्चैवविशेष्यते संज्ञाच कथंपुनरेकेनयत्नेनोभयंलभ्यं लभ्यमित्याह॥ ०॥

दनार्थोवग्रहेणपरत्वओदनशब्दोपिसर्वार्थोवग्रहेण प्रतिपत्तानुकेवलात्सर्वशब्दाद्विशेषंनप्रतिपद्यतेरूपसादृश्यात् नाप्योदनशब्दादिति तत्रनिपसर्थेमुभयोरूपादाने तत्रैकस्यसर्वनामकार्यंभवति नापरस्येतिप्रमाणाभावादतिप्रसंगउद्भावितः॥ ॥ ॥

एकशेषनिर्देश इति। सहविवक्षाया अभावात्कथमेकशेषः। एकशेषफलत्वात्तत्र न्याय्यमावृत्तिर्वैकशेषशब्देनोच्यते। अथवा आह्लसंनिधानपक्षे एकशे-
षप्रयोगे सिद्धे प्रत्याख्यातमेकशेषशास्त्रं संज्ञापरिभाषावच्छास्त्रप्रक्रियासंपादनार्थं भवतीति सहविवक्षामन्तरेणापि भवत्येकशेषः। संज्ञोपसर्जने चेति। यदा स-
र्वशब्दः संज्ञात्वेन विनियुज्यते तदा प्रसिद्धप्रवृत्तिनिमित्तपरित्यागेन स्वरूपमात्रोपकारी भवत्येतदिति विशेष एवावतिष्ठते उपसर्जनमपि जहत्स्वार्थं उपज

एकशेषनिर्देशात्॥ एकशेषनिर्देशोयं सर्वादीनि च सर्वादीनि। सर्वनामानि च सर्वनामानि सर्वादीनि सर्वनामसंज्ञानि भवन्ति सर्वेषां
यानि च नामानि तानि सर्वादीनि संज्ञोपसर्जने च विशेषेऽवतिष्ठेते अथ वा महती संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः कुत एतत् ल
घ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनं अन्वर्थसंज्ञा यथा विज्ञायेत सर्वादीनि सर्वनामसंज्ञानि भवन्ति सर्वेषां नामा
नीति चातः सर्वनामानि संज्ञोपसर्जने च विशेषे वतिष्ठेते अथो भयस्य सर्वनामत्वे कोऽर्थः उभयस्य सर्वनामत्वेऽकजर्थः उभयस्य सर्वना
मत्वेऽकजर्थः पाठः क्रियते उभकौ किमुच्यतेऽकजर्थ इति न पुनरन्यान्यपि सर्वनामकार्याणि॥ ॥

ह्यति क्रान्तार्थे विशेषणतामापन्नमिति क्रान्तार्थे वर्तते भवसतिसर्वोयेसत्र वाकेत्वसंसृष्टार्थत्वात्स्वार्थमात्रं प्रतिपादयतो न विशेषे वस्थानं यतो न लघीय
इति शाब्दस्य व्यवहारे लघुः ततोपि लघीयो नाम तत्र गुरुसंज्ञाकरणात्सर्वादीनां विशिष्टो धर्मोऽनुमीयते नूनमेतानि संज्ञाप्रवृत्तिनिमित्तेन सर्वनामत्वे
न युक्तानि यतस्तदनुरूपा तेषां संज्ञा कृतेति सर्वनामकार्यमन्तरेण कार्यं च सर्वनामत्वयुक्तानामेव भवतीति न संज्ञोपसर्जनानां॥ ॥

अन्याभावइति॥ टाब्विषयत्वमपि न द्विवचनादन्यत्रबोद्धव्यं तत्रोभादुदात्तो नित्यमिति सत्र नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषय उभशब्दस्य प्रयोगो माभू [redacted]
उभयशब्दस्यैव यथा स्यादिति उभयपुत्र इत्यादि भवति द्विदंष्ट्रादिप्रयोगेऽस्य तु निपातनात् उभाबाह्वित्यादयः साधवः कथमिदानीमिति रूपे स्व
रे च नास्ति विशेषः अवग्रहे च नास्मादृशेन हि लक्षणे न पदकाराः अनुवर्त्याः उभकाभ्यां हेतुभ्यां उभकयोर्हेत्वोरिति षष्ठी तृतीये सिद्धे निमित्तकारणहेतुषु

अन्याभावो द्विवचनटाब्विषयत्वात् अन्येषां सर्वनामकार्याणामभावः किं कारणं द्विवचनटाप्विषयत्वात् उभशब्दोऽयं द्विवचनटाब्विष
यः। अन्यानि च सर्वनामकार्याणि एकवचनबहुवचनेषूच्यन्ते। यदा पुनरुभशब्दो द्विवचनटाब्विषयः कथमिदानीमस्यान्यत्र भवति। उभयोर
न्यत्र उभयशब्दोऽस्यान्यत्र भवति उभये देवमनुष्याः उभयो मणिरिति किं च स्यात् यद्यत्राकच् न स्यात् कः प्रसज्येत कथमिदानीं काकचोर्विशे
षः उभशब्दोऽयं द्विवचनटाब्विषय इत्युक्तं तत्राकचि सत्यकच् तन्मध्यपतितत्वात् [illegible] एतदुक्तं द्विवचनपरोऽयमिति के पुनः सति नायं द्विवचन
परः स्यात् तत्र द्विवचनपरतावक्तव्या यथैवं तर्हि के सति नायं द्विवचनपरः एवमप्यपि सति नायं द्विवचनपरः स्यात् तत्रापि द्विवचनपरता
१९ वक्तव्या अवचनाद्वापि तत्सर्वं विज्ञानं॥ ॥ ॥

सर्वासां प्रायदर्शनामिति वचनात् उभशब्दोऽयमिति द्विवचने अनन्तरे श्रूयमाणे उभशब्देन साधुनाभाव्यं न लुप्ते न व्यवहिते के पुनः सतीति पूर्वस्य द्वि
वचनस्य लुप्तत्वात् परस्य के न व्यवधानात् तत्र कविषये व्यवहितद्विवचनविषय उभशब्दः साधुर्भवतीति वक्तव्यं। यथैवं तर्हीति ननु द्विवचनटाब्विषयत्वा
दित्यत्रटापउपात्तत्वाच्चोद्यानुपपत्तिः एवं तर्हि टाब्विषयत्वमेकवचनबहुवचनयोर्माभूदित्येवमर्थमपि द्विवचनपरतावक्तव्येत्युक्तं [redacted] ॥

अवचनादिति॥ स्वार्थिकत्वादापउभार्थस्याहानादापि सिद्धं द्विवचनपरत्वे स्यर्थः। केपितुल्यमिति॥ द्विवचनविषयत्वादित्यत्र द्विवचनशब्देन प्रत्ययो न गृह्यते किं तर्हि द्य
र्थाभिधानसमर्थ इत्यर्थः। उभयत उभयत्रे तित्रतसो द्व्ययत्वाद् द्वित्वाभिधानसामर्थ्यं नास्तीत्यभेदविषय उभयशब्द एव प्रयुज्यते न तूभशब्दः। एवं प्रत्याख्यातोः
कजर्थ उभशब्दस्य पाठः। सर्वनाम्नस्तृतीया चेति षष्ठी तृतीयार्थं पाठ इति केचित्। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वचनात्तद्योर्ऽपि पाठो न कर्त्त
व्य इत्यन्ये। अथ भवत इति। अनकारान्तत्वात् स्मायाद्यभावात्प्रश्नः। शेष इति॥ पाठे सति त्यदादित्वाच्छेषो भवति ततो त्यादयोपीति निमित्तकारणहेतुषु सर्वा

द्विवचनरू

अंतरेणापि वचनमापि द्विवचनपरोयं भविष्यति किं वक्तव्यमेतत् नहि कंचिन्नमनुच्यमानं गंस्यते एकादेशे कृते द्विवचनपरोयमंतादिवद्भा
वेन अवचनादापि न त्सरविज्ञानमिति चेत्केपि तुल्यं अवचनादापि न त्सरविज्ञानमिति चेत्केपि अंतरेण वचनं परो भविष्यति कथं स्वार्थिकाः
प्रत्ययाः प्रकृतितोऽविशिष्टा भवंतीति प्रकृतिग्रहणेन स्वार्थिकानामपि ग्रहणं भवति अथ भवतः सर्वनामत्वे कानि प्रयोजनानि भवतो
कच्छेषात्वानि भवतः अकच्छेषात्वानि प्रयोजनानि अकच् भवकान् शेषः सच भवंतौ आत्वं भवादृगिति किं पुनरिदं परिगणनं आहो
स्विदुदाहरणमात्रं उदाहरणमात्रमित्याह तृतीयादयोऽपि हीष्यंते सर्वनाम्नस्तृतीया च भवता हेतुना भवतो हेतोरिति विभाषा दिक्समा
से बहुव्रीहौ दिग्ग्रहणं किमर्थं न बहुव्रीहाविति प्रतिषेधं वक्ष्यति तत्र न ज्ञायते क्व विभाषा क्व प्रतिषेध इति दिग्ग्रहणे पुनः क्रियमाणे न दोषो

सांप्रायदर्शनमित्यनपेक्ष्यैतदुक्तं इदं तु प्रयोजनं भावत्का यनिः भवद्यड्. भवन्मयः पूर्वनिपातश्च भवन्नित्रः भवत एकच्छमावितिवद्भूत्वाद् बहुकच्छसो गुणवचनसंज्ञा
बाधनं च भवतो भावो भावत्कमिति मा भूत् विभाषा दिग्ग्रहणमिति एकस्मिन्विषये विकल्पप्रतिषेधयोरसंभवात्सामर्थ्याद्विषयभेद आश्रयितव्य इति प्रश्नः वचन
((मंतरेणाभिमतो विषयभेदो न लभ्यत इत्युत्तरं॥ ॥ ॥

समास एवेति । मुख्य इत्यर्थः । अन्यस्मिन् तत्कार्ये लाभायतद्यपदेशं लभत इत्यमुख्यः दक्षिणोत्तरपूर्वाणामिति द्वंद्वे चेत्यनेन न सर्वाद्यंतस्य द्वंद्वस्य सर्वनाम्नोऽवय
वानामिति सर्वनाम्नो वृत्तिमात्र इति पुंवद्भावः येनानाप्राप्त इति अयमर्थः नबहुव्रीहाविति अनेन सर्वः स्वविषयो व्याप्तः द्वंद्वे चेत्यनेन तु न व्याप्तो विभाषा
मतप्रतिषेधो ना२

समास एव यो बहुव्रीहिस्तत्र यथा स्यात् ॥ बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र माभूदिति दक्षिणादक्षिणस्मै देहीति अथ बहुव्रीहिग्रहणं किम
र्थं द्वंद्वे माभूत् दक्षिणोत्तरपूर्वाणामिति नैतदस्ति प्रयोजनं द्वंद्वे चेति प्रतिषेधो भविष्यति नाप्राप्ते प्रतिषेध इयं विभाषा आरभ्यते सा यथैव नब
हुव्रीहाविति एतं प्रतिषेधं बाधते एवं द्वंद्वे चेत्येतमपि बाधेत नवा बाधते किं कारणं येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते नबहुव्रीहाविति एत
स्मिन् प्रतिषेधे इयं विभाषा आरभ्यते द्वंद्वे चेत्येतस्मिन् पुनः प्राप्ते चाप्राप्ते च अथवा पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तरान् इत्येवमि
यं विभाषा नबहुव्रीहाविति एतं प्रतिषेधं बाधिष्यते द्वंद्वे चेत्येतं प्रतिषेधं न बाधिष्यते अपवाद इदं तावदयं प्रष्टव्यः इह कस्मान्न भवति या पूर्वा सोत्तरा
अस्योन्मुग्धस्य सोयं पूर्वोत्तर उन्मुग्धः तस्मै पूर्वोत्तराय देहीति । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति यद्येवं नार्थो बहुव्रीहिग्रहणेन
द्वंद्वे कस्मान्न भवति लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति उत्तरार्थं तर्हि बहुव्रीहिग्रहणं कर्तव्यं न कर्तव्यं क्रियते तत्रैव न बहुव्रीहावि
ति द्वितीयं कर्तव्यं बहुव्रीहिरेव यो बहुव्रीहिः तत्र यथा स्यात् बहुव्रीहिवद्भावेन यो बहुव्रीहिः तत्र मा भूत् एकैकस्मै देहि एतदपि नास्ति प्रयोजनं

जसीति जसि विकल्पविधानात् । यदि चानेन द्वंद्वे विभाषा स्यात् जस्यनुवाददोषः प्रसज्येत बहुव्रीहौ तु अनुवाददोषमलभमाना कृतार्थासती परत्वादियं विभाषा
द्वंद्वे चेत्यनेन बाध्यते लक्षणप्रतिपदोक्तयोरिति दिक्समास इत्यपदेशो दिङ्नामानीति विहितस्य न्याय्यः तत्र हि दिक्शब्दोऽस्ति ॥ ॥ ॥

वस्वंतरेति॥ उपसर्जनप्रतिषेधो वार्त्तिककारस्य न सूत्रकारस्य न बहुव्रीहाविति सारं भादिति तन्मतेनेदं प्रयोजनमुक्तं। न बहुव्रीहौ प्रियविश्वायेति। प्रियश्च ह्रस्व
विश्वश्च विशेषणत्वात् पूर्वनिपातं मन्यते ह्यन्यायेति संख्यायाः संख्येयपरतंत्रत्वाद्विशेषणत्वं सर्वनाम्न एवेति। नियमः कथमिति चेदुच्यते। विशेषणत्वात्संख्या

वर्त्तते तेन बहुव्रीहिं विशेषयिष्यामः समासो यो बहुव्रीहिरिति। इदं तर्हि प्रयोजनं अवयवभूतस्यापि बहुव्रीहेः प्रतिषेधो यथा स्यात्। इह मा
भूत् वस्वंतरमेषां त इमे वस्वंतराः वसनमंतरमेषां त इमे वसनांतराः वस्वंतराश्च वसनांतराश्च वस्वंतरवसनांतराः॥ न बहुव्रीहौ किमुदाहरणं प्रि
यविश्वाय नैतदस्ति प्रयोजनं सर्वाद्यंतस्य बहुव्रीहेः प्रतिषेधेन भवितव्यं वक्ष्यति चैतत् बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानमिति त
त्र विश्वप्रियायेति भवितव्यं इह तर्हि ह्यन्याय। त्र्यन्याय। ननु चात्रापि सर्वनाम्न एव पूर्वनिपातेन भवितव्यं। नैष दोषः वक्ष्यसे तत् संख्यायाः स
र्वनाम्नो यो बहुव्रीहिः परत्वात्तत्र संख्यायाः पूर्वनिपातो भवतीति इदं चाप्युदाहरणं प्रियविश्वाय ननु चोक्तं विश्वप्रियायेति भवितव्यमिति
वक्ष्यसे तद्धा प्रियस्येति। न खल्वप्यवयवस्य सर्वाद्यंतस्यैव बहुव्रीहेः प्रतिषेधेन भवितव्यं किं तर्हि असर्वाद्यंतस्यापि भवितव्यं। किं प्रयोजनं अक
स्माभूदिति किंच स्यात् यद्यत्राकच् स्यात् को न स्यात् कश्चेदानीं काकचोर्विशेषः अहकं पिता अस्य मकपितृकः त्वकं पिता अस्य त्वकपितृक इति
प्राप्नोति। मत्कपितृकः त्वत्कपितृक इति च × व्यंजनांते तु विशेषः। ×२ ष्यते॥ ॥

याः पूर्वनिपाते प्राप्ते एवमर्थमुपसंख्यानं स्यात् सर्वनामसंख्ययोः संनिपाते सर्वनाम्न एव पूर्वनिपातः स्यादिति वक्ष्यसे तदिति नैष वाक्यार्थो यत्त्वया कल्पित इत्यर्थः॥ प्र०म०
व्यंजनांतेष्विति उपलक्षणमेतत् द्विकपुत्रो द्विकपुत्र इत्यत्रापि विशेषदर्शनात्॥ ॥ श्री॥ ॥ ९७

कथं पुनरिति॥ अन्तरङ्गत्वात्संज्ञानिमित्तेनाकचा तावद्भाव्यं पश्चात्सदान्तरसन्नि[धा]नेऽधाने वृत्तिपदार्थे विशेषणान्यपदार्थे विवक्षायां बहिरङ्गेण बहुव्रीहिणो
ऽर्थः॥ अन्तरङ्गानपीति 'प्रत्ययोत्तरपदयोश्चेति सामान्येन ज्ञापकं बहिरङ्गोऽपि समासाश्रयो विधिरन्तरङ्गं बाधत इत्यस्यार्थस्येति भावः 'क्रियते तत्रेति' लुग्विष
यमेव तत्तज्ज्ञापकमित्यर्थः। अस्त्यन्यदिति' अत्र हि विधिप्रतिषेधौ समानकालौ कार्यकालत्वात्संज्ञाया इति मन्यते अयं खल्वपीति सञ्ज्ञोयाकृद

कथं पुनरिच्छतापि भवता बहिरङ्गेण प्रतिषेधेनान्तरङ्गो विधिः शक्यो बाधितुं अन्तरङ्गानपि विधीन्बहिरङ्गो विधिर्बाधते गोमत्प्रियः इति यथा
क्रियते तत्र यत्नः प्रत्ययोत्तरपदयोश्चेति ननु चेहापि क्रियते न बहुव्रीहाविति अस्त्यन्यदेतस्य वचने प्रयोजनं किं प्रियविश्वाय उपसर्जे
न प्रतिषेधेनाप्येतत्सिद्धं अयं खल्वपि बहुव्रीहिरस्त्येव प्राथमकल्पिकः यस्मिन्नैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च अस्ति ताद्धर्म्योत्ता
च्छब्द्यं बहुव्रीह्यर्थानि पदानि बहुव्रीहिरिति तद्यस्तादर्थ्यात्ताच्छब्द्यं तस्येदं ग्रहणं 'गोनर्दीय आह' अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंश
यौ त्वकत्पितृकः इत्येवं भवितव्यमिति प्रतिषेधे भूतपूर्वस्योपसंख्यानं कर्तव्यं आढ्यो भूतपूर्वः आढ्यपूर्वाय देहीति प्रतिषेधे भूतपूर्वस्योप
संख्यानानर्थक्यं पूर्वादीनां व्यवस्थायामिति वचनात् प्रतिषेधे भूतपूर्वस्योपसंख्यानमनर्थकं किं कारणं पूर्वादीनां व्यवस्थायामिति वचनात् पू
×कोमकल्पित×२ ॥ र्वादीनां व्यवस्थायां सर्वनामसंज्ञोच्यते न चात्र व्यवस्था गम्यते॥ ॥

एवायमर्थ इति प्रतिपादयति 'अप्रयोगसमवायि यत्प्रक्रियावाक्यं तत्रायं प्रतिषेधो न लौकिके वाक्ये प्रयोगार्हे तस्य पृथगेव प्रयोगात्ताद्रूप्याभावात् 'गोनर्दीय आहेति'
सूत्रप्रत्याख्यानमेतत् यथोत्तरं हि मुनित्रयस्य प्रामाण्यं। स्वरः स्वाङ्गशिटामदन्तानामित्याद्युदात्तत्वं 'आढ्यपूर्वायेति' अबहुव्रीह्यर्थवचनं 'न चात्रेति' प्राधान्येने
ति भावः। अत्र हि पूर्वत्वमाढ्यत्वस्य विशेषणं यथा 'तिपूर्वायेतिपूर्वाय्यौ' तिक्रान्तस्येत्युपसर्जनत्वात्सर्वादेरस्य न भवति संज्ञा मयूरव्यंसकादित्वात्समासः॥ ॥

भा०कै०प्र० तृतीयासमासे॥ अत्र तादर्थ्योनाद्यव्यत्तामेस इति प्रयोगाहेस्तत्त्वौ किकस्य वाक्यस्य ग्रहणे मत इति मासेन पूर्वायेति प्रयोगः साधुः वाक्यभेदेन च मुख्ये समासे
९८ निषेधः अथवेति पर्युदासाश्रयणात् समास(स)स्य वाक्यस्य ग्रहणं पूर्वसदृशेति प्रतिपदोक्तस्तृतीयासमासो गृह्यते विभाषा जसः कार्यं प्रतीति जस इ
९४ जसी इति निर्देशादिकारेण ईकारस्य ग्रहणादिसाधुः॥ अन्ये तु कार्यकालत्वात्संज्ञाया जसः शी सन्नैवास्योपस्थानं मन्यन्ते 'पूर्वपरावर' अवरादीनां चेति'

तृतीयासमासे॥ समास इति वर्त्तमाने पुनः समासग्रहणं किमर्थं। अयं तृतीयासमासः अस्येव प्राथमकल्पिकः यस्मिन्नेकपद्यमैकस्वर्यमे
कविभक्तिकत्वं चेति अस्ति तादर्थ्याज्ज्ञातबुद्ध्यां तृतीयासमासार्थो नि(पदानि)तृतीयासमास इति तद्यन्तादर्थ्याज्ज्ञातबुद्ध्यां तस्येदं ग्रहणं। अथवा समास
इति वर्त्तमाने पुनः समासग्रहणस्यैतत्प्रयोजनं योगांगं यथोपजायेत सति च योगांगे योगविभागः करिष्यते तृतीयासमासे सर्वादीनि स
र्वनामसंज्ञानि भवन्तीति मासपूर्वायदेहि ततो समासे। अ समासे तृतीयायाः सर्वादीनि सर्वनामसंज्ञानि न भवन्ति मासेन पूर्वायदेहि वि
भाषा जसि जसः कार्यं प्रति विभाषा अकज् न भवति पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायां अवरादीनां च पुनः सूत्रपाठे ग्रहणम
नर्थकम् गणोपठितत्वात् अवरादीनां च पुनः सूत्रपाठे ग्रहणमनर्थकं किं कारणं गणे पठितत्वात् गणोक्तेनानि पठ्यन्ते॥ ॥

किमर्थं प्रतिपदं पूर्वादीनि जसि विभाषार्थं पठितानि यावता गणे एवार्थविशेषेण विशिष्टानि निसंसर्व नामसंज्ञार्थं पठ्यन्ते तत्र पूर्वादीनि न वेसे
वं सूत्रे पठितत्वं प्राप्तविभाषा चेयं भविष्यति तेषामेवात्र प्रत्यभिज्ञाऽर्थगुणे एवार्थनिर्देशः पाठविशेषणं भविष्यति यथा तिष्ठगोप्रादीनी सत्र कुत्सना एम०
भीक्ष्णप्रग्रहणं पाठविशेषणमिति वार्त्तिककाराभिप्रायः। अवरादीनामिसत्र प्रकारार्थो ज्ञादिशब्दः तेन पूर्वपरशब्दावपि गृह्येते॥ ॥ ९८

ना

कथं पुनरिति पूर्वं गणपाठे नियतसंनिवेशोऽव्यवस्थितः पश्चात्तु सूत्रपाठ इत्यत्र प्रमाणाभावात्। आदिशब्दः प्रकारवाची दृष्टोऽव[redacted]वस्थावाचीच तत्र सर्वादीनीत्यत्र आ
दिशब्दस्य प्रकारार्थतापि संभवति प्रकारार्थप्रदर्शनाय पश्चादभियुक्ता गणान्पठन्ति यदुक्तं श्वेतप्रादयः पठ्यन्ते कृतादिराकृतिगणः [redacted] इति कृतादय आवृत्तिकारै
र्निर्दिष्टोऽनार्षे पठिताः तत्र वेदे मध्यम स्याम अवमस्यामिति प्रयोगदर्शनात् प्रकारार्थतादिशब्दस्य सर्वादीनीत्यत्र संभाव्यत इति प्रश्नः। तानि हि सर्वादीनीति। पूर्वकालप
ठितत्वात् पूर्वशब्देन सर्वशब्दोऽभिधीयते तेनायमर्थः॥ सर्वादीनीत्यत्र व्यवस्थावाच्यादिशब्दः प्रकारवाचित्वे हि कृत्वादीनामपि संज्ञा स्यात् मध्यम स्याम अवम

कथं पुनर्ज्ञायते। सपूर्वः पाठः अयं पुनः पाठ इति तानि हि सर्वादीनि इमान्यपराणि इमान्यपि सर्वादीनि एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति सपूर्वः
पाठः अयं पुनः पाठ इति यदयं पूर्वादिभ्यो नवभ्यो वेति नवग्रहणं करोति नवैव हि सर्वादीनि इदं तर्हि प्रयोजनं व्यवस्थायामसंज्ञायामिति वक्ष्यामी
ति एतदपि नास्ति प्रयोजनं एवं विशिष्टान्येवैतानि गणे पठ्यन्ते इदं तर्हि प्रयोजनं द्व्यादिपर्युदासेन पर्युदासो मा भूदिति। एतदपि नास्ति प्रयोजनं आ
चार्यप्रवृत्तिर्ज्ञापयति नैषां द्व्यादिपर्युदासो भवतीति यदयं पूर्वत्रासिद्धमिति निपातनं करोति॥ ॥ ॥

नोच्यते। ते
स्यामिति तु यत्नसाध्येन छन्दसः प्रयोगः इमान्यपराणीनीति अपरकालपाठात् पूर्वशब्दोऽपरशब्देन पूर्वं गणपाठः पश्चात्सूत्रपाठ इत्यर्थः हेत्वभिधानमन्तरेण शक्योऽयमर्थः प्रति
पत्तुमित्याह इमान्यपीति नवग्रहणमिति [redacted] तत्र नवग्रहणं स्वदादिनिरासार्थं क्रियते यदि च नियतसन्निवेशो गणपाठः पूर्वं ततोऽधिकस्य व्यवच्छेदाय नवग्रहणं कर्त
व्यं इदं तर्हीति प्रतिनियतविशेषणाभिधानाय प्रतिपदपाठ इत्यर्थः एवं विशिष्टान्येवेति पाठविशेषणावगतोऽर्थो निर्दिष्ट इत्यर्थः। द्व्यादिपर्युदासेनेति त्यदादीनि पठित्वा गणे
केचित्सर्वादीनि पठितानि तत्र द्व्यादिभ्य इति तसिलादीनां प्रतिषेधः प्राप्नोति तत्र पुनः सर्वनामसंज्ञया तसिलादिर्विधीयते तेन द्व्यादिपर्युदासो वाध्यते यथा अनुलक्षण इति पुनर्वि
धानेन हेतुतृतीया बाध्यते वाक्यभेदेन च विभाषा जसि विधीयते यथा विपूर्वः संप्रसारणं सच वाक्यभेदेन वा छन्दसीति संबध्यते छन्दसि विकल्पः क्रियत इति भावः॥ ॥

भा०कै०प्र० इदं तर्हीति॥ यदि पूर्वादीनि नव सूत्रे तत्र तद्गणपाठे ऽर्थनिर्देशात्स्य नित्यसंज्ञाविधानस्योपयुक्तत्वात्पाठविशेषणे प्रमाणाभावात् प्राप्तविभाषेयमर्थात
९९ रे पूर्वादीनां जसि विज्ञायेत प्राप्तविभाषाया मुक्तानुवाददोषप्रसंगात् प्राप्तविभाषायामपूर्वविधानात्। विभाषामिति प्राप्तविभाषामित्यर्थः प्रतिपदपा
११ ठं चान्तरेण संकरेणार्थनिर्देशो ऽशक्यः कर्तुमिति भाष्यकारेण प्रतिपदपाठः समर्थितः स्वमज्ञातिध आत्मात्मीयज्ञातिधनवचनः स्वशब्दः आ
मि निजविषयत्वे प्रत्ययेवाची आख्याग्रहणमिति स्वे पुत्राः स्वे गाव इत्यत्र स्वशब्द आत्मीयत्वमेवाह पुत्रादिशब्दास्तु ज्ञातिधनयोर्वर्तन्ते न स्वशब्द इति
प्रतिषेधो न भविष्यतीति प्रश्नः। तस्य यथा स्यादिति प्रतिषेध इति शेषः इह मा भूदिति। आत्मसाख्याग्रहणे स्वे पुत्रा इत्यादौ स्यादेव प्रतिषेधः अप्राप्या

वार्त्तिककारस्तु पठति जशः भावादिति चेदुत्तरत्रा पवादप्रसंगा इति इदं तर्हि प्रयोजनं सिजे विभाषां वक्ष्यामीति स्वमज्ञातिधनाख्यायां आ
ख्याग्रहणं किमर्थं। ज्ञातिधनपर्यायवाचीयः स्वशब्दः तस्य यथा स्यादिह माभूत् स्वे पुत्राः स्वाः पुत्राः स्वे गावः स्वा गावः अन्तरं बहिर्योगोपसं
ख्यानयोः उपसंख्यानग्रहणमनर्थकं बहिर्योगेन कृतत्वात् उपसंख्यानग्रहणमनर्थकं किं कारणं बहिर्योगेन कृतत्वात् बहिर्योग इत्येव सिद्धं॥
न वा शाटकयुगाद्यर्थं न वा अनर्थकं किं कारणं शाटकयुगाद्यर्थं शाटकयुगाद्यर्थं तर्हि वक्तव्यं॥ ॥ ॥

त्मीयत्वं प्रवृत्तिनिमित्तमुपादाय स्वशब्दो ज्ञातिधनयोर्वर्तते पुत्रादिभिः सामानाधिकरण्यादाख्याग्रहणेनतु सति न दोषः स्वशब्दो ऽत्रात्मीयस्याख्या न तु
ज्ञातिधनयोरिति विधिः सिद्धः अन्तरं बहिरित्स्य नावतो देशाउच्यते। तेन योगो बहिर्योगः स च बाह्यस्य भवतीति अन्तरे गृहा इति नगरबाह्या चण्डालादि गृहा उ एम०
च्यन्ते यदा तु बहिः शब्देन बाह्य उच्यते बाह्येन योगो बहिर्योग इति तदा नगराभ्यन्तरे ये गृहास्त उच्यन्ते उभयथापि स्पष्टेनेउपसं आनशब्दो ऽपि कर्मकरणार्थ ९९
भेदमिन्नार्थः ततः सर्वथा बहिर्योगात्सिद्धिं पश्यताह उपसंख्यानेति न वेति समानप्रमाणे शाटकयुगे ऽपरिहिते तत्रेदं न ज्ञायते किमुत्तरीयं किमन्तरीयमेतदित्यर्थः॥

अत्रापीतितायथोपसंख्यानत्वं माविज्ञायावस्थाप्यते तथा बहिर्योगेपीसर्थेः। अन्येत्वाहुः आदिशब्दोयमार्णिकेश्राटकयुगाद्यर्थमितस्तोपात्तः तत्रशा
टकानांतत्रयेचतुष्टयेवातृतीयचतुर्थयोर्बहिर्योगाभावात् उपसंख्यानग्रहणंकर्त्तव्यं। अपुरीति। गणसूत्रमेतल्लक्षणेभ्यं लिंगविशिष्टपरिभाषयायह
णप्रसंगात् इहत्वनेननार्थः अतइतिजसः शीविधानात् दृष्टांतत्वाप्रभावात्। पूः कस्मिंश्चिद्देशेप्राकाराभ्यंतरेक्वचित्प्राकाराद्बहिरितिअस्ति
पुरोबहिर्योगः। स्वरादिनिपा। किमर्थमिति स्वरादिषुकिंचित्क्रियाप्रधानंकिंचित्साधनप्रधानमिति असत्ववचनत्वाच्चादिष्वेवस्वरा

यत्रैतत्त्रज्ञायते किमंतरीयं किमुत्तरीयमिति अत्रापियएषमनुष्यः प्रेक्षापूर्वकारीभवति निर्ज्ञातंतस्यभवति इदमंतरीयमिदमुत्तरीय
मिति अपुरीतिवक्तव्यं इहमाभूत् अंतरायांपुरिवसतिवाप्रकरणेतीयस्यङि. त्सूपसंख्यानं केचनेयं। द्वितीयायैद्वितीयस्मै तृतीयायैतृ
तीयस्मै विभाषाद्वितीयातृतीयाभ्यामित्येतन्नवक्तव्यं भवति किंपुनरत्रज्यायः उपसंख्यानमेवात्रज्यायः इदमपिसिद्धं भवति द्वितीया
यद्वितीयस्मै तृतीयायतृतीयस्मै। स्वरादिनिपातमव्ययं। किमर्थएषग्रहणंस्वरादीनां क्रियतेनचादिष्वेवपठ्येरन् चादीनांवैअसत्वव
चनानां निपातसंज्ञास्वरादीनांपुनः सत्ववचनानामसत्ववचनानांच अथकिमर्थमुभेसंज्ञे क्रियेते ननिपातसंज्ञैवस्यात् नैवंशक्यं नि
पातएकाजनाङितिप्रगृह्यसंज्ञोक्तास्वरादीनामप्येकाचांमाभूदेत एवंतर्ह्यव्ययसंज्ञैवस्यात्॥ ॥ ॥

दीनिपठितव्यानीतिमत्वाप्रश्नः। स्वरादीनांपुनरिति स्वस्तिवाचयतिस्वः पश्यतिक्रियासंबंधेअनेकशक्तिदर्शनात्सत्ववाचित्वनिश्चयः लोहितगंगं
इत्यादीनांचाव्ययानां सत्वधर्मेनपुंसकत्वदर्शनाद्व्यक्तमेवसत्ववाचित्वं ननिपातसंज्ञैवेति प्राग्रीश्वरान्निपाताः स्वरादीनि चादयोसत्वे इतिसूत्रन्यासः
कार्यइत्यर्थः स्वरादीनामिति। किमोदिसत्त्वस्य योर्दक्षिणादाजिसाचकेन्यतमन्तयस्मलतएकाचः संतीतिभावः॥ ॥ ॥

भा० कै० प्र० १०० 100

तच्चाशक्यमिति॥ अपर्य्युसंज्ञायामेव सत्यामव्ययमेकाजनाङिति सत्त्वं कर्तव्यं ततश्चासमती नामपि प्रगृह्यसंज्ञाप्रसंगः प्राप्नोति अथ चादयः एकाजनाङिति क्रियते तदा चादीनामसत्त्ववचनत्वं विशेषणमलभ्यं। तद्धितश्च इह संज्ञाविधौ प्रसज्यग्रहणे तदंतविधिप्रतिषेधात्यद्यपि केवलस्य प्रत्ययस्य ग्रहणं तथापि प्रयोजनं सर्वनामाव्ययसंज्ञा प्राप्नोति वाचनिकस्तदंतविधिरस्तीति तदंतस्याव्ययसंज्ञा क्रियते तत्र वृत्तिकारेण व्याख्यातं असर्वविभक्तिर्यस्य सोऽसर्वविभक्तिरिति तत्र यदायमर्थः यस्य तद्धितस्यासर्वा विभक्तिः कार्या यस्मान्न सर्वा विभक्तिरुत्पद्यते तद्

तच्चाशक्यं वक्ष्यसे तत् अव्ययेनन्कु निपातानामिति तद्वरीयसा न्यासेन परिगणनं कर्त्तव्यं स्यात् तस्मा
त्पृथग्ग्रहणं कर्त्तव्यं। उभे च संज्ञे कर्त्तव्ये तद्धितश्चासर्वविभक्तिः असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्या
नम् असर्वविभक्तावविभक्तिनिमित्तस्योपसंख्यानं कर्त्तव्यं नानाविना किं पुनः कारणं न सिध्यति॥ ॥

सर्थस्तदा न दोषः यदा तु यस्य तद्धितस्योत्पन्नो निमित्तत्वेनासर्वा विभक्तिराश्रिता सोऽसर्वविभक्तिराश्रिते साहा॥ असर्वविभक्ताविति अन्ति व्याप्तिश्चा
स्मिन्नस्तत्वार्थे दाक्षिरितीत्रः प्रष्ठेवनिमित्तमिति संज्ञाप्रसंगात्॥ अविभक्तिनिमित्तस्येति अश्रूयमाणविभक्तिकमव्ययमविभक्तीत्युच्यते तन्नि
मित्तस्य प्रत्ययस्येष्यते न च प्राप्नोतीति तस्य उपसंख्यानं कर्त्तव्यं ननु सामान्येनाविभक्तिनिमित्तस्य संज्ञाविधेयाविशालविशंकटादीनामपि प्रसंगात्।
किं पुनरिति एकवचनमुत्सर्गइति वचनात् क्रमव्यतिक्रमे कारणाभावात् विनानेत्यत्रापि सर्वा विभक्तिरुत्पन्नो निमित्तमितिप्रश्नः॥ ॥ राम० १००
×ः यथा सर्वैकान्येति दाप्रत्ययस्य सप्तम्येवोत्पत्तिनिमित्तमिति। अस्मिन्नत्रार्थे विनानानेत्यव्ययसंज्ञा न सिध्यति। न हि विनञ्भ्यामित्यत्र प्रतिनियता काचिद्विभक्तिः ×४

सर्वविभक्तिरिति । अविशेषेण सद्यं तेऽसन्नानां नियमः क्रियत इत्यभिप्रायात् सर्वा विभक्तय उत्पद्यंत इत्यर्थः अविशेषादिति विशेषस्यानाश्रयणादित्यर्थः तसिलादीनां चेति । आदिशब्दस्य प्रकारवाचित्वात् तसिलपि गृह्यते वक्ष्यत्येतदिति भवदादियोग एवामात्रि ... वर्तत इत्यर्थः यदि पुनरिति प्रयोगेऽप्यश्रूयमाणविभक्तिः सोऽव्ययमित्यर्थः न चैदधिमच्चिसतिप्रसंगः दृष्टसादौ विभक्तिश्रवणात् अविभक्ताविति अव्ययत्वाद् विभक्तित्वं अवि

सर्वविभक्तिस्त्येवि शेषात् सर्वविभक्तिस्त्येष भवति किं कारणं अविशेषेण विहितत्वात् तसिलादीनां चोपसंख्यानं तसिलादीनां चोपसंख्यानं कर्तव्यं तत्र यत्र ततः यतः ननु च विशेषेण एते विधीयंते पंचम्यास्तसिल् सप्तम्यास्त्रलिति वक्ष्यत्येतत् इतराभ्योपि दृश्यंत इति यदि पुनरविभक्तिः शब्दोऽव्ययसंज्ञो भवतीत्युच्यते अविभक्ताविति इतरेतराश्रयत्वादप्रसिद्धिः अविभक्ताविति इतरेतराश्रयत्वादप्रसिद्धिः संज्ञयाः कार इतरेतराश्रयता सत्यविभक्तित्वे संज्ञया भवितव्यं संज्ञया चाविभक्तित्वं भाव्यते तदेतदितरेतराश्रयं भवति [redacted] रतरेतराश्रयाणि च न प्रकल्पंते अलिंगमसंख्यमिति वा अथवा लिंगमसंख्यमव्ययसंज्ञं भवतीति वक्तव्यं एवमपीतरेतराश्रयमेव कार इतरेतराश्रयता सत्यलिंगासंख्यत्वे संज्ञया भवितव्यं संज्ञया चालिंगासंख्यत्वं भाव्यं तदिदितरेतराश्रयं भवति इतरेतराश्रयाणि च न प्रकल्पंते नेदं वा चुनिकमलिंगता असंख्यता च किं तर्हि स्वाभाविकमेतत् तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थै

भक्तित्वादव्ययत्वमिति दोषः अलिंगमसंख्यमिति अविभक्तिरव्ययमित्यस्य लक्षणस्य दूषितत्वात् अत्रापि तदेव दूषणमिति प्रदर्शनार्थो वाशब्दः अलिंगसंख्यत्वस्य लौकिकत्वान्नात्रेतरेतराश्रयत्वमिति पूर्वपक्षः एवमपीति अथ मपि कश्चित्तत्के चिच्छास्त्रादेव [redacted] प्रतिपद्यते

भा०कै०प्र० १०१ 101

सिद्धत्वमिति॥ वार्त्तिककारस्येतरेतराश्रयदोषः स्थित एवेति तु शब्दो विशेषप्रदर्शनार्थः। भाष्यकारेणानितरेतराश्रयदोषः परिहृत इति वा शब्दार्थः स्वशब्दो व्याख्यातः। य एवं प्रकारस्य वचने यावल्लस एव प्रत्यादिभ्यो विधीयत इति नाव्याप्तिः मांत इति आम् आमन्तसिः प्रतियोगे पंचम्यास्तसिः ते नैककृदिकृत सिस्त्वेति कृत्वोर्थाः कृत्वसुच्धाच्प्रत्ययवेति वृद्धव्यवहारादेव शब्दार्थसंबंधावगमादेकत्वादिव्यवहारवदलिंगासंख्यत्वमप्यव्ययार्थे प्रसिद्धमित्यर्थः॥ अ

सुच्

तत्र किमस्माभिः कर्तुं शक्यं स्वाभाविकमेतत्। ततु हि वक्तव्यमलिंगमसंख्यमिति न वक्तव्यं सिद्धं तु पाठात् पाठाद्वा सिद्धमेतत्। कथं पाठः कृन्मेज्यः तसिलादयः प्राक्पाशपः शस्प्रभृतयः प्राक्समासान्तेभ्यः मांतः कृत्वोर्थः तसिवती नानाञाविति॥ अथवा पुनरस्त्वविभक्तिः
तीर शब्दोव्ययसंज्ञो भवतीत्येव ननु चोक्तं अविभक्तावितरेतराश्रयत्वादप्रसिद्धिरिति। नैष दोषः इदं तावदयं प्रष्टव्यः यद्यपि तावद्वैयाकरणा
ते४ विभक्तिलोपमारभमाणा अविभक्तिकान् शब्दान्प्रयुंजते ये त्वेते वैयाकरणेभ्योन्ये मनुष्याः कथं तेऽविभक्तकान् शब्दान्प्रयुंजते अपि ता च पुनर्लौकिका एकत्वादीनामर्थानां आतश्चाभिज्ञाः अन्ये न हि वस्त्रेनैकं क्रीणाति अन्येन द्वौ अन्येन त्रीन् अभिज्ञाश्च न च प्रयुंजते नदेतदेवं संदृश्यतामर्थरूपमेवैतदेवं जातीयकं येनात्र विभक्तिर्न भवतीति तच्चाप्येतदेवमनुगम्यमानं दृश्यतां किंचिदव्ययं विभक्त्यर्थप्रधानं किंचित्क्रियाप्रधानं उच्चैर्नीचैरिति विभक्त्यर्थप्रधानं॥ ॥ ॥

तैवोपपत्तिमाह॥ तच्चापीति 'किंचिदिति' अव्ययानां द्वैविध्यमेवेति प्रतिपाद्यते अलिंगासंख्यत्वप्रतिपादनाय अन्ये त्वाहुः किंचिदव्ययं क्रियाप्रधानं किंचित्साधनप्रधानं अन्यस्तु नापि क्रियाप्रधानं नापि साधनप्रधानं [redacted] यथा स्वः प्रपत्नो हितं गंगं उन्मत्तगंगं देश इति तथा चात्र नपुंसकत्वं अव्ययीभावश्चेत्यन्वाख्यायते पूर्वं च भाष्यकारेणोक्तं स्वरादीनां पुनः सत्ववचनानां चेति तस्माद्बाहुल्याभिप्रायेण लिंगासंख्यमव्ययमित्युच्यते उच्चैर्नीचैरिति सप्तम्यर्थे

राम० १०१

हिरुकृष्टयगिति॥ क्रियाविशेषणत्वादेषां क्रियाप्राधान्यं। क्रियापदप्रयोगमन्तरेणापि पृथग्देवदत्तइत्यादिप्रयोगः क्रियाक्षेपादुपपद्यते। शब्दशक्तिस्वाभाव्या
देवैकस्मिन्नेवार्थे विधीयमानयोस्तेनैकदिकृतसिद्धेऽसत्त्वे न सो भिन्नधर्मत्वं तत्र पीलुमूलमिति द्वयं प्राधान्येनाभिधीयते। पीलुमूलत इति तु द्वयोपसर्जने
नस्तृतीयार्थे इति तस्य साधनप्रधानता। अघ्यल इति। सूत्रारम्भकाले इत्यर्थः॥ पूर्वं हि त्यासान्तराश्रयेण सूत्रं प्र त्याख्यातं। अतिबहु इति। एकस्मि
न्निसे तद्यनीयमेकवचनमिति सूत्रं कर्तव्यं। ततो द्विबह्वोर्द्विवचनबहुवचने इत्येवं कर्तव्यं। तेन द्वित्वबहुत्वयोः द्विवचनबहुवचने भविष्यतः। एकवचनं तु

हिरुकृष्टयगिति क्रियाप्रधानं। तद्धितश्चापि कश्चिद्विभक्त्यर्थप्रधानः कश्चित्क्रियाप्रधानः यत्र तत्रेति विभक्त्यर्थप्रधानः। विनानानेति क्रि
याप्रधानः। न चैतयोरर्थयोर्लिंगसंख्याभ्यां योगोऽस्ति। अथापि सर्वविभक्तिरित्युच्यते एवमपि न दोषः। कथमिदं चाप्पद्यते अतिबहु क्रिय
ते एकस्मिन्नेकवचनं। द्वयोर्द्विवचनं बहुषु बहुवचनमिति। कथं तर्हि एकवचनमुत्सर्गतः करिष्यते। तस्य द्विबह्वोरर्थयोर्द्विवचनबहु
वचने बाधके भविष्यतः। न चाप्येवं विग्रहः करिष्यते न सर्वोऽसर्वो विभक्त्योऽयस्मादिति॥ ॥ ॥
असर्वा

कस्मिन्नपि भविष्यति अलिंगासंख्येभ्योऽव्ययेभ्यः श्चेति। ननु कर्मणि द्वितीयेत्यादिना कर्मादिषु द्वितीयादीनां नियतत्वात् कथमव्ययेभ्य एकवचनं स्यात्। नैष दो
षः। एतदर्थमेवैकवचनमित्येतत्क्रियते अप्राप्तप्रापणार्थं। तेन कर्माद्यभावेऽपि भवति। द्वित्वबहुत्वयोस्तु प्राप्तं द्विवचनबहुवचनाभ्यां बाध्यते। न सर्वो विभक्त्य
उत्सन्नो निषिद्ध मस्सेति येन वृत्तिकारेण व्याख्यातं तन्मतं दूषितं। इदानीं वृत्तिकाराणां तमतप्रदर्शनेन समाक्रियते॥ न चाप्येवमिति। एवं विग्रहे सर्वे शब्दस्य प्रकार
कात्स्न्येऽपि वर्तनादेकवचनमात्रोत्पत्तावपि सर्वो विभक्त्यः सम्प्राप्यायेभ्य उत्पद्यन्त इति न स्यादसर्वविभक्तित्वम्॥ ॥ ॥

भा॰कै॰पु॰ १०२ 102

कथंतर्हीति॥ इत्यकारान्तेभ्यः सर्वेभ्यः एकवचनमात्रोत्पन्नौ चुनिरवशेषाद्विभक्तिर्नोत्पन्ना भवतीति भवसे वा सर्वविभक्तित्वं। यदा त्वयं न्यायः प्रथमातिक्रमे कार
णाभावात्प्रथमायाः एवैकवचनमव्ययेभ्य उत्पद्यते इति तदा सर्वविभक्त्ययोगः स्मादित्यपि विग्रहे न दोषः। यदा तु खलेकपोतिकान्यायेन सर्वैकवचनोत्पत्ति
स्तदैतदुक्तं॥ अव्ययीभावादप्येकवचनमात्रमेवोत्पद्यते तावतैव तृतीयासप्तम्योर्बहुलमिति सप्तम्योपपादनात्। एवंगत इति। यदा सर्वो विभक्तिरस्मादि
ति विग्रह आश्रीयते तदैवं विज्ञाते सत्येतावल्लक्षणमस्तु असर्वविभक्त्यव्ययमिति। पंचसूत्री न वक्तव्या। एतदसर्वविभक्तित्वं कस्यचित्स्यात् यस्य क
न्मेजंत इत्यनेनाव्ययसंज्ञा विधीयते। मांतस्येति। सूत्रोपलक्षणं ततः पर इति। कृन्मेजंत इत्यस्मात्सूत्रात्परे कृदर्थाः॥ कृत्संज्ञा विषयाः क्त्वातोसुन्कसु

कथं तर्हि न सर्वो असर्वो असर्वो विभक्तिरस्मादिति। त्रिकं पुनर्विभक्तिसंज्ञं। एवं गते कस्यचित्स्यमेतन्मांतस्य कार्यग्रहणं न तत्र ततः परे
चाभिमतानकार्योऽव्ययः कृदर्थो ग्रहणे न योगाः। कृत्तद्धितानां ग्रहणं तु कार्यं संख्याविशेषं ह्यभिनिश्चिता ये। तेषां भवति ये धो भवतीति व कथं
। इह मा भूत्। एको द्वौ बहव इति। तस्मात्स्वरादिग्रहणं च कार्यं कृत्तद्धितानां ग्रहणं च पाठे। पाठेन पव्ययसंज्ञा कृतासे न प्राप्नोति। परमोच्चैः
॥ परमनीचैरिति॥ ॥श्री॥ ॥१॥

न इत्यर्थः॥ ग्रहणे नोच्चारणेन प्रतिपदमित्यर्थः। योगाश्च न कर्त्तव्याः स्वरादिनिपातमव्ययमित्येवमादयः पंचेत्युपसंहारः। इदानीमतिव्याप्तिपरिहा
रार्थं तद्धितग्रहणं कर्त्तव्यं तस्मिन्कृते कृन्मेजंत इत्याद्यपि कर्त्तव्यं इति दर्शयति। कृत्तद्धितानामिति। संख्याविशेषमिति। तत्र त्रित्वसंख्येत्यर्थः। तेषामि
ति। असति तद्धितग्रहणे एकादीनामप्यसर्वविभक्तित्वात्प्रतिषेधो वक्तव्यः स्वरादिसेव मर्थं तद्धितग्रहणं कर्त्तव्यं। तस्मिन् कृते स्वरादिग्रहणं कार्यं। स्वरादी
नामतद्धितान्तत्वात्। ननु भयशब्दस्य द्विवचनानुत्पादाद् असर्वविभक्तित्वं तथा गोद्दौ वरणा इति। तत एषामपि तद्धितश्चासर्वविभक्तिरित्यव्ययत्वप्रसंग इत्या एम॰
ह। कृत्तद्धितानामिति। प्रतिपदं तद्धिताः पठितव्याः येषामव्ययसंज्ञेष्यते इत्यर्थः। तस्मादुपपाठ एवाश्रयितव्यः। प्रपंचार्थस्तु सूत्रप्रबंधः॥ ॥ १०२

तदंतविधिनेति। प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वचनेनेत्यर्थः। असुच्चै साविति। शक्तिप्रधानान्यव्ययानि निवृत्तिविषये शक्तिमत्प्रधानानि भवंति।
यथा दोषामन्यमहः दोषाभूतमहरिति। ततउच्चैः शब्दस्य प्रक्रियायां द्वितीयां तस्य समासः। कपुनरिति। श्लोके सप्तमी निर्दिष्टा शास्त्रे पि सप्तमी निर्दिष्टा।
सदृशामिति। लिंगविशेषप्रतिपादने सामर्थ्याभावात्। विभक्तिष्विति। कारकेषु। तत्र यानि साधनप्रधानान्यव्ययानि तेषां शक्त्यंपतरेणावेशात्क्रियाप्र
धानानां च शक्तिसंबंधाभावात्सर्वास्तु विभक्तिष्वित्युक्तं। वचनेष्विति। एकत्वादिष्वित्यर्थः। अव्ययीभावस्य शक्तिलिंगविशेषयोगे पि वचनाद्व्ययत्वं

तदंतविधिनाभविष्यति॥ इहापि तर्हि प्राप्नोति उच्चैः असुच्चैः सो असुच्चैः स इति। उपसर्जनस्येति प्रतिषेधो भविष्यति। सत्तर्हि प्रतिषे
धोवक्तव्यः। नवक्तव्यः। सर्वनामसंज्ञायामहतः प्रतिषेध इहानुवर्त्स्यते। सर्वेतत्रप्रसाख्यायते। यथासत्रत्रप्रसाख्यायते इहापि
तथा शक्यः प्रसाख्यातुं। कथं सत्रत्रप्रसाख्यायते। महती यं संज्ञा क्रियते इति। इयमपि च महती संज्ञा क्रियते। संज्ञाच नामयतोनलघीयः
। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं। तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनं। अन्वर्थसंज्ञा यथा विज्ञायेत। न व्येतीत्यव्ययमिति॥
कपुनर्न व्येति। स्त्रीपुंनपुंसकलिंगानि सत्वगुणाः एकत्वद्वित्वबहुत्वानि च। एतानि यानि केचिद्व्ययंति केचिन्न व्ययंति ये न व्ययंति
तदव्ययं। सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययं॥ ॥ ॥

यथास्वसादीनां कर्मप्रवचनीयसंज्ञा। तत्र यान्यसत्वभूतार्थाभिधायीन्यव्ययानि तेषां लिंगादिभिरयोगः— तेषां द्रव्यधर्मत्वात्। सत्ववाचिनामपि शा
ब्दशक्तिस्वाभाव्यात्तदयोगो यथा युष्मदस्मदोर्लिंगाभावः। केचित्तु लिंगादिविशेषेणायोगात् सामान्येन तु योगमव्ययानामाहुः। तदयुक्तं। लिंगादिसामा
न्यसद्भावे प्रमाणाभावात्। यन्न व्येतीति। नानात्वं न गच्छति। सत्वधर्मान्न गृह्णातीत्यर्थः॥ ॥श्री॥ ॥श्री॥

ऌन्मे जंतः॥ कथमिति। किंमेजंतग्रहणेन पूर्वेण ऌ द्विशेष्यते पश्चात्ऌमांतदंतविधिः। आहोस्वित् पूर्वेण ऌमांतदंतविधिः पश्चात्ऌदंतं मेजंतग्रहणेन विशेष्यते इति प्रश्नः प्रयोजनं सर्वनामाव्ययसंज्ञायामिति चात्र तदंतविधिः। अथवा अन्वर्थसंज्ञाश्रयणात्प्रत्ययग्रहणे संज्ञाविधावप्यत्र तदंतविधिर्भवति। नहि केवलस्य प्रत्ययस्य प्रयोगा हे स्मनांगमनम्गमनं वा संभवति। कारयांचकारेति। लिडत्र ऌत्सच मांतो न भवति। प्रतामाविति। किं पिल्लुन्ते विप्रत्ययलक्षणे

ऌन्मेजंतः॥ कथमिदं विज्ञायते ऌद्यो मकारांत इति आहोस्वित् ऌदंतं यन्मकारांतमिति। किंचातः यदि विज्ञायते ऌद्यो मांत इति। कारयांचकार हारयांचकारेत्यत्र न प्राप्नोति॥ अथ विज्ञायते ऌदंतं यन्मांतमिति प्रतामौ प्रतामः अत्रापि प्राप्नोति। यथेच्छसि तथास्तु।
काऌ अस्तु तावत् ऌद्यो मांत इति॥ कथं कारयांचकार हारयांचकार। किं पुनरत्राव्ययसंज्ञया प्राप्यते। अव्ययादिति [redacted] लुग्यथा
स्यात्। मा भूदेव मा मद् लेवं भविष्यति। न सिध्यति। लिड्ग्रहणं तत्रानुवर्त्तते। लिड्ग्रहणान्निवर्त्तिष्यते। यदि निवर्त्तते
प्रत्ययमात्रस्य लुक् प्राप्नोति। इष्यते च प्रत्ययमात्रस्य। आतश्चेष्यते। एवं ह्याह ऌ आनुप्रयुज्यते लिटीति। यदि च प्रत्ययमात्रस्य लुग्भवति तत एतदुपपन्नं भवति। अथवा पुनरस्तु ऌदंतं यन्मकारांतमिति। कथं प्रतामौ प्रताम इति॥ आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेनाव्ययसंज्ञा भवतीति॥ ॥ ॥

न ऌदंतमेतत् इवतिश्रुत्साच मांतं। अव्ययादिति लुगिति। ननु हल्ङ्यादिलोपेन सिद्धत्वात् किं लुका प्रयोजनं। यद्यातस्थेनु प्रयोगवशाद्विल बहुत्वावगतिस्तदास्ति द्विवचनबहुवचनयोरूस त्रिरिति लुगेवैषितव्यः। अकचतुनसंभवति। अपरिसमाप्तार्थत्वादज्ञातादिभियोगाभावात्। इष्यते चेति। पूर्वोक्तादेतो स्वरबाधनुत्सात् तु प्रयोगएव हि तरबाधुस्जिः। समाप्तार्थसप्रकर्षादियोगादिसर्थः। अत्रैवार्थे ज्ञापकमाह। आतश्चेति। तत्र सुकंब्बहितन्निदसर्थे चेति॥ ॥

प्रशान्‌ नशाङ्‌ इमिति॥ तस्य हि मो नो धातोरिति नत्वस्यासिद्धत्वात्‌ सिद्धमव्ययत्वमिति भावः। तुल्यजातीयस्य च धातोर्नियमेन निवृत्तिः क्रियत इति कार्यां च कारेति भवत्येवमां
तस्याव्ययसंज्ञा। शान्‌ तेजन इति धातोः प्रशानिति रूपं न भवति। तस्य क्विबंतस्य प्रयोगादर्शनात्‌। लावयते लैः। अत्रापि न भवति। अस्मादेव ज्ञापकात्‌ व्याक्षणिकत्वाद्धौ
कारस्य। अनिकारोकारेति। एच एतद्विशेषणं नमकारस्य व्यवच्छेद्यासंभवात्‌॥ आधय इति। गुणे कृतेंऽतरंगबहिरंगयोरिति न्यायात्‌ अव्ययसंज्ञा स्यात्‌ न त्वयादयः

यद्यं प्रशान्‌ नशाङ्‌ स्वरादिषु पठति। कृन्मेजंत इत्यनिकारोकारप्रकृतिः। कृन्मेजंत इत्यनिकारोकारप्रकृतिरिति वक्तव्यं। इह माभूत्‌। आधये।
आधेः। चिकीर्षवे। चिकीर्षौ इति। अनन्यप्रकृतिरिति वा। अथवा अनन्यप्रकृतिः कृदव्ययसंज्ञो भवतीति वक्तव्यं। किं पुनरत्र ज्यायः। अनन्य
प्रकृति [illegible] वचनमेव ज्यायः। इदमपि सिद्धं भवति। कुंभकारेभ्यो नगरकारेभ्य इति। तत्तर्हि वक्तव्यं। न वा सन्निपातलक्षणो विधिरनि
मित्तं तद्विघातस्येति। न वा वक्तव्यं। किं कारणं। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषा कर्तव्या। कः पुनरत्र विशेषः। एषा वा
परिभाषा क्रियेत अनन्यप्रकृतिरिति वोच्येत। अवश्यमेषा परिभाषा कर्तव्या। बहून्येतस्याः परिभाषायाः प्रयोजनानि। कानि पुनस्तानि।
प्रयोजनं ह्रस्वत्वं तुग्विधौ ग्रामणिकुलं। ग्रामणिकुलं सेनानिकुलमिति ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुगिति तुक्‌ प्राप्नोति। सन्निपातलक्षणो
विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। नैतदस्ति प्रयोजनं। अंतरंगस्तुक्‌। बहिरंगो ह्रस्वः॥ ॥ ॥

अंतरंगत्वादेव चेत्तद्बलवत्स्यात्‌। परिभाषांतरप्रयोजनकथनार्थं च लक्षणप्रतिपदोक्तयोरित्येतदनाश्रितं। लाक्षणिकं त्वनुमेयं प्रतिपदोक्तं तु प्रत्यक्षं इति तस्यैव
ग्रहणं न्याय्यं। सन्निपातलक्षण इति। सन्निपातः संश्लेषः तन्निमित्तो यो विधिः स तद्विघातस्यानिमित्तं। तं संनिपातं यो विहंति तस्येत्यर्थः। ग्रामणिकुलमिति। इको ह्रस्व इ
ति पूर्वपदोत्तरपदसन्निपातनिमित्तं ह्रस्वत्वं तुकोऽनिमित्तं। तुकि हि सति पूर्वपदोत्तरपदयोरानंतर्यविघातः स्यात्‌। यदा तु ह्रस्वमात्रस्य तुगागमो न तदंतस्य। अवयवा
वयवश्च समुदायावयवो न भवतीति नैतत्प्रयोजनं न त्वन्यथा॥ ॥

बहिरंगमिति॥ द्विपदाश्रयत्वात्। यदपि ह्रस्वो नपुंसक इति ह्रस्वत्वं तदप्यपदाश्रयत्वाद्बहिरंगं तुक्त्वमेकाश्रयत्वादंतरंगः। यदि तु सन्निपातलक्षण इत्याश्रीयते तदा ग्रामणि
च्छत्रमित्यत्रापि तुक् न स्यात्। ह्रस्वतुगागमयोस्तत्र साम्यादंतरंगत्वं बहिरंगत्वं वा नास्तीति छलक्षणस्तुक् सिद्धो भवति। असिद्धो नलोप इति। नलोपः सुप्स्वरेति असिद्धं
बहिरंगमिति वा। निकुचित इति। कुंचेर्भावे क्तप्रत्ययः। अनिदितामिति नलोपः। तत्र किल निमित्तमुउपधत्वमुउपधाद्दिति अकित्त्वस्यानिमित्तमिति गुणो न भवति।

असिद्धं बहिरंगमंतरंगे॥ नलोपो वृत्रहभिः। वृत्रहभिः स्त्रूणाहभिरित्यत्र नलोपे कृते ह्रस्वस्यापि तिकृति तुगिति तुक् प्राप्नोति। सन्निपातलक्ष
णो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनं। असिद्धो नलोपस्तस्यासिद्धत्वान्न भविष्यति। उउपधत्वमकित्त्व
स्य निकुचिते। [redacted] उउपधत्वमकित्त्वस्यानिमित्तं। क्क निकुचिते। निकुचितमित्यत्र नलोपे कृते उउपधाद्वा दि
कर्मणो रन्यतरस्यामित्यकित्त्वं प्राप्नोति॥ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति॥ एतदपि नास्ति प्रयोजनं। अस्त्व
त्राकित्त्वं। न धातुलोप आर्द्धधातुक इति प्रतिषेधो भविष्यति। नाभावो यञि दीर्घत्वस्यामुना। नाभावो यञि दीर्घत्वस्यानिमित्तं। क्क।
अमुना। भावे कृते यञि दीर्घो यञि सुपि चेति दीर्घत्वं प्राप्नोति। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। एतदपि ना
ना
स्ति प्रयोजनं। वक्ष्यत्येतत्। न मु टादेशा इति॥ ॥ ॥

अमुनेति। न मुने इत्यस्यायमर्थः। ने कर्त्तव्ये मुभावः सिद्धो भवति। ने परतो यद्दीर्घत्वं प्राप्नोति तत्र मुभावस्यासिद्धत्वादकारांतत्वाद्दीर्घत्वप्रसंगः। तस्मिन्कृते इदसोमे
रिति दीर्घ ऊकारः प्राप्नोति। ततश्चामूनेति स्यात्। उकारसन्निपातनिमित्तस्तु नाभावो दीर्घत्वस्यानिमित्तं इति सिद्धममुनेति। न मु टादेश इति। अनेकविभक्तिस्त
त्रसमास आश्रितः। टापा आदेशः टाया मादेश इति॥ ॥ ॥

उपादास्तेति। एतद्विषये आत्वविधानादकित्त्वसंनिपातनिमित्तमात्वं स्याघ्वोरिच्चेति कित्वस्यानिमित्तं कित्त्वसन्नियुक्तं चेत्त्वमिति कित्वाभावेन भव
ति। यदयमिति। ननु समस्तार्थमेतत्स्यात्क्रियतिस्त्रग्राग्राह्मणानामिति। अत्रत्वं गं पुंसि वर्तते इति नास्ति ङीपः प्राप्तिरिति केचित्। तदयुक्तं
न हि ङीपूर्विधाने ऽगाधिकारोऽस्ति। तत्रावयवस्य स्त्रीत्वे इति त्वात् ङीपः प्राप्तिः केन वार्यते इति ज्ञापकमेवैतत्। ज्ञापकादेव सिद्धत्वस्त्रादिष्वनपोः

आत्वं कित्वस्योपादास्त। आत्वं कित्वस्यानिमित्तं क्व। उपास्तास्य [स्व] शिक्षकस्येति। आत्वे कृते स्याघ्वोरिच्चेतीत्वं प्राप्नोति। सन्निपातलक्षणो
विधिरनिमित्तं तद्विघातस्येति न [तेषा] भवति। एतदपि नास्ति प्रयोजनं। उक्तमेतत्। दीङः प्रतिषेधः स्याघ्वोरित्त्वे इति। तिसृचतसृत्वं ङी
पूर्विधेः। तिसृचतसृत्वं ङीपूर्विधेरनिमित्तं। क्व। तिस्रस्तिष्ठन्ति। चतस्रस्तिष्ठन्ति। तिसृचतसृभावे कृते ऋन्नेभ्यो ङीबिति ङीप्
प्राप्नोति। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। एतदपि नास्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञाप
यति। न तिसृचतसृभावे ङीब्भवतीति। यदयं न तिसृचतसृनामिति दीर्घत्व[प्रतिषेध]ं शास्ति। इमानि तर्हि प्रयोजनानि। शतानि सहस्रा
णि नुमि कृते ष्णान्ता षडिति षट्संज्ञा प्राप्नोति। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। शक
टौ पद्धतौ अत्वे कृते ऽत इति टाप् प्राप्नोति। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति॥ एत

पाठेन कर्त्तव्यो भवति। शतानीति। विभक्तिसन्निपातनिमित्तो नुमागमः षट्संज्ञाहेतुकस्य विभक्तिलुको न निमित्तं ष्णान्ता षडित्यनन्तग्रहणमौपदेशि
कप्रतिपत्त्यर्थमित्यत्र न भविष्यतीति चेत्संस्मात्प्रत्ययार्थं बहुव्रीह्यर्थं तत्स्यादित्यदोषः। शकटाविति। विभक्तिसन्निपातकृतमत्त्वं पद्धिटापो निमित्तं स्या
त् न नत्त्वं विहन्येत। शास्त्रीये च कार्ये प्रज्ञादिवद्वा नाननत्वं लौकिके ऽपि समतिशकटायामिति। अव्यघेरिति तपरकरणेनाप्यत्र टापुनिवर्त्तयितुं शक्यते इ
स्यात्।

भा॰ के॰ प्र
१०५
105

ङितोः स्थाने मात्रिकस्याकारो भविष्यति। भाष्यमाणत्वाद्ध्रस्वग्रहणस्याकारो ग्राहको न भविष्यतीति लक्ष्यान्तरेणापि प्राप्तस्य दीर्घत्वस्य निवारणार्थमपरं कारणं स
पद्यते। इयेषेति। आमिमसतीत्युक्त्यादिति प्रकृतिप्रत्ययसन्निपातस्य विघातः स्यात्। उषविदेति विकल्पः। ओषां चक्रतुः उषतुरित्यादौ सावकाशत्वाद्योषे
ति। नित्यमाम् प्रसज्येत। प्रतिपदविधेस्तु बलवत्त्वात्परत्वाच्चात्र विकल्पेनैव भाव्यमित्यनुदाहरणमेतत्। गुरुमत इति नित्ययोगमेवाश्रयणादपिश
ब्दोऽयामभावः प्रतिपादयितुं दाक्षिरिति। प्रयोगेऽव्यवस्थितस्यैवैकारस्योच्चारणान्तेनमनेन क्रियते इति सन्निपातलक्षणत्वं प्रत्ययस्य संभाव्यते। नप्र

इयेष। उवोष। गुरोः कृते ऋजादेश्च गुरुमतोऽनृच्छ इत्याम् प्राप्नोति। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न दोषो भवति। तस्य
ते घोवर्णाश्रयः प्रत्ययो वर्णविचालस्य। तस्यैतस्य लक्षणस्य ते घोवर्णाश्रयः प्रत्ययो वर्णविचालस्यानिमित्तं स्यात्। क्व। अप्रत इत्रात
क्षिः प्राक्षिः। न प्रत्ययः सन्निपातलक्षणः। अंगसंज्ञा तर्हि निमित्तं स्यात्। आत्वं पुग्विधेः। क्रापयति। आत्वं पुग्विधेरनिमित्तं स्यात्। क्व
क्रापयतीति। पुग्घ्रस्वत्वस्यादीदपत्। पुग्घ्रस्वत्वस्यानिमित्तं स्यात्। क्व। अदीदपत्। त्यदाद्यकारष्टापू विधेः। त्यदाद्यकारष्टाब्विधेर
निमित्तं स्यात्। क्व। या सेति। इड्विधिराकारलोपस्य पपिवान्। इड्विधिराकारलोपस्यानिमित्तं स्यात्। क्व। पपिवान्। तस्थिवानि
ति। मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य। मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्यानिमित्तं स्यात्। क्व। अग्निमान्। वायुमान्। परमवाचा
परमवाचे। नदीह्रस्वत्वं संबुद्धिलोपस्य। नदीह्रस्वत्वं संबुद्धिलोपस्यानिमित्तं स्यात्। क्व। नदि कुमारि। ब्राह्मणि। किशोरि। ब्रह्मबन्धु इ
ति। ह्रस्वत्वे कृते एङ्ह्रस्वादिति संबुद्धिलोपो न प्राप्नोति

त्यय इति। कल्पितप्रकृतिप्रत्ययविभागेनाख्यानात्प्रकृतेरविद्यमान एव प्रत्यय उत्पाद्यते इत्याशयः। अंगसंज्ञेति। सत्यामंगसंज्ञायामकार
लोप इति स्यात्। तन्न तर्हि विघातः। न त्र वर्णविचालस्यानिमित्तं स्यादित्यंगसंज्ञाद्वारेणेत्यर्थः। अत्र केचिद्वर्णाश्रय इति व्याचक्षते तेषां मात्रे
याघप्युदाहरणं। अन्ये त्वत्र वर्णाश्रय इत्यकारप्रश्लेषमाहुः। क्रापयतीति। णिचि कृते कृतायामात्वं पुकोऽनिमित्तं स्यात्। अंगस्य यः आकारस्त
स्य पुगित्यवयवभक्तं पुकं मत्वा दोषोपन्यासः। अग्निमानिति। पूर्वमुदात्तमाश्रित्य मतुप उदात्तत्वं क्रियमाणं पूर्वस्य निघातं न कुर्यात्। परमवाचेति

[illegible]

राम॰
१०५

निः

माभूदिति॥ हल्ङ्यादिसूत्रे दीर्घग्रहणमदन्तेष्वदमुच्यते। तत्र कृतेऽपि ह्रस्वत्वे स्यान्निवृत्तिर्वा ङ्याब्विषयत्वादिति भावः। ब्रह्मबन्धुशब्दापेक्षया चैतदुच्यते तेन स्याद्ङ्याब्वत्त्वात्।
निसृ इति। कार्ये तावन्नि संततत्ये न केनचि लक्षणे न भवतीति भावः। संबुद्धिलोपसत्त्वकाः प्राः हे देवदत्तेति। भूयांसो वेति। दुष्टत्वमति पादनाय प्रकर्षोऽयः।
सर्वादिषु समशब्दस्य सर्वशब्दपर्यायस्य सर्वनामसंज्ञा विधानात्तुल्यवाचिनोऽत्र समा इति प्रयोगः। अस्ति च समशब्दः सर्वशब्दपर्यायः। यथा समरुण्वर्त्ते
ते सर्वे प्राणजन्मिसर्थः। वेदे विमानः समस्य दूष्य इति प्रयोगः। तत्र प्रयोजनानाम सम्यत्वात्तस्मे वोपसंख्या नमानीसर्थः। प्रतिविधेयमिति। तत्र विधानसा
मर्थ्यादङ्गोवर्णविचालो भविष्यति। कष्टायेति ज्ञापकाद्यशब्दे दीर्घो भविष्यति। नयासयोरिति लिङ्गादाप् भविष्यति। पपिवानिति वस्वेकाजाद्घसा

माभूदेवं ङ्यन्तादिस्ये वे भविष्यति। न सिद्ध्यति। दीर्घादित्युच्यते। ह्रस्वान्ताच्च न प्राप्नोति। इदमिह संप्रधार्यं ह्रस्वत्वं क्रियतां संबुद्धिलोप इति कि
मत्र कर्तव्यं। परत्वाद्ध्रस्वत्वे। नित्यः संबुद्धिलोपः। कृते ह्रस्वत्वे प्राप्नोति अकृतेऽपि। अनित्यः संबुद्धिलोपः। न हि कृते ह्रस्वत्वे प्राप्नोति। किं का
रणं सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति। एवं दोषाः समा भूयांसो वा। तस्मान्नार्थोऽनया परिभाषया। न हि दोषाः सन्तीति परि
भाषा न कर्तव्या लक्षणं वा न प्रणेयं। न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। नापि मृगाः सन्तीति यवा नोप्यन्ते। दोषाः खल्वपि सा
कल्येन परिगणिताः। प्रयोजनानामुदाहरणमात्रं। कुत एतत्। न हि दोषाणां लक्षणमस्ति। तस्माद्यान्येतस्याः परिभाषायाः प्रयो
जनानि। तदर्थमेषा परिभाषा कर्तव्या। प्रतिविधेयं दोषेषु॥ ॥ ॥

मित्स्वयं नियमः इरोऽनल्पूर्वो यं विधिरिसाकारः त्लोपः। क्रापयतीसाकारान्तभक्तः पुङ्क्ष्व वधायकः। अदीद्यदपदिति लिङ्गाद्ध्रस्वः। यदयं मारणानोपणोति जाना
ते र्मित्वं उपधाह्रस्वार्थं शास्त्रिन ज्ञापयति पुकि कृते उपधाह्रस्वत्वं भवतीति। न हि जानाते रुकृते पुकि ह्रस्वमाविन्युपधा भवति। अग्निमानिति अनुदात्तं पदमे
कवर्जमिति परिभाषा स्वरविषयासन्निपातपरिभाषां बाधते। एङ् ह्रस्वादित्यत्रापि गुणात्संबुद्धेरिति वक्तव्ये ह्रस्वग्रहणसामर्थ्यात्सन्निपातपरिभाषाया बाधः।
दवीत्यत्र छंदसि गुणाभावपक्षे छान्दसो लुग्भविष्यति॥ ॥ ॥ ॥ ॥

भा०कौ०प्र०
१०६
106

अव्ययीभावस्य॥ प्रयोजनमिति। मुखस्वरोपचारौ निवर्तमानौ प्रयोजनं। यथा मशकार्थो धूम इति॥ अपरिखल्विति। एवं खल्वित्यर्थः। परिगणनमनेन दर्शी क्रियते।
उपाग्न्यधीयानेति। अग्निसमीपे अधीयाने इत्यर्थः। तत्र षष्ठ्यामन्त्रितकारकवचनमिति परांगवद्भावो भवति। न चैकमिति। सामान्यलक्षणमेकं प्रयोजनार्थं नवकस्य

अव्ययीभावस्य॥ अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचाराः। अव्ययीभावस्याव्ययत्वे प्रयोजनं। किं लुङ्मुखस्वरोपचाराः। लुक्। उपाग्नि। प्रत्य
ग्नि। अव्ययादिति लुक् सिद्धो भवति। मुखस्वरः। उपाग्निमुखः प्रत्यग्निमुखः। नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्य इत्येष प्रतिषेधः
सिद्धो भवति। उपचारः। उपपयः कारः। उपपयः कामः। अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्येति प्रतिषेधः सिद्धो भवति। किं पुनरिदं
परिगणनमाहोस्विदुदाहरणमात्रं। परिगणनमित्याह। अपरिखल्वप्याहुः। यदन्यदव्ययीभावस्याव्ययकृतं प्राप्नोति तस्य प्रतिषेधो वक्तव्य
इति। किं पुनस्तत्। परांगवद्भावे अव्ययप्रतिषेधश्चोदितः। उच्चैरधीयानेत्येवमर्थं। स इहापि प्राप्नोति। उपाग्न्यधीयान। प्रत्यग्न्यधीयानेति। अक
च्चाव्ययसर्वनाम्नामकच् प्राक् टेः। क्रियते उच्चकैर्नीचकैरित्येवमर्थं तदिहापि प्राप्नोति॥ उपाग्निकं प्रत्यग्निकं। मुमप्यव्ययप्रतिषेधश्चोद्यते दोषामन्यमहः दिवामन्या रात्रि
रित्येवमर्थं। स इहापि प्राप्नोति। उपकुंभंमन्यः उपमणिकंमन्य इति॥ अपस्पद्भावश्चाव्ययप्रतिषेधश्चोद्यते। दोषाभूतमहः दिवाभूता रात्रिरित्येवमर्थं।
स इहापि प्राप्नोति। उपकुंभीभूतं। उपमणिकीभूतं इति। यदि परिगणनं क्रियते नार्थोऽव्ययीभावस्याव्ययसंज्ञया। कथं। यान्यव्ययीभावस्याव्ययत्वे प्र
योजनानि। नैतानि सन्तीति। यत्तावदुच्यते लुगिति। आचार्यप्रवृत्तिर्ज्ञापयति। भवत्यव्ययीभावाल्लुगिति। यदयं नाव्ययीभावादिति प्रतिषेधं शास्ति।
उपचारः। अनुत्तरपदस्थस्येति वर्तते। तत्र मुखस्वर एकः प्रयोजयति। न चैकं प्रयोजनं योगारंभं प्रयोजयति। यद्येतावत्प्रयोजनं स्यात् तत्रैवायं ब्रूयान्ना

मित्यर्थः। तत्रैवायमिति। न चोक्तं तस्मान्मुखस्वरेणात्र भवितव्यमित्याहुः। अन्ये वर्णयन्ति। अनव्ययमव्ययं [redacted] भवतीत्यन्वर्थसंज्ञाविज्ञानान्मुखस्वरनिवृत्तिर्भवि
ष्यतीति नार्थः सूत्रेण। केचित्तु स्वरादिपाठात्सिद्धायामव्ययसंज्ञायां पुनर्विधानमनित्यत्वज्ञापनार्थं। तेन कृतिपयान्येवाव्ययकार्याणि भवन्तीति नार्थः परिगणनेनेत्या
हुः। तेषां वचनमन्तरेण विशेषप्रमाणाभावः॥ ०॥

॥ ० ॥ [illegible]

प्राम०
१०६

शि सर्वनामस्थानं॥ शि सर्वनामस्थानं सु इ नपुंसकस्येति चेदिति। अस्मिन्सूत्रन्यासे दोषः॥ स्तुट् स्त्रीपुंसयोरिति न्यासे तु न दोष इत्यर्थः। प्रसज्यप्रतिषेधाश्रयेण पूर्वः
पक्षः। पर्युदासाश्रयेण सिद्धान्तः। अप्राप्तेर्वेति। प्रसज्यप्रतिषेधे पूर्वदोषः। तत्र स्तुडिति सनेन या प्राप्तिः सा निषिध्यते। न तु शि सर्वनामस्थानमिति सनेन या प्राप्तिः अ
न्यथा शि सर्वनामस्थानमिति निरवकाशमेव स्यात्। नपुंसकस्यैव शिः संभवति। ननु चेयमिति। परत्वादित्यर्थः। प्रतिषेधे पुंस्त्वाच्च विरोध सद्भावः। तत्र पर
पुंस्त्वा

शि सर्वनामस्थानं॥ स्तुड् नपुंसकस्य॥ ॥शि सर्वनामस्थानं स्तुड् नपुंसकस्येति चेज्जसि शि प्रतिषेधः॥ शि सर्वनामस्थानं स्तुड् नपुंसक
स्येति चेज्जसि शि प्रतिषेधः प्राप्नोति। कुण्डानि। वनानि। असमर्थसमासश्चायं द्रष्टव्यः। अनपुंसकस्येति। न हि नञो नपुंसकेन सामर्थ्यं।
केन तर्हि भवतिना। न भवति नपुंसकस्येति। यत्त्वावुच्यते शि सर्वनामस्थानं स्तुड् नपुंसकस्येति चेज्जसि शि प्रतिषेध इति। नाप्रतिषेधात्।
नायं प्रसज्यप्रतिषेधो नपुंसकस्येति। किं तर्हि पर्युदासोऽयं यदन्यन्नपुंसकादिति नपुंसके न व्यापारः। यदि केन चित्प्राप्नोति तेन भवि
ष्यति। पूर्वेण च प्राप्नोति॥ अप्राप्तेर्वा। अथवा अनन्तरा या प्राप्तिः सा निषिध्यते। कुत एतत्। अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति।
पूर्वा प्राप्तिः अप्रतिषिद्धा तया भविष्यति॥ ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुं। यदप्युच्यते। असमर्थ
समासश्चायं द्रष्टव्य इति। यद्यपि वक्तव्यं अथवैतर्हि बहूनि प्रयोजनानि। कानि। असूर्यंपश्यानि मुखानि। अपुनर्गेयाः श्लोकाः। अश्राद्ध
भोजी ब्राह्मण इति॥ ॥ ॥

त्वात्स्तुडिति प्राप्तिः पूर्वां प्राप्तिं बाधेत तामपि प्रतिषेध इति दोषः। नोत्सहत इति। अपवादविषयपरिहारेण स्याः प्रवर्त्तनादिति भावः। अथवैतर्हीति॥ इदानीमि
त्यर्थः॥ स्तुट् स्त्रीपुंसयोरिति वक्तव्ये अनपुंसकस्येति वचनं ज्ञापकं प्रसज्यप्रतिषेधेऽपि नञ्समासो भवतीति॥ ॥ ॥

पदलाघवाय

भा०कै०प्र० नवेति विभाषा॥ ॥ नवेति विभाषायामिति। समुदायस्यानुकरणत्वादनुकरणस्य चानुकार्येणार्थवत्त्वात्प्रातिपदिकत्वे सतीति विभक्त्युत्पत्तिः। स्त्रीप्रत्यये च तदादिनि
१०७ यमाभावान्न याप्सौ भवतः। अथवा नवेत्युच्चार्यया विभाषा कृता तस्यामिति व्याख्या। तत्र लोके क्रियापदसन्निधाने न वा शब्दयोर्यो ऽर्थो द्योत्यो विकल्पः प्रतिषेध
107 लक्षणः स संज्ञी स यथा। अन्यथा विभाषाप्रदेशेषु न वा शब्दावेवादेशे स्यातां घुग्रहणेष्विति। शब्दस्य संज्ञाकरणे प्रदेशेषु तस्यैव संप्रत्यय इत्यर्थः॥ इतिकरण इति।
क्रियत इतिकरणः। कर्मणि ल्युट्। इतिशब्दः सो ऽकरणश्चेति विशेषणसमासः। क्रियत इति। सामान्यविशेषभावेन निर्देशः। शास्त्रापेक्षया दिति। उपहासपरमेतच्चो

नवेति विभाषा॥ नवेति विभाषायामर्थे संज्ञाकरणं॥ नवेति विभाषायामर्थस्य संज्ञा कर्तव्या। नवा शब्दस्य यो ऽर्थस्तस्य संज्ञा भवतीति वक्तव्यं। किं प्र
योजनं। शब्दसंज्ञायां ह्यर्थासंप्रत्ययो यथान्यत्र। शब्दसंज्ञायां हि सत्यामर्थस्यासंप्रत्ययः स्यात्। यथान्यत्र। अन्यत्रापि शब्दसंज्ञायां शब्दस्य संप्र
त्ययो भवति नार्थस्य। क्वान्यत्र। दाधाघ्वदाप् तरप्तमपौ घ इति घुग्रहणेषु घग्रहणेषु च शब्दस्य संप्रत्ययो भवति नार्थस्य। तत्र हि वक्तव्यं। न वक्तव्यं।
इतिकरणो ऽर्थनिर्देशार्थः॥ इतिकरणः क्रियते सो ऽर्थनिर्देशार्थो भविष्यति। किं गतमेतदितिना आहोस्विच्छब्दाधिक्यादर्थाधिक्यं। गतमित्याह। कुतः
। लोकतः। तद्यथा। गौरित्ययमाहेति गोशब्दादितिकरणः प्रयुज्यमानो गोशब्दं स्वस्मात्पदार्थात्प्रच्यावयति। सो ऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासावर्थ
पदार्थकः संपद्यते। एवमिहापि नवा शब्दादितिकरणः प्रयुज्यमानो नवा शब्दं स्वस्मात्पदार्थात्प्रच्यावयति सो ऽसौ स्वस्मात्पदार्थात्प्रच्युतो यासौ शब्दप
दार्थकता तस्याः शब्द×१ (१ दार्थकता तस्या लौकिकमर्थं संप्रत्याययति। नवेति यद्रूप्यते। नवेतियत्प्रतीयत इति॥ ॥

दकस्य वचनं। अशब्दार्थे स्यात् मादितिभावः। गौरित्ययमाहेति। यद्यपि निर्लेशशब्दार्थे संबंधे उपात्तस्यार्थस्य सा गौर्नास्ति तथापि प्रसिद्धिवशादेतदभिधीयते अर्थपदार्थ
कतायाः प्रच्युत इति। तत्त्वतस्त्वादावेव स्वरूपपदार्थको गोशब्दः प्रयुक्तः। सादृश्यात्तु तमर्थमनभिव्यक्तमितिशब्दो द्योतयतीति पदार्थविपर्यासकृदित्युच्यते। अर्थपदा राम०
र्थकतेति। संबंधे भावप्रत्ययः। संबंधात्प्रच्युतो ऽर्थादपि प्रच्युतो भवति॥ ॥श्री॥ ॥ ॥ १०७

समानशब्दप्रतिषेध इति। समानः शब्दो वाचको येषां पर्यायाणां तेषां इत्यर्थः। विभाषा दिक्समासे इति। विभाषाशब्देनाभिनवलक्षणोऽर्थः प्रत्याप्यते। तत्र प्रत्ययवाची यो दिक्समास इ
ति संप्रत्ययः स्यात्। तत्र दिशो निरस्तत्वान्नवधूपुण्णलां संभवान्ननिमित्तो यदा शाला याम्यप्रदेशो दक्षिणपूर्वो शाला सा चाभिनवा तदा संज्ञा स्यादित्यर्थः। संज्ञाकार्यं व्यंग
च प्रत्ययत्वं स्यात्। न वा विधिपूर्वकत्वादिति। प्रदेशवाचकार्थं पर्यालोच्येयं संज्ञा व्यवस्थाप्यते। तत्र प्रदेशे पुचकायोतिविधायविभाषाशब्द उच्चारितो नवापक्षार्थं गमय
ति। तत्र लोकवन्निषणता यो वृगतिर्भवति नतु प्रत्ययार्थो वृगतिरित्यर्थः। विलिंगमिति। भिन्नलिंगं। अधिकरणमित्यर्थः। विलिंगत्वेनाधिकरणत्वं लक्ष्यते। नहि

समानशब्दप्रतिषेधः। समानशब्दानां प्रतिषेधो वक्तव्यः। नवाकुंडिका नवाघटिकेति। किंच स्यात्। यद्येतेषामपि विभाषासंज्ञा स्यात् विभाषा दिक्समा
से बहुव्रीहौ। दक्षिणपूर्वस्यां शालायामचिरकृतायां संप्रत्ययः स्यात्। न वा विधिपूर्वकत्वात्प्रतिषेधसंप्रत्ययो यथा लोके। नवा एष दोषः। किं कारणं।
विधिपूर्वकत्वात्। विधाय किंचिन्नवेत्युच्यते तेन प्रतिषेधवाचिनः संप्रत्ययो भवति। तद्यथा लोके। ग्रामो भवता गंतव्यो न वा नेति गम्यते। अस्तिका
लो॰क॰ रणं येन प्रतिषेधवाचिनः संप्रत्ययो भवति। किं कारणं। विलिंगं हि भवान्लोके निर्देशं करोति। अंग हि समानलिंगेन निर्देशः क्रियतां प्रत्ययवा
चिनः संप्रत्ययो भविष्यति। तद्यथा ग्रामो भवता गंतव्यो नवः प्रत्यय इति गम्यते। एतच्चैव न जानीमः क्वचिद्व्याकरणे समानलिंगो निर्देशः
क्रियत इति। अपि चात्र कामचारः प्रयोक्तुः शब्दानामभिसंबंधे। तद्यथा। यवागूर्भवता भोक्तव्या न वा। यदा यवागूशब्दो भुजिनाभिसं
बध्यते भुजिर्नवाशब्देन तदा प्रतिषेधवाचिनः संप्रत्ययो भवति। यवागूर्भवता भोक्तव्या नवेति। नेति गम्यते। यदा तु यवागूशब्दो नवा
शब्देनाभिसंबध्यते न तु भुजिना तदा प्रत्ययवाचिनः संप्रत्ययो भवति। यथा। यवागूर्नवा भवता भोक्तव्या प्रत्यग्रेति गम्यते॥ ॥

निषेधवाचिनो नवाशब्दस्य लिंगयोगोऽस्ति। एतच्चैवेति। नैव क्वचिद्व्याकरणसूत्रे समानलिंगो निर्देश इत्यर्थः। विभाषासेनासुरेति यद्यपि समानलिंगो निर्दे
शस्तथापि भिन्नविभक्तित्वात्सामानाधिकरण्याभावः। अपि चेति। तत्र सामर्थ्याद्विशेषावगतिः॥ यदा प्राप्नेय वागू भोजने वा कामुद्दीयेते तदा प्रत्ययार्थावगतिः॥
यदा त्वातुरं प्रतिगुरु भोजननिषेधायोच्यते तदा निषेधावगतिः॥ ॥ ॥

भा०कै०प्र०
१०८
108

नचेदिति॥ क्रियायाः प्राधान्यात्सैव विभाषाग्रहणेन संबध्यते ननु तदंगयिसर्थेः। तदेवं स्थितमेतत् न वा विधिशब्देकत्वादिति। विध्यनित्यत्वमिति। विकल्प इत्यर्थः।
नवाशब्द एक निपातः प्रतिषेधवाची। तस्येहोपादानादिति भावः। परिहाणं तणभिधानायन बहुव्रीहाविति संबद्धं स्यादिति नोक्तं। सिद्धं त्विति। प्रतिषेधाद्विधिर
नुमास्यते। ततो विकल्पः सेत्स्यतीत्यर्थः॥ न वा प्रसंगेति। सामर्थ्याद्विधिप्रतिषेधयोः पर्यायो भविष्यतीत्यर्थः। महतीसंज्ञेति। तेनद्भावत्र संज्ञिनो विकल्पप्र

* विप्रतिषिद्धं त्विति। एकविषययोर्विधिप्रतिषेधयोर्विरोधादित्यर्थः॥ ४१

बर्प०
नचेहं विभाषाग्रहणेन सर्वादीन्यभिसंबध्नीमः। दिक्समासे बहुव्रीहौ सर्वादीनि विभाषा भवंतीति। किं तर्हि भवतिरभिसंबध्यते। दिक्समा
बहुव्रीहौ
सेसर्वादीनि भवंति विभाषेति। विध्यनित्यत्वमनुपपन्नं प्रतिषेधसंज्ञाकरणात्। विधेरनित्यत्वं नोपपद्यते। शुशाव शुशुवतुः शुशु
वुः। शिश्वाय शिश्वियतुः शिश्वियुः। किं कारणं। प्रतिषेधसंज्ञाकरणात्। प्रतिषेधस्येयं संज्ञा क्रियते तेन विभाषाप्रदेशेषु प्रतिषेध
स्यैव संप्रसयः स्यात्। सिद्धं तु प्रसज्यप्रतिषेधात्। सिद्धमेतत्। कथं। विधाय किंचिन्नवेत्युच्यते। तेनोभयं भविष्यति। विप्रतिषिद्धं तु वि
प्रतिषिद्धं तु भवति। अत्र न ज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति। न वा प्रसंगसामर्थ्यादन्यत्र प्रतिषेधविषयात्। न
वा एष दोषः। किं कारणं। प्रसंगसामर्थ्यात्। प्रसंगसामर्थ्याच्च विधिर्भविष्यति। अन्यत्र प्रतिषेधविषयात्। प्रतिषेधसामर्थ्याच्च प्रतिषेधो भ
विष्यति। अन्यत्र विधिविषयात्। तदेतत्क्व सिद्धं भवति या प्राप्ते विभाषा। या हि प्राप्ते क्व तत्सामर्थ्यं तत्र पूर्वेणैव विधिरिति कृत्वा प्रति
षेधस्यैव संप्रसयः स्यात्॥ एतदपि सिद्धं। कथं विभाषेति महती संज्ञा क्रियते संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकर
णं तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनं उभयोः संज्ञा यथा विज्ञायते नेति [redacted] वेति च॥ ॥ ॥

तिषेधाविसर्थः। यदिहि केवलः प्रतिषेधः संज्ञी स्यात् संज्ञाकरणमनर्थकं स्यात् विभाषाप्रदेशेषु नेत्येव ब्रूयात् तत्र समुदायस्येयं संज्ञेति विभाषाप्रदेशे एम०
षु विकल्पप्रतिषेधावुपतिष्ठेते। अप्राप्ते विभाषास्तु चप्राप्तभावात्प्रतिषेधस्याव्यापाराद्विकल्प एवोपतिष्ठते॥ ॥ १०८

एवमपीति। यद्यपि विरुद्धयोरेकासंज्ञा क्रियते तथापि प्रदेशेषु विरोधाद्युगपद्भावाभावो विधातुं न शक्यते इत्यर्थः। सिद्धं त्विति। उभयत्र विभाषास्तु प्रतिषेधेन समीक्ष्य
ते देशे पश्चाद्विकल्पः प्रवर्त्तते इत्यर्थः। यदि तु पूर्वं विकल्पः प्रवर्त्तते पश्चात्प्रतिषेधस्ततो विकल्पप्रवृत्तिरनर्थिकैव स्यात्। आनुपूर्वी चैषैव संज्ञा विधावाश्रिता सैव प्रदेशे
वाक्येष्वप्याश्रीयते। उभयत्र विभाषार्था चेयं संज्ञा प्राप्ते विभाषायां अप्राप्ते विभाषायां च संज्ञाकरणस्यानुपयोगात्। तथा हि। प्राप्ते विभाषास्तु पक्षे निवृत्तिः क्रि
यते पक्षे तु प्रवृत्तिः स्थितैव। अप्राप्ते विभाषास्तु च पक्षे कार्यस्य प्रवृत्तिः क्रियते। पक्षान्तरे त्वप्रवृत्तिः स्थितैवेति नास्ति तत्र संज्ञाफलं। विभाषाग्रहणस्य तु यदि वि

तत्र या तावदप्राप्ते विभाषा तत्र प्रतिषेधं नास्ति इति कृत्वा वेत्यनेन विकल्पो भविष्यति। या हि प्राप्ते विभाषा तत्रोभयमुपस्थितं भवति। नेति च वेति च नेत्य
नेन प्रतिषिद्धे वेत्यनेन विकल्पो भविष्यति। एवमपि विधिप्रतिषेधयोर्युगपद्वचनानुपपत्तिः। विधिप्रतिषेधयोर्युगपद्वचनं नोपपद्यते। शुश्राव
शुश्रुवतुः शुश्रुवुः। शिश्वाय शिश्वियतुः शिश्वियुः। किं कारणं। भवतीति चेन्न प्रतिषेधः। भवतीति चेत्प्रतिषेधो न प्राप्नोति। नेति चेन्न विधिः। ने
ति चेद्विधिर्न सिध्यति। सिद्धं तु पूर्वस्योत्तरेण बाधितत्वात्। सिद्धमेतत्। कथं। पूर्वं विधिमुत्तरो विधिर्बाधते इति करणोऽर्थनिर्देशार्थ इत्युक्तं। साध्वनुशा
सनेस्मिन् शास्त्रे यस्य विभाषा तस्य साधुत्वं। साध्वनुशासनेस्मिन् शास्त्रे यस्य विभाषा क्रियते स विभाषा साधुः स्यात्। समासस्यैव हि विभाषा क्रियते
॥ तेन समासस्यैव विभाषा साधुत्वं स्यात्॥ ॥ ॥

धिमुखेन विभाषाश्रुतिः प्रवर्त्तते तथापि त्वेव संप्रसारणं विभाषा स्यात् श्विस्तु यजादित्वान्नित्यमेव स्यात्। अथ प्रतिषेधमुखेन प्रवृत्तिस्तदा श्विस्त्वेव विकल्प इति पित्स्तु न स्यात्।
संज्ञाकरणेनानुपूर्वं प्रतिषेधे कृते तत्प्रवृत्ते पश्चाद्विधिमुखेन सर्वत्र पक्षे संप्रसारणस्य प्रवर्त्तनादिष्टं सिध्यति। यदा तु प्रतित्वस्यैव भेदेन विभाषाग्रहणस्यापारः क्वचिद्विधि
मुखेन क्वचित्प्रतिषेधमुखेन तदा संज्ञाकरणमन्तरेणापि सिध्यतीत्यस्य शिष्यो यं योग इति वक्ष्यते। शिष्यो वा विदितत्वादिति। साध्वनुशासन इति। साधुत्वप्रतिपादना
र्थत्वाच्छास्त्रस्य साधुत्वस्यैव प्रधान्याद्विकल्पेन संबन्धः स्यात् ननु तदंगभूतानां समाससंज्ञादीनामपीति भावः। ततश्च विभाषाग्रहणस्यायमर्थः स्याद्विभाषाग्रहणे
॥ साधुसंप्रसारणं भवति पक्षे त्वसाध्विति॥ ॥ ॥

त॰ विकल्पनेः

अस्तु यः साधुरिति। यथा मस्याम स्यस न्निधौ भस्य मेवोपादीयते। न चैव हीति। सर्वदा त्वस्य साधुत्वं नोभय रूपमिति सर्वेः। द्वेधा अप्रतिपत्तिरिति। साधुत्वं विभाषाग्रह
णस्योपयुक्तत्वात् शिष्विय तु रित्यादि रूपं न सिध्यतीत्यर्थः। यस्य पुनरिति। एवं मन्यते व्याकरणे नैव शास्त्रान्युत्पाद्यन्ते तन्मन्यते विभाषाग्रहणेनापूर्वत्वेन विधेयत्वात्सं प्रसार
णमेव विकल्प्यत इति द्वैधं प्रतिपत्तिः शब्दानां सिध्यतीति भावः। यस्यापीति। साधुत्वस्यापौरुषेयत्वादविकल्प्यत्वान्न तदं गानां विकल्पः। न दोषो येति। प्रभुत्वान दुत्वयो
रविकल्प्यत्वात् क्रिया विकल्प्यते। ननु न्यग्रोधे च संज्ञाया भावाभावा विद्यते। इह तु संज्ञाभिसंबध्यत इति। तत्र विरोधः। नैष दोषः। इह हन्ति वाक्येया मुख्या

अस्तु यः साधुः संप्रयोक्ष्यते। असाधुर्न प्रयोक्ष्यते। न चैव हि कदाचिद्राजपुरुष इत्येतस्याम वस्थायां असाधुत्वमिष्यते। अपि च द्वैधा अप्रतिपत्ति
ः। द्वैधं शब्दानामप्रतिपत्तिः स्यात्। इच्छाम श्च पुनर्विभाषाप्रदेशेषु द्वैधं शब्दानां प्रतिपत्तिः स्यादिति तच्च न सिध्यति। यस्य पुनः कार्याः शब्दाः विभा
षा सोऽसमासं निर्वर्त्तयति। यस्यापि नित्याः शब्दास्तस्याप्येषु दोषो न भवति। कथं। न विभाषाग्रहणेन साधुत्वमभिसंबध्यते। किं तर्हि समाससंज्ञा
भिसंबध्यते। समास इत्येषा संज्ञा विभाषा भवति। तद्यथा मेध्यः पशुर्विभाषितः मेध्योऽनड्वान् विभाषित इति। नैतद्विचार्यते अनड्वानानड्वानि
ति। किं तर्हि आलब्धव्यो नालब्धव्य इति। कार्येषु युगपदन्वाचययौगपद्यं। कार्येषु ह्येषु युगपदन्वाचयेन च यदुच्यते तस्य युगपद्वचन
ता प्राप्नोति। न व्यतव्यानीयरः हकुच मंडूकादिति। यस्य पुनर्नित्याः शब्दाः प्रयुक्तानामसौ साधुत्वमन्वाचष्टे। ननु च यस्यापि कार्याः शब्दास्तस्या
[redacted]प्येषु न दोषः कथं प्रत्ययः परो भवतीत्युच्यते॥ ॥ ॥

र्थोभेदाद् भिन्नार्थत्वमाश्रितो ऽन्यत्र तु व्यपेक्षैकार्थीभावभेदेन भिन्नार्थतामाश्रितैकार्थीभाव एव संज्ञाया भावाभावौ नेष्येते इत्युक्तमिति न विरोधः। नित्य
वादी कार्यपक्षे दूषणमाह। कार्येष्विति। युगपद्भावे युगपच्छब्दो वर्तते इति द्वंद्वः कृतः। अन्वाचयः समुच्चयोऽभिमतः। परस्य चकारेणास्थितत्वेन वा विधानं। यस्य का
र्याः शब्दाः सः प्रयोगनिरपेक्षं शब्दानन्वाचष्टे इति तव्यादीनां युगपदुत्पत्तिः प्राप्नोति॥ ॥ ॥ एष॰ १०९

नचैकस्या इति॥ ननु च वृद्धिनिमित्तेऽपि परशब्दः प्रवर्त्तते। सत्यं। किंतरां तस्य मनपेक्ष्यार्थं तर्यमारोप्य तत्र परशब्दप्रयोगः। निर्दिष्टग्रहणात्त्वानंतर्यार्थे इति कुतो वृद्धिनिमित्तस्य प्रसंगः। कथं
तर्हि उक्तं एका प्रकृतिर्द्वे ह्वे च प्रत्यय इति। तत्र यस्मात्प्रकृतेरेकत्वात्तस्याश्च परत्वादानंतर्यो [redacted] च्चादोषः। तथापि यत्त्वे
का कृतियुक्ता न भवतीति। नापि ब्रूम इति। एकस्याः प्रकृतेः भवंति त्रिनि ब्रूमः किं तर्हि प्रत्ययांतरेण प्रकृत्यंतरस्याक्षेपात्कृत्यमिति प्रयुयुक्षिते करणीयादीनामपि प्रयो
गः प्राप्नोतीति॥ अर्थे गत्यर्थे इति। तत्र तन्नानीयर इत्यस्माद्वाक्यांतराणुपपन्नं प्रतिपादकानि धातोस्तव्यदूवति भावकर्मणोरित्यादीनि। तत्र कर्त्तव्यशब्देन तत

न चैकस्याः प्रकृतेरनेकप्रत्ययस्य युगपत्परत्वेन संभवोस्ति। नापि ब्रूमः प्रत्ययमात्रात्प्राप्नोतीति किं तर्हि कर्त्तव्यमिति प्रयोक्तव्ये युगपद्द्वितीय
स्य तृतीयस्य च प्रयोगेण भवितव्यं। नैष दोषः। अर्थे गत्यर्थः शब्दप्रयोगः। अर्थं संप्रत्याययिष्यामीति शब्दः प्रयुज्यते। तत्रैकेनोक्तत्वात्तस्यार्थस्य
द्वितीयस्य तृतीयस्य च प्रयोगेण न भवितव्यं। उक्तार्थानामप्रयोग इति। आचार्यदेशशीलनेन च तद्विषयता। आचार्यशीलनेन देशशीलनेन
न च यदुच्यते तस्य तद्विषयता प्राप्नोति॥ इको ह्रस्वो ङ्यो गालवस्य प्राचामवृद्धात्फिन्बहुलमिति। गालवा एव ह्रस्वत्वं युंजीरन् प्राक्षु चै
व हि फिक्स्यात्। तद्यथा। जमदग्निर्वा एतत्संचममवदानमवाद्यत तस्माज्जामदग्न्याः पंचावत्तं जुहोति। यस्य पुनर्नित्याः शब्दाः गालवग्रह
१णं तस्य पूजार्थं देशग्रहणं च कीर्त्यर्थं॥ ॥ ॥

स्यार्थस्य प्रतिपादितत्वात्करणीयशब्देन प्रयुज्यते। आचार्येति। आचार्यस्य देशस्य च पुनः पुनः संकीर्त्तनमाचार्यदेशशीलनं। तत्र तस्य शब्दस्य तद्विषयत्वमेव स्या
त्। सर्वप्रयोक्तृप्रसंगे गालवस्येति नियमार्थं स्यात्। यस्य पुनरिति। अनादित्वाच्छब्दव्यवहारस्य नित्यत्वपक्षे नास्ति प्रयोक्तृनियमः। केवलं गालवः स्मर्तृत्वेन स्मर्यते। स्मर्तृत्वेन तस्य शा
स्त्रस्य प्रामाण्यं प्रतिपादयितुमिति पूजार्थमाचार्यग्रहणं। शास्त्रस्य स्वनाद्यर्थप्रतिपादकत्वात्पूजा भवति। कीर्त्यर्थमिति। कीर्त्तौ सत्यां तेषां स्वर्गाद्यवस्थानं स्थिरं भवति।
१ यथा इंद्रद्युम्नादीनाम्॥ ॥ ॥

भा० कै० प्र० ११० 110

ननु च यस्यापीति गकार्यपक्षेऽपि पूजार्थाश्रयते व्याख्यातुं यस्माद्गालवेन ह्रस्वत्वं प्रयुक्तं तस्मात्त्वमपि प्रयुङ्क्ष्वेति स्तुत्यर्थोऽर्थवादः स्यादित्यर्थः। इदानीं कार्यपक्षे दूषणमाह। अत
त्कीर्त्तनं इति। कार्यपक्षेऽयमर्थः स्यात् यस्माद्गालवेन ह्रस्वत्वं प्रयुक्तं तस्मात्प्रयोक्तव्यमिति। तत्र च ह्रस्वत्वस्य विकल्पो न स्यात्। नित्यत्वपक्षेऽनु गालवो ह्रस्वत्वस्य स्मर्त्ता
न्यो दीर्घस्येति स्मरंस्तत्रानुसंधानद्वारेण विकल्पः सिध्यतीति नित्यपक्ष एव युक्तः। अशिष्यो वेति। वाशब्दो विकल्पे। तेनाकृतिपक्षे उभयत्र विभाषार्थं सूत्रं चैकत्र्यं। व्यक्ति
पक्षे तु लक्ष्यभेदेन लक्षणभेदात् क्वचित्किंचित्लक्षणं विधिमुखेन प्रवर्त्तते क्वचिन्निषेधमुखेन प्रवर्त्तते इतीष्टसिध्यात्सूत्रं न कर्त्तव्यं इत्यर्थः। अप्राप्ते इति। अधिका

ननु च यस्यापि कार्यो ऽध्याहारः तस्यापि गालवग्रहणं पूजार्थं देशग्रहणं च कीर्त्यर्थं। तत्कीर्त्तने द्वेधाप्रतिपत्तिः। तत्कीर्त्तने च द्वैधं शब्दानामप्रतिपत्तिः।
इच्छामश्च पुनराचार्यग्रहणेषु देशग्रहणेषु च द्वैधं शब्दानां प्रतिपत्तिः स्यादित्येतच्च न सिध्यति। अशिष्यो वा विदितत्वात्। अशिष्यो वा पुनरयं योगः। किं
कारणं। विदितत्वात्। यदनेन योगेन प्रार्थ्यते तस्यार्थस्य विदितत्वात्। [redacted]
मं४ ये पि त्वेतां संज्ञां नारंभन्ते तेऽपि विभाषेत्युक्ते नित्यत्वमवगच्छन्ति। याज्ञिकाः खल्वपि संज्ञामनारभमाणा विभाषेत्युक्ते नित्य
त्वमवगच्छन्ति। तद्यथा मेध्यः पशुर्विभाषितो मेध्यो नडुन्विभाषितः इति। आलब्धव्यो नालब्धव्य इति गम्यते। आचार्यः खल्वपि संज्ञामारभमाणो भूयि
ष्ठमन्यैरेव शब्दैरेतमर्थं संप्रत्यापयति बहुलमन्यतरस्यामुभयथा वा एकेषामिति। अप्राप्ते त्रिसंज्ञायां। इत उत्तरं या विभाषा अनुक्रमिष्यामः अप्राप्ते ताः
द्रष्टव्याः। त्रिसंज्ञायास्तु मवेति। प्राप्ते। प्राप्ते उभयत्र वेति। द्वन्द्वे च विभाषा जसि प्राप्ते। प्राप्ते उभयत्रेति संदेहः। कथं प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। उभयत्र
॥ बहु सर्वादिषु पठ्यते तत्र यप्रत्यये याज्जादेशः क्रियते तेन नित्यमप्राप्ते ऽन्यत्र वाप्राप्ते उभयत्र वेति। अप्राप्ते ॥ ॥ ॥
णेयं। त्रिसंज्ञायाम् इति। त्रिष्वर्थेषु संज्ञायास्तु नाम्नि संज्ञायाः। द्वंद्वे चेति। प्रकरणोपलक्षणार्थमेतदुपात्तं प्रथमचरमतयेत्यत्र तयग्रहणोसंज्ञः। तत्र तयप्रत्ययस्य प्रयोजनं सर्वना
मा व्ययसंज्ञा यामिति वान्यत्र संज्ञाविज्ञानार्थे केवलस्य प्रयोगाभावात्तदंतस्यैव सर्वनामत्व संभवात्तस्य यग्रहणं इति परिभाषया तदंतविधिः॥ न त्वयदि सर्वादिग्रहणेन तयांतं
विशेष्यते नेमशब्दो ऽव्यभिचारात्प्रथमादयस्त्वसंभवान्न विशेष्यंते। तदोभयशब्दस्य जसि नित्यासंज्ञा विभाष्यत इति प्राप्तविभाषा स्यात्। अथ सर्वादीनीति नित्यं पूर्वं विप्रतिषेध राम० ११०
॥ अन्तरं प्राप्तविभाषा। अथ परविप्रतिषेधस्तदोभयत्र विभाषा॥ ॥ ॥

प्रत्ययांतरमिति ॥ आदेशपक्षे पूर्वविप्रतिषेधो वक्तव्य इति प्रत्ययांतरपक्ष आश्रितः । उभा उदात्त इत्यत्र तयस्येति नानुवर्त्तते तदा प्रत्ययांतरमयज् भवति । तैलमात्रेति । प्रत्याहा
रे सति चकारेण मात्रशब्दो न विशेषित इति । कुण्या मात्रमुभमसि वसि मयट्त्रं त्रितित्त्वनं तादपि मात्रशब्दानुः प्रसंगः । सदृशस्यापीति । प्रमाणे वर्त्तमानान्मात्रमेवेयो मात्रज्
विहितः स प्रत्याहारेण गृह्यत इत्यर्थः ॥ ऊर्णोतेर्विभाषेति । विभाषोर्णोरिति सूत्रं यद्यसंयोगाल्लिट् किदित्यत्रानुवर्त्तते ऊर्णुञ्च संयोगांतः एवेत्यसंयोगग्रह
णाद्वाक्यभेदेनोर्णोः परस्येडादेः लिटो नित्यं कित्वं प्राप्तं विकल्प्यते ततः प्राप्तविभाषा । इदुपजीवनार्थमनुवृत्त्या नांतरे सूत्रं पठितं । अथ तत्र सूत्रं नानुवर्त्तते परवि

अयच प्रत्ययांतरं ॥ यदि प्रत्ययांतरं उभयीति ईकारो न प्राप्नोति । मा भूदेवं मात्रजित्येवं भविष्यति । कथं । मात्रजिति नेदं प्रत्ययग्रहणं । किंत
र्हि प्रत्याहारग्रहणं । कस्मिन्निविष्टानां प्रत्याहारः । मात्रशब्दात्प्रभृति आ अयच ष्टकारात् । यदि प्रत्याहारग्रहणं कतितिष्ठति अत्रापि प्राप्नो
ति । अत इति वर्त्तते । एवमपि तैलमात्रा घृतमात्रा अत्रापि प्राप्नोति । सदृशस्यापसन्निविष्टस्य न भविष्यति प्रत्याहारे ग्रहणं । ऊर्णोतेर्वि
भाषा । प्राप्ते अप्राप्ते उभयत्रेति सन्देहः । कथं प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र । असंयोगाल्लिट् किदिति वा नित्ये प्राप्ते अन्यत्र
वा प्राप्ते उभयत्र वेति । अप्राप्ते ॥ स्पृद्धि कित्वमस्पृद्धि ङित्वं एकं चेन्ङि. त्किते य ङेकं ङि. त्किते ततः सन्देहः । अथ हि नानानास्ति सन्देहः । यद्यपि
नानाएवमपि सन्देहः । प्रोर्णुवीति । सार्वधातुकमपिदिति नित्ये प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति अप्राप्ते ॥ ॥ ॥

प्रतिषेधश्चुतनोः प्राप्तविभाषा । अथ पूर्वविप्रतिषेधस्तदोभयत्रेति संशयः । अन्यद्धीति । व्यपदेशातिदेशो यमिति किल्ङि. त्वयोर्भेदः । एकं चेदिति । कार्याति
देशपक्षे गुण निषेधस्य कार्यस्य केवलादेकत्वमनयोरित्यर्थः ॥ प्रोर्णुवीति । लट्. उत्तमैकवचनं । सार्वधातुकमपिदिति सत्र विभाषोर्णोरित्येन द्वाक्यभेदेन संब
ध्यते ततः प्राप्तविभाषा । अथासंबंधः पूर्वविप्रतिषेधश्चुतदोभयत्र विभाषा । परविप्रतिषेधे वेलप्राप्ते ॥ ॥ ॥

भा०कौ०प्र०
१११
।।।

विभाषोपयमने इति। यदा गंधनं गमुपयमनं तत्र गत्यते तदाप्राप्ते। पूर्वविप्रतिषेधेनत्वप्राप्ते। परविप्रतिषेधे उभयत्रे तिसंदेहः। जातिरिति चर्मादिमयास्तदा मृगादयो ग्राह्याः। निवृत्तेत्यपिति॥ तन्निवृत्तौ चर्मणो गता चर्मादिमयानाम ग्रहणं। प्रत्ययांतादिति वेति। कथं पुनः प्रत्ययांताः शब्दाः रूपांतरयुक्ताः उपादिप्रपदे शत्वमंते। उच्यते। सनाद्यंताधातव इत्यस्य यदा यम घोर्व्याख्यायते धातवः सनोद्यवयवा भवंति धातूनामंतावयवाः सनादयो भवंति। ये पासमासांता छजादयस्तदा पूर्वोक्तचो।

विभाषोपयमने। प्राप्ते प्राप्ते उभयत्र वेति संदेहः। कथं प्राप्ते कथं वा अप्राप्ते कथं वा उभयत्र। गंधन इति वानिसेप्राप्ते। अन्यत्र वाप्राप्ते उभयत्र वेति।
अप्राप्ते गंधन इति निवृत्तं। अनुपसर्गाद्वा। प्राप्ते प्राप्ते उभयत्र वेति संदेहः॥ कथं प्राप्ते कथं वा अप्राप्ते कथं वो भयत्र। हृन्निसर्गानायने षुक्म इति वानिसेप्राप्ते। अन्यत्र वाप्राप्ते उभयत्र वेति। अप्राप्ते। हृसादिष्विति निवृत्तं। विभाषा हृक्षमृगादीनां। प्राप्ते प्राप्ते उभयत्र वेति संदेहः।
कथं प्राप्ते कथं वा अप्राप्ते कथं वो भयत्र। जातिरप्राणिनामिति वानिसेप्राप्ते। अन्यत्रवाप्राप्ते उभयत्र वेति। अप्राप्ते जातिरप्राणिनामिति निवृत्तं। उपविदजागुर अन्यतरस्यां। प्राप्ते प्राप्ते उभयत्र वेति संदेहः। कथं प्राप्ते कथं वा अप्राप्ते कथं वो भयत्र। प्रत्ययांतादिति वानिसेप्राप्ते। अन्यत्र वाप्राप्ते उभयत्र वेति [redacted] अप्राप्ते प्रत्ययांताधातूनां तरादि। दीपादीनां विभाषा। प्राप्ते प्राप्ते उभयत्र वेति संदेहः। कथं प्राप्ते कथं वा अप्राप्ते कथं वो भयत्र। भावकर्मणोरिति वानिसेप्राप्ते। अन्यत्र वाप्राप्ते उभयत्र वेति। अप्राप्ते कर्तरीति हि वर्तते। एवमपि संदेहः। अप्याप्येवा कर्तरि कर्मकर्तरि वेति। नास्ति संदेहः। सकर्मकस्य कर्तृत्वाकर्मवद्भवति॥ ॥ ॥

घ्या भावः। प्रत्ययांता इति। सनाद्यंता धातव इत्ययं योगः संज्ञासंज्ञिसंबंधार्थ इति भावः। भावकर्मणोरिति वेति। चिण्भावकर्मणोरिति सूत्रे पदादी पजने सेन तत्सूत्रमनुवर्त्यसेवा सभेदेन संबंधः क्रियते पृथक्पाठसामर्थ्यात् तदाप्राप्त विभाषा। अथनानुवर्त्तते परविप्रतिषेधन्तु तदा प्राप्ते विभाषा पूर्वविप्रतिषेधेनूभयत्र वि

॥१०॥ प्रक्रियासंदेहः
एम०
१११

अकर्मकाश्चेति॥ यद्यपि बुधिः सकर्मकस्तथापि एकपरिहारोपन्यासार्थमविशेषेणोक्तं। सोपसर्गो इति। अर्थान्तरवृत्तित्वादनुभवतीति वदितिभावः। कर्तृस्थभावकाश्चेति। अचः कर्तृयकीति स्वयमेव लुनाति। तस्य एव थे वृत्तित्वात्कर्मस्थभावकत्वमिति नास्ति तेनास विशेषः। आभीक्ष्ण्ये इति निवृत्तमि

अकर्मकाश्च दीपादयः। अकर्मका अपि वे सोपसर्गाः सकर्मका भवंति। कर्मापदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवंति। कर्तृस्थभावकाश्च दीपादयः। विभाषा ग्रे प्रथमपूर्वेषु। प्राप्ते अप्राप्ते उभयत्र वेति संदेहः। कथं प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। आभीक्ष्ण्ये इति वा निसे प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति। अप्राप्ते आभीक्ष्ण्ये इति निवृत्तं। तन्नादीनां विभाषा। प्राप्ते अप्राप्ते उभयत्र वेति संदेहः कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। आक्रोशे इति वा निसे प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति। अप्राप्ते। आक्रोश इति निवृत्तं। एकहलादौ पूरयितव्ये अन्यतरस्यां। प्राप्ते अप्राप्ते उभयत्र वेति संदेहः। कथं प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। उदकस्योदः संज्ञायामिति वा निसे प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति। अप्राप्ते संज्ञायामिति निवृत्तं। श्वादेरिञि पदां तस्यान्यतरस्यां। प्राप्ते अप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते [redacted] कथं वा अप्राप्ते कथं वोभयत्र। इञीति वा निसे प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति। अप्राप्ते। इञीति निवृत्तं। सपूर्वायाः प्रथमाया विभाषा। प्राप्ते अप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। चादिभिर्योग इति निसे प्राप्ते अन्यत्र वा अप्राप्ते उभयत्र वेति। अप्राप्ते चादिभिर्योग इति निवृत्तं। ग्रो यङ्यचि विभाषा। प्राप्ते अप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। यङीति वा निसे प्राप्ते अन्यत्र वा प्राप्ते उभयत्र वेति। अप्राप्ते। यङीति निवृत्तं॥ ॥ ॥

ति। पूर्वविप्रतिषेधश्चेति भावः। तन्नादीनामिति। आक्रोशे इत्यत्र यद्यप्योनानुवर्त्तते ततोयं संशयः। एकहलादाविति। पूरयितव्यस्य चास्ति संज्ञा उदपानमिति। चादिभिरिति। प्रतिषेधस्याप्राप्तविभाषास्यापत्ते। विधेस्तु प्राप्तविभाषैव। यङीति वेति। यङ्लुकि कृते अजादिः परः संभवति निजेगिल इत्यत्र प
((वा घ चिह्न तेयङो चिचेति लुक्॥ ॥ ॥

भा०कौ०प्र०
११२
112

प्राप्ते चेति॥ प्रकृतानुवृत्त्या प्राप्तविभाषाव्यवतिष्ठते। अन्यत्र वेति। विप्रवदंतिशकुनय इत्यत्र पूर्वविप्रतिषेधश्चयदीति भावः। विभाषोपपदेनप्रतीयमानेइति।
कर्त्रभिप्राये क्रियाफलविषये आत्मनेपदं भवतीत्येवं प्राप्तविभाषा व्यवतिष्ठते। अयतु तदर्थद्योतनायात्मनेपदं क्रियतेतदोपपदेनैव द्योतितत्वादप्रा

प्राप्ते चाइतउत्तरं याविभाषा अनुक्रमिष्यामः प्राप्तेता द्रष्टव्याः त्रिसंपायास्तु भवंति। प्राप्ते ऽप्राप्ते उभयत्र वेति। विभाषाविप्रलापे। प्राप्ते ऽ
प्राप्ते उभयत्रवेति संदेहः। कथं च प्राप्ते कथं वा ऽप्राप्ते कथं वोभयत्र। व्यक्तवाचामिति वानिसे प्राप्ते ऽन्यत्र वा प्राप्ते उभयत्र वेति। प्राप्ते। व्य
क्तवाचामिति हि वर्त्तते। विभाषोपपदेनप्रतीयमाने। प्राप्ते ऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा ऽप्राप्ते कथं वोभयत्र। स्वरित
ञित इति वा निसे प्राप्ते ऽन्यत्र वा प्राप्ते उभयत्र वेति। प्राप्ते। स्वरितञित इति हि वर्त्तते। तिर्गतेर्दौ विभाषा कृञि। प्राप्ते उभयत्र वेति संदे ऽप्राप्ते४
हः। कथं प्राप्ते कथं वा प्राप्ते कथं वोभयत्र। अं तर्द्धौ वितिं निसे प्राप्ते ऽन्यत्र वा प्राप्ते उभयत्र वेति। प्राप्ते तर्द्धौ विति हि वर्त्तते। अधिरी
श्वरे विभाषा कृञि। प्राप्ते ऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा ऽप्राप्ते कथं वोभयत्र। ईश्वर इति वा निसे प्राप्ते ऽन्यत्र वा प्रा
प्ते उभयत्र वेति। प्राप्ते। अधिरीश्वर इति वर्त्तते। दिवस्तदर्थस्य विभाषोपसर्गे। प्राप्ते ऽप्राप्ते उभयत्र वेति संदेहः। कथं च प्राप्ते कथं वा ऽ
प्राप्ते कथं वोभयत्र। तदर्थस्येति वा निसे प्राप्ते ऽन्यत्र वा प्राप्ते उभयत्र वेति। प्राप्ते तदर्थस्येति वर्त्तते॥ उभयत्र च। इत उत्तरं या
विभाषा अनुक्रमिष्यामः उभयत्रताः द्रष्टव्याः। त्रिसंशयास्तु भवंति। प्राप्ते ऽप्राप्ते उभयत्र वेति। हृक्रोरन्यतरस्याम्। प्राप्ते ऽप्राप्ते उभयत्र वेति
संदेहः। कथं प्राप्ते कथं वा ऽप्राप्ते कथं वोभयत्र। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता सणाविति वा निसे प्राप्ते ऽन्यत्र वा
"प्राप्ते उभयत्र वेति [redacted]। उभयत्र। प्राप्ते तावत्। अभ्यवहारयति सैंधवान्। अभ्यवहारयति
प्त विभाषा स्यात्॥ गतिबुद्धीति। तत्र विपूर्वो हरतिर्गत्यर्थः अभ्यवपूर्वः प्रत्यवसानार्थः॥ करोतिः क्वचिदकर्मको यथा विकुर्वते सैंधवा इति॥ ॥ राम०
११२

यदीति वेति॥ प्रतिषेधे प्राप्ते इडसमर्थः। त्वरत्तु यदि प्रतिषिद्धः। देवपत्नी सादिन विचारितं। तस्मादिडिः प्राप्तप्रदर्शनार्थे कृतं॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैयटकृ

विकारयति सैंधवान् विकारयति सैंधवैः। अप्राप्ते हरति भारं देवदत्तः हारयति भारं देवदत्तं। हारयति भारं देवदत्तेन। करोति कटं देवदत्तः। कारयति कटं देवदत्तेन कारयति कटं देवदत्तं॥ न यदि विभाषा साकांक्षे। प्राप्ते। प्राप्ते उभयत्र वेति सन्देहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र।
यदीति वानिसे प्राप्ते। अन्यत्र वा। प्राप्ते उभयत्र वेति। उभयत्र। प्राप्ते तावत्। अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः। यत्कश्मीरेषु वसाम।
नो ५ यत्तत्रौदनं भोक्ष्यामहे। यत्तत्रौदनमभुंज्महि। अप्राप्ते अभिजानासि देवदत्त कश्मीरान् गमिष्यामः॥ कश्मीरान् गच्छाम। तत्रौदनं भोक्ष्यामहे तत्रौदनमभुंज्महि। विभाषा श्वेः। प्राप्ते। प्राप्ते उभयत्र वेति सन्देहः। कथं च प्राप्ते कथं वा अप्राप्ते कथं वोभयत्र। क्तीति वानिसे प्राप्ते। अन्यत्र वा। प्राप्ते उभयत्र वेति। उभयत्र। प्राप्ते तावत्। शुशुवतुः शुशुवुः शिश्वियतुः शिश्वियुः। अप्राप्ते। शुशुवा। शुशाविथ शिश्वायशिश्वयिथ। विभाषा संघुषास्वनां। संपूर्वो घुषेः प्राप्ते [redacted]। प्राप्ते उभयत्र वेति सन्देहः। कथं च प्राप्ते कथं वा। प्राप्ते कथं वोभयत्र। घुषिरविशब्दे न इति वानिसे प्राप्ते। अन्यत्र वा। प्राप्ते उभयत्र वेति। उभयत्र। प्राप्ते तावत्। संघुष्टा रज्जुः संघुषिता रज्जुः। अप्राप्ते संघुष्टं वाक्यमाह संघुषितं वाक्यमाह। आङ्पूर्वात् स्वनेः प्राप्ते। प्राप्ते उभयत्र वेति सन्देहः। कथं च प्राप्ते कथं वा। प्राप्ते कथं वोभयत्र। मनसीति वानिसे प्राप्ते। अन्यत्र वा। अप्राप्ते उभयत्र वेति। उभयत्र। प्राप्ते तावत्। आस्वान्तं मनः आस्वनितं मनः। अप्राप्ते आस्वनितो देवदत्तः आस्वान्तो देवदत्त इति॥
॥ ॥ इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकं॥ ॥ ॥

कृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य प्रथमे पादे षष्ठमाह्निकं॥ ॥ श्री॥ ॥९१॥

भा०कै०प्र०
११२
113

इग्यणः संप्रसारणम्॥ पक्षद्वयेऽपि लिंगदर्शनाद् युगपच्चोभयोः संज्ञित्वस्यैकस्मिन्वाक्येऽनुपादानादेकतरपक्षाश्रयणे सर्वकार्यासिद्धिप्रसंगात्प्रश्नः। किमियमिति।
वाक्यशब्देन वाक्यार्थ उच्यते। इग्यण इत्यत्र भवतीत्यध्याहारादिग्यणो भवतीति योऽयं वाक्यार्थस्तस्येयं संज्ञेत्यर्थः। अथवा वाक्यस्यैवेयं संज्ञा न प्रतिपादितं च वाक्यं
स्वार्थमपि प्रतिपादयति। यणः स्थाने य इग्वर्णः स संप्रसारणसंज्ञ इति वर्णसंज्ञापक्षः। वर्णविधिरिति। वर्णाश्रयो विधिर्दीर्घादिः। नहीति। वाक्यार्थेन पो-

इग्यणः संप्रसारणम्॥ किमियं वाक्यस्य संप्रसारणसंज्ञा क्रियते। इग्यण इत्येतद्वाक्यं संप्रसारणसंज्ञं भवतीति आहोस्विद्वर्णस्य इग्यो यणः
स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति। कश्चात्र विशेषः। संप्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिः। संप्रसारणसंज्ञायां वाक्यस्य संज्ञा
चेद्वर्णविधिर्न सिध्यति। संप्रसारणस्य च पूर्वो भवतीति संप्रसारणस्य दीर्घो भवति। नहि वाक्यस्य संप्रसारणसंज्ञायामेष निर्देश उपप-
द्यते नाप्येतयोः कार्ययोः संभवोऽस्ति। अस्तु तर्हि वर्णस्य। वर्णसंज्ञा चेन्निर्वृत्तिः। वर्णसंज्ञा चेन्निर्वृत्तिर्न सिध्यति। ष्यङः संप्रसारणमि-
ति स एव हि तावदिक् दुर्लभः यस्य संज्ञा क्रियते। अथापि कथंचिल्लभ्येत केनासौ यणः स्थाने स्यात्। अनेन नचैव वक्ष्यसे सोऽक्ष वस्यापनेत
देतद्वितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। विभक्तिविशेषनिर्देशस्तु ज्ञापकः॥ ॥ ॥

र्वापर्याभावान्न स्यच्चासत्वभूतस्य स्थानित्वाभावादिसं(सं)अर्थः। दुर्लभ इति। कार्यपक्षे न लभ्यते निस[ंप्रसारण]पक्षे तु लभ्यत इति दुर्लभत्वमुक्तं। केनासाविति। लोके इगेव राम०
नि संप्रयोगेऽस्ति न स्यात्तु यणः स्थानिकत्वं शास्त्रे समधिगम्यमित्यर्थः। भाविसंज्ञाविज्ञानं तु परिहारान्तराभिधानाय न तावदत्रोक्तं॥ ॥ ११२

उभयसंज्ञात्वस्येति। उभयोः संज्ञा उभयसंज्ञा तस्याः भाव उभयसंज्ञात्वं। तत्र तेनावृत्तैकशेषाणामनाश्रयणे नोभयोः संज्ञा सिध्यति। यथा काकादि-ति। ननु काकत्वमिति संबन्धात्काकः। अप्यत्र चोक्तं। येनैकः काकस्तेनैवापरोपीति। नैष दोषः। यस्त्वनुपजातजातिमिवंजकसंस्थानविशेषः काको भवति नि-र्ज्ञातं च तस्य काकाज्जन्मत इति उक्तं। एवमिहापि संप्रसारणज्ञातत्वादुपचारादत्तोपितात्यक्ष्य ब्द्धुलमते इति भावः। प्रविश्येति। प्रवेशनक्रियाकर्मयोग्यमा

उभयसंज्ञात्वस्य॥ यदयं विभक्तिविशेषैर्निर्देशं करोति संप्रसारणात्परः पूर्वो भवतीति संप्रसारणस्य दीर्घो भवति ष्यङः संप्रसारणं भवति इति तेन ज्ञायते उभयोः संज्ञा भवतीति। यत्तावदाह। संप्रसारणात्परः पूर्वो भवतीति संप्रसारणस्य दीर्घो भवतीति तेन ज्ञायते वर्णस्य भवतीति। यदप्याह ष्यङः संप्रसारणमिति तेन ज्ञायते वाक्यस्य भवतीति। अथवा पुनरस्तु वाक्यस्यैव ननु चोक्तं संप्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिर्न सिध्यतीति। नैष दोषः। यथा काकाज्जातः काकः श्येनाज्जातः श्येनः एवं संप्रसारणाज्जातं संप्रसारणं तस्मात्परः पूर्वो भवति तस्य दीर्घो भवतीति। अथवा दर्शनं हि वाक्येषु वाक्यैकदेशान् प्रयुंजानाः पदेषु पदैकदेशान् प्रयुंजानाः। वाक्येषु तावद्वाक्यैकदेशान्। प्रविश पिण्डीं प्रविश तर्पणं। पदेषु पदैकदेशान्। देवदत्तो दत्तः सत्यभामा भामेति। एवमिहापि संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येति एतस्य वाक्यस्यार्थे संप्रसारणात्संप्रसारणस्येति वाक्यैकदेशः प्रयुज्यते तेन निर्वृत्तस्य विधि-र्विज्ञायते मतः संप्रसारणनिर्वृत्तात्संप्रसारणनिर्वृत्तस्येति॥ ॥ ॥

क्षिपतीति तत्र पिण्डीं प्रवेशासंभवादूहप्रतिपत्तिः एवं पिण्डीमिति कर्मयोग्यां क्रियामाक्षिपत् भक्षणक्रियां प्रकरणवशात्प्रत्याययति। एवं संप्रसार-णादिसेतत्रिर्वृत्तार्थमाक्षिपतीत्यर्थः। यथा च पदैकदेशप्रयोगस्तथा सिद्धे शब्दार्थसंबन्धे इत्यत्र प्रतिपादितं॥ ॥ ॥

अथ वेति॥ यथा ब्राह्मणा शतं भोज्यन्तामित्युक्ते सामर्थ्यात् संख्येया ब्राह्मणा भोज्यन्ते न यथेहापि संप्रसारणादिसुक्ते वाक्यार्थे नपौर्वापर्याभावान्नफलस्य वर्णस्य प्रतीतिः॥ भाविनीति॥ इग्यणः संप्रसारणमिति विधिप्रदेशेषु भाविसंज्ञाविज्ञानमित्यर्थः॥ तिरुं तु निस शब्दत्वादिसेनत्समर्थनार्थमाह॥ अथ वेति॥ बुद्धिविपरिणाममात्रेण त्वान्यादेशभाव इत्यर्थः॥ आसाध्वमिमतस्येति॥ प्राक् संप्रसारणशास्त्रादित्यर्थः॥ यथा संख्यसंबंधात् अदुहितरा

अथवा आहायं संप्रसारणात्परः पूर्वो भवतीति संप्रसारणस्य दीर्घो भवतीति न च वाक्यस्य संप्रसारणसंज्ञायां सत्यामेषु निर्देश उपपद्यते नाप्येतयोः कार्ययोः संभवोस्तीति॥ तत्र वचनानुविष्यति॥ अथवा पुनरस्तु वर्णस्य॥ ननु चोक्तं वर्णसंज्ञा चेन्निर्दिष्टिरिति॥ नैष दोषः॥ इतरेतराश्रयमात्रमेतच्चोदितं॥ सर्वाणि चेतरेतराश्रयाण्येकत्वेन परिहृतानि निसिद्धं तु निसशब्दत्वादिति॥ नेदं तुल्यमन्यैरितरेतराश्रयैः॥ न हि तत्र किंचिदुच्यते॥ स्थाने ये आकारैकारौकारा भाव्यन्ते ते वृद्धिसंज्ञा भवंतीति॥ इह हि पुनरुच्यते इग्यो यणः स्थाने वर्णः स संप्रसारणसंज्ञो भवतीति॥ एवं तर्हि भाविनीयं संज्ञा विज्ञास्यते॥ तद्यथा कश्चित्कंचित्तंतुवायमाह अस्य सूत्रस्य शाटकं वयेति स पश्यति यदि शाटकः न वातव्यः अथ वातव्यः न शाटकः शाटको वातव्यश्चेति विप्रतिषिद्धं भाविनी खल्वस्य संज्ञाभिप्रेता स मन्ये वातव्यः यस्मिन्नुते शाटक इत्येतद्भवतीति॥ एवमिहापि स यणः स्थाने भवति यस्याभिनिर्वृत्तस्य संप्रसारणमित्येषा संज्ञा भवतीति॥ अथवा इजादिर्यजादिः प्रवृत्तिर्लोके दृश्यते॥ यजाद्युपदेशान्तु इजादिनिर्वृत्तिः प्रसक्ता॥ प्रयुंजते च पुनर्लोका इष्टं उप्तमिति ते मन्यामहे स्य यणः स्थाने इममिकं प्रयुंजते इति तस्य तत्रासाध्वभिमतस्य शास्त्रेण साधुत्वमन्वाख्यायते किमिति साधुर्भवति इति साधुर्भवतीति॥ ॥श्री॥ ॥०॥

मितीकारस्य संप्रसारणसंज्ञा न भवति॥ दिव उदित्युत्वे यणादेशे कृते हल इति दीर्घत्वं तपरकरणान्न भवति द्युभ्यामिति॥ अथ द्युवाविस्तत्र संप्रसारणं चेति पूर्वैकादेशो न भवति॥ अचः परस्मिन्निधानात्॥ अथवा वार्णादाङ्गस्य बलीयस्त्वात्॥ ॥श्री॥ ॥०॥

आद्यंतौ टकितौ ॥ लोकव्यवहारादत्र क्रमव्यवस्थानसिध्यति अपितु शास्त्रेऽपीत्येवं निर्देशो नायशब्दः प्रश्नः समासनिर्देशोयमिति भिन्नार्थस्य समासेन प्रतिपादनमि
त्यर्थः यद्यपि देवदत्तस्य यज्ञदत्तस्य च अजा अवयश्च धनमिति वाक्येपि क्रमव्यवस्था नास्ति तथापि समासे सुतरां नास्तीति दर्शयितुं समासनिर्देश इत्युक्तं यद्यपीति दर्शो
नं दृष्टं तस्मात्तो निश्चयः यद्यपि लोके एतद् दर्शनमित्यर्थः संज्ञाधिकारोयमिति यद्येवं संज्ञासंज्ञि संप्रत्ययनार्थां संज्ञिनेश्यामिति यमेव निवर्त्यते इति किमि कृष्ट्वहेणे

आद्यंतौ टकितौ ॥ समासनिर्देशोयं तत्र न ज्ञायते कआदिः कोंत इति तद्यथा अजाविधनौ देवदत्तयज्ञदत्तौ विसुक्ते तत्र न ज्ञायते कस्याजाधनं
कस्यावयइति यद्यपि ताव ल्लोक एषदृष्टांतः दृष्टांतस्यापि तु पुरुषारंभो निवर्त्तको भवति अस्ति चेह पुरुषारंभः अजीत्याह कः संख्यातानुदेशो ना
म कौ पुनष्टकितावाद्यंतौ भवतः आगमाविस्याह युक्तं पुनर्यन्नित्येषु शब्देषु आगमशासनं स्यात् न नित्येषु नामशब्देषु कूटस्थैरविचालिभि
र्वर्णैर्भवितव्यं अनपायोपजनविकारिभिः आगमश्च नामापूर्वः शब्दोपजनः अथ युक्तं यन्नित्येषु नामशब्देषु आदेशाः स्युः बाढं युक्तं
शब्दांतरैरिह भवितव्यं तत्र शब्दांतराच्छब्दांतरस्य प्रतिपत्तिर्युक्ता आदेशास्तर्हीमे भविष्यंति अनागमकानांसागमकाः तत्कथं संज्ञा
धिकारोयं आद्यंतौ चेह संकीर्त्येते टकारककारावुदाह्रियेते तत्राद्यंतयोष्टकारककारावितौ संज्ञे भविष्यतः तत्रार्द्धधातुकस्येड्वलादेरित्युपस्थि
तमिदं भवति आदिरिति तेनेकारादिरादेशो भविष्यति एतावदिह सूत्रं इड् इति कथं पुनरियता सूत्रेण इकारादिरादेशो लभ्यः लभ्य इत्याह
कथं बहुव्रीहिनिर्देशात् बहुव्रीहिनिर्देशोयं इकार आदिरस्येति यद्यपितावँच्छक्यते एवं वक्तुं इहतु कथं लुङ् लङ् लृङ् स्वडुदात्त इति दृत्येत
॥ अत्राशक्य मुदात्त ग्रहणेनाकारोविशेषयितुं तत्रको दोषः ॥ ॥ ॥
नटकाविसेवास्तु नैषदोषः इत्संज्ञकत्वे न देशविशेष उपलक्ष्यते तेनेत्संज्ञकस्य योदेशः तद्देशावस्थितौ टकौ संज्ञे भवत इति प्रात्तजास्यचाविलाट च प्रसये
टकारः संज्ञा न भवति तत्रेड्ग्रहणेनेकारादिः शब्दोपलक्ष्यते स्थानेंतरतमस्यादेशो भवतीति तत्प्रयत्नो भवतीति सिद्धमिष्टम् ॥ • ॥

अङ्गस्योदात्तत्वमिति॥ तच्चालोंसमस्ते संसमस्यात्। त्रिपदोयमिति। विशेषणस्याप्युदात्तस्य सौत्रत्वान्निर्देशस्य परनिपातः। यत्रत्तहीति। तत्राप्युदात्तग्रहणमेवानुवर्त्तते
इत्यशक्यो बहुव्रीहिः। अपि तु मिस थ्र्येः। वक्ष्यसे तदिति। सूत्रस्यैवप्रत्याख्यानाद्दोषः। अथवेति। परिभाषापक्षेपि न दोष इत्यर्थः। नहि व्यवस्थितस्यान्त्यस्य पष्ट्यादिका
रावयवत्वमागच्छति येनानिसत्वं स्यात् किं तर्हि निसंपदमनेनोपायेनान्वाख्यायते। खदिरबुर्बुरयोरिति। निर्द्धारणे षष्ठी। तयोः कं कटवान्खदिर इत्युक्ते द्व्यांतरंख

अङ्गस्योदात्तत्वं प्रसज्येत। नैष दोषः। त्रिपदोयं बहुव्रीहिः। तत्र वाक्य एवोदात्तग्रहणेनाकारो विशेष्यते। अकार उदात्त आदिर्यस्येति। यत्रतत्त्वे
नुवर्त्स्यते तद्भवति। आद्युदात्तानामिति वक्ष्यसे तत्। अद्युदात्तानामदासिद्धमिति। अथवायत्नावदयं सामान्येनोपदेष्टुं शक्नोति तत्नाव उपदिशति।
प्रकृतिं ततो बत्नाद्यार्द्धधातुकं ततः पश्चादिकारं तेनायं विशेषेण शाब्दान्तरं समुदायं प्रतिपद्यते। तद्यथा। खदिरबुर्बुरयोः खदिरबुर्बुरैर्गो
रकांडौ सूक्ष्मपर्णौ ततः पश्चादाह कंकटवान्खदिर इति तेनासौ विशेषेणाद्व्यांतरं समुदायं प्रतिपद्यते। अथवा एतया आनुपूर्व्या अयं शब्दां
तरमुपदिशति। प्रकृतिं ततो बत्नाद्यार्द्धधातुकं ततः पश्चादिकारं यस्मिंस्तस्यागमबुद्धिर्भवति। टकितोराद्यन्तविधाने प्रत्ययप्रतिषेधः। टकि
तोराद्यन्तविधाने प्रत्ययस्य प्रतिषेधो वक्तव्यः। प्रत्ययः आदिरन्तो वा माभूत्। चरेष्टः। आतोनुपसर्गे क इति। परवचनात्सिद्धं। परवचनात्प्र
त्ययः आदिरन्तो वा न भवति। परवचनात्सिद्धमिति चेत्॥ ॥ ॥

दिरं प्रतिपद्यते। नात्र कंकटास्तदानीमारोप्यन्ते प्रतिपादनोपाय एवायमित्यर्थः। अथवेति। एतदाह अस्तिस्तः एधीतित त्वतोरूपाद्योन्वयाभावात्कल्पितामेवा
र्थवत्तामाश्रित्य प्रकृतिप्रत्ययोपदेशेन समस्तस्य परस्यानुसारं क्रियते रेखागवयेनेव सत्यगवयस्य। प्रत्ययप्रतिषेध इति। प्रत्ययपरत्वस्याप्ययमपवादः प्राप्नोतीति रा॰म॰
भावः। परवचनादिति। पुरस्तादपवादन्यायेन स्थानेयोगत्वमेवानेन वाध्यते न प्रत्ययपरत्वमिति भावः॥ ॥ ना॰॥ ११५

नापवादत्वादिति ॥ बाध्यमात्रापेक्षायां पुरस्तादपवादन्यायो नास्तीति भावः। सर्वोपवादवादी आह। प्रयोजनमिति। सतिपरत्वे प्रयोजनमेतत्स्यात्। परत्वमेव त्वलम्प्रमि
सर्थः। टित्करणादिति। ङीबर्थादिसर्थः। कित्करणादिति। आकारलोपार्थात्। प्रयोजनमभ्युपगम्याप्याह। टित इति। कितस्त्विति। ननु परत्वावयवत्वयोर्विरोधा
त्कथमुच्यते परश्चेत्स्यादन्तश्चेति। नैष दोषः। परस्य सतोऽन्तवत्कार्यप्राप्तौ तत्त्वमुच्यते यथा समासान्तानां। टितश्चापीति। पूर्वोक्तमेव समर्थयते। धिकं वक्तुं। णापोष्टगि

नापवादत्वात्परवचनासिद्धमिति चेत्। तन्न। किं कारणं। अपवादत्वात्। अपवादोऽयं योगः। तद्यथा। मिदचोऽन्त्यात्पर इत्येष योगः स्थानेयो
गत्वस्य प्रत्ययपरत्वस्य चापवादः। विषम उपन्यासः। युक्तं तत्र यदनवकाशं मित्करणं स्थानेयोगत्वं प्रत्ययपरत्वं च बाधते। इह तु पुनरुभयं सावका
शं। कोऽवकाशः। टित्करणस्यावकाशः। टित इतीकारो यथा स्यात्। कित्करणस्यावकाशः। कितीत्याकारलोपो यथा स्यात्। प्रयोजनं नाम तद्वक्तव्यं
यन्नियोगतः स्यात्। यदि चायं नियोगतः परः स्यात्तत एतत्प्रयोजनं स्यात्। कुतो नु खल्वेतत्। टित्करणादयं परो भविष्यतीति न पुनरादिरि
ति कित्करणात्परो भविष्यतीति न पुनरन्त इति। टितः खल्वप्येष परिहारः। यत्र नास्ति संभवः यत्परश्च स्यादादिश्च। कितस्तु परिहारः। अस्ति संभ
वः यत्परश्च स्यादन्तश्च। तत्र को दोषः। उपसर्गे घोः किः। आध्योः प्रध्योः। नोङ्धात्वोरिति प्रतिषेधः प्रसज्येत। टितश्चाप्यपरिहारः स्यादेवं ह्ययं टि
त्करणादादिर्न पुनः परः। कृते हीदानीमिदं स्यात्। टित ईकारो भवतीति। यथोभयथा न गणापोष्टगिति। सिद्धं तु षष्ठ्यधिकारे वचनात्। सिद्धमेतत्।
कथं। षष्ठ्यधिकारेऽयं योगः कर्तव्यः। आद्यन्तौ टकितौ षष्ठीनिर्दिष्टस्येति। आद्यन्तयोर्वा षष्ठ्यर्थत्वात्तदभावे संप्रत्ययः। आद्यन्तयोर्वा षष्ठ्यर्थत्वात्त
दभावे षष्ठ्यभावे संप्रत्ययः स्यात्। आदिरन्तो वा न भविष्यति॥ ॥ ॥

सच्च हि कित्वात्परत्वादन्तत्वमिति। टिदन्तमेतद्भवतीति ङीपोऽयमवकाशः। ततश्चारेष्टइत्ययमादिः स्यात्। षष्ठ्यधिकार इति। यत्र स्थानषष्ठी प्राप्ता तत्रोपस्थानमस्याः
नतु प्रत्ययपरत्वबाधाय। आद्यन्तयोर्वेति। षष्ठ्याः प्रयोजकावाद्यन्तौ। षष्ठ्यभावाच्चाद्यन्ताभावावगतिरित्यर्थः॥ ॥श्री॥ ॥

भा० कै० प्र० ११६ 46

महा०

युक्तं पुनरिति॥ शब्दभावाभावाभ्यामर्थभावाभावयोः शब्दनिमित्तकत्वं अर्थस्य प्रतीतं तच्च पुनर्न युक्तं ज्ञापको हि शब्दोऽर्थस्य न तु कारकः। सर्वेण सर्वस्यार्थस्य क्रिया
प्रसंगादिति भावः। अर्थनिमित्तक एवेति। अर्थ एव शब्दस्य प्रयोजकस्तस्य निपातनाय शब्दप्रयोगः। अप्रयोगात्तु मीयते नूनं अर्थ एवात्र प्रयोजको नास्ति शब्द
प्रयोगे यः प्रयुंजीत सर्थः। चरेष्ट इत्यत्र परस्य स्त्रेषु अधिकारात्संचम्येव युक्ता। णपो ष्टुक् व्रीहिशाल्योर्ढक् इत्यादावप्यानन्तर्यसंबंधे षष्ठी न त्ववयवावयविसंबंधे। प्रत्यय

युक्तं पुनर्यच्छब्दनिमित्तको नामार्थः स्यात् नार्थनिमित्तकेन नाम शब्देन भवितव्यं। अर्थनिमित्तक एव शब्दः। तत्र यमाद्यन्तौ षष्ठ्यर्थौ नैवात्र ष
ष्ठी प्रयामः। ते मन्यामहे आद्यन्तावेवात्र नन्तः तयोरभावे षष्ठ्यपि न भवतीति॥ ॥मिदचोऽन्त्यात्परः॥ ॥किमर्थमिदमुच्यते। मिदचोऽन्त्यात्परः
स्थानपरप्रत्ययस्यापवादः॥ मिदचोऽन्त्यात्पर इत्युच्यते स्थानेयोगत्वस्य प्रत्ययपरत्वस्य चापवादः। स्थानेयोगत्वस्य तावत्। कुण्डानि वनानि। प
यांसि यशांसि। प्रत्ययपरत्वस्य भिनत्ति छिनत्ति। भवेदिदं युक्तमुदाहरणं। कुण्डानि वनानि। यत्र नास्ति संभवो यदयमचोऽन्त्यात्परः स्यात्
स्थाने चेति। इदं त्वयुक्तं पयांसि यशांसि। पयांसि इति। अस्ति हि संभवो यदयमचोऽन्त्यात्परः स्यात्स्थाने च एतदपि युक्तं। कथं। नैवेश्वर आ
ज्ञापयति नापि धर्मसूत्रकाराः पठंति। अपवादैरुत्सर्गा बाध्यन्तामिति किं तर्हि लौकिकोऽयं॥ ॥ ॥

परत्वेन प्रतियोगसन्निहितेनाकांक्षाविच्छेदादनर्थितादस्यानुपस्थानात्। पुरस्तादपवादन्यायस्तु यथोद्देशपक्षे संभवति न कार्यकालपक्ष इति नाश्रितः॥
॥मिदचोऽन्त्यात्परः॥ ॥किमर्थमिति। किमनेन व्यावर्त्यत इति प्रश्नः। स्थान इति। परस्मात्तः प्रत्ययस्यापवादस्तेन सामर्थ्यादयमर्थः प्रत्ययपरत्वस्यापवाद इ
ति। कुण्डानीति। नपुंसकस्य झलचः इत्यत्र झल्ग्रहणं नपुंसकस्य तदंतविधिः। सुप्ति स्थानेयोगत्वप्रसंगः। मितां त्वस्मिन्नुपस्थिते न पुंसकस्यांगस्य सवयवष
ष्ठी संपद्यते। स्थाने चेति। तत्र च सकारस्य स्थाने नुम्प्रभवत्विति अर्थः॥ ॥ राम० ११६

दृष्टांत इति॥ निश्चय इत्यर्थः। तत्र रूढ्यवहारादीदृशे एव वा कार्ये मुत्सन्निये तस्मान्यविहितो विशेषविहितेन बाध्यते न समुच्चीयते नापि विकल्प्यते। भञ्जिमज्योश्चे
ति। भञ्जीमज्जेन इत्यसौ रागादिकेः चिकृतेशुरोरपरत्वे च जकारात्पूर्वं उमागमः। मज्जे शब्दार्थ इत्यस्य चौरादिकस्य णिच्च च इरिति इत्यस्य येणिलोपे च चकारात्पूर्वं ई मा

दृष्टांतः। लोके हि सत्यपि संभवे बाधनं भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति। सत्यपि संभवे दधिदानस्य तक्रदानेन नि
वर्त्तकं भवति। एवमिहापि सत्यपि संभवे अचामंत्यात्परत्वं षष्ठीस्थाने योगत्वं बाधिष्यते। अंत्यात्पूर्वो मस्जेरनुषंगसंयोगादिलोपार्थम्॥
अंत्यात्पूर्वो मस्जेर्मिदुक्तव्यः किंप्रयोजनम्। अनुषंगसंयोगादिलोपार्थम्। अनुषंगलोपार्थं संयोगादिलोपार्थं च। अनुषंगलोपार्थं तावत्
त्। मग्नः मग्नवान्। संयोगादिलोपार्थम्। मङ्क्ता मङ्क्तुं मङ्क्तव्यम्। भञ्जिमज्योश्च। भञ्जिमज्ज्योश्चान्त्यात्पूर्वो मिदुक्तव्यः। भरूजा मरीचय इति।
सत्तर्हि वक्तव्यः न वक्तव्यः। निपातनात्सिद्धम्। किं निपातनम्। भरूजा शब्दो गुल्मादिषु पठ्यते। मरीचिशब्दो वा ह्वादिषु। किं पुनरयं पूर्वा
न्तः आहोस्वित्परादिः। आहोस्विदभक्तः। कथं चायं पूर्वान्तः स्यात् कथं वा परादिः कथं वा अभक्तः। यद्यन्त इति वर्त्तते ततः पूर्वान्तः। अथादि
रिति वर्तते ततः परादिः। अथोभयं निवृत्तं ततो भक्तः। कश्चात्र विशेषः। अभक्ते दीर्घनलोपस्वरणत्वानुस्वारशीभावाः। यद्यभक्तः दी
र्घत्वं न प्राप्नोति॥ ॥ ॥

गमः। पूर्वान्त इति। संघातस्य पूर्वस्य भक्तो न तदेकदेशस्य। अथादिरिति। न हि संभवोस्ति पदचोत्या परस्य स्यात्पूर्वस्य चादिरिति सामर्थ्यात्परादित्वं विज्ञा
यते॥ ॥श्री॥ ॥ ॥

कुंडानीति। नांतमंगं न भवतीति दीर्घत्वाप्राप्तिः। ननु नदादिवचनं स्यादिनुमर्थमित्युक्तम्। एवं तर्हि नतस्मान्नत्वं भवतीति गौरवापत्तिः। सर्वाणीति। नुमा सुपो व्यव
धानात्स्वरो न सिध्यति। क्रियते एतन्न्यास एवेति। उत्तरपदस्य प्रातिपदिकस्यांतस्तत्र नकारो गृह्यते। गर्गाणां भगिनी गर्गभगिनी अत्र णत्वं माभूदित्सवर्ष्यं नुमो

कुंडानि वनानि। नोपधायाः सर्वनामस्थाने चासंबुद्धाविति दीर्घत्वं न प्राप्नोति। दीर्घो नलोपः। नलोपश्च न सिध्यति। अग्ने त्री ते वाजिना त्री षध
स्था। ता ता पिंडानां। नलोपः प्रातिपदिकांतस्येति नलोपो न प्राप्नोति। नलोपः स्वरः। स्वरश्च न सिध्यति। सर्वाणि ज्योतींषि। सर्वस्य सुपीत्या
द्युदात्तत्वं न प्राप्नोति। स्वरः णत्वं। णत्वं च न सिध्यति। माषवापाणि व्रीहिवापाणि। पूर्वांते प्रातिपदिकांतनकारस्येति सिद्धम्। पाणौ हि विभ
क्तिनकारस्येति। अभक्ते नुमो ग्रहणं कर्तव्यम्। न कर्तव्यम्। क्रियते एतन्न्यास एव। प्रातिपदिकांतनुम्विभक्तिषु चेति णत्वम्। अनुस्वा
रः। अनुस्वारश्च न सिध्यति। द्विषंतपः परंतपः। मोनुस्वारो हलीत्यनुस्वारो न प्राप्नोति। माभूदेवं नश्चापदांतस्य झलीत्यनुस्वारो भविष्य
ति। यस्तर्हि न झल्परः। बहंलिहो गौः। अभ्रंलिहो वायुः। अनुस्वारः। शीभावः। शीभावश्च न सिध्यति। त्रपुणी जतुनी तुंबुरुणी। नपुंस
कादुत्तरस्यौङः शीभावो भवतीति शीभावो न प्राप्नोति। एवं तर्हि परादिः करिष्यते। पणे दोगुणाव द्धौ दीर्घनलोपानुस्वारशीभावे नका
रप्रतिषेधः। यदि परादिः गुणः प्रतिषेध्यः। त्रपुणे जतुने तुंबुरुणे। घेर्ङितीति गुणः प्राप्नोति। गुणः। वृद्धिः। वृद्धिः प्रतिषेध्या॥ ॥

ग्रहणं कर्तव्यम्। स हि समुदायभक्तत्वादुत्तरपदस्यांतो न भवति। द्विषंतप इति। प्रसंगो ह्यारितमेतत्। अत्र हि तन्न व्यपनीतस्तद्ग्रहणेन गृह्यत इति ॥ एम०
नुमो द्विषंग्रहणेन ग्रहणमस्ति। त्रपुणीति। निसत्वासरत्वाच्चानुमिलते व्यवधानमिति भावः॥ ॥ ॥ ११७

अतिसखीनीति। बहुव्रीहिः। द्विपंतपइति। परादिपक्षे नकारस्य मकारो भक्तः तकारस्यापदांतइति मकारोपि तद्भक्तत्वात्पदांतइति सिद्धो नुस्वारइत्याहुः। अन्येतु तद्भक्तत्वा त्तकारग्रहणे नास्य ग्रहणं भवतु नतु पदांतत्वं। नहि द्वयोर्मकारतकारयोः पदांतत्वमुपपद्यत इत्याहुः। शीभावेन कारप्रतिषेधइति। शीभावे विधीयमाने नकारस्य

अतिसखीनि ब्राह्मणकुलानि। सख्युरसंबुद्धाविति णित्वे अचो ञ्णितीति वृद्धिः प्राप्नोति। वृद्धिः। औत्व। औत्वं च प्रतिषेध्यं। त्रपुणि जतुनि तुंबुरूणि इ उ ऊ ः। औत्। अच्च घेरित्यौत्वं प्राप्नोति। औत्व। दीर्घ। दीर्घत्वं च न सिध्यति। कुंडानि वनानि नोपधायाः सर्वनामस्थाने चासंबुद्धाविति दीर्घत्वं न प्राप्नोति। मा भूदेवं। अतो दीर्घो यञि सुपि चेत्येवं भविष्यति। इहतर्हि स्थीनि दधीनि प्रियसखीनि ब्राह्मणकुलानि। दीर्घ। नलोप। नलोपश्च न सिध्यति। अग्नेत्री ते वाजिनात्री षधस्थांतापि एतानि। नलोपः प्रातिपदिकांतस्येति नलोपो न प्राप्नोति। नलोप। अनुस्वार। अनुस्वारश्च न सिध्यति। द्विषंतपः परंतपः। मोनुस्वारो हलीत्यनुस्वारो न प्राप्नोति। मा भूदेवं। नश्चापदांतस्य झलीत्यनुस्वारो भविष्यति यस्तर्हि न झल्परः। वहंलिहो गौः। अभ्रंलिहो वायुः। अनुस्वार। शीभावेन कारप्रतिषेधः। शीभावे नकारप्रतिषेधो वक्तव्यः। त्रपुणी जतुनी तुंबुरूणी। सनुम्कस्य शीभावः प्राप्नोति। नैष दोषः। निर्दिश्यमानस्यादेशा भवंतीत्येवं भविष्यति। यस्तर्हि निर्दिश्यते तस्य न प्राप्नोति। कस्मात्नुमा व्यवहितत्वात्। एवं तर्हि पूर्वांतः करिष्यते। पूर्वांते नपुंसकोपसर्जनह्रस्वत्वं द्विगुस्वरश्च। यदि पूर्वांतः नपुंसकोपसर्जनह्रस्वत्वे द्विगुस्वरश्च न सिध्यति। नपुंसकोपसर्जन ह्रस्वत्वं। आगाय

(१ स्त्रि ए॥ ॥

स्याः नित्वप्रतिषेधो वक्तव्य इत्यर्थः। निर्दिश्यमानस्येति। यथा पाहः पदिति पद्भावः पाच्छब्दस्यैव भवति न तदंतस्य। यस्तर्हीति यो निर्दिश्यते तस्य न प्राप्नोति। श्रुतिसन्निपातियद्रूपं शौ इतित्नकारेणाभक्तेनापि तस्य तोव्यवहितमित्यर्थः॥ ॥ ॥श्री॥ ॥

भा०कै०प्र० ११८ 118

धाना शष्कुलिनी इति। निःसत्वात्पूर्वं नुमं मन्यते। तत्रैते नजंतत्वाद्ध्रस्वाप्राप्तिः। निष्कौशांबिनीति। नपुंसकह्रस्वत्वमुपसर्जनह्रस्वत्वेन परत्वाद्बाध्यते तदपि नुमि कृते न तथैव न प्राप्नोति। नवेति। निसा रूपं तरंगो बलीयानिति स्वरह्रस्वौ च विभक्तिनिरपेक्षत्वादंतरंगौ। तदत्र निर्दिष्टवत्वात्पूर्वोत्तरपक्ष एव स्थितः॥ ॥एच इग्घ्रस्वादेशे॥ ॥ किमर्थमिति। विनापि सूत्रेणेष्टसिद्धिरिति प्रश्नः। एऊ इति। एऊः प्रश्लिष्टावर्णत्वात्प्रश्लिष्टावर्णौ अर्द्धैकारार्द्धौकारौ प्राप्नुतः ननु विश्लिष्टावर्णयोरैचोरिति भावः। समाहारवर्णाविति। समाह्रियमाणावयवत्वात्। मात्रावर्णस्येति। अष्टादशभेदभिन्नस्यावर्णस्य मात्रावयवइति भेदसंज्ञावात्स्यानिर्दिष्टः। दीर्घास्त्विति। सतत

धाना शष्कुलिनी निष्कौशांबिनी निर्वाराणसिनी द्विगुस्वरः। पंचारत्नी निः दशारत्नी निः। नुमि कृते नंतत्वादेते विधयो न प्राप्नुवंति। नवा बहिरंगलक्षणत्वात्। न वा एष दोषः। किं कारणं। बहिरंगलक्षणत्वात्। बहिरंगो नुम्। अंतरंगा एते विधयः। असिद्धं बहिरंगमंतरंगे। द्विगुस्वरे भूयान्परिहारः। संघातभक्तो सौ नोत्सहते वयवस्वे गं तं तं विहंतुमिति कृत्वा द्विगुस्वरो भविष्यति॥ ॥एच इग्घ्रस्वादेशे॥ ॥किमर्थमिदमुच्यते। एच इक्त्ववर्णाकारनिवृत्त्यर्थं। एच इग्भवतीत्युच्यते। सवर्णनिवृत्त्यर्थं अकारनिवृत्त्यर्थं च। सवर्णनिवृत्त्यर्थं तावत्। एङो ह्रस्वशासनेष्वर्द्ध एकारः अर्द्ध ओकारो वा मा भूदिति। अकारनिवृत्त्यर्थं च। इमावैचौ समाहारवर्णौ। मात्रावर्णस्य मात्रेवर्णोवर्णयोः तयोः ह्रस्वशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ मा कदाचिदवर्णो भूदित्येवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। दीर्घप्रसंगः। दीर्घास्त्विकः प्राप्नुवंति। किं कारणं। स्थानेन्तरतमो भवतीति। ननु च ह्रस्वादेश इत्युच्यते तेन दीर्घा न भविष्यंति। विषयार्थमेतत्स्यात्। एचो ह्रस्वप्रसंगे इग्भवतीति॥

त्रमिदं निर्वर्तकमिति भावः। भाष्यमानस्यापि सवर्णग्रहणं दृश्यते अभूभ्यामित्यादाविति दोषोपन्यासः। ननु चेति। अयं हि वाक्यार्थः एचो ह्रस्वप्रसंगे इगेव ह्रस्व इति। विषयार्थमिति। यत्र ह्रस्वो विधीयते तत्रैवास्योपस्थानं यथा स्यात्। देवदत्तेति प्लुतादिविधावुपस्थानं मा भूदस्मिंश्चोपस्थिते वाक्यभेदेनैव इको विधीयमाना एम० ११८
अंतरतमा दीर्घा एव प्राप्नुवंति ह्रस्वस्य बाधितत्वाद्दीर्घे प्लुते कृते पुनर्ह्रस्वाप्रसंगः॥ ॥

निवर्त्तकत्वादिति। एकवाक्यभावे नैच इगेव ह्रस्वो भवति नान्य इत्येवमनिको व्यावर्त्यते। पदितस्त्वेकवाक्यतायां व्यतिरेकेणान्यस्य ह्रस्वो न प्राप्नोति। नैष दोषः। पूर्वं ह्रस्वश्रु
तावच उपस्थानाद् ह्रस्वत्वं क्रियते तत्र एचो प्रयत्नभेदाद् ह्रस्वे क्रियमाणे एच इगि सस्थो पस्थानं। सिद्धमेङ इति। एकारस्य तालव्यस्य तालव्य इकारः ओकारस्य चौष्ठ्यस्य
उकारः ओष्ठ्यो भविष्यतीत्यर्थः। ऐचोश्चेति ऐकारः कण्ठतालव्यः। औकारः कण्ठोष्ठ्यः न च तथा विधो ह्रस्वोस्ति सवर्णेतरेतरमेनमाक्षे। भूयसा चावयवेन स्थ

दीर्घप्रसंगस्तु निवर्त्तकत्वात्। दीर्घाणां लिकामप्रसंगः। किं कारणं। निवर्त्तकत्वात्। नानेनेको निवर्त्यंते। किं तर्हि। अनिको निवर्त्यंते। सिद्धास्त्वत्र ह्रस्वाः इकश्चा
निकश्चा तत्रानेनानिको निवर्त्यंते सवर्णनिवृत्त्यर्थेन तावन्नार्थः। सिद्धमेङः सस्थानत्वात्। सिद्धमेतत्। कथं। एङः सस्थानत्वात्। अर्द्ध एकारो अर्द्ध ओकारो
वा न भविष्यति। ननु च एङः सस्थानतरावर्द्ध एकारो अर्द्ध ओकारो न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशेत्। ननु च भोश्छन्दोगानां सात्यमुग्रि
राणायनीया अर्द्धमेकारं अर्द्धमोकारं चाधीयते। सुजाते ए १ श्वसूनृते। अध्वर्यो अ १ द्रिभिः सुतं। शुक्रं ते ए १ न्यद्यजतं ते ए १ न्यदिति। पार्षदकृति
रेषा तत्रभवतां नैव लोके ना न्यस्मिन् वेदे अर्द्ध एकारो अर्द्ध ओकारो वास्ति। अकारनिवृत्त्यर्थेन नापि नार्थः। ऐचोश्चोत्तरभूयस्त्वात्। ऐचोश्चोत्तरभूयस्त्वाद
वर्णो न भविष्यति। भूयसी मात्रेवर्णो वर्णयोः। अल्पीयस्य वर्णस्य। भूयस एव ग्रहणानि भविष्यंति। तद्यथा। ब्राह्मणग्राम आनीयतामित्युच्यते।
तत्र चावरतः पंचकारुकी भवति॥ षष्ठी स्थानेयोगा॥ ॥किमिदं स्थानेयोगेति। स्थाने योगोऽस्याः स्थानेयोगा। सप्तम्यलोपो निपातनात्॥०

प्रदेशो स्ति तदात्मक इह वहिस्समुदायो लक्ष्यते इतीयु तावेव भविष्यतः॥ ब्राह्मणग्राम इति। ब्राह्मणानां वा सत्यं उदाहरणं न तु स्वामिले॥ ॥षष्ठी स्थानेयोगा॥
॥ ॥किमिदमिति। समासे सति विभक्तिश्रवणाप्रसंगः। असमासे तु युक्तिरितिस्थानेन्तु योगेति प्रश्नः। स्थानेयोगेस्याइति। स्थानेन निमित्तसंबंधेसत्यर्थः॥

भा०कै०प्र०
११९
117

तृतीयावेति। निपातनादिति योऽयं यथादेवदन्तस्य यत्तदन्तत्वं तिपुत्रत्वादि द्वारकः संबंधो ऽवगम्यते। एवमस्तेर्भूरित्यत्रापि ऽस्यां परिभाषायां सत्यां स्थाननिमित्तः संबंधो
ऽवसीयते। स्थानमर्थ इति केचिदाहुः। तिष्ठत्यस्मिन् शब्दार्थ इति स्थानं। ऽर्थे च शब्दास्तिष्ठंतीति तेनास्तेरर्थे भूरिसर्थः। ऽन्ये त्वाहुः। प्रसंगो ऽपधयोरमन्यतरस्यामित्यादौ ऽपे
पधादीनामानर्थकाद्भावसाधनः प्रसंगवाची स्थानशब्द ऽपाश्रीयते। तेनास्तेः प्रसंगे ऽस्तेः प्राप्तौ भूः प्रयुज्यत इत्यर्थः संपद्यते। स्वाभाविको ऽस्तेः प्रयोगः ऽपाईधा
तुकेभूशब्दस्य च प्रयोगो नेनप्रकारेण व्याख्यायते। किमर्थमिति। विनापि सूत्रेणेष्टं सिध्यति। ऽपार्ब्धे तु तिप्रसंगइति प्रश्नः। एकशातमिति। पष्ठीदं रूपाठाष्ठ

तृतीयायावाएत्वं। स्थानेनयोगोस्याः सेयं स्थानेयोगेति। किमर्थं पुनरिदमुच्यते। षष्ठ्याः स्थानेयोगवचनं नियमार्थं। नियमार्थोयमारंभः। ए
कशातं षष्ठ्यर्थाः। यावंतोवा संतितेसर्वे षष्ठ्यामुच्चारितायां प्राप्नुवंति। इष्यते च व्याकरणे या षष्ठी सा स्थाने योगैव स्यादिति। नचांतरेणायत्नं न सि
ध्यतीतिषष्ठ्याः स्थानेयोगवचनं नियमार्थमेवमर्थमिदमुच्यते। अस्तिप्रयोजनमेतत्। किंतर्हीति। अवयवषष्ठ्यादिषु तिप्रसंगः शासोगोहइ
ति। अवयवषष्ठ्यादयस्तु न सिध्यंति। तत्र को दोषः। शास इदङ्हलोरिति शासेश्चांत्यस्यस्या उपधामात्रस्य च। ऊउपधायागोहइति गोहेश्चांत्यस्यस्या
उपधामात्रस्य च। अवयवषष्ठ्यादीनां चाप्राप्तिर्योगस्यासंदिग्धत्वात्। अवयवषष्ठ्यादीनां च नियमस्याप्राप्तिः। किंकारणं। योगस्यासंदिग्धत्वात्। सं
देहे नियमः। न चावयवषष्ठ्यादिषु संदेहः। किंवक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। लौकिकोयं दृष्टांतः। तद्यथा। लोके कंचित्कश्चित्पृच्छति।
ग्रामांतरंगमिष्यामि पंथानंमेभवाननुपदिशत्विति। स तस्मायाचष्टे ऽमुष्मिन्नवकाशे हस्तदक्षिणो गृहीतव्यः। अमुष्मिन्नवकाशे हस्तवाम इति
। यस्तत्रतिर्यक्पथो भवति न तस्मिन्संदेह इति कृत्वा नासावुपदिश्यते। एवमिहापि सन्देहे नियमः। न चावयवषष्ठ्यादिषु संदेहः॥ ॥

येणेत उच्यते। यावंतोवेति। शास्त्रे यावंतो संभवइत्यर्थः। अवयववेति। नियमेन संबंधांतराणां निवर्त्तनादिति भावः। उपधामात्रस्य चेति। शासिना संबंधाभावा
स चादिसंबंधिनोपीति भावः। तत्र ह्यनिर्दिताम्मिस्यत उपधाया इतिवर्त्तते। असंदिग्धत्वादिति। अनियमप्रसंगे हि नियमः क्रियते न तु प्रागेवावस्थिते नियमे।

रामः
११९

अप्रयोगे इति। योगमन्तरेण षष्ठ्या एव भावात् विशिष्टो योगो यस्या नास्तीति सामर्थ्यात् प्रतीयते। योगवतीति। षष्ठ्यामेव प्रभावी योग इति भूम्नि मत्वर्थीयो ऽकारः। किंचि
ल्लिंगमिति। कृत्तादिकं। अधिकारो नामेति। पारार्थ्यं तु परिभाषात्वं तु च्यते। कश्चिदिति। परिभाषारूपः इत्यर्थः। चकारेणेति। यथा सहस्रस इत्यत्र विशेषणत्वे योगान्ताधिके चे सा

साम्या १ प्याधिकार ६ १

अपवादस्थाने। योगास्थाने योगा। किमिदमयोगे इति। अयमन्यो योगा अयोगा। अथवा योगवती योगा का पुनर्योगवती। यस्या बहवो योगाः। कुत एतत्।
भूम्नि हि मतुप् भवति। विशिष्टा वा षष्ठीस्थाने योगा। अथवा किंचिल्लिंगं आसज्य वक्ष्यामि इत्यत्र लिंगा षष्ठीस्थाने योगा भवतीति। न च तल्लिंगमवय
वषष्ठ्यादिषु करिष्यते। यद्येवं शास इदङ्हलोः शाहौ शासि ग्रहणं कर्तव्यं। स्थाने योगार्थं लिंगमासंक्ष्यामीति। न कर्तव्यं। यदेवादः पुरस्तादवयव
षष्ठ्यर्थं प्रकृतमेतदुत्तरत्रानुवर्तिष्यते स्थानेयोगार्थं भविष्यति। कथं। अधिकारो नाम त्रिः प्रकारः। कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वल
यति यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति। अपरोऽधिकारो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारे
ण। अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते। तद्यदेष पक्षः अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति तदा हि
यदेवादः पुरस्तादवयवषष्ठ्यर्थं एतदुत्तरत्रानुवर्तिष्यते स्थानेयोगार्थं भविष्यति। संप्रसरणमात्रमेतद्भवति। न ह्यनुच्चार्ये शब्दे लिंगं प्राकामा
१ संकुं। एवं तर्ह्यादेशे तल्लिंगं करिष्यते। तत्प्रकृतिमास्कं स्यति॥ ॥ ॥

दावनुकृष्यते। संप्रसरणमात्रमिति। स्वरितत्वप्रतिज्ञानात् उत्तरेषु योगेषु तस्य शब्दस्यानुमानं भवतु लिंगासंगस्त्वनुच्चारितस्य कथं स्यादित्य
र्थः। एवं तर्हीति। आदेशे लिंगान्तस्य [संगा] च षष्ठ्यभावात् तत्संबंधिनः स्थानिनो लिंगकार्यं फलिष्यतीति भावः॥ ॥ ॥

पदीति। अंगस्येति च स्थानषष्ठीत्वात् विशेषणविशेष्यभावो न प्रकल्प्यते इत्यर्थः। देवदत्तस्येति। संबंधसामान्यमुपक्रम्यते पश्चात्तदंतरसन्निधानाद्विशेषावसायः स्यान इति। अंतरंगत्वाल्लक्ष्यापेक्षणादिति भावः। यतः षष्ठीति। तेन पादः पदित्ययमर्थः। पादंतस्यांगस्यावयवः पाच्छब्दः स तेन षष्ठ्या निर्दिष्टः तस्य पच्छब्द आदेशो भवति।

यदि नियमः क्रियते॥ यत्रैका षष्ठी अनेकं च विशेष्यं तत्र न सिध्यति॥ अंगस्य हलः अणः संप्रसारणस्येति। हलपि विशेष्यः अणपि विशेष्यः। [redacted] संप्रसारणमपि विशेष्यं। असति पुनर्नियमे कामचारः एकया षष्ठ्यानेकं विशेषयितुं। तद्यथा। देवदत्तस्य पुत्रः पाणिः कंबलः इति। तस्मान्नार्थो नियमेन। ननु चोक्तमेकशतं षष्ठ्यर्था यावंतो वा सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवंतीति। नैष दोषः। यद्यपि लोके बहवोऽभिसंबंधा आर्था यौना मौखाः स्रौवाश्च। शाब्दस्तु शब्देनैकोऽन्योऽभिसंबंधो भवितुमर्हति। अन्यदतः स्थानात्। शाब्दस्यापि शब्देनानंतरादयोऽभिसंबंधाः। अस्ति भूर्भवतीति संदेहः। स्थानेऽन्तरे समीप इति। संदेहमात्रमेतद्भवति। सर्वसंदेहेष्विदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति स्थान इति व्याख्यास्यामः॥ न तर्हीदानीमयं योगो वक्तव्यः। वक्तव्यश्च। किं प्रयोजनं। षष्ठ्यंतस्य स्थानेन यथा युज्येत। यतः षष्ठ्युच्चारिता किं फलं न भवति। निर्दिश्यमानस्यादेशा भवंतीत्येषा परिभाषा न कर्तव्या भवति॥ ॥श्री॥ ॥

ननु प्रतीयमानस्य पादंतस्यांगस्यैव निर्दिश्यमानस्यादेशा भवंतीत्ययमर्थः। षष्ठीति षष्ठ्यंतं गृह्यते तेन षष्ठ्यंतमेव निर्दिश्यमानं स्थानेन युज्यते न तु प्रतीयमानमित्यर्थः। अल्लोपस्याप्यादेः परस्येत्यनेन तु वचनसामर्थ्यान्न बाध्यते॥ ॥श्री॥ ॥

स्थानेंतरतमः॥ किमुदाहरणमिति॥ क्वचिल्लक्षणांतरेणेष्टं सिद्धमिति प्रश्नः। इकोयणचि दध्यत्रेति। अस सत्त्रसलक्षणमप्युदाहरणं प्रयोगोपी सुँपन्था सः। इको
ह्रस्वादिभेदात्सदृश्येर्यणस्तु सपन्नेति वेष म्यात्संख्यातानुदेशोन भवतीति भावः। नैतदस्तीति प्रत्याहारपाठे शब्दतः साम्यमस्तीति भावः। घस्तादेश इत्यादौ लका
रेपि त्वकारस्यादेशो दृश्यत इति त्वकारस्थानित्वाभावो न शंकनीयः। एकार्थस्येति। सादृश्यहेतुधर्मोपलक्षणमेतत्। तेन प्रसत्त्वादयोपि धर्मा गृह्यंते। यत्राने
भयोः

स्थानेंतरतमः। किमुदाहरणं। इकोयणचि दध्यत्र मध्वत्र तालुस्थानस्य तालुस्थान ओष्ठस्थानस्य ओष्ठस्थानो यथा स्यादिति। नैतदस्ति।
संख्यातानुदेशेनाप्येतत्सिद्धं। इदं तर्हि तस्य तस्य मिपांतौ तेनाम इति। एकार्थस्यैकार्थः द्व्यर्थस्य द्व्यर्थः बह्वर्थस्य बह्वर्थो यथा स्यात् इति। ननु चै
तदपि संख्यातानुदेशेनैव सिद्धं। इदं तर्ह्यकः सवर्णे दीर्घ इति। दंडाग्रं क्षुपाग्रं दधींद्रः मधूष्ट्रः। कंठस्थानयोः कंठस्थानः तालुस्थानयोस्ता
लुस्थानः ओष्ठस्थानयोरोष्ठस्थानो यथा स्यात्। अथ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थं। यत्रानेकविधमांतर्यं तत्र स्थानतआं
तर्यं बलीयो यथा स्यात्। किं पुनस्तत्। चेता। स्तोता। प्रमाणतः अकारो गुणः प्राप्नोति। स्थानतएकारौकारौ। पुनः स्थानग्रहणादेकारौका
रौ भवतः। अथ तमप्ग्रहणं किमर्थं। झयो होन्यतरस्यामिति सोष्मणः सोष्माण इति द्वितीयाः प्रसक्ताः। नादवतो नादवंत इति तृतीयाः प्रस
क्ताः। तमप्ग्रहणाद्घोषोष्माणो नादवंतश्च ते भवंति चतुर्थाः वाग्घसति त्रिष्टुब्भसतीति॥ ॥ ॥

कमिति। स्थानग्रहणेनुवर्तमाने वाक्यभेदः क्रियते। स्थानेंतरतमो भवति। यत्र चानेकविधमांतर्यमस्ति तत्र स्थानकृतमेवांतर्यमाश्रीयते इति। वाक्यभेदस्य च
तमग्रहणमेव लिंगं। स्थानकृतएव हि सादृश्ये गृह्यमाणे सादृश्यांतरपरित्यागात्तमग्रहणमनर्थकमेव स्यात्। सोष्मण इति। ऊष्मत्वगुणयुक्तस्येत्यर्थः। तमग्रहणादिति
। ईषत्सदृशेपि लोके सदृशव्यवहारदर्शनादिह तमप्ग्रहणं कृतम्॥ ॥श्री॥ ॥७॥ ॥

भा०कै०प्र० किमर्थमिति। यदीदं नोच्येत तदा किं स्यात् इति प्रश्नः। स्थानिन इति। यद्यप्यक इसनेन स्थानिनो बहव उपात्तास्तथापि प्रयोगे एकैकः स्थानी तस्य पर्यायेण बहवो दी
१२१ र्घा आदेशाः प्राप्नुवंतीत्यर्थः। यथा पुनरिति। येन प्रकारेण संहितापाठलक्षणेनेत्यर्थः। प्रतिसूत्रं तु विच्छिद्य पाठे संशयाभावः। परः प्रकृतिः संहितेति संहितायामेव निस्स
121 त्वान्नतः पदापोद्धारे क्रियमाणे तरतमशब्दः किं सप्तम्यंतोपोद्ध्रियते। अथ प्रथमांत इति प्रश्नः। तत्र सप्तम्यंतपक्षे षष्ठीति वर्त्तते। अंतरतमो य आदेशस्तस्य स्थानीनत्रैव षष्ठी य

किमर्थं पुनरिदमुच्यते। स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसंगस्तस्मात्स्थानेंतरतमवचनं नियमार्थं। स्थान्येकत्वेन निर्दि
श्यते अक इति। अनेकश्च पुनरादेशः प्रतिनिर्दिश्यते दीर्घ इति। स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसंगः। सर्वे सर्वत्र प्राप्नुवंति।
इष्यते चांतरतमा एव स्युरिति तच्चांतरेण यत्नं न सिध्यति तस्मात्स्थानेंतरतमवचनं नियमार्थमेवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्
किं तर्हीति। यथा पुनरियमंतरतमनिर्वृत्तिः सा किं प्रकृतितो भवति। स्थानिन्यंतरतमे षष्ठीति। आहोस्विदादेशतः। स्थाने प्राप्यमाणाना
मंतरतम आदेशो भवतीति। कुतः पुनरियं विचारणा। उभयथा हि तुल्या संहिता स्थानेंतरतम उरण्रपर इति। किं चातः। यदि प्रकृतितः इ
कोयणचीति यणांयेंतरतमा इकस्तत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवंतीति। इहैव स्याद् दध्यत्र मध्वत्र कुमार्यर्थं ब्रह्मबंध्वर्थमित्यत्र न स्यात्।
आदेशतः पुनरंतरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी यत्र षष्ठी तत्रादेशा भवंतीति सर्वत्र सिद्धं भवति। तथा इको गुणवृद्धी गुणवृद्ध्योरंतरतमा
ये इकस्तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवंतीति इहैव स्यात् नेता लविता नायकौ लावकः चेता स्तोता॥ " "

त्रैव षष्ठी तत्रैवादेश इति प्रकृतिर्नियम्यते। प्रथमांतपक्षे तु अंतरतम आदेशो भवतीत्यादेशो नियम्यते। इहैवेति। यणाम इमात्रिकाणां सदृशा इको मात्रि राम०
का न तु इरवि प्रकृत्यादीर्घा इति भावः। आदेशनियमपक्षे चैतदुदाहरणत्वेन दूषितं। प्रकृतिनियमपक्षे तु भवत्येतदुदाहरणं॥ ॥श्री॥ ॥ १२१

चायक इति। अचो ञ्णितीत्यत्राप्येवमेव दोष इत्युपन्यासः। ऋवर्णस्येति। ऋकारस्य ह्रस्वस्यैव गुणः स्याद्दीर्घस्यैव च वृद्धिरिति विशेषदर्शनाय ऋवर्णस्येत्युपन्यासः। वान्तो यीति। एच इत्यनुवर्तनात् सर्वेषां वान्तादेशप्रसंगः। यद्यप्येवं व्याख्यायते यादृशो वान्त आदेशः पूर्वं दृष्टस्तादृशो यि प्रत्यये भवति। ओकारस्थानिको वादेशो दृष्ट औका

सर्वा

चायकः स्तावकः इत्यत्र न स्यात्। आदेशतः पुनरन्तरतमनिर्वृत्तौ सर्वत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवति। तथा ऋवर्णस्य गुणवृद्धिप्रसंगे गुणवृद्ध्योर्येऽन्तरतमा इकस्तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीति इहैव स्यात्। कर्ता हर्ता आस्तारकः निपारकः। आस्तरिता निपरिताकारको हास्कर इत्यत्र न स्यात्। आदेशतः पुनरन्तरतमनिर्वृत्तौ सत्यां सर्वत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीति सर्वत्र सिद्धं भवति। अथ स्यादेशतोऽन्तरतमनिर्वृत्तौ सत्यामयं दोषः। वान्तो यि प्रत्यये। स्थानिनिर्देशः कर्तव्यः। ओकारौकारयोरिति वक्तव्यं। ऐकारौकारयोर्मा भूदिति। प्रकृति

तरतमाय तः पुनरन्तरतमनिर्वृत्तौ सत्यां वान्तादेशस्य प्रसक्तयां प्रकृतिः तत्र षष्ठी यत्र षष्ठी तत्रादेशा भवन्तीति ऽन्तरेण स्थानिनिर्देशं सिद्धं भवति। आदेशतोऽप्यन्तरतमनिर्वृत्तौ सत्यां न दोषः। कथं। वान्तग्रहणं न करिष्यते यि प्रत्यये एचोऽयादयो भवन्तीत्येव। यदि न क्रियते चेयं नेयमित्यत्रापि प्राप्नोति। क्षय्यजय्यौ शक्यार्थे इत्येतन्नियमार्थं भविष्यति क्षिज्योरेवेति तयोस्तर्हि शक्यार्थादन्यत्र प्राप्नोति क्षेयं पापं जेयो वृषलः। उभयतो नियमो विज्ञास्यते क्षिज्योरेव च तयोश्च शक्यार्थ एवेति। इहापि तर्हि नियमान्न प्राप्नोति लव्यं पव्यं अवश्यपाव्यमिति। तुल्यजातीयस्य नियमः। कश्च तुल्यजातीयः। यथाजातीयकं क्षिज्योरेचः कथं जातीयकं क्षिज्योरेच एकारः॥ अवश्यलाव्यं ॥ ॥

रस्थानिक आवादेश इति तदा न दोषः। उभयत इति। योगविभागेनेति भावः। इहापीति। सामान्येन नियम इति प्रश्नः। तुल्यजातीयस्येति। कंठतालव्यस्येत्यर्थः॥

१९ ॥श्री॥ ॥श्री॥ ॥

भा०कै०प्र० गायमिच्छतीति। एकारस्यैव नियमेन प्रवृत्तिः कृतानेकारस्येति प्रश्नः। छान्दस इति। कजन्तस्यैरैशब्दस्य भाषायां नास्ति प्रयोगो ऽन्यत्र तु विद्यत एवेत्याचक्षते। क्व च ऐकारान्त
१२२ न्नास्ति। गोसमानाक्षरनान्तादिति वचनात्। अन्ये तु भाषायां रैशब्दप्रयोगो नास्तीत्याहुः। गोह इति। एतत्सरिभाषोपस्थाने सति गोह इति षष्ठ्यन्तरतमेऽस्यानिन्युपसंह्रियेते
122 ति भावः। क्रियते तन्न्यास एवेति। अन्यथा परत्वादल्लोपस्य स्यात् अनेन गोह इति षष्ठ्यां सेल्पनुसंह्रियेत इति भावः। रदाभ्यामिति। चरितमिसाद्वैव्यवधानान्न भवति। निष्ठाया इति षष्ठ्या

एवमपि रायमिच्छन्ति रैयतीत्यत्र प्राप्नोति॥ रायिच्छान्दसः॥ दृष्टानुविधिश्छन्दसि भवति। ऊदुपधाया गोहः। आदेशतोऽन्तरतम निर्देशात् सिद्धम्। उपधाग्र रन॰
हणं कर्तव्यं। प्रकृतितः पुनरन्तरतमनिर्देशात् सिद्धम् ऊकारस्य गोहेर्योऽन्तरतमा प्रकृतिस्तत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेणोपधाग्रहणं सिद्धं
भवति। आदेशतोऽप्यन्तरतमनिर्देशात् सिद्धं न दोषः। क्रियते तन्न्यास एव। रदाभ्यां निष्ठातो नः पूर्वस्य च दः। आदेशतोऽन्तरतमनिर्देशात् सिद्धं तकारग्र
हणं कर्तव्यं। प्रकृतितः पुनरन्तरतमनिर्देशात् सिद्धं नकारस्य निष्ठाया याऽन्तरतमा प्रकृतिः तत्र षष्ठी। यत्र षष्ठी तत्रादेशा भवन्तीत्यन्तरेण तकारग्रह
णं सिद्धं भवति। आदेशतोऽप्यन्तरतमनिर्देशात् सिद्धं न दोषः। क्रियते तन्न्यास एव। किं पुनरिदं निर्वर्तकमन्तरतमानेन निर्वर्त्यते आहोस्वित् प्रति
पादकम् अन्येन निर्वृत्तानामनेन प्रतिपत्तिः। कश्चात्र विशेषः। स्थानेऽन्तरतमनिर्वर्तके सर्वे स्थानिनिवृत्तिः। स्थानेऽन्तरतमनिर्वर्तके सर्वे स्थानिनां नि
वृत्तिः प्राप्नोति। अस्यापि प्राप्नोति। दधि मधु। अस्तु न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते। तत्रान्तर्यतो दधिशब्दस्य दधिशब्द एव मधुशब्दस्य मधुशब्द एवादेशो भवि
मधुशब्दस्य

स्तकार एवोपसंहारात्तस्यैवानन्तर्येणानल्विधानात्। क्रियते तन्न्यास एवेति। अन्यथा हि भिन्नवाक्यामिसत्र दकारस्यानत्वं स्यात्। स हि नकारस्य स्थाने दृश्यो ऽपयात्। तीया
स्तथा पंचमा इति वचनात्। किं पुनरिति। किं स्वतन्त्रमेतल्लक्षणमाहोस्विल्लक्षणान्तरेणाभिनिर्वृत्तानामनेन नियमः क्रियते अपि लक्षणान्तरशेषभूतमिति प्र
श्नः। स्थानिनिवृत्तिरिति। दधिशब्दस्य यदि दधिशब्द आदेशः क्रियते तदा प्रयोजनाभावः। भिन्नरूपस्त्वादेशस्तदर्थस्याप्रत्यायक इति शब्दव्यवहारोत्साद एवेति भावः। रम० १२२
अस्त्विति। वचनसामर्थ्याच्छब्दव्यवहारस्य चानादित्वादिति भावः॥ ॥

कचिद्वैरूप्यमिति॥ यदा विसर्जनीयस्य विसर्गशब्दादेशस्तदा षत्वं नास्ति। न हि तदा सकारस्यादेशः। यदा तु सकारस्य सकारादेशस्तदा षत्वप्रसंग इति वैरूप्यप्राप्तिः। अस्ते
भूरित्यादयस्तु विशेषविहितत्वादस्य बाधकाः। अपि चेति। पुनरन्येनान्येनादेशेन भवितव्यमिति भावः। प्रयोजनमंतरेण प्रवृत्तौ सत्यामसकृदपि प्रवृत्तिः स्यात्तत
श्च सर्वस्य निवृत्त्यभिमुखत्वात्साधुत्वव्यवस्था नोपपद्यते। अस्तु तर्हीति। निर्वृत्ते पुलक्षणांतरेणादेशे पुनिर्यमोने न क्रियते। न चांतरतमः साधुर्नान्य इत्य

यदि चैवं कचिद्वैरूप्यं तत्र दोषः स्यात्। विसमुसलं। इणकोरिति षत्वं प्राप्नोति। अपि चेष्टाव्यवस्था न प्रकल्प्येत। तद्यथा। तत्रैवाष्टेतिलाः प्रक्षिप्तामु
हूर्त्तमपि नावतिष्ठंते। एवमिमेऽपि वर्णामुहूर्त्तमपि नावतिष्ठेरन्। अस्तु तर्हि प्रतिपादकं। अनेन निर्वृत्तानामनेन प्रतिपत्तिः। निर्वृत्तप्रतिपत्तौ
निर्वृत्तिः। निर्वृत्तप्रतिपत्तौ निर्वृत्तिर्न सिध्यति। सर्वे सर्वत्र प्राप्नुवंति। किं त र्हि उच्यते निर्वृत्तिर्न सिध्यतीति। न सा धीयो निर्वृत्तिः सिद्धा भवति। न
ब्रूमो निर्वृत्तिर्न सिध्यतीति। किं तर्हि इष्टाव्यवस्था न प्रकल्प्येत। न सर्वे सर्वत्रेष्यंते। इदमिदानीं किमर्थं स्यात्। अनर्थकं च। अनर्थकमेतत्स्यात्।
यो हि भुक्तवंतं प्रति ब्रूयान्मा भुक्था इति किमेतेन कृतं स्यात्। उक्तं वा। किमुक्तं। सिद्धं तु षष्ठ्यधिकारे वचनादिति। षष्ठ्यधिकारेऽयं योगः कर्त्तव्यः
स्थानेंतरतमः षष्ठीनिर्दिष्टस्येति। प्रसात्मवचनं च। प्रसात्म्यमिति वक्तव्यं। किं प्रयोजनं। योयस्यांतरतमः स तस्य स्थाने यथा स्यात्। अन्यस्यां
तरतमोन्यस्य स्थाने मा भूदिति। प्रसात्मवचनमशिष्यं स्वभावसिद्धत्वात्। प्रसात्मवचनमशिष्यं। किं कारणं। स्वभावसिद्धत्वात्। स्वभावत

र्थेः। निर्वृत्तिरिति। अभिमतशब्दस्येत्यर्थः। इणाव्यवस्थेति। अकः सवर्णे दीर्घ इत्यनेन लक्षणेन यदा सर्वे दीर्घाः कृतास्तदा तेषां साधुत्वं विज्ञातं। न चानेन तेषामेव साधु
त्वं शक्यं प्रतिपादयितुमिति भावः। उक्तं वेति। इको गुणवृद्धी इत्यत्र। यत्र षष्ठी तत्रेदमुपतिष्ठते। तेनैकवाक्यतापन्नेन सूत्रेण विधिवाक्यानामिति विधानकालएवांत
रतमआदेशो विधीयते। प्रसात्म्यमिति। आत्मानमात्मानं प्रतीति समासः। स्थान्यात्मनोंतरतम इत्यर्थः। स्वभावसिद्धत्वादिति। तुल्यस्यास्यप्रयत्नं सवर्णमित्यत्र स्थाना
''येति उक्तं। न तु संबंधिशब्दत्वादिति॥ ॥ ॥

भा०कै०प्र० समाजेष्विति। समाज उत्सवे पुंसंघातः। समाशः सहभोजनं। समवायः कस्यांचित्क्रियायां मेलनं। नैव कृशा इति। गुणप्रमाणकृतसादृश्यपरिहारेण विघातार्थे कृत
१२३ मां[redacted]तर्यं लोके आश्रीयते इत्यर्थः। एवमिहापि यदीयमर्थं यः शक्नोति वक्तुं न तस्य स्थाने स एव भवति। गाव इति। निरवकाशमप्ययं व्यवहारः संकीर्णो नाम संकरलक्षणः॥
123 एवं चोदनायां संकीर्णा अप्यादेशा असंकरेण प्रवर्त्स्यन्तीति। तथा यानीति। यथा तत्र सादृश्याद्वर्गीभवन्ते विच्छिन्नसाहचर्याणामपि भवन्ति तथा स्थान्यादेशानां स्थान्यादिसा

तद्यथा समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते न चोच्यते प्रत्यासन्नमिति प्रत्यासन्नं चासते। अन्तरतमवचनं च। अन्तरतमवचनं चाशि
ष्यं। योगश्चाप्ययमप्यशिष्यः। कुतः। स्वभावसिद्धत्वादेव। तद्यथा। समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते न पा
ण्डवः पाण्डुभिः। येषामेव किंचिदर्थकृतमान्तर्यं तैरेव सहासते। तथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति तेन सह शेरते। तथा या
न्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति तान्यन्योन्यमपश्यन्ति शब्दं कुर्वन्ति। एवं तावच्चेतनावत्सु। अचेतनेष्वपि लोष्टः क्षिप्तो बाहुवेगं
गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः। तथा या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां वि
कारो धूमः स धूम आकाशदेशे निवाते नैव तिर्यग्गच्छति नावागवरोहति। अब्विकारोऽप एव गच्छत्यान्तर्यतः। तथा ज्योतिषो विकारोऽर्चिराका
शदेशे निवाते सुप्रज्वलितो नैव तिर्यग्गच्छति नावागवरोहति। ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः॥ ॥ ॥

दृश्येन वर्गीभवनमित्यर्थः। अचेतनेष्वपीति। न्यायस्यास्य व्याप्तिप्रतिपादनपरमेतत्। अब्विकार इति। अन्तरिक्षे सूक्ष्मः समुद्रोऽस्ति तद्विकाराः सर्वा आप इति काष्ठा राम०
दिस्थानामपामग्निसंयोगाद्धूमोऽब्विकारः। सूर्यविकारोऽर्चिः सूर्यमेव गच्छति। लोकव्यवहाराश्रयेण प्रसाध्य स्थाने सूत्रे तदनाश्रयेण योगारम्भे दोषमाह॥ ॥ १२३

व्यंजनेति। व्यतिक्रमः स्यान्निलेन निवृत्तिः इदमेव यथा स्वं निर्वर्त्तकमिति भावः। नैव लोक इति। निसाः शास्त्रे व्याख्यायंते। निवृत्तिपक्षे प्रुच्चारणास्याशक्यत्वादिति मा
कः। नैव लोक इति। कुक्कुटादिषु हे व्यंजनेन त्वेकमात्रिकमिति भावः। अर्द्धतृतीयमात्रमिति। अत्रैकादेशयोः कृतयोरित्यभाव इति यदा प्रक्रिया इति भावः। भाष्यमाने

व्यंजनस्वरव्यतिक्रमे च तत्कालप्रसंगः। व्यंजनव्यतिक्रमे स्वरव्यतिक्रमे च तत्कालतां प्राप्नोति। व्यंजनव्यतिक्रमे। इष्टं उपन्नं। आंतर्य
तोऽर्द्धमात्रिकस्य व्यंजनस्यार्द्धमात्रिक इकुः प्राप्नोति। नैव लोके नैव वेदेऽर्द्धमात्रिक इगस्ति। कस्तर्हि मात्रिकः। योऽस्ति स भविष्यति। स्वरव्य
तिक्रमे दध्यत्र मध्वत्र कुमार्यत्र ब्रह्मबंध्वर्थं। आंतर्यतो मात्रिकस्य द्विमात्रिकस्य मात्रिको द्विमात्रिको यण् प्राप्नोति। नैव लोके नैव वेदे मा स्वरस्य
त्रिको द्विमात्रिको यणस्ति। कस्तर्हि अर्द्धमात्रिकः। योऽस्ति स भविष्यति। अक्षु चानेकवर्णादेशेषु। अक्षु चानेकवर्णादेशेषु तत्कालतां
प्राप्नोति। इदमइश्च। आंतर्यतोऽर्द्धतृतीयमात्रिकस्य इदमोऽर्द्धतृतीयमात्रमिवर्णं प्राप्नोति। नैष दोषः। भाव्यमानेन सवर्णानां
ग्रहणं नेत्येवं भविष्यति। गुणवृद्ध्येज्भावेषु। गुणवृद्ध्येज्भावेषु तत्कालतां प्राप्नोति। खट्वा इन्द्रः॥ ॥

नेति। नैव लोक इत्ययं परिहारो नोक्तः। यदा विशेषविहितत्वादत्र मिश्रभावेन बाध्यते इति न्यायस्तदा त्रिमात्रस्य त्रिमात्र[redacted]संभवात्तस्मादेव प्लुतः। प्लुता प्लुत
प्रसंगे च प्लुतस्याविषयेऽस्मत इत्युच्यते। अत्र तु प्लुतस्यैव प्राप्तिः॥ ॥श्री॥ ॥श्री॥ ॥०॥

खट्वेन्द्र इति ॥ संज्ञयात्र गुणवृद्ध्योर्भावनं । संज्ञा च भिन्नकालानामपि स्यादिति भाष्यमाने नेति परिहारस्यासंभवः ॥ एज्भाव इति । प्रत्याहारः प्लुतऋतोरैच मनो ऐवे
त्यादिसंग्रहार्थः । तत्र हि मात्रिक ऐकार औकार स्यात् । ऋवर्णस्येति । अत्र ह्रस्वस्याकार एव गुणः स्यात् । स चेष्यत एव दीर्घस्य त्वेङोः स्यातां । तुल्यप्रमाणत्वात् । न

खट्वेन्द्रः । खट्वा उदकं खट्वोदकं । खट्वा ईषा खट्वेषा । खट्वा ऊढा खट्वोढा । खट्वा एलका खट्वैलका । खट्वा ओदनः खट्वौदनः । खट्वा ऐति
कायनः खट्वैतिकायनः । खट्वा औपगवः खट्वौपगवः इति । आन्तर्येण त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशाः प्राप्नु
वंति । नैष दोषः । तपरे गुणवृद्धी । ननु च तः परो यस्मात्सोयं तपरः नेत्याह । तादपि परस्तपरः । यदि तादपि परस्तपरः । ऋदोरप् इति इहै
व स्यात् यवः स्तवः । लवः पव इत्यत्र न स्यात् । नैष तकारः । कस्तर्हि । दकारः । किं दकारे प्रयोजनं । अथ किं तकारे । यद्यसंदेहार्थस्तका
रः दकारोपि । अथ मुखसुखार्थस्तकारः दकारोपि । एज्भावे कुर्वीते । कुर्वीयाते । आन्तर्यतो द्वैततीयमात्रस्य टिसंज्ञकस्य अर्धतृती
यमात्र एच् प्राप्नोति । नैव लोके नैव वेदे द्वैततीयमात्र एजस्ति । ऋवर्णस्य गुणवृद्धिप्रसंगे सर्वप्रसंगो विशेषात् । ऋवर्णस्य गुणवृद्धिप्रसं
गे सर्वप्रसंगः । सर्वे गुणवृद्धिसंज्ञका ऋवर्णस्य स्थाने प्राप्नुवंति किं कारणं । अविशेषात् । न हि कश्चिद्विशेष उपादीयते एवं जातीयको गु
णवृद्धिसंज्ञक ऋवर्णस्य स्थाने भवतीति । अनुपादीयमाने विशेषे सर्वप्रसंगः । न ऋवर्णस्य स्थाने रपरप्रसंगादवर्णं स्यान्तर्यं । नवा एष दोषः
किं कारणं ऋवर्णस्य स्थाने रपरप्रसंगात् उः अण् प्रसज्यमान एव रपरो भवतीत्युच्यते । तत्र ऋवर्णस्यान्तर्यतो रेफवतो रेफवानकार एवान्त

र्याह्रस्वस्य दीर्घस्य च सर्वे वृद्धिसंज्ञकाः प्राप्नुवंति समुदायापेक्षया तु सर्वप्रसंग इत्युच्यते । नवेति । उरण्रपर इत्यनेन गुणवृद्धिप्राप्तस्यैकवाक्यतायां विधीयमानस्य
वाण्रपरो भवतीति श्रुतेः स्थाने गुणौ गुणवृद्धी भवत इत्यर्थः ॥ ॥ श्री ॥ ॥

सर्वादेशेतिग ऋवर्णस्यस्थानेरारौ क्रियमाणे अन्तेसस्थेपेत [redacted] द्वाधेनानेकाल्त्वात्सर्वादेशो प्राप्नुतः नवेति। अंगस्येतिषष्ठीपूर्वमेवांसमिक्रमनुसंगृह्यते। तत्र ऋवर्ण
स्यस्थानिलेज्ञातेरपरत्वमानुपूर्व्यासिद्धत्वात्सर्वस्यान्तमलोन्त्यस्येत्यनुसंहारं नबाधतेइत्यर्थः। अथवेति। निर्दिष्टस्यस्थाने रपरत्वविधाने पितद्वानदोषइत्यर्थः। अनोन्तय
मेवेति। नहिस्थानापेक्षगुणमप्राप्तमन्तमेवांतर्यंपरिभाषितं। रूपांतरेणापिसादृश्यसंभवात्तसरि [redacted] प्र हाच्चेतिभावः। ऋवर्णस्यमात्रिकस्यमात्रिकोकारोगु

सर्वादेशप्रसंगस्त्वनेकाल्त्वात्। सर्वादेशस्तुगुणवृद्धिसंज्ञक ऋवर्णस्यप्राप्नोति। किंकारणं। अनेकाल्त्वात्। अनेकाल्शित्सर्वस्येति। नवानेका
ल्त्वस्यतदाश्रयत्वाद्वर्णादेशस्याविघातः। नवाएषदोषः। किंकारणं। अनेकाल्त्वस्यतदाश्रयत्वा [redacted] ता यदा
यमुःस्थानेतदायमनेकाल्। अनेकाल्त्वस्यतदाश्रयत्वाद्वर्णादेशस्यविघातोनभविष्य ति। अथवानोंतर्यमेवैतयोरांतर्यं। एकस्यापांतर
तमाप्रकृतिर्नास्ति। अपरस्यापांतरतमआदेशोनास्ति। एतदेवैतयोरांतर्यं। संप्रयोगोवानष्टाश्वदग्धरथवत्। अथवानष्टाश्वदग्धरथवत्संप्रयोगोभव
ति। तद्यथा। तवाश्वोनष्टः ममापिरथोदग्धः उभौसंप्रयुज्यावहै इति। एवमिहापितवाप्यंतरतमाप्रकृतिर्नास्ति ममापिअंतरतमआदेशोनास्ति
अस्तुनौसंप्रयोगइति। विषमउपन्यासः। एवंतावच्चेतनावत्सुअर्थात्प्रकरणाद्वालोकेसंप्रयोगोभवति। वर्णाश्चपुनरचेतनाः। तत्र किंकृतःसं
प्रयोगः। यद्यपिसौप्रयुंक्तेसचेतनावान्। एजवर्णयोरादेशःवर्णस्थानिनोःवर्णप्रधानत्वात्। एजवर्णयोरादेशःवर्णप्राप्नोति। एतद्वैलक्षण्यमालोपग
वः। किंकारणं। स्थानिनोवर्णप्रधानत्वा। स्थानीत्यत्रावर्णप्रधानः। सिद्धंतुप्रयांतर्यात्। सिद्धमेतत्। कथं उभयोर्यांतरतमः तेनभवितव्यं। नचावर्णमु
×पिवर्णप्रत्येन नायस्त्व+२
खोंतरतमोःस्यवेतिचेत्। तृद्दर्थस्यपत्रस्याकरणाद्दोषएवादीर्घस्यतुल्यप्रमाणत्वादेकारैकारएवंतरतमौस्तइतिचेत्। पवेदेतद्यदिमेदापेक्षाक्रियते। ऋवर्णमात्रस्यह्रस्वा
द्यांतरतन्नपेक्षायांस्थानाकृतमांतर्यंनंस्तीसनांतर्यमेवेत्युक्तं। संप्रयोगोवेति। यदास्थानेंतरतमइस्येतत्प्रसारव्यातमितिभावः। अवर्णप्रधानत्वादिति। इममेवहिन्यायमाश्रित्यो
क्तमेचोह्रस्वांतरभूयस्त्वादिति। उभयांतर्यादिति। ह्रस्वशासनेत्वेचःसमुदायांतरमामाबादैचोह्रस्वेत्युक्तं। इहतुसंभवस्येवस्थानिनःसमुदायांतरतमइत्यर्थः॥ ॥
मेदा२ केनविद२

उरण्रपरः॥ ॥किमिदमिति। षष्ठीप्रकरणाद्यत्र षष्ठीनिर्देशमुपतिष्ठते। तत्र किमादेशान्तराणां बाधकमणं निवर्तयति। तस्य च वाक्यभेदेन रपरत्वं आहोस्विद्रप
रत्वमात्रमनेन क्रियते उःस्थाने लक्षणान्तरेणानिष्पन्नोऽण्सरपर इति प्रश्नः तत्र केषांचित्साधोरणभवतिरपरश्चेति। तत्राद्यपक्षे ऽण्विधीयमान आदेशान्तराणां
बाधकः। अन्येषां तु पाठोऽणेव भवतीति। तत्र साम र्थ्यादन्य निवृत्तिः सा चैवकारेण प्रदर्श्यते। उदात्तादिष्विति। अन्तरतमस्य बाधकोऽण्प्रसज्यत इति भावः। सत्यं हात्रादि
गुणोऽनवेति सर्वथा दोषः। न्दृष्याहीति। यद्यप्यस्मिन्पक्षे पूर्वे सवर्णे ऋकारे नत्वम्प्यते तथापि नन्द्येति निपातनाद्भवति। नकारस्य तु लृत्वे कृते नुनासिको विधीयमा

उरणनपरः॥ ॥किमिदमुरण्रपरवचनमन्यनिवृत्त्यर्थं उःस्थानेऽणेव भवतिरपरश्चेति आहोस्विद्रपरत्वमनेन विधीयते उःस्थानेऽण्चान ण्
च अणतु रपर इति। कश्चात्र विशेषः। उरण्रपरवचनमन्यनिवृत्त्यर्थं चे उदात्तादिषु दोषः। उरणनपरवचनमन्यनिवृत्त्यर्थं चेदुदात्तादिषु दो
षो भवति। के पुनरुदात्तादयः। उदात्तानुदात्तस्वरितानुनासिकाः। कृतिः हृतिः कृतं हृतं प्रकृतं प्रहृतं। न्दृष्याहि। अस्तु तर्हि उःस्थानेऽण्चान ण्
चअणतु पर इति। य उःस्थानेऽण्सरपर इति चेद्गुणवृद्ध्योरवर्णाप्रतिपत्तिः। यः उःस्थानेऽण्सरपर इति चेद्गुणवृद्ध्योरवर्णस्याप्रतिपत्तिः स्यात्।
कर्त्ता हर्त्ता वार्षगण्यः। किं हि साधीयः ऋवर्णस्य सवर्णो यद्वर्णः स्यात्। न पुनरेदैचौ। पूर्वस्मिन्पक्षे एष दोषः किं हि साधीयः तत्रापि ऋवर्णस्य सव
मेतर तों [redacted] यद्वर्णः स्यात्। न पुनरिकारोकारौ। अयमतः उःस्थानेऽण्प्राप्नोत्यण्प्रसङ्गे ऽणेव भवतिरपरश्चेति। सिद्धापूर्वस्मिन्पक्षे ऽवर्णस्य प्र
तिपत्तिः। यत्तूक्तमुदात्तादिषु दोष इति। स इह दोषो जायते। न जायते। जायते स दोषः। कथं। उदात्त इत्यनेनाणां प्रतिनिर्दिश्यन्ते ऽनणोपि य
''द्यप्यणोपि प्रतिनिर्दिश्यन्ते न तु प्राप्नुवन्ति किङ्कारणं स्थानेन्तरतमो भवतीति॥ ॥ ॥

नोऽणेवस्यान्न तु ऋकार इति दोषः। प्रतिपदविहितैरित्वोत्वादिभिरयं हि बाध्यते इति तेषां रपरत्वं न स्यात्। गुणवृद्ध्योरिति। मूर्त्तस्य चेदणो रपरत्वं क्रियते तदा गुणवृ
द्धिविधावुणेव उरुत्वम इति दोषः। किं हि साधीय इति। किं साधु तरेकारणमित्यर्थः। न पुनरिति। तत्र श्चावर्णस्यैव नियमेना प्रतिपत्तिरवर्णप्रतिपत्तिरिति व्याख्येयोऽस्य
यमतमिति। स एव पश्चात्क्षेपवाद्याह। नानेनान्येषां बाधकोऽस्त्वीति विधीयते किं त्वं रायसङ्गे ऽणेव भवतीति नियमः क्रियते स च रपरः। न च गुणवृद्धिप्रसङ्गे इकारोकारप्र
सङ्गः। यत्तु तदुक्तमिति। किं भवान्मन्यते इति विचारयति। स एव युक्तियुक्तपक्षं गृह्णाति। जायत इति॥ " " एम० १२५

कुतो नु खल्विति॥ अन्तरतमपरिभाषाया अवकाशः अकः सवर्णे दीर्घः अयो होऽन्यतरस्यामिति। उरण्रपर इत्यस्यावकाशः कर्तृ हर्तृ इति। इहोभयं प्राप्नोति कृतिरिति। एवं परत्वादियमेव प्राप्नोतीति दोषः। ये चाप्येत इति। यत्र स्थानेन नियमः क्रियते तत्र तत्कृतो षष्ठ्यन्तेऽपरत्वं भवति न त्वन्यत्र प्रतिपदं विधावितिदोषः। सिद्धं त्विति। विषयविधा कैश्चिदस्येकवाक्यतयाविधानकाल एवाणो रपरत्वं क्रियत इत्यर्थः। यद्येवमिति। न ह्यनेन उः स्थानेऽण्त्विधीयते अपि तु लक्षणान्तरेण। तत्र विधेयाङ्गभूतापषष्ठी स्थाने योगेतिपरिभाषानोपतिष्ठते। तथा चोदीचामातः स्थानेइत्यत्र स्थानग्रहणं कृतं। ततः उः समीपे योऽणत्स्यापि रपरत्वप्रसंग इति स्थानग्रहणानुवृत्तेः उः स्थाने य आदेशो लि
नियमप्रसंगत्वात्

कुतो नु खल्वेतद्द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः स्थानेऽन्तरतम उरण्रपर इति च स्थानेऽन्तरतम इत्यनया व्यवस्था भविष्यति। न पुनरनेन उरण्रपर इत्यतः किं। अत एष दोषो जायते उदात्तादिषु दोष इति। ये चाप्येते ऋवर्णस्य स्थाने प्रतिपदमादेशा उच्यन्ते तेषु रपरत्वं न प्राप्नोति। ऋत इद्धातोः उदोष्ठ्यपूर्वस्येति। सिद्धं तु प्रसंगे रपरत्वात्। सिद्धमेतत्। कथं। प्रसंगे रपरत्वात्। उः स्थानेऽण्प्रसज्यमान एव रपरो भवतीति। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गंस्यते। स्थान इति वर्तते। स्थानशब्दश्च प्रसंगवाची। यद्येवमादेशोऽविशेषितो भवति। आदेशश्च विशेषितः। कथं द्वितीयस्थानग्रहणं प्रकृतमनुवर्तते। तत्रैवमभिसंबन्धः करिष्यते। उः स्थानेऽण्स्थान इति। उः स्थानेऽण्विधीयमान एव रपरो भवति। अथ षाष्ठीग्रहणं किमर्थं। न अर्परो भवतीत्येवोच्येत। अर्पर इतीयत्युच्यमाने कइदानीं रपरः स्यात्। यः स्थाने भवति कश्च स्थाने भवति। आदेशः॥ ७॥

लेनावलम्ब्यते न तु प्रसज्यमान इति। आदेश इति। प्रसज्यमानत्वेनेत्यर्थः। अथ वा स्थानग्रहणानुवृत्त्या प्रसज्यमान इत्येषोऽर्थो लभ्यते न तु उः स्थान इति। तत्र षष्ठ्याणादेशरूपता नियमेन न लभ्येतेति सामीप्यलक्षणेऽपि संबन्धो गम्येत इत्यर्थः। द्वितीयमिति। तच्चाद्यो यथामी तेषं पद्यते। अथ वा सप्तम्यन्तमेव तस्मिन्नयमर्थो भवति प्रसंग एवात्राण्रपरो भवतीति। इदानीमुदात्तादिषु दोषो नास्ति। स्थानेऽन्तरतम इत्यनया परिभाषया कृतिरित्यादावकारस्य ऋकार एव प्रवर्तत इत्यणः प्रसंग एव नास्ति। गुणवृद्धी च
॥ ऋकारस्य विधीयमाने रारावेवान्तरतम्यादुदात्तत इत्यवर्णप्रतिपत्तिरपास्ति॥ ॥

भा॰ कै॰ प्र॰
१२६
126

जोपोन२

रीरिविधिष्विति। बहुवचननिर्देशादीरिशब्दावुपलक्षणमिति द्रष्टव्यम्। केपुनरिति। पैतृष्वसेय इति। लोपवचनं तु सर्वादेशार्थं स्यात्। होतापोतारावितिरेफस्य संयोगां-
तलोपे कृते न स्यात् सिद्धत्वान्न स्यात्। एकादेशस्येति। पूर्वपरयोरिति समुदायस्य स्थानित्वेन चोदितत्वात्तस्य च ऋवर्णरूपत्वाभावादिति भावः। अवयवग्रहणादिति। पूर्वपर-
योरिति स्थानेनोक्तावयवभेदः समुदायो निर्दिश्यते। अवयवावेवचापेक्षितपरस्परौ समुदाय इति भवत्ययमृवर्णस्य स्थाने इति भावः। रान्तप्रतिषेध इति। आन् दि-

अणादेशो रपर इति चेद्रीरिविधिषु रपरप्रतिषेधः॥ अणादेशो रपर इति चेद्रीरिविधिषु रपरत्वस्य प्रतिषेधो वक्तव्यः। केपुना रीरिविधयः। अकङ्लो-
पानङ्नङ्रीङ्रिङादेशाः। अकङ्। सौधातकिः। अकङ्। लोप। पैतृष्वसेयः। लोप। आनङ्। होतापोतारौ। आनङ्। आनङ्। कर्त्तोहर्त्तौ। आनङ्।
रीङ्। मात्रीयति। पित्रीयति। रीङ्। रिङ्। क्रियते ह्रियते। रिङ्। उदात्तादिषु च। किं। रपरत्वस्य प्रतिषेधो वक्तव्यः। कृतिः हृतिः कृतं हृतं। प्रकृतं
प्रहृतं। न्हृष्याहि। तस्मादण्ग्रहणं कर्त्तव्यं। एकादेशस्योपसंख्यानं। एकादेशस्योपसंख्यानं कर्त्तव्यं। खट्वर्श्यः मालर्श्यः। किं पुनः कारणं न सिध्य-
ति। उः स्थाने। अण् प्रसज्यमान एव रपरो भवतीत्युच्यते। न चायमुरेव स्थाने अण् शिष्यते। किं तर्हि उश्चान्यस्य च। अवयवग्रहणात्सिद्धं। यदत्र
ऋवर्णं तदाश्रयं रपरत्वं भविष्यति। तद्यथा। माषानभोक्तव्या इत्युक्ते मिश्रा अपि न भुज्यन्ते। अवयवग्रहणात्सिद्धमिति चेदादेशेषु रान्तप्रतिषेधः। अवय-
वग्रहणात्सिद्धमिति चेदादेशेषु रान्तप्रतिषेधो वक्तव्यः। होतापोतारौ। यथैवोश्चान्यस्य च स्थाने अण् रपरो भवत्येवं य उः स्थाने अचा न अण् च सोपि रपरः
स्यात्। यदि पुनऋवर्णान्तस्य स्थाने रपरत्वमुच्यते खट्वर्श्यः मालर्श्यः नैवं शाक्यं इह न प्रसज्येत॥ ॥
विधीयमाने आकारस्यारणो भावादिसर्थः। तस्मादवयवग्रहणादिसम्याति स्यापकत्वाद्यत्रसाक्षादृवर्णस्याण् विधीयते तत्रैवेदमुपतिष्ठते इत्येकादेशस्योपसंख्यानं क-
र्त्तव्यमेव। यदि पुनरिति। उरितिवर्णग्रहणाद्वर्णग्रहणं च सर्वत्र तदन्तविधिं प्रयोजयतीति न्यायादृवर्णान्तस्य ग्रहणं। खट्वर्श्य इत्यत्र च समुदायः ऋवर्णान्तो भवतीति सि- राम॰ १२६
॥ उरण्रपरत्वं॥ ॥ ॥ ॥

ऋतेनेति॥ अंगस्येति षष्ठ्यंतस्यमलमुपसंहृतेति ऋवर्णस्य गुणे न भाव्यं। न च ऋवर्णो ऋवर्णान्तो भवतीति दोषः। न चेह तदंतविधिरस्ति। उँणिति मूत्तानुवादात्। न च प्रदेशेषु त
दंतस्य कार्यं मंतस्यैवानुसंहारेण स्थानित्वप्रतिपादनादिति भावः। अर्थवतेति। यथैवेयायेसत्रैकाच्त्वं अर्थस्य हि सागोपादानाभ्यां वर्णरूपता धातुरूपता च व्यवस्था
प्यते। इह चेति। उपसंख्यानस्यातिव्याप्तेरर्थः। मातुरिति। रपरत्वे कृते विभक्तिसकारस्य रुत्वे पूर्वस्य रोरीति लोपः। ढ्रूलोप इति दीर्घे लो। नत्र मातॄरिति प्राप्नोतीति भा
वः। द्वयोरिति। अवयवावेवात्रापेक्षितपरस्परौ स्थानिनावत एवैकग्रहणं स्थानिभेदादादेशभेदनिरस्यर्थं कृतं। अन्यतरतरइति। नतीयं तादाघादित्वात्तसिः।

कत्नोहन्त्रो। किरतिगिरतीति। ऋवर्णान्तस्येत्युच्यते। न चैतदवर्णान्तं। ननु चैतदपिव्यपदेशिवद्भावेन ऋवर्णान्तं। अर्थवता व्यपदेशिवद्भावः। न चैषोऽर्थे
वान्। तस्मान्नैवं शक्यं। न चेदेवमुपसंख्यानं कर्तव्यं। इह च परत्वस्य प्रतिषेधो वक्तव्यः। मातुः पितुरिति। उभयेन वक्तव्यं। कथमिह यो द्वयोः षष्ठी
निर्दिष्टयोः प्रसंगे भवति लभते सावन्यतरतो व्यपदेशं। तद्यथा। देवदत्तस्य पुत्रः देवदत्तायाः पुत्र इति। कथं मातुः पितुरिति अत्र रपरत्वं। का
रूपसिद्धिः। रात्सस्येति सकारलोपः रेफस्य विसर्जनीयः। नैवं शक्यं। इह मातुः करोति पितुः करोतीति। अप्रत्ययविसर्जनीयस्येति षत्वं प्रसज्येत।
अप्रत्ययविसर्जनीयस्येत्युच्यते प्रत्ययविसर्जनीयश्चायं। लुप्यते त्र प्रत्ययो रात्सस्येति। एवं तर्हि भ्रातुष्पुत्रग्रहणमेव ज्ञापकमेकादेशनिमित्ता
त्षत्वप्रतिषेधस्य। यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति ज्ञापयत्याचार्यः नैकादेशनिमित्तात्षत्वं भवतीति॥ ॥ ॥

नघयेति। एकः पुत्र उभाभ्यामपि यथा व्यपदिश्यते तथेहापि पूर्वपराभ्यां तत्स्थानिकत्वेनादेशस्य व्यपदेशः। आनडादेस्तु समुदायस्यादेशत्वं नाणइति [redacted] रपरत्वा
भावः। अप्रत्ययेति। असिसयंसमुदायः प्रत्ययो न त्वकार इति तदादेशो प्यप्रत्यय इति भावः। प्रत्ययेति। प्रत्ययावयवत्वादकारोपि प्रत्ययो न तत्तदादेशोपि प्रत्यय इति भावः।
लुप्यते त्र प्रत्यय इति। सकारस्त्रिविधिकाले ऽकारेण नैवलब्धाप्रत्ययसंज्ञा। समुदायनिवेशिनीत्वात्तस्याइति कुतस्तदादेशस्तां लप्स्यते। उत्वे च कृते ऽवशिष्टः सकार एव प्रत्य
य संज्ञः सच लुप्त इति भावः। एकादेशनिमित्तादिति। एकादेशशास्त्रं निमित्तं यस्य तस्मात्॥ ॥ ॥

यद्यंतइति॥ यद्यपि रपरइत्यत्रान्यपदार्थस्य प्राधान्यं तथापि रेफस्य विधेयतया प्राधान्यात्तस्यैवांतत्वं विशेषणमिति भावः॥ यद्यपि समग्रमानं एवाणरपरो विधीयते
तथाप्यानंतरे इवर्णसाम्यादृकारस्येव प्रविधानात्तास्य यथार्थपर्यालोचनया न केवलावस्थानात्सक्षत्रयविमर्शः। लत्वं चेति। ग्रइत्यव यवयषष्ठीति चोद्यं। पिपर्तु

किंपुनरयं पूर्वांतः आहोस्वित्परादिः आहोस्विदभक्तः। कथंचायं पूर्वांतः स्यात् कथं वा परादिः कथं वा अभक्तः। यद्यंतइति वर्जने ततः पूर्वांतः। अथादिरि-
तिवर्जने ततः परादिः। उभयोमयं निवृत्ते ततोऽभक्तः। कश्चात्र विशेषः। अभक्ते दीर्घलत्वयगभ्यस्तस्वरहलादिःशेषविसर्जनीयप्रतिषेधः प्रस-
याव्यवस्था च। यद्यभक्तः। दीर्घत्वं न प्राप्नोति। गीः पूः। रेफवकारांतस्य धातोरिति दीर्घत्वं न प्राप्नोति। किंपुनः कारणं रेफवकाराभ्यां धातुर्विशे-
ष्यते न पुनः पदं विशेष्यते रेफवकारांतस्य पदस्येति। नैवं शक्यं। इहापि प्रसज्येत अग्निर्वायुरिति। एवं तर्हि रेफवकाराभ्यां पदं विशेषयि-
ष्यामः। धातुनेकं रेफवकारांतस्य पदस्येको धातोरिति। एवमपि प्रियंग्राम अस्ति कुलं यस्य प्रियग्रामणिः प्रियसेनानिः। अत्रापि प्राप्नोति।
तस्माद्धातुरेव विशेष्यते। धातौ च विशेष्यमाणे इह दीर्घत्वं न प्राप्नोति। गीः पूः। दीर्घ। लत्वं। लत्वं च न सिध्यति। निजेगिल्यते ग्रो यङीति लत्वं
न प्राप्नोति। नैष दोषः। ग्र इत्यनंतरयोगे षा षष्ठी। एवमपि स्वर्जेगिल्यते इत्यत्रापि प्राप्नोति। एवं तर्हि यङानंतर्ये विशेषयिष्यामः। अथवा
ग्र इति पंचमी। लत्वं। यक्स्वर। यक्स्वरश्च न सिध्यति। गीर्यते स्वयमेव पूर्यते स्वयमेव। अचः कर्तृयकीत्येष स्वरो न प्राप्नोति। रेफेण व्यवहितत्वात्।
नैष दोषः। स्वरविधौ व्यंजनमविद्यमानवद्भवतीति नास्ति व्यवधानं। यक्स्वर। अभ्यस्तस्वर। अभ्यस्तस्वरश्च न सिध्यति। मा हि स्म ते पिपरुः। मा हि-
स्म ते बिभरुः। अभ्यस्तानामादिरुदात्तो भवति अजादौ लसार्वधातुक इत्येष स्वरो न प्राप्नोति। रेफेण व्यवहितत्वात्। नैष दोषः। स्वरविधौ व्यंजनमवि-

[illegible] ॥०॥१७॥

रिति। पृगल्लइ. किशपः श्लुः द्विर्वचनं। अर्त्तिपिपर्त्योश्चेतीत्त्वं। ति जभ्यस्तेति जुस्। जुसि चेति गुणः॥ ॥श्री॥ ॥०॥

ववृतेइति॥ अभ्यासावयवस्यानादेर्हलो निवृत्त्यभावमिति रेफस्य निवृत्त्यसिद्धिः। नार्कुटइति। यस्मात्तु प्रिद्धि॰ धिस्तदादिर्विशे॰ ते सुबंतं चेति रेफांतस्य पदत्वाद्विसर्जनी
यप्रसंगः। किरतइति। एकवचने किरतीति निसत्वात्पूर्वं विकरणः। अंगं तु कार्यमनि संज्ञकते हि विकरणे गुणः प्राप्नोति कृते त्वित्वमिति। द्विवचने तु द्वयोरपि निसत्वात्सस्वा
दित्वं। तत्र रेफो भक्तत्वाच्च धात्ववयवइति विकरणो न स्यात्। सहि धातोः परतो विधीयते। अथ विकरणस्य रेफस्तथाप्यपरेण नस्यादिति व्यवस्था द्वयोर्न कल्प्यते।
अव्यवहितेपि परशब्दस्य प्रवृत्तिस्तथाप्यभिमतव्यवस्था न प्रकल्प्यते इति प्रत्ययाव्यवस्थोक्ता। गीर्षुधिति। परादौ सुब्ग्रहणे न गृह्यते इति न पदांतत्वमिति भावः। अभक्तपक्षे

हलादिः शेषः॥ हलादि शेषश्च न सिध्यति। ववृते। ववृधे। अभ्यासस्येति हलादिः शेषो न प्राप्नोति। हलादिः शेषः। विसर्जनीयः। विसर्जनीयस्य प्रतिषेधो व
क्तव्यः। नार्कुटो नार्पत्यः। खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्राप्नोति। विसर्जनीयः। प्रत्ययाव्यवस्था च। प्रत्यये च व्यवस्था न कल्प्यते। किरतः
गिरतः। रेफोप्यभक्तः प्रत्ययोपि। तत्र व्यवस्था न प्रकल्प्यते। एवं तर्हि पूर्वांतः करिष्यते। पूर्वांते चेदवधारणं विसर्जनीयप्रतिषेधो यक्त्वरश्च। यदि पूर्वांतः
गीरवधारणं कर्तव्यं। गीः सुपि गीरेव सुपि नान्यस्य। सर्पिष्षु धनुष्षु। इह माभूत्। गीर्षु पूर्षु। परादावपि सत्यवधारणं कर्त्तव्यं च तुर्षि सेवमर्थे। विसर्जनी
म॰ यप्रतिषेधः। विसर्जनीयस्य च प्रतिषेधो वक्तव्यः। नार्कुटो नार्पत्यः। खरवसानयोर्विसर्जनीय इति विसर्जनीयः प्राप्नोति। परादावपि विसर्जनीयस्य
प्रतिषेधो वक्तव्यः। नार्कल्पिः सेवमर्थे। कल्पिपदसंघातभक्तो सौ नोत्सहते अवयवस्य पदांततां विहंतुमिति विसर्जनीयः प्राप्नोति। यक्त्वरश्चाय
क्त्वरश्च न सिध्यति। गीर्यते स्वयमेव। स्तीर्यते स्वयमेव। अचः कर्तृयकि इति स्वरो न प्राप्नोति। नैष दोषः। उपदेश इति वर्त्तते॥ ॥

पितदादिवचनात्प्राप्तिरिति कर्त्तव्यमवधारणं। कल्पिपद इति। न कल्पिशब्दादिर्निवृत्तौ च रेफः प्रत्ययसमुदायस्य कल्पिशब्दस्य भक्तत्वादवयवो न तु कल्पिश
ब्दस्य। न तस्य कल्पिशब्दे परतः पदसंज्ञा विधीयमाना तदादौ सुधिकारादे रेफांतस्य भवतीति विसर्जनीयप्रसंगः। पदशब्दे न पघते ने नार्प इति प्रत्यय उच्यते। तेन प्र
त्ययसमुदायभक्तो रेफः कल्पिशब्दे व्यवस्थितो न कल्पिशब्दस्यावयव इति तयोः पौर्वापर्यमस्त्येवेति अवयवस्या त्मन एव पदांततां विहंतुं नोत्सहते इत्यर्थः॥०॥
परतो

मा०कौ०पृ०
१२८
128

क्वचित्तु कल्पप्रत्ययात्पूर्वपदसंघातमकृ इतिपाठः। तत्रायमर्थः। कल्पशब्दसंबन्धियस्तदेनाके त्विरिति तस्य पदस्य योवयवः प्रत्ययसंघातः कल्पिश इति तद्रूकृदसर्थः। पिन्नुतइति। एकवचनेः सत्वप्ककारलोपः प्राक्दुणेन विकरणस्यागुणे परत्वेपेणा पिनोतीतिसिध्यतीति द्विवचनमुदाहृतं। आर्द्धधातुको पदेशाइति। सन्नियोगेन चाकारस्य विधाना दार्द्धधातुकप्रतिपत्तिकालेः कारांतत्वप्रतिपत्त्या सिद्धोलोपः। निर्द्दिश्यमानस्येति। नन्वादेः परस्येतिरेफस्यौत्वे न भाव्यं। नैषदोषः। लेणेरइत्वेनेनयत्वस्याप्रितेप्रयोगविषयमकारमात्रं तस्याकारांतादंगादुत्तरस्यादेशः प्रवर्त्ततो। सरेफस्त्वलुभीयमानलादादेशाभावः प्रसाप्यप्रसायकाभेदविवक्षायांषष्ठीनिर्द्दिष्टस्यादेशा

अथवापुनरस्तुपरादिः। परादावकारलोपः औत्वंघुवृप्रतिषेधश्चघुपधाह्रस्वत्वमिटोव्यवस्थाभ्यासलोपोभ्यस्तनादिस्वरोदीर्घत्वं चायदि परादिः। अकारलोपः प्रतिषेध्यः। कर्त्ताहर्त्ता। अतोलोपः आर्द्धधातुकेइसकारलोपः प्राप्नोति। नैषदोषः। उपदेशाइतिवर्त्तते। यदुपदेशाइतिवर्त्तते धिनुतःकृणुतः अत्रापि प्राप्नोति। नोपदेशग्रहणेनप्रकृतिरभिसंबध्यते किंतर्ह्यार्द्धधातुकमभिसंबध्यते। आर्द्धधातुकोपदेशेयदकारांतमि ति। अकारलोपः। औत्वं औत्वंचप्रतिषेध्यं। चकार। जहार। आतऔणलइत्यौत्वंप्राप्नोति। नैषदोषः। निर्द्दिश्यमानस्यादेशाभवंतीत्येवंनभविष्यति। प स्तर्हि निर्द्दिश्यतेतस्यकस्मान्नभवति। रेफेणव्यवहितत्वात्। औत्वं। पुकप्रतिषेधः युक्प्रतिषेध्यः कारयतिहारयति। आतोयुगितियुक्प्राप्नोति। चघुपधाह्रस्वत्वं। चघुपधाह्रस्वत्वंचनसिध्यति। अचीकरत्। अजीहरत्। णौचघुपधा ह्रस्वइतिह्रस्वत्वंनप्राप्नोति। इटोव्यवस्था। इटव्यवस्था नप्रकल्प्यते। आस्तरिता। निपरिता। इडपिपरादिःरेफोपितत्रव्यवस्थानप्रकल्प्यते। इटोव्यवस्था। अभ्यासलोपः। अभ्यासलोपश्चवक्तव्यः। वहृतेववृधे। अभ्या सस्येतिहलादिःशेषोनप्राप्नोति। अभ्यस्तस्वरश्चनसिध्यति। माहिंसतेपिपृतः। माहिंस्मतेविभृतः। अभ्यस्तानामादिरुदात्तोभव सजाद्यौत्वसार्वधातुकइसे पस्वरेणनप्राप्नोति। अभ्यस्तस्वरः। मादिस्वरश्चनसिध्यति। मकर्त्तोमकर्त्तुं। नादौचनितिकृत्सतापिसेपस्वरेणनप्राप्नोति। नैषदोषः। उक्तमेतत्। कउपदेशोवा तां पर्थ्योपिइष्टोमिति। दीर्घत्वंचनसिध्य ति। गीः। पूः। रेफवकोरांतस्यधातोरिति दीर्घत्वंनप्राप्नोति॥ ॥

अभ्यासलोपः अभ्य अक्षर ×२

इत्युच्यतेरेफेणेति। यद्रूपं षष्ठीनिर्द्दिष्टमकारमात्रंतेनव्यवहितमित्यर्थः। यदितुप्रत्ययस्येत्युच्येत लिट् इतिवानन्तरान्यवधानाभावात्तस्यस्यादेवादेशः। आस्तरितेति। निसला दुणारपरत्वेचकृतेनेडुक्तिकृतीतिनिषेधाद्यत्रत्रिलक्षणोटोव्यवस्थाप्रत्ययोवारेफान्तःवेइडितिअनिटाव्यवस्थाप्राप्नोति। गीरिति। अंतरंगत्वाद्विलोपेकृतेइत्वेरपरत्वेचतद्धोप्य माढीरेफइतिकल्पनायांरात्तस्येतिसलोपेकृतेदीर्घत्वंनस्यादितिपूर्वोक्तपक्षोत्रस्थितः॥ ॥ ॥

एम०
१२८

अलोऽन्त्यस्य ॥ किमिदमिति। षष्ठी प्रथमयोर्निर्देशादस्य साम्यात्प्रश्नः। यदि पुनरिति। प्रथमा बहुवचनमलइति पदावाख्यायेतद्स्यार्थः। अस्मिंश्च पक्षे रहोरजसांलो
पश्चेति लोपः सर्वादेशः प्राप्नोतीति विरजीकरोतीति। इदं नियमार्थमिति। अन्त्यस्यादेशा भवंतीत्यलोऽन्त्यपक्षे पादलग्रहणमनलव्यावृत्त्यर्थमिति भावः। वाक्यस्यापीति। दोष
परत्वादेवमुक्तं ननु वाक्यं षष्ठीनिर्दिष्टमस्ति। पदस्यलोपरमानदुद्गामिसत्यानडुच्छन्दस्योऽन्त्यस्य सर्वस्यादेशप्राप्नोति। यदि खल्वपीति। अवश्यकर्त्तव्योऽसौ योगोपवा
द विप्रतिषेधार्थः। अथवा लाघवमात्रेऽप्यादरस्तत्राप्युच्यते। अंत्यविशेषणोपीति। स्थानेविज्ञातस्येति। षष्ठी स्थानेयोगे त्यनुवर्त्तते। तेन या षष्ठी स्थानेयोगत्वेन वि
ज्ञाता तां समलमुपसंह्रियते। आदेशो वा यो विवक्षितः सोऽन्त्यस्यालः स्थाने इत्येवं विज्ञायते। इतरथेति। यदि षष्ठीमात्रमनुसंह्रियेतेत्यर्थः॥ तत्र लवितेतितच्चक्र

अलोऽन्त्यस्य॥ किमिदमल्ग्रहणमंत्यविशेषणमाहोस्विदादेशविशेषणं। किं चातः। यद्यंत्यविशेषणं आदेशोऽविशेषितो भवति। तत्र को दोषः। अनेकालप्यादेशों
त्यस्य प्रसज्येत। यदि पुनरल्त्वं त्यस्येत्युच्यते तत्रायमप्यर्थः। अनेकालशित्सर्वस्येत्येतन्न वक्तव्यं भवति। इदं नियमार्थं भविष्यति। अलेवोऽन्त्यस्य भवति नान्य
इति। एवमप्यंत्यस्याविशेषितो भवति। तत्र को दोषः। वाक्यस्यापि पदस्याप्यंत्यस्य प्रसज्येत। यदि खल्वप्येषोऽभिप्रायस्तन्न क्रियेतेति। अंत्यविशेषणो
पि सति तन्न करिष्यते। कथं यदि चु अलोऽन्त्यस्येत्येतन्नियमार्थं भविष्यति। इदं वानेकालं त्यस्य भवति नान्य इति। किमर्थं पुनरिदमुच्यते। अलोऽन्त
स्येति स्थानेविज्ञातस्यानुसंहारः॥ अलोऽन्त्यस्येत्युच्यते स्थानेविज्ञातस्यानुसंहारः क्रियते। स्थानेप्रसक्तस्या इतरथा ह्यनिष्टप्रसंगः। इतरथा ह्यनिष्टं
प्रसज्येत। रिति किन्निमित्तोऽप्यंत्यस्य स्युः। यदि पुनरयं योगशेषो विज्ञायेत। योगशेषे च। किं। अनिष्टं प्रसज्येत। रितत्किन्निमित्तोऽप्यंत्यस्य स्युः। तस्मात्सूच्यते। अलो
ऽन्त्यस्येति स्थानेविज्ञातस्यानुसंहार इतरथा ह्यनिष्टप्रसंग इति॥ ॥ ॥

कारात्पूर्वमिट् प्राप्नोतीति दोषः। दापयतीति युगागमस्य स्यात्। तत्रापि उक्तमर्थवत्। आगमा इति तन्न युज्यते। यदि पुनरिति। षष्ठी स्थानेयोगे स्यान्नेनात्स्ये कवाक्यता। अत्र तु
प्रकरणे करोति। इ. च्चेत्यादेः संबंधार्थः। तत्रायमर्थो भवति। शास्त्रे या षष्ठी सा सैव स्थानेयोगे वेति। ननु स्थानेविज्ञातस्य पश्चादनुसंहारः प्रतिपत्तिगौरवप्रसंगादिति भावः। अ
निष्टमिति। आद्यन्तौ टकितौ मिदचोऽन्त्यात्पर इत्येताभ्यां स्थानेयोगत्वमेव बाध्यते तुल्यजातीयत्वात्संबंधस्य संबंधान्तरेण बाधोपसाप्रत्यास्तु पञ्चपन्तं इत्यत्र बाल्यव स्थितं इतिप्र

ङि॰च्च॥ विप्रतिषेधादिति। ननु यमपवादः अनेकाल्शित्सर्वस्येति सुत्सर्गः। उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः। नैतदस्ति। ङि॰त्त्वस्यान्यार्थत्वसंभवे सति दीर्घत्वात्संदिग्धोपस्थानो-
यं योग इत्यपवादत्वमेवात्र विषये नास्ति। प्रयोजनमिति। सति सर्वादेशे ङि॰त्करणं गुणवृद्धिप्रतिषेधार्थं स्यात् तदेव सर्वादेशत्वमलभ्यं ङि॰त्त्वादं तस्यैव प्रसंगादिति भावः॥

ङि॰च्च॥ तातङ॰ तस्य स्थाने कस्मान्न भवति। ङि॰च्चालोन्त्यस्येति प्राप्नोति॥ तातङि ङि॰त्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः। तातङि ङि॰त्करणं सावका-
शं। कोवकाशः। गुणवृद्धिप्रतिषेधार्थो ङ॰कारः। तातङि ङि॰त्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशो भविष्यति। प्रयोजनं नाम तद्भवति यत्स्याद्य-
न्नियोगतः स्यात्। यदि चायं नियोगतः सर्वादेशः स्यात् तत एतत्प्रयोजनं स्यात्। कुतो नु खल्वेतत् ङि॰त्करणादयं सर्वादेशो भविष्यति न पुनरन्त्यस्य
स्यादिति। एवं तर्ह्येतदेव ज्ञापयति न तातङ॰ तस्य स्थाने भवतीति यदेतं ङि॰तं करोति। इतरथा हि लोट एरु प्रकरण एव ब्रूयात्तिह्योस्तादाशिष्यन्य-
तरस्यामिति॥ ॥आदेः परस्य॥ ॥अलोन्त्यस्यादेः परस्यानेकाल्शित्सर्वस्येत्यपवादविप्रतिषेधात्सर्वादेशः॥ अलोन्त्यस्येत्युत्सर्गः। तस्यादेः परस्या-
नेकाल्शित्सर्वस्येत्येतावपवादौ। अपवादविप्रतिषेधात्सर्वादेशो भविष्यति। आदेः परस्येत्यस्यावकाशः। द्व्यन्तरुपसर्गेभ्योप ईत्। द्वीपं। अन्तरीपं। सम-
मीपं। अनेकाल्शित्सर्वस्येत्यस्यावकाशः। अस्तेर्भूः। भविता। भवितुं। इहोभयं प्राप्नोति सर्वस्येत्यस्यावकाशः। इदम इश्। इतः। इह। आदेः परस्येत्येतस्यावका-
शः स एव। इहोभयं प्राप्नोति। अष्टाभ्य औश्। शित्सर्वस्येत्येतद्भवति विप्रतिषेधेन॥ x प्नोति॰ अतो भिस ऐसिति॰ अनेकाल्शित्सर्वस्येत्येतद्भवति वि-

ङि॰त्करणादिति। गुणवृद्धिप्रतिषेधार्थादिति भावः॥ एवं तर्हीति। अन्तरेणापि ङि॰त्त्वमेतस्य अप्रकरणेऽतानि विधीयमानं तस्यादेशत्वं सिद्ध्यतीति ङि॰त्त्वादेव गुणवृद्धिप्र-
॥तिषेधार्थं ङि॰त्त्वं ज्ञायते॥ ॥श्री॥ ॥१॥ ॥

अनेकाल्शित्सर्वस्य॥ ॥शित्करणादेवेति। सति शकारे नेकाल्त्वादिति भावः। अनेकाल्त्वसंपादनेन चरितार्थः शकार इतीत्संज्ञकत्वाल्लुप्यत एव। अष्टाभ्य औशिति। आ
देः परस्येत्यादेः प्राप्तेरिति भावः। अस्य सप्तायमिति। ननु सर्वनाम्नो नपुंसकादिति च पंचमीनिर्देशादादेः परस्येत्यादेर्भाव्यं तत्किमुच्यते सस्यायं भवन्निति। एवं तर्हि सर्वेना
म्न इति षष्ठीं मन्यते नपुंसकादिति विहितविशेषणमिति ज्ञापकत्वमेव शित्करणस्य। अथवा सस्य पि इह शिद्ग्रहणे ऽनेकाल्त्वादादेः परस्येत्येतद्बाधित्वा सर्वादेशो भ

अनेकाल्शित्सर्वस्य॥ ॥शित्सर्वस्येति किमुदाहरणं। इदम इश्। इतः। इह। नेतदस्ति। शित्करणादेवात्र सर्वादेशो भविष्यति। इदं तर्ह्यष्टाभ्य
औश्। ननु चात्रापि शित्करणात्सर्वादेशो भविष्यति। इदं तर्हि जस्शसोः शिः। ननु चात्रापि शित्करणादेव सर्वादेशो भविष्यति। अस्त्य
न्यच्छित्करणे प्रयोजनं। किं। विशेषणार्थः शकारः। क्व विशेषणार्थेनार्थः। शि सर्वनामस्थानं विभाषा ङिश्योरिति। शित्सर्वस्येति शक्यम
कर्तुं। कथं। अस्य सप्तायं स्थाने भवन्न प्रत्ययः स्यात्। असत्यां प्रत्ययसंज्ञायामित्संज्ञा न स्यात्। असत्यामित्संज्ञायां लोपो न स्यात्। असति लो
पेऽनेकाल्। यदानेकाल् तदा सर्वादेशः। यदा सर्वादेशः तदा प्रत्ययः। यदा प्रत्ययस्तदेत्संज्ञा यदेत्संज्ञा तदा लोपः। एवं तर्हि सिद्धे सति यच्छित्सर्वस्येत्याह त
ज्ज्ञापयत्याचार्यः नानुबन्धकृतमनेकाल्त्वं भवतीति। किमेतस्य ज्ञापने प्रयोजनं। तत्रासरूपसर्वादेशादाप्प्रतिषेधे पृथक्त्वनिर्देशोऽनाकारान्तत्वा
दित्युक्तं तन्न वक्तव्यं भवति॥ ॥इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य प्रथमे पादे सप्तमाह्निकं॥ ॥

विष्यति किं शिद्ग्रहणेनेति पुनरपि शिद्ग्रहणं ज्ञापकमेव। अनेकान्तेषु चानुबन्धेषु नासत्त्वेनानुबन्धकृतमनेकाल्त्वमिति। एकान्तेषु च तेषु ज्ञापने प्रयोजनम्॥ ॥इत्यु
पाध्यायजैय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य प्रथमे पादे सप्तमाह्निकं॥ ॥ ॥श्री॥ ॥

भा०कौ०प्र०
१३०

स्थानिवदादेशोऽनल्विधौ॥ वल्करणमिति। विनापि वतिना तदर्थलाभोपपत्तेरिति भावः। ननु स्थान्यादेशयोरुच्यमाने स्थानिरूपमादेशः प्रतिपद्यत इति कल्पनाश्रयितुं युक्ता
। अस्तेर्भूरित्यादेशविधानवैयर्थ्यप्रसङ्गात्। न च वचनद्वयप्रामाण्यादिकल्पः। वा लिटीति विकल्पारम्भात्। संज्ञाधिकार इति। संज्ञाप्रस्ताव इत्यर्थः। तत्र को दोष इति। आदेशका
र्यसिध्यर्थोऽतिदेशः। तच्चादेशकार्यं संज्ञासंबन्धेनापि सिध्यतीति प्रश्नः। वधेरेवेति। संज्ञा हि प्रदेशेषु संज्ञिप्रत्यायनार्था संज्ञिनं प्रत्याय्य निवर्तते न तु स्वयं कार्ये प्रतिप
द्यत इति भावः। बहुगणेत्यत्र तु संख्येत्यन्वर्थाश्रयणाद्वो क्रिकार्थग्रहणाद्विनापि वतिनातिदेशपक्ष उपन्यस्तः। वल्करणे त्विहातिदेशः स्थानिकार्यारोपादेशे क्रियं
ते न तु स्थानि निनिवर्त्स्यत इत्यस्य दोषः। डि. नु क्किदिति तु संज्ञा न भवति। न त्वासेऽडितिप्रतिषेधात्। न हि त्रुकः कित्संज्ञा विहिता या प्रतिषिध्येत। किं किनोल्तिं उच्चे सत्त्रनु

स्थानिवदादेशोऽनल्विधौ॥ ॥ वल्करणं किमर्थम्॥ स्थान्यादेशोऽनल्विधाविति यदुच्यमाने संज्ञाधिकारोऽयं तत्र स्थानी आदेशस्य संज्ञा [redacted]
स्यात्। तत्र को दोषः। आङो यमहनः आत्मनेपदं भवतीति वधेरेव स्यादुं ते न स्यात्। वल्करणे पुनः क्रियमाणे न दोषो भवति। स्थानिकार्यमादेशोऽ
तिदिश्यते गुरुवद्गुरुपुत्र इति यथा। अथादेशग्रहणं किमर्थं। स्थानिवदनल्विधाविति यदुच्यमाने क इदानीं स्थानिवत्स्यात्। यः स्थाने भव
ति। कश्च स्थाने भवति आदेशः। इदं तर्हि प्रयोजनं। आदेशमात्रं स्थानिवद्यथा स्यात्। एकदेशविकृतस्योपसंख्यानं चोदयिष्यते। तन्न व
क्तव्यं भवति॥ अथ विधिग्रहणं किमर्थं॥ ॥ ॥

संज्ञाप्रकरणाभावान्नहदतिदेशः स्थानिकार्यमित्यनेन कार्यातिदेशोऽयमिति दर्शयति। शास्त्रातिदेशापेक्षया कार्यातिदेशस्य प्राधान्यात् इतरेषां कार्योपलक्षणत्वादिति भा
वः। आदेशग्रहणमिति। स्थानिशब्दस्य संबन्धिशब्दत्वादादेशो लभ्यत एव। यथा पितृवदधीते इत्युक्ते पुत्र इति गम्यत इति भावः। क इदानीमिति। द्विविधश्चादेशः। प्रत्यक्ष
श्चास्तेर्भूरित्यादिरानुमानिकश्चेरुरित्यादिः। अत्र हीकारेणोकारान्तः स्थान्यनुमीयते उकारेणोकारान्तस्यादेशः। ततश्च तेस्तुरिति संपद्यते। अत्र प्रत्यक्षस्यैव ग्र
हणं स्यान्नानुमानिकस्येति भावः। आदेशमात्रमिति। प्रत्यक्षमनुमितं चेत्यर्थः। एरुरित्यत्र प्रत्यक्षमुकारस्यादेशत्वमिकारं च स्थानि[redacted]त्वं न च किंचिदिकारस्य कार्यम राम०
स्ति यदुकारेऽतिदिश्येत तिशब्दकार्यं तु नुशब्दस्यातिदिश्यत इति पदत्वसिद्धिः॥ ॥ १३०

सर्वविभक्त्यंत इति। सर्वविभक्त्यंतेनोवयवो स्यास्तीति मत्वर्थीयोकारप्रत्ययः। बहुत्वप्रतिपादनपरमेतत्। न त्वत्र सर्वविभक्तयः संभवंति। तत्र संबंधमात्रे षष्ठ्युपादानेऽनेक विभक्त्यर्थोनभावात् फलतः सर्वविभक्त्यंतता संभवति। अथवाल्विधिरिति विशिष्टप्रवृत्तिनिमित्तानाश्रयणात् सर्वविभक्त्यंतता। सति च विधिशब्दे समाससद्भावादेतद्वस्तुलाभः। केवलस्त्वल्शब्द उपादीयमानो यद्विभक्तिरुच्चार्येत तदर्थो पक्षः स एव स्यात्। तत्रालः परस्य विधिः द्यौः पंथाः सः इति सुलोपो न भवति। अलि परतो विधिः कइष्टः स इष्ट इति हशि चेत्युत्वं न भवति। अलो विधिः। घुकामः इति। लोपो व्योर्वलीति वलोपो न भवति। उत्वं त्व वलि सा वक्काशंस्यादहह र्विमलद्यु इति। अला विधिः। व्यूढोरस्के नेति। अयोगवाहानाम् दूस्थदेशात्वं न भवतीति। प्रातिपदिकनिर्देशाश्चेति। अनलि सेनावदेवो च्यतां अत्रत्य इसस्का एव केवलं प्रथमाविभक्तिं पादीयतेन

सर्वविभक्त्यंतः समासो यथा विज्ञायेत। अलः परस्य विधिः अल्विधिः अलो विधिरल्विधिः अलि विधिरल्विधिः अला विधिरल्विधिरिति। नैतदस्ति प्रयोजनं। प्रातिपदिकनिर्देशो यं प्रातिपदिकनिर्देशाश्चार्थतंत्रा भवंति न कांचित्प्राधान्येन विभक्तिमाश्रयंति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुत्पद्यते सा साश्रयितव्या। इदं तर्हि प्रयोजनं। उत्तरपदलोपो यथा विज्ञायेत। अल्माश्रयते अलाश्रयः। अलाश्रयो विधिरल्विधिरिति। यत्र प्राधान्येनालाश्रीयते तत्र प्रतिषेधः स्यात् यत्र विशेषणत्वेनाश्रीयते तत्र प्रतिषेधो न स्यात्। किं प्रयोजनं। प्रदीव्य प्रसीव्येति वलादि
(लक्षण इण्मा भूदिति॥ ॥ ॥

त्वुत्तरदर्थो विवक्ष्यते। यथा भाव इत्यत्र लिंगसंख्ये इति भावः। उत्तरपदलोपः इति। अनलि सुच्यमानेयत्र कार्ये स्वातंत्र्येणालाश्रीयते तत्रैव निषेधः स्यात्। कइष्टः सरइष्ट इत्यादौ प्रदीव्य सादाविटः प्रतिषेधो न स्यात्। न ह्यत्र विधावलः स्वातंत्र्येणाश्रयणं। वलादेरित्यन्यपदार्थस्य प्राधान्यादुणभावादलः। उत्तरपदलोपे त्वलाश्रयत्वादिड्विधेः प्रतिषेधसिद्धिः। अल्माश्रयत इति। अर्थप्रदर्शनमेतत्। एवं त्वलाश्राय इति स्यात्। तस्मादाश्रीयत इत्याश्रयः एरच्। अलाश्रयो विधिरल्विधिः। अलाश्रयत्वादिड्विधेरेवाल्वि
(सुच्यत इति गतार्थत्वादप्रयोग एव उत्तरपदस्य लोपः॥ ॥ ॥

भा०कै० प० किमर्थमिति। न स्थानापन्नस्य तद्धर्मलाभात् स्थानिकार्यो ऽणादेशः प्राप्स्यतीति भावः। स्थान्यादेशपृथक्त्वादिति। स्थानिस्वरूपाश्रयं यत्कार्यं तद्भिन्नरूपत्वादादेशे न सिध्यतीति भा-

१३१ वः। लोकवदिति। लोके हि वचनमन्तरेणापि स्थानापन्नस्य तद्धर्मलाभो दृष्टः। उपाध्यायस्येति। प्रसंगापेक्षेयं षष्ठी। ननु शिष्यविशेषणमेतत्। व्यभिचाराभावात्। प्रतिषेधं च

131

किमर्थं पुनरिदमुच्यते। स्थान्यादेशपृथक्त्वादादेशे गुरुस्थानिवदनुदेशो गुरुवद् गुरुपुत्र इति यथा। अन्यः स्थानी अन्य आदेशः। स्थान्यादेशपृथक्त्वादे-
तस्मात्कारणात् स्थानिकार्यमादेशेन प्राप्नोति। तत्र को दोषः। आङो यमहनः आत्मनेपदं भवतीति हन्तेरेव स्यात् वधेर्न स्यात्। इष्यते च स्यादिति। तच्चान्तरेण
यत्नं न सिध्यति। तस्मात् स्थानिवदनुदेशः। एवमर्थमिदमुच्यते। गुरुवद् गुरुपुत्र इति यथा। तद्यथा गुरुवदस्मिन् गुरुपुत्रे वर्तितव्यमिति गुरौ यत्कार्यं तद्गु-
रुपुत्रेऽतिदिश्यते। एवमिहापि स्थानिकार्यमादेशेऽतिदिश्यते। नैतदस्ति प्रयोजनम्। लोकत एतत्सिद्धम्। तद्यथा लोके यो यस्य प्रसंगे भवति लभतेऽसौ
तत्कार्याणि। तद्यथा। उपाध्यायस्य शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते। यद्यपि तावल्लोक एष दृष्टान्तः। दृष्टान्तस्यापि तु पुरुषारंभो निव-
र्तको भवति। अस्ति चेह कश्चित्पुरुषारंभः। अस्तीत्याह। कः। स्वरूपविधिर्नाम। हन्तेरात्मनेपदमुच्यमानं हन्तेरेव स्याद्वधेर्न स्यात्। एवं तर्ह्याचार्यप्रवृ-
त्तिर्ज्ञापयति स्थानिवदादेशो भवतीति। यदयं युष्मदस्मदोरनादेश इत्यादेशप्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकम्। युष्मदस्मदोर्विभक्तौ कार्यमु-
च्यमानं कः प्रसंगो यदादेशे स्यात्। पश्यति त्वाचार्यः स्थानिवदादेशो भवतीति अतोऽनादेशे प्रतिषेधं शास्ति। इदं तर्हि प्रयोजनम्। अनल्विधावि-
ति प्रतिषेधं वक्ष्यामीति। इह मा भूत्। द्यौः पन्थाः स इति। एतदपि नास्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति। अल्विधौ स्थानिवद्भावो भवतीति।
यदयमदो जग्धिर्ल्यप्ति किति तिकिती सेव सिद्धे ल्यब्ग्रहणं करोति तस्मान्नार्थोऽनेन योगेन॥०॥

क्ष्यामीति। न स्थानिप्रदर्शितविषयः प्रतिषेधः। आकोऽपि धातुमिति भावः। एवं तावल्लिंगेनाभिमतोऽर्थः सिद्ध इति प्रदर्शितम्। इदानीं क्रियमाणोऽपि सूत्रे न अल्विधाविति न वक्तव्यमि राम०
त्याह॥ ॥श्री॥ ॥ ॥ १३१

अलुग्विधौ प्रतिषेध इति। प्रदीव्येति रूपं न भवति। इडुविधौ वलादेरिति विशेषणमाश्रितं। न चाक्त्वो ल्यपि विनिवृत्तस्थितिः सासन्निहितमपि वलादित्वं स्थानिवद्भावेन लभ्यते। तथा हि। इडागमे दिव
पि क्त्वाभवे सेवं क्त्वाके वलोपि। आकारान्तोपि। स्नातीतीकारान्तोपि। दत्वाये तिवयन्तोपि। इट्टीन्नमितिमान्तोपि। तत्र क्त्वामात्रप्रतिबद्धं यत्कार्यं क्त्वाप्रत्ययस्य ल्यबादि तदा देशो
ति दिश्यते। ननु वलादित्वमिति ल्यपो न स्वतो नापि स्थानितो वलादित्वमिति। उभावः सिद्ध एवेति भावः। ब्रालुणवदिति। सामान्यशब्दोपादाने न यत्र कार्यमतिदिश्यते तत्र वि
विशेषाश्रयकार्यं नातिदेशः। यत्र तु विशेषशब्दोपादाने नातिदेशस्तत्र विशेषातिदेशो भवत्येव। अग्रहीदिति। ग्रहोलिटि दीर्घ इत्यनेन इति भावः। दीर्घविधौ त्वचि परिभाषोपस्था
शेषस्याशा शार्थता॰

आरभ्यमाणो ह्येतस्मिन्योगेऽलुग्विधौ प्रतिषेधे विशेषणेऽप्राप्तिस्तस्यादर्शनात्। अलुग्विधौ प्रतिषेधे तस्यापि विशेषणे समाश्रीयमाणेऽसति तस्मिन् विशेष
णेऽप्राप्तिर्विधेः। प्रदीव्य प्रसीव्य क्तिकारणां। तस्यादर्शनात् वलादेरित्युच्यते न चात्र वलादिं पश्यामः। ननु च एवमर्थ एवायं यत्नः क्रियते। अन्यस्य कार्यमु
च्यमानमन्यस्य यथा स्यात् इति। सत्यमेवमर्थः। ननु प्राप्नोति। किं कारणां। सामान्यातिदेशो विशेषानतिदेशः। सामान्ये ह्यतिदिश्यमाने विशेषो ना
तिदिष्टो भवति। तद्यथा। ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमिति सामान्यं यद् ब्राह्मणकार्यं तत् क्षत्रिये तिदिश्यते। यद्विशिष्टं वलादेरिति तन्न दिदेतिदि
श्यते। यद्येवमग्रहीत् इटईटीति सिचो लोपो न प्राप्नोति। अनलुग्विधाविति पुनरुच्यमाने इहापि प्रतिषेधो भविष्यति प्रदीव्य प्रसीव्येति। विशिष्टं त्येषो
लमाश्रयते वलं नाम इह च प्रतिषेधो न भविष्यति। अग्रहीत् इति। विशिष्टं त्येषो नलमाश्रयते इटं नाम। यदि तर्हि सामान्यप्यतिदिश्यते विशेषश्च॥ ७॥

नादच एवस्थानित्वं। इड्लजन्तराणां वावर्तते क इति इट्कार्ये विशेषकार्यत्वात्प्राप्नोति। तथा प्रदीव्येति गुणप्रतिषेधो न प्राप्नोति। देविल्वे सादावकिन्तोपि क्त्वाप्रत्ययस्य
संभवात् किं त्वस्यापि वलादित्ववन्न स्यादतिदेशः। तस्माद्विशेषकार्यातिदेशज्ञापनार्थमनल्विधाविति कर्तव्यमिति भावः। अनुबन्धकार्येषु चानल्विधाविति प्रतिषेधो
न प्रवर्तते स्थानिवदनुबन्धस्यासन्निधानादसंत एवानुबन्धाः कार्यस्य विशेषका इति सिद्धान्तस्य व्यवस्थापनात्। विशिष्टं त्येषो नलमिति। इटईटीति सलोपे समुदाय रूपे
णाश्रयणा ग्रहोलिटि दीर्घ इत्यत्रापीट एवस्थानित्वं नाचः। अनियमप्रसंगान्नियमफलाया अच् परिभाषाया अनुपस्थानात्॥

ससाश्रय इति॥ आश्रीयते इत्याश्रयः। यथा वलादित्वमिड्विधौ। तत्रेडागमस्यात्रविधित्वाद नल्विधौ च स्थानिवद्भावविधानादहृदिनामिति स्थानिकार्ये मिडागमो न प्राप्नोति। न वेति। अतिदेशएवानुदेशः सः प्रयोजनं यस्य तदानुदेशिकं। तत्रस्त्वाश्रयं वलादित्वमाश्रित्य स्थान्याश्रयं सार्वधातुकत्वमिड्विधास्यते। तत्रानल्विधाविती ति। इडागमार्थमत्र स्थानिवद्भावः प्राप्यते। इट्चाल्विधिरिति अनल्विधाविति प्रतिषेधात्सार्वधातुकत्वस्यापीरष्यत्वादि एनप्राप्नोतीति। इदानीं यथात्र प्रतिषेधो न प्रवर्त्तते तथा विचारपूर्वकं प्रतिपादयितुमाह। किं पुनरिति। आदेशो स्यास्ती सादेशी स्यानी। किं स्थान्यलाश्रये कार्ये स्थानिवत्त्वनिषेधो

ससाश्रये विधिरिष्टः। स तिच वलादित्वे इटामवितव्यं। अहृदितां। अहृदितं अहृदित। किमत्तो यत्स्तनि भवितव्यं। प्रतिषेधस्तु प्राप्नोस ल्विधित्वात्। प्रतिषेधस्तु प्राप्नोति। किं कारणं। अल्विधित्वात्। अल्विधिरयं भवति। तत्रानल्विधाविति प्रतिषेधः प्राप्नोति। न वानुदेशिकस्य प्रतिषेधादितरेणभावः। न वाएष दोषः। किं कारणं। आनुदेशिकस्य प्रतिषेधात्। आस्त्वत्रानुदेशिकस्य वलादित्वस्य प्रतिषेधः। स्वाश्रयमत्र वलादित्वं भविष्यति। नैतद्विवदाम हे वलादिने वलादिरिति। किं तर्हि स्थानिवद्भावात्सार्वधातुकत्वमेषितव्यं। तत्रानल्विधाविति प्रतिषेधः प्राप्नोति। किं पुनरादेशिन्यल्याश्रीयमाणे प्रतिषेधो भवत्साहोस्विदविशेषेण। आदेशो आदेशिनि च। कश्चात्र विशेषः। आदेशल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः। आदेशल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धयोः प्रतिषेधो वक्तव्यः। कुर्वित्यत्र स्थानिव[illegible]द्भावादंगसंज्ञा स्वाश्रयं च लघूपधत्वं तत्र लघूपधगुणः प्राप्नोति। वधक इत्यत्र स्थानिवद्भावादंगसंज्ञा स्वाश्रयं चाडुपधत्वं तत्र वृद्धिः प्राप्नोति। अस्तु तर्ह्यविशेषेण आदेश आदेशिनि च। आदेशप्रादेश इति चेत्तुप्रतिडूक्ष्वदतिदिष्टेष्वुपसंख्यानं। आदेशप्रादेश इति चेत्तुप्रतिडूक्ष्वदतिदिष्टेषूपसंख्यानं कर्त्तव्यं। तुप्रा इट्क्षायप्रस्ला

यात्मात्राश्रय इति विचारः। किं प्रसासन्नि राश्रीयतेऽथवा व्याप्नि रिति भावः। वधक इति। हंतेर्ण्वुलि बहुलं संज्ञाछंदसोरिति वक्तव्यं अन्त्र वधकगांत्र विचक्षणाज्जिराघ्यर्थे मिति वधादेशः। स च हलन्त इति दोषोपन्यासः। अदंतत्वे त्वेद्धोपस्य स्थानिवद्भावाद्वृधभावः। तुप्रतिड्क्ष्वदतिदिष्टेष्विति। आदिष्टएवातिदिष्टो विवक्षितः। उपलक्षणं चैतत्। तद्धितादेशेष्वपि न प्राप्नोति लिंगवापन इति अत्र हि स्वाश्रयमजादित्वं स्थानिवद्भावात्रद्धितत्वं॥ ॥ x पिबेयत्र स्थानिवद्भावादंगसंज्ञा स्वाश्रयं च लघूपधत्वं तत्र लघूपधगुणः x

स्यत॰

किंपुनरिति॥ न्यायापेक्षः प्रकर्षः। कः पक्षो न्यायोपपन्न इत्यर्थः। अपादेशिनीति। प्रत्यासत्तेरिति भावः। यत्कार्यमादेशः स्वतो न प्रतिपद्यते तेनैवासादतिदेशाकांक्षा। तच्छेष स्थप्रतिषेधस्तद्वारकस्त्वा कार्ये युक्तः। अनूदिता मित्यत्र त्वादेशस्य स्वतो वलादित्वाभावेनत्रातिदेशाकांक्षा। सार्वधातुकत्वस्य तु नो नास्तीति तदेवातिदेशेन प्राप्यते। यथा गुरुपुत्रो गुरुत्वे सति नातिदेशमपेक्षते न तथा वलादित्वं प्रत्यादेशस्य नास्त्यतिदेशापेक्षे सेनावतादृष्टांतः सार्वधातुकत्वे प्रसक्त्यपेवातिदेशापेक्षा। करोतादिति। अका

तिङ्। अनूदितं। अरुदितं। अरुदितास्थानिवद्भावात्सार्वधातुकसंज्ञास्याश्रयं च वलादित्वं तत्र प्रतिषेधः प्राप्नोति। तिङ्। रुदतिदिष्टं। सुवनं स्तुवनं धुवनं। स्थानिवद्भावात्प्रत्ययसंज्ञास्याश्रयं चाजादित्वं तत्र प्रतिषेधः प्राप्नोति। किंपुनरत्र न्यायः। अपादेशिन्यत्याश्रीयमाणे प्रतिषेध इत्येतदेव न्यायः। कुत एतत्। तथा ह्ययं विशिष्टं स्थानिकार्यमादेशेतिदिशति गुरुवद्गुरुपुत्र इति यथा। तद्यथा। गुरुवदस्मिन् गुरुपुत्रे वर्तितव्यमन्यत्रोच्छिष्टभोजनात्पादोपसंग्रहणाच्चेति। यदि च गुरुपुत्रोपि गुरुर्भवति। तदपि कर्तव्यं भवति। अस्तु तर्ह्यादेशिन्यत्याश्रीयमाणे प्रतिषेधः। ननु चोक्तमादेशप्रत्ययविधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेध इति। नैष दोषः। करोतेस्तपरनिर्देशात्सिद्धं। पिबिरदंतः। वधकइति नायं ण्वुल्। अन्योयमकशब्दः। क्विदौणादिकः करुचक इति यथा। एकदेशविकृतस्योपसंख्यानं। एकदेशविकृतस्योपसंख्यानं कर्तव्यं। किंप्रयोजनं। तिङ्। ग्रहणेन ग्रहणं यथा स्यात्। एकदेशविकृतस्यानन्यत्वात्सिद्धं। एकदेशविकृतमनन्यवद्भवतीति तिङ्। ग्रहणेन ग्रहणं भविष्यति। तद्यथा श्वा कर्णे पुच्छे वा छिन्ने श्वैरसत्यधुकारो मात्रिकयेव न्यायस्य इति श्वा स्त्रांतरेणापि प्राप्तस्य भिन्नकालस्य निरसार्थं तपरत्वमिसर्थः। अन्योयमिति। हनो वध चेति कुन्प्रत्ययः। एकदेशविकृतस्येति। एकदेशेन विकृत इति तृतीया समासः। तद्यथेति। छिन्नेपि पुच्छे शिष्टावयवसन्निवेशः श्वत्वजातेरभिव्यंजकः। एवं पचतु लिसत्र इकारस्य विकारेपि नकारस्तिङ्। त्वस्य व्यंजकः। तथा चेकारलोपे पिद्भ्यपचदितितकारमात्रस्य तिङ्। त्वमर्थमतीतिहेतुत्वं चास्ति। नाम्न इति। अवयवापगमेपि तत्स्य जात्संतरेणायोगः। किं तर्हि श्वत्वेन व्यवहारः॥

प्रक्रियाकौमुदी

पचतुपचंतुर

भा० कै० प्र० अनित्य विज्ञानमिति। अवस्थिते तकारे इकारस्य उकार इत्यनित्यत्वं श्रुतत्वं प्राप्नोतीति भावः। उपसंख्यानेनतु क्रियमाणेनानित्यत्वं। एरुरिति स्थान्यादेशाभ्यां तिपाद्यन्तु
१३३ शब्दयोरनुमीयमानत्वान्नेः प्रसंगे तो विधानात्। तत्रादेशग्रहणं उपसंख्यानात्। आनुमानिकस्यापादेशस्य स्थानिवद्भावः सिद्धः। नचेमे इति। तुशब्दादयः। एरुरित्यत्र साक्षा
133 त्समुदायानुपादानात्। रूपान्यत्वाच्चेति। यद्यप्यवयवादेशे रूपं नभिंद्यात्स्यादेव प्रत्यभिज्ञानात्तिङ्‌लोऽयत्तत्तु भेदको रूपं तस्मान्नास्तितिङ्‌त्वमिति भावः। योत्रादेश

अनित्यविज्ञानंतु॥ अनित्यविज्ञानंतु भवति। नित्याः शब्दाः नित्येषु नाम शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोपजनविकारि
भिः। तत्रस एवायं विकृतश्चेत्येतन्नित्येषु शब्देषु नोपपद्यते तस्मादुपसंख्यानं कर्तव्यं। भारद्वाजीयाः पठंति। एकदेशविकृतेषूपसंख्यानं। एकदेशवि
कृतेषूपसंख्यानं कर्तव्यं। किं प्रयोजनं। पचतु पचंतु तिङ्‌ग्रहणेनग्रहणं यथा स्यात्। किंच कारणं न स्यात्। अनादेशत्वादादेशः स्थानिवदित्यु
च्यते। नचेमे आदेशाः॥ रूपान्यत्वाच्च। अन्यत्वल्वपि रूपं पचतीतिअन्यत्पचत्विति। इमेप्यादेशाः। कथं। आदिश्यते यः स आदेशः॥ इमेचाप्या
नार दिश्यंते। आदेशः स्थानिवदितिचेन्नाश्रितत्वात्। आदेशः स्थानिवदितिचेत्तन्न किंकारणं। अनाश्रितत्वात्। योत्रादेशो नासावाश्रीयते यश्चा
श्रीयते नासावादेशः। नैतन्मंतव्यं समुदाये आश्रीयमाणेऽवयवो नाश्रीयत इति॥ अभ्यंतरो हि समुदायस्यावयवः। तद्यथा वृक्षः प्रचलन्स
हावयवैः प्रचलति। आश्रय इतिचेदल्विधिप्रसंगः। आश्रय इतिचेदल्विधिरयं भवति। तत्रानल्विधाविति प्रतिषेधः प्राप्नोति। नैषदोषः। नैवं सति
कश्चिदनल्विधिः स्यात् उच्यते चेदमनल्विधाविति। तत्र प्रकर्षगतिर्विज्ञास्यते साधीयो योऽल्विधिरिति कश्च साधीयः॥ ॥
इति॥ इकारस्य उकारः नासावाश्रीयते पदसंज्ञायां सा हि तिङ्‌शब्दनिबंधना नावयवनिबंधना। यश्चेति। तुशब्दः साक्षाद्विधानान्नादेशः पदसंज्ञानिमित्तभावेनचाश्री राम०
यतइत्यर्थः। कुतोऽन्तरमाह। नैतदिति। तिपृतस्फि इति तिप्सन्निवेशे इकारतकारावपि सन्निविष्टाविति कारस्य तिङ्‌त्वात्तदादेशस्याप्युकारस्य तिङ्‌त्वमिति सिद्धा पदसंज्ञा। १३३
अल्विधिप्रसंग इति। इकारस्य पदसंज्ञानिमित्तत्वादल्विधिः पदसंज्ञा स्यादित्यर्थः॥ ॥श्री॥ ॥ ॥

यत्रप्राधान्येनेति। यत्र साक्षात्त्वं निर्दिष्टः तत्र प्रतिषेधो नानुमीयमाने संभवमात्रेणेत्यर्थः। प्राधान्यग्रहणं प्रत्यक्षोपलक्षणं आदेशमात्रमिति। आनुमानिक-
मपीत्यर्थः। अनुपपन्नमिति। एकदेशविकारे ऽपि यत्र नित्यत्वहानिस्तत्र सर्वविकारे कुतो नित्यत्वं। यत्रान्यथोऽपि कस्य चिन्नाशीत्यर्थः। सोमस्येति। सोमस्तृणविशेषः। तद

यत्रप्राधान्येनाश्रीयते। यत्र नांतरीकोल्लाश्रीयते नासावत्वं विधिरिति। अथ यथोक्तमादेशग्रहणस्य प्रयोजनं। आदेशमात्रं स्थानिवद्यथा स्यादि-
ति। अनुपपन्नं स्थान्यादेशत्वं नित्यत्वात्। स्थानी आदेश इत्येतन्नित्येषु शब्देषु नोपपद्यते। किंकारणं। नित्यत्वात्। स्थानी हि नाम भूत्वा यो न भवति। आदे-
शो हि नाम यो ऽभूत्वा भवति। एतच्च नित्येषु शब्देषु नोपपद्यते। यत्तावन्नाम विनाशः स्यात् असतो वा प्रादुर्भाव इति। सिद्धं तु यथा लौकिकवैदिकेष्व-
भूतपूर्वेऽपि स्थाने शब्दप्रयोगात्। सिद्धमेतत्। कथं। यथा लौकिकवैदिकेषु कृतांतेषु अभूतपूर्वेऽपि स्थाने शब्दप्रयोगो वर्त्तते। लोके तावदुपाध्यायस्य
स्थाने शिष्य इत्युच्यते न च तत्र उपाध्यायो भूतपूर्वो भवति। वेदेऽपि सोमस्य स्थाने पूतीकतृणान्यभिषुणुयादित्युच्यते। न च तत्र सोमो भूतपूर्वो भवति। कार्य-
विपरिणामाद्वा सिद्धं। अथवा कार्यविपरिणामात्सिद्धमेतत्। किमिदं कार्यविपरिणामादिति। कार्या बुद्धिः सा विपरिणम्यते। ननु च कार्याविपरिणामादि-
ति भवितव्यं। संति चैवौत्तरपदिकानि ह्रस्वत्वानि। अपि च बुद्धिः संप्रत्यय इत्यनर्थांतरं। कार्या बुद्धिः कार्यः संप्रत्ययः कार्यस्य संप्रत्ययस्य विपरिणामः
कार्यविपरिणामः कार्यविपरिणामादिति। परिहारांतरमेवेदं मत्त्वा पठितं कथं चेदं परिहारांतरं स्यात् यदि भूतपूर्वे स्थाने शब्दो वर्त्तते॥ ॥

सन्निधौ पूतीकतृणानि प्रतिनिधीयंते। कार्या बुद्धिरिति। अन्यस्मात्तु विपरिणामासंभवात्सामर्थ्यात्कार्यत्वेन बुद्धिर्गृह्यते न तु कार्यशब्दो बुद्धिपर्यायः संतीति। इक्पोरि
((लत्रबहुलग्रहणात्॥ ॥श्री॥ ॥७॥ ॥

भा० कै० प्र० १३४ 124

मूतपूर्वेचापीति।नचनिरवकाशत्वविरोधः।बुद्धिधर्मोः केवलमर्थेषुप्रतिपन्नत्वशब्दारोप्यंतेनतुतद्वशादर्थानांतथात्वस्थानं।प्राचीनमिति।प्राचिदेशेप्राक्।ततोविभाषांचेरदिक्
स्त्रियामितिस्वार्थेखः।तत्रसन्नम्यर्थेस्यामिहितत्वादंतर्भूतत्वाच्चप्रथमैवरूकता।आम्रबुद्ध्या इति।आस्याअनंतरमित्यर्थः।अपवादप्रसंगस्त्विति।बुद्धिविपरिणाममात्रेय
द्स्थान्यादेशभावइतिभावः।कर्मण्यणिति।सर्वत्राणबुद्धिःप्रसक्ता।आतोनुपसर्गेकइतिकबुध्यानिवर्त्यतेइतिकेप्यणकृतप्रसंगः।विषयेणत्विति।तुशब्दःपुनरर्थे।

भूतपूर्वेचापिस्थानशब्दोवर्त्तते।कथं।बुध्या।तद्यथा।कश्चित्कंचिदुपदिशति।प्राचीनंग्रामादाम्रा इति।तस्यसर्वत्राम्रबुद्धिःप्रसक्ता।ततःपश्चादाहाये
क्षीरिणोवरोहवंतःपृथुपर्णास्तेन्यग्रोधा इति।सतत्राम्रबुध्यान्यग्रोधबुद्धिंप्रतिपद्यते।सततःपश्यतिबुध्या आम्रांश्चापकृष्यमाणान्न्यग्रोधांश्चा
धीयमानान्नित्याएवचास्मिन्विषये आम्राःनित्याश्चन्यग्रोधाःबुद्धिस्त्वस्यविपरिणम्यते।एवमिहाप्यस्तिरस्मायविशेषेणोपदिष्टस्तस्यसर्व
त्रास्तिबुद्धिःप्रसक्ता।सोस्तेर्भूरित्यनेनास्तिबुद्ध्याभवतिबुद्धिंप्रतिपद्यते।सततःपश्यतिबुध्याअस्तिंचापकृष्यमाणंभवतिंचोपादीयमानंनित्य
एवचास्मिन्विषयेअस्तिर्नित्योभवतिश्च।बुद्धिस्त्वस्यविपरिणम्यते।अपवादप्रसंगस्तुस्थानिवत्त्वात्।अपवादेउत्सर्गकृतंचप्राप्नोति।कर्मण्यण
आतोनुपसर्गेकः इतिकेपिअणिकृतंप्राप्नोति।किंकारणं।स्थानिवत्त्वात्।उक्तंवा।किमुक्तं।विषयेणतुनानालिंगकरणात्सिद्धमिति।अथवासि
द्धंतुषष्ठीनिर्दिष्टस्यस्थानिवद्वचनात्।सिद्धमेतत्।कथं।षष्ठीनिर्दिष्टस्यादेशःस्थानिवदितिवक्तव्यं।तत्तर्हिषष्ठीनिर्दिष्टग्रहणंकर्तव्यं।नकर्तव्यं।
प्रकृतमनुवर्त्तते।क्वप्रकृतं।षष्ठीस्थानेयोगेति॥ ॥ ॥

यद्ययंगापोष्टगितिकापवादस्परकःकिंत्वंशास्तितज्ज्ञापयतिनोत्सर्गकृतमपवादेभवतीति।षष्ठीनिर्दिष्टस्येति।नचापवादःषष्ठीनिर्दिष्टस्यस्थानेविधीयतेनाभिनवं
चेत्यादेशष्ष्ठ्याःस्थानेप्रथमायाविधानादस्तिषष्ठी।विप्रवरणरवर्णोसत्त्वतुल्यत्वात्तंतरंप्रत्ययविषयंविज्ञेयं।यथोक्तं।बालवायोविदूरंचप्रकृत्यंतरमेवतु।विप्रवःशाब्दत्वन राम० १३४
भिधानात्प्रत्ययाभावः॥ ॥श्री॥ वेति ॥

यद्यमिति॥ न च पित्त्वनिवृत्त्यर्थे नियमार्थे शित्त्वं। अपनो नित्या ज्ञापकत्वेऽपि न निवृत्तेः सिद्धत्वात्। न त्वत्रापि पित्त्वं नित्त्वस्य वा विशेषोऽस्तीति केचिदाहुः। तद्युक्तं तान्छीत्यादौ चानवका
नित्त्वं प्रकृतेरा घुदात्तार्थं स्यात्। तस्मादिष्टसिद्धये सामान्ये न ज्ञापकं शित्त्वमाश्रीयते अपवादे उत्सर्गकृतं न भवतीति। कृतिति ङितीति। परिहारान्तरं संज्ञावान्त षट् स्वस्त्रादिभ्य इ

अथवाचार्यप्रवृत्तिर्ज्ञापयति नापवादे उत्सर्गकृतं भवतीति। यदयं श्यपन्नादीन्कांश्चित् शितः करोति। श्यपन् श्नम् श्नाशानुरिति। तस्य दोषस्तयादेशाउभ
यप्रतिषेधः। तस्यैतल्लक्षणस्य दोषः। तयादेशे उभयप्रतिषेधो वक्तव्यः। उभये देवमनुष्याः। तयपो यहणे न ग्रहणं जसि विभाषा प्राप्नोति। नैष दोषः। अ
पञ्चसयान्तरं। यदि प्रत्ययान्तरं उभयीति ईकारो न प्राप्नोति। माभूदेवं। मात्रजि सैवं भविष्यति। कथं मात्रजिति। नेदं प्रत्ययग्रहणं किं तर्हि प्रत्याहारग्रहणं। क्व
सन्निविष्टानां प्रत्याहारः मात्रशब्दात्प्रभृत्याअयपचष्टकारात्। यदि प्रत्याहारग्रहणं। कृतितिष्ठेति इत्रापि प्राप्नोति। अतः इति वर्त्तते। एवमपि तैलमात्राघृतमा
त्राअत्रापि प्राप्नोति। समदेशस्यापि सन्निविष्टस्य न भविष्यति प्रत्याहारे ग्रहणं। जातसंख्यायां वचनादेशे स्थानिवद्भावप्रतिषेधः। जातसंख्यायां वचनादेशे स्था
निवद्भावप्रतिषेधो वक्तव्यः। व्रीहिभ्य आगत इत्यत्र घेर्ङितीति गुणः प्राप्नोति। नैष दोषः। उक्तमेतत्। अर्थातिदेशात्सिद्धमिति। द्व्याबग्रहणो दीर्घः। द्व्याबग्रह
णो दीर्घ आदेशो न स्थानिवदिति वक्तव्यं। किं प्रयोजनं। निष्कौशाम्बिः द्व्याबग्रहणो न ग्रहणात्तु लोपो माभूदिति। ननु चेदीर्घादित्युच्यते।
तेनैव वक्तव्यं भवति। किं पुनरत्र ज्यायः स्थानिवत्प्रतिषेध एव ज्यायान्। इदमपि सिद्धं भवति अतिखट्वाय अतिमालाय याडापः इतियाणन्न भ
वति। अथेदानीमसत्यपि स्थानिवद्भावे दीर्घत्वे कृते पिच्चासौ भूतपूर्व इति कृत्वा याडुत्स्मान्न भवति॥ ॥ ॥

तिप्रतिषेधोऽत्रनोक्तः। तैलमात्रेति। चकारस्य प्रत्याहारार्थस्योपादानात्तस्याविशेषकत्वान्मात्रप्रभृतिमात्रयग्रहणप्रसंगः। सदृशास्येति। प्रत्ययानुक्रमणं मात्रशब्द इतिप्रातिपदिक
त्याग्रहणमित्यर्थः। जातसंख्यायामिति। एकस्मिन्नर्थोऽस्मिन्नेकवचनं तस्य प्रसंगे बहुवचनमादेशः इति कल्पनाश्रयेणादोषोपन्यासः। भूतपूर्व इति। अनुबन्धकार्येषु सर्वत्र भूतपूर्वगत्या
॥ श्रयणाद्वाद्विवरूपसङ्घावात्॥ ॥ ॥

भा॰कौ॰पृ॰ १३५ 135

लक्षणेति। अत्र चांतरङ्गत्वात्कृते सत्येवायमिति बुद्धेर्विच्छेदः। ऋल्वादिरिति। ऋल्वादिषु पठ्यते वर्तमानः ऋल्वादिरिति भावः। आपिमितीति बादयो हि सर्वे ऋल्वादय इति णत्वादयो भू

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। ननु चेदानीं सत्यपि स्थानिवद्भावे एतया परिभाषयाशक्यमिहोपस्थातुं। नेत्याह। न तर्हीदानीं क्वचिदपि स्थानिवद्भा
वः स्यात्। न त्वर्हिवक्तव्यं। नवक्तव्यं। प्रश्लिष्टनिर्देशात्सिद्धं। प्रश्लिष्टनिर्देशो यं। ई ई ई कारांतात्। आ आ पृ आकारांतात् इति। आहिभुवो रीट्प्रतिषेधः॥
आहिभुवो रीट्प्रतिषेधो वक्तव्यः। आत्थ। अभूत्। अस्ति ब्रूग्रहणेन ग्रहणाद्रीट् प्राप्नोति। आहेस्तावन्न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति नाहे
रीट् भवतीति। यदयमाह स्थ इति। ऋल्वादिप्रकरणेप्यत्वं शास्ति। नैतदस्ति। ज्ञापकं। अस्तिद्धस्मदे तस्य वचने प्रयोजनं। किं। भूतपूर्वगतिर्यथा वि
ज्ञायेत। ऋल्वादिर्यो भूतपूर्व इति। यद्येवं वचनमनर्थकं स्यात्। आथिमेवायमुच्चारयेत् ब्रुवः पंचानामादित आथो ब्रुव इति। भवतेश्चापि न वक्तव्यम
ः। अस्ति सिचोऽपृक्त इति द्विसकारको निर्देशः। अस्तेः सकारांतादिति। वृध्यादेशौ वृद्धित्वप्रतिषेधः। वध्यादेशे वृद्धितत्वयोः प्रतिषेधो वक्तव्यः।
वधकं पुष्करमिति। स्थानिवद्भावाद्वृद्धितत्वप्राप्नुतः। नैष दोषः। उक्तमेतत्। नायं ण्वुल्। किं तर्हि। योयमकः शब्दः। किं तर्हि। औणादिकः। ऋत्वुक इति यथा। इंद्रुधि
ष्वा इङ्विधेयः। आवधिषीष्ट एकाच उपदेशेनुदात्तादिति प्रतिषेधः प्राप्नोति। नैष दोषः। आद्युदात्तनिपातनं करिष्यते स निपातनस्वरः प्रकृतिस्व
रस्य बाधको भविष्यति। एवमप्युपदेशिवद्भावो वक्तव्यः। यथैव हि निपातनस्वरः प्रकृतिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेत आवधिषीष्टेति। नैष दो
षः। आर्द्धधातुकीयाः सामान्येन भवंति अनवस्थितेषु प्रत्ययेषु। तत्रार्द्धधातुकसामान्ये वधिभावे कृते सति शिष्टत्वात्प्रत्ययस्वरो भविष्यति। आकारां

तपूर्वो ऋल्वादय इति भावः। आवधिषीष्टेति। पंच्छब्दप्रयोगः यदावधिषीष्टेति भवति तदा तिङ्ङतिङ इति निघातः प्राप्नो निपातैर्यद्यदीति प्रतिषिद्धस्तदैतदुदाहरणं क्वचित्तु
दपः ॥यदावधिषीष्टेति पाठः॥ ॥श्री॥ ॥

आकारान्तानुकृष्युकोः प्रतिषेधो वक्तव्यः। विलापयति। भापयते। लीभी ग्रहणेन ग्रहणानुकृष्युकौ प्राप्नुतः। लीभियोः प्रश्लिष्टनिर्देशात्सिद्धं। लीभियोः
प्रश्लिष्टनिर्देशो यं। ली ई ईकारान्तस्य। भी ई ईकारान्तस्येति। लोड़ादेशे शाभावजभावधित्वहिलोपैत्वप्रतिषेधः। लोड़ादेशे एषां प्रतिषेधो वक्तव्यः। शिष्टा
त्। हतात्। भिंतात्। कुरुतात्। स्तात्। लोड़ादेशे कृते शाभावो जभावो धित्वं हिलोप एत्वमित्येते विधयः प्राप्नुवंति। नैष दोषः। इदमिह संप्रधार्यं लोड़ादेशः
क्रियतामेते विधय इति। किमत्र कर्तव्यं। परत्वात्लोड़ादेशः। अथेदानीं लोड़ादेशे कृते पुनः प्रसंगविज्ञानात्कस्मादेते विधयो न भवंति। सकृद्गतौ
विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति कृत्वा। त्रयादेशे स्तंतप्रतिषेधः। त्रयादेशे स्तंतस्य प्रतिषेधो वक्तव्यः। तिसृभावे कृते त्रेस्त्रय इति त्रयादेशः
प्राप्नोति। नैष दोषः। इदमिह संप्रधार्यं तिसृभावः क्रियतां त्रयादेशः कस्मान्न भवति। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। आ कृता२
म्विधौ च। आम्विधौ च स्तंतस्य प्रतिषेधो वक्तव्यः। चतस्रस्तिष्ठंति। चतसृभावे कृते चतुरनडुहोरामुदात्त इत्याम् प्राप्नोति। नैष दोषः। इद
मिह संप्रधार्यं चतसृभावः क्रियतां चतुरनडुहोरामुदात्त इत्यामिति। किमत्र कर्तव्यं। परत्वाच्चतसृभावः। अथेदानीं चतसृभावे कृते पु
नः प्रसंगविज्ञानात्कस्मा[redacted]दाम्न भवति। सकृद्गतौ (विप्रतिषेधे) यद्बाधितं तद्बाधितमेवेति कृत्वा॥ ॥श्री॥ ॥१॥ ॥
×त्रयादेश इति। किमत्र कर्तव्यं। परत्वात्तिसृभावः। अथेदानीं तिसृभावे कृते पुनः प्रसंगविज्ञाना ×४ ॥श्री॥ ॥०॥

भा०कौ०पृ०
१३६
136

उकारात्प्रभृतीति ॥ तनादित्वात्प्रभृतौ इति सतः ॥ तत्रच वस्तुरंतरमूर्तः ॥ यदीति । श्लाघ्यस्य यस्य प्रत्याहारेणं भोवात् । शतायइति । न चात्र श्नाशनुः कृत इत्यनुमेव शत्वामुं
चतेति । शत्रेत स्य सनुमकत्वादितिभावः । तस्मादागमग्रहणेपि शत्रेवविशेषणीय इति प्रत्याहारग्रहणेपि स एव विशेष्यते इत्यदोषः । सर्वत्रेति । प्रकृतिभावो ने

स्वरेव स्वादेशो । स्वरेव स्वादेशे प्रतिषेधो वक्तव्यः । विदुषः पश्य शतुरनुमो न द्य जादीअंतोदात्तादि त्येषस्वरः प्राप्नोति । नैषदोषः । अनुम इति
प्रतिषेधो भविष्यति । अनुम इत्युच्यते न चात्रनुमंपश्यामः । अनुम इति नेदमागमग्रहणं किं तर्हि प्रत्याहारग्रहणं । क्व सन्निविष्टानां
प्रत्याहारः । उकारात्प्रभृत्यानुमो मकारात् । यदि प्रत्याहारग्रहणं लुनता पुनता अत्रापि प्राप्नोति । अनुम् ग्रहणेन न शत्रेतेविशेष्यते
किं तर्हि शात्वैव विशेष्यते । शानायोः नुमकृइति । अव श्यं चैतदेवं विज्ञेयं । आगमग्रहणेहि सन्नीहप्रसज्येत । मुंवता मुचते इति । गोः
तं५ पूर्वणित्वात्त्वस्वरेषु । गोःपूर्वणित्वात्त्वस्वरेषु प्रतिषेधो वक्तव्यः । चित्रगवंशबलगवं । सर्वत्र विभाषा गोरिति विभाषापूर्वरूपत्वं प्राप्नो
ति । नैषदोषः । एङः इतिवर्तते । तत्रानल्विधाविति प्रतिषेधो भविष्यति । एवमपि हे चित्रगो अग्रे अत्र प्राप्नोति । णित्वं । चित्रगुः चित्रगू
चित्रगवः । गोतो णिदिति णित्वं प्राप्नोति । आत्वं । चित्रगुं पश्य शबलगुं पश्य । औतोमिति आत्वं प्राप्नोति । नैषदोषः । तपरकरणात्सिद्धं । अपंचाद्यवार्तिकव्याख्यातः ३०
तपरकरणसामर्थ्यात् णित्वात्त्वे न भविष्यतः । स्वरः बहुगुमान् । नगोश्वन्साववर्णेति प्रतिषेधः प्राप्नोति । कृणेति पिबसोः प्रतिषेधः । कृ
णोतिपिबसोः प्रतिषेधो वक्तव्यः । कुरु पिबेति स्थानिवद्भावाल्लघूपधगुणः प्राप्नोति । उक्तं वा । किमुक्तं । करोतौ तपर निर्देशात्सिद्धमिदं

न विधीयते न तु पूर्वरूपत्वं । तस्माद् एङः पदांतादतीति पूर्वरूपं प्राप्नोतीति वाच्यायदा स्वप्रकृतिभावस्तदायंप्रसंग उक्तः । उत्तरं त्वल्विधित्वात् स्थानिवत्त्वाभावः एम०
॥१॥ ॥श्री॥ १३६
--उरुमानितिअत्राप्तिसमाधानंअष्टमोदीर्घादित्यनेनैम्ऋकानुदात्तादीर्घादित्यस्यसंबंधाद्दीर्घात्मोमदादितिव्याख्यानात्पक्षः नचैवमपि...लाक्षणिकत्वात् ३--

अचः परस्मिन्। अल्विध्यर्थमिदं। तथाहि। वव्रश्चेति उरदत्वे कृते तेन संप्रसारणे संप्रसारणमिति विकारस्य संप्रसारणनिषेधः स्थान्यलाश्रयः। एवम चितीकः बूढ़
चितीकृः इति चितेः कपीति दीर्घे कृते ह्रस्वान्तेसा लघूवेमिति स्थान्यलाश्रयः स्वरोऽस्मादुचनाद्भवति। वा नर्तीनि प्रसुदाहरणानि कानिचिच्छब्दरूपमतिविधानानीति प्रश्नः।
अच इति किमर्थमिति। अन्तरंगलादिति। अत एव युगपत्प्राप्त्यभावाद्धारणे द्वंगं बलीय इत्येतदत्र नास्ति। यत्र हि युगपदंगबहिरंगयोः प्राप्तिः। यथा कारक इति हृद्धि
यणादेशयोः यथा चक्रिरतः किरंतीति यणित्वयोः। तत्रैतदुपतिष्ठते। न त्वत्रायं यत्नः। च्छ्वोः शूडनुनासिके चेति चकारछकारयोः समुदायनिर्देशात्तु कृच्छ
कारः स्थानी समुदायनिर्देशात् सामर्थ्याद्वा लोपस्य स्थानस्य नुपस्थाने। अनर्थकत्वाद्वा। एवं च न ङो दि.त्करणं विग्रह इत्स त्रगुणप्रतिषेधार्थमर्थवद्भवति। सा श्र

सृता

अचः परस्मिन्पूर्वविधौ॥ अच इति किमर्थं। विश्नः प्रश्नः द्यूत्वा आकाष्टां। आगसा प्रश्नो विश्न इत्स त्रछकारस्य शकारः परनिमित्तकः
तस्य स्थानिवद्भावात् छे चेति तुक् प्राप्नोति। अच इति वचनान्न भवति। नैतदस्ति प्रयोजनं। क्रियमाणेऽपि चाज्ग्रहणे वष्प मन्त्र तुगभावे
यत्नः कर्तव्यः। अंतरंगत्वाद्धि तुक् प्राप्नोति। इदं तर्हि द्यूत्वा स्यूत्वा वकारस्य ऊठ् परनिमित्तकस्तस्य स्थानिवद्भावाद् चीति यणादेशो न
प्राप्नोति। अच इति वचनाद्भवति। एतदपि नास्ति प्रयोजनं। सा श्रयमत्राच्त्वं भविष्यति। अथवा योऽत्रादेशो नासावाश्रीयते आश्री

यमिति। न त्वनिर्देशेन स्वाश्रयधर्मो निवर्त्स्यते। यथा ब्राह्मणवदस्मिन्क्षत्रिये वर्जितव्यमिति क्षत्रियस्य क्षत्रियधर्मोः। वायोरिसादौ तु स्वाश्रये समस्यपि वल्त्वे बहिरंगत्वा
घणो सिद्धत्वाद्वलिलोपाभावः। द्यूत्वेत्यत्र तुनाजानंतर्ये इत्स सिद्धत्वनिषेधाघणप्रवर्तते। ऊठः स्थानिवत्त्वाद्यलोः कथं न शंकित इति चेत्। योनादिष्टादच इत्येवमर्थस्याज्ग्र
हणस्य स्थापयिष्यमाणत्वात्। योऽत्रादेश इति। समुदायरूपऊठ्। य त्राश्रीयते। यणविधावच्। नासावादेश इति। समुदायस्यादेशत्वात्। न चावयव आदेशो गृह्यते। मुख्य
संभवे गौणग्रहणस्यायुक्तत्वात्। ख्यान्नादीनां तत्वेनुबंधविमुक्तानां धातुसंज्ञा आदेशावयवत्वान्न प्राप्नोति। घत्वादेशस्यत्वदित्वादद. र्थो ज्ञापकाद्धानुकार्याणि भ

विष्यंतीत्सद्दोषः॥ देशा ॥ ॥

भा०कै०प्र० युवजानिरिति। अथुसन्नत्वाउणादीनां जायाद्याकारस्यलोपो न भवति। अन्यथाऽऽकारस्य निर्दिष्टत्वेयल्लोपेच निर्दिष्टः स्थानिवद्भावात्सयत्वादकारलोपः स्यात्।

१३७ नचाप्यसिद्धवद्त्राभादिस्याकारलोपेकृतेऽभ्येऽसिद्धत्वस्याश्रयत्वात्। पुनरिति। यस्येति लोपे सिद्धे पादशनस्येसत्वपुनर्लोपवचनं स्थानिवत्त्वनिषेधार्थं। पुनर्लोपव

तमाः

137

इदंतर्हि प्रयोजनं। आकाशांसिचो लोपः परनिमित्तकः तस्य स्थानिवद्भावात् षढोःकःसीतिकत्त्वं प्राप्नोति। अचइतिवचनान्न भवति। एतदपि नास्ति प्रयोजनं। वक्ष्यत्येतत्। पूर्वत्रासिद्धेन स्थानिवदिति। इदंतर्हि प्रयोजनं। आगत्य अभिगत्य अनुनासिकलोपः परनिमित्तकः तस्य स्थानिवद्भावा त्स्यपेतितुक्न प्राप्नोति। अचइतिवचनाद्भवति। अथ परस्मिन्निति किमर्थं। युवजानिः द्विपदिका वैयाघ्रपद्यः आदीध्ये। युवजानिः वधूजानिरिति जायाया निङ् नपरनिमित्तकस्तस्य स्थानिवद्भावाद्वलीति यलोपो न प्राप्नोति। परस्मिन्निति वचनाद्भवति। नैतदस्ति प्रयोजनं। स्वाश्रयमत्र वत्त्वं भविष्यति। अथवा योत्रादेशो नासावाश्रीयते यश्चाश्रीयते नासावादेशः। इदंतर्हि प्रयोजनं द्विपदिका त्रिपदिका पादस्य लोपोऽपरनिमित्तकस्तस्य स्थानिवद्भावात्पद्भावो न प्राप्नोति। परस्मिन्नितिवचनाद्भवति। एतदपि नास्ति प्रयोजनं। पुनर्लोपवचनसामर्थ्यात्स्थानिवद्भावो न भविष्यति। इदंतर्हि प्रयोजनं। वैयाघ्रपद्यः। ननु चात्रापि पुनर्लोपवचनसामर्थ्यादेव न भविष्यति। अस्ति ह्यन्यत्पुनर्लोपवचने प्रयोजनं। किं। यत्रभसंज्ञानस्याश्रयात् स्येनपादिति। इदं चाप्युदाहरणं। आदीध्ये आवेवेरिकारस्य एकारो न परनिमित्तकस्तस्य स्थानिव द्भावाद्दीधीवेव्योरितिलोपः प्राप्नोति परस्मिन्निति वचनान्न भवति॥ ॥

चनेसतित्लुप्यतएवाकारः कार्येनाश्रीयतेइत्यर्थः। ननुचात्रापीति। यस्येतिलोपेसिद्धे पादस्यलोपइति पुनर्लोपवचनादित्यर्थः। आदीध्यइति। इटएत्वेकृते लोपः प्राप्नोति राम०

विकरणश्चात्रनिमित्ताद्विकरणः तस्यलुक्। एरनेकाचइतियणनप्रवर्तते क्ङिति गुणप्रतिषेधात्चइट् परनिमित्तकत्वेऽपिस्थानिवत्त्वनिषेधात्॥ ॥ १३७

यदयमिति॥ अग्नेर्वायोरिति स्थानिवत्त्वाद्ध्रस्वादि सेर्वलोपः सिद्धः। खट्वे मालेइत्यादौ हल्ङ्याब्भ्य इति। नयत्यादीनां विजंतानां गुणे नेर्लोपो इत्यतिकथं संबुद्धिलोप इति चेन्नै
तेभ्यो विचृ दृश्यते। बाभ्रवीया इति। सन्निपातपरिभाषाया अनित्यत्वाद्यशब्दसन्निपातनिमित्तो वान्तादेशो यलोपनिमित्ततां प्रतिपद्यते। योऽत्रादेश इति। वान्तः समुद्रा

अथ पूर्वविधाविति किमर्थं। हे गोः बाभ्रवीयाः नैधेयः। हे गौरिति औकारः परनिमित्तकस्तस्य स्थानिवद्भावादेङ्ह्रस्वात्संबुद्धेरिति लोपः प्राप्नो
ति। पूर्वविधाविति वचनान्न भवति। नैतदस्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञापयति न संबुद्धिलोपे स्थानिवद्भावो भवतीति। यदयमेङ्ह्रस्वात्सं
बुद्धेरित्येङ्ग्रहणं करोति। नैतदस्ति ज्ञापकं। अर्थमेतत्स्यात्। यत्तर्हि प्रत्याहारग्रहणं करोति। इतरथा ह्यो ह्रस्वादित्येव ब्रूयात्। इदं तर्हि प्रयोज
नं। बाभ्रवीयाः माधवीयाः वान्तादेशः परनिमित्तकस्तस्य स्थानिवद्भावाद्धलस्तद्धितस्येति यलोपो न प्राप्नोति। पूर्वविधाविति वचनाद्भवति।
एतदपि नास्ति प्रयोजनं। सामर्थ्यमत्र हल्त्वं भविष्यति। अथवा योऽत्रादेशो नासावाश्रीयते यश्चाश्रीयते नासावादेशः। इदं तर्हि प्रयो
जनं। नैधेयः। आकारलोपः परनिमित्तकस्तस्य स्थानिवद्भावाद्द्व्यज्लक्षणो ढक् प्राप्नोति पूर्वविधाविति वचनाद्भवति। अथ विधिग्रह
णं किमर्थं। सर्वविभक्त्यन्तः समासो यथा विज्ञायेत। पूर्वस्माद्विधिः पूर्वे विधिः पूर्वस्य विधिः पूर्वविधिरिति। कानि पुनः पूर्वस्माद्विधौ स्थानि
वद्भावस्य प्रयोजनानि॥ ॥ ॥

य॰ यस्येति। लोपं प्रति निमित्तत्वेन वकारः। नैधेय इति। स्थानिवद्भावात्रात्त्वव्यपदेशो मतिविरोधात् साध्यं यच्च त्वं अलभ्यं। यदविरुद्धं साध्यं तदतिदेशेन न बाध्यते विरुद्धं
तु बाध्यत एव। संख्याहतस्तु व्यपदेशः परस्परपरिहारेण लोके स्थितः। न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते॥ अचेति। अचः परस्मिन्पूर्वस्येति षष्ठ्या विध्यर्थ आक्षिप्तः
पूर्वस्य कार्ये कर्तव्ये इति। कार्यं च विधिरिति प्रश्नः॥ ॥ ॥

बेभिदितेति॥ बेभिद्य शब्दात्तृच्। निसस्यार इत्योपयलोपौ। ततएकाच इतीट्प्रतिषेधः प्राप्नोति। उपदेशग्रहणं द्वयोरपि विशेषणं। उपदेशेऽत्काच उपदेशोऽनुदात्तादिति। द्विःप्रयोगश्च द्विर्वचनं। अल्लोपस्य तु स्थानिवत्त्वयवधानादिट्प्रतिषेधाभावः। मातिथिकइति। यदा ठस्येकइति संघातग्रहणं तदा स्थानिवद्भावादिकस्य कादेशः प्राप्नोति। वर्णनिर्देशे त्वल्विधित्वात्कादेशस्याप्रसंगः। सन्निपातपरिभाषया चानाश्रितत्वेन तदुक्तं। अपीपचन्निति। णेरनिटीत्यकारलोपे कृते एकदेशविकृतमनन्यवद्भवतीति णेरेवायां। तत्रां तादेशे कृते च उः। कारस्य च पररूपे

बेभिदिता॥ माथितिकः। अपीपचन्॥ बेभिदितौ चेच्छिदिते इति। अकारलोपे कृते एकाच्त्वलक्षणः इट्प्रतिषेधः प्राप्नोति। स्थानिवद्भावान्न भवति। मातिथिकइति। अकारलोपे कृते तान्तात्कइति कादेशः प्राप्नोति स्थानिवद्भावान्न भवति। अपीपचन्निसेकादेशे कृते अभ्यस्तात् झेर्जुस् भवतीति जुस्भावः प्राप्नोति स्थानिवद्भावान्न भवति। नैतानि सन्ति प्रयोजनानि। प्रातिपदिकनिर्देशोऽयं प्रातिपदिकनिर्देशाश्चार्थतन्त्रा भवन्ति न कांचित्प्राधान्येन विभक्तिमाश्रयन्ति। तत्र प्रातिपदिकार्थे निर्दिष्टे यां यां विभक्तिमाश्रयितुं बुद्धिरुपजायते सा साश्रयितव्या। इदं तर्हि प्रयोजनं। विधिमात्रे स्थानिवद्यथा स्यात्। अनाश्रीयमाणायामपि प्रकृतौ वाय्वोः अध्वर्य्वोः लोपो व्योर्वलीति लोपो मा भूदिति। अस्ति प्रयोजनमेतत्। किं तर्हीति। अपरविधाविति तु वक्तव्यं। किं प्रयोजनं। स्वविधावपि स्थानिवद्भावो यथा स्यात्। कानि पुनः स्वविधौ स्थानिवद्भावस्य प्रयोजनानि॥ ० ॥

कृते नस्यादिवद्भावाज्जुस् प्राप्नोति। स्थानिवद्भावे तु णिलोपस्य पररूपस्य च व्यवधानान्न भवति। ननु पूर्वस्मादिद्विधौ स्थानिवद्भावे कथं हेगोरिसादिसिध्यति। उच्यते। अचःपूर्वेन्तस्मान्निमित्तत्वेनाश्रिता दित्याश्रयणात्। तथा हि गोशब्दे ओकारात्पूर्वो गकारः न च तस्मादत्र विधिरस्ति। विधिमात्र इति। अच परस्मिन्पूर्वस्येत्यनेन स्थानिवद्भावे विहिते पुनर्विधाविति वचनं नियमार्थं। स्थानिवदेव यथा स्यान्मा भूत्तदाश्रयमिति सर्थः। अनाश्रीयमाणायामिति। कार्ये निमित्तत्वेनेत्यर्थः॥ ॥ ॥

आयन्निति। अजादेशेवाद्विधानात्स्वविधिराड्ढ्रध्वे इति। पूर्वत्रासिद्धे न स्थानिवदिति सेतस्तत्र नास्ति। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति सत्रसंयोगादिलोपस्य संयोगे न लोपो पलक्षणार्थत्वात्। पदान्तविधिं प्रति नेत्ययमपि निषेधो नास्ति। पदान्ते विधानत्वेऽप्रतिषेधः। न च लोपोऽभावात्मकत्वात्स्थानी नेति चक्रतुरिति। अत्र सा च कस्य द्विर्वचनमिति स्वविधिर्भवति। न तस्य द्विर्वचने चीर्षेतं चवक्रमं भवति। न नु चापरविधाविसुच्यमाने कथं वेभिदितेत्यादयः संगच्छन्ते। उच्यते। निमित्तापेक्षयाऽपरत्वविवज्ञानात्। तथाहि। वेभिदितेत्यत्राकारलोपस्य निमित्तमार्धधातुकं न च तस्मात्परस्य विधिरस्ति किं तर्हि तस्यैवेति सिद्धः स्थानिवद्भावः। एवं माजिघ्रिको पीपचन्निति बो

आयन्नासन्भिन्द्वं तिकुर्वंति। दध्यत्र मध्वत्र चक्रतुः चक्रुः। इह तावदायन् आसन् इति इणस्योरयं रल्लोपयोः कृतयोरनजादित्वादाडजादीनामिति आण् न प्राप्नोति। स्थानिवद्भावाद्भवति। भिन्द्वे तिकुर्वंतीति यणादेशे कृते बलादिलक्षण इट् प्राप्नोति। स्थानिवद्भावान्न भवति। दध्यत्र मध्वत्रेतियणादेशे कृते संयोगान्तलोपः प्राप्नोति स्थानिवद्भावान्न भवति। चक्रतुश्चक्रुरिति यणादेशे कृते। नच्कत्वाद्द्विर्वचनं न प्राप्नोति। स्थानिवद्भावाद्भवति। यदि तर्हि स्वविधौ स्थानिवद्भावो भवति ह्राम्यां देयं त्लवनं। अत्रापि प्राप्नोति। ह्राम्यामित्यत्रात्वस्य स्थानिवद्भावाद्दीर्घत्वं न प्राप्नोति। देयमित्यत्रात्वस्य स्थानिवद्भावाद्गुणो न प्राप्नोति। त्लवनमिति गुणस्य स्थानिवद्भावादवादेशो न प्राप्नोति। नैष दोषः। स्वाश्रया एते विधयो भविष्यन्ति। तत्र हि वक्तव्यमपरविधाविति नवक्तव्यं। पूर्वविधाविसेव सिद्धं॥ ॥

दुद्यं हे गौरि सत्र तु स्थानिवद्भावः प्राप्तः एङ्इतिप्रसाहारग्रहणान्न भवति। वाभ्रवीयाइ सत्रयोऽत्रादेशो नासावाश्रीन इति परिहारः। नैव य इसत्र तु निमित्तात्परस्य ढको विधिरिति [redacted] स्थानिवद्भावः। स्वाश्रयाइति। विधिग्रहणं स्वाश्रयनिवृत्त्यर्थं व्याख्यानमिति स्वाश्रयाइसन्यथा व्याख्यायते शङ्खानां स्खलत्क्षणं तेन तत्रापकाश्रयाइसर्थः। द्वयोरेकस्यउतरा चेदेयमृणोऽकिरतौ त्लवने इत्यादि ज्ञापकमादेशाश्रयकार्यभावस्य॥ ॥श्री॥ ॥

निमित्तमिति। आयन्निसादिषु निमित्तात्पूर्वस्य विधिरिति स्थानिवद्भावः। पूर्वो मि षिक्तमिति। सर्वेष्वनिष्टत्वात्। पट्वी आ इति स्थिते परयणादेशेनाकार
स्य व्यवधानात् अप्राप्तः। व्यवहितेपीति। पूर्वशब्दस्य साक्षान्निर्दिष्टत्वात्स्मिन्निति निर्दिष्टस्यास्य तुपस्थानमिति भावः। भावसाधनस्येति। भावसाधन एव विधिशब्दोऽस्या

कथं। न पूर्वग्रहणेन आदेशोभिसंबध्यते। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवतीति। कुतः पूर्वस्य। आदेशादिति। किं
तर्हि। निमित्तमभिसंबध्यते अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवतीति कुतः पूर्वस्य। निमित्तादिति। अथ निमित्ते
भिसंबध्यमाने यत्तदस्य योगस्य पूर्वो मि षिक्तमुदाहरणं तदपि संगृहीतं भवति। बाढं संगृहीतं। ननु च ईकारयणाव्यवहितत्वान्ना
सौ निमित्तात्पूर्वो भवति। व्यवहितेपि पूर्वशब्दो वर्तते। तद्यथा। मथुरायाः पूर्वं पाटलिपुत्रमिति। अथ वा पुनरस्त्वादेश एवाभिसं
बध्यते। कथं यानि स्वविधौ स्थानिवद्भावस्य प्रयोजनानि नैतानि संति। इह तावत् आयन् आसन् धिन्वंति कृण्वंतीति अयं विधिशब्दो
स्त्येव कर्मसाधनः विधीयते विधिरिति। अस्ति भावसाधनः विधानं विधिरिति। तत्र कर्मसाधनस्य विधिशब्दस्योपादानेन सर्वे मिष्टं
संगृहीतं भवतीति कृत्वा भावसाधनस्य विधिशब्दस्योपादानं विज्ञास्यते। पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति पूर्वः स्थानिवद्भवतीति। एवं स्यादिति
माऽभविष्यति। इदं न भविष्यति। दध्यत्र मध्वत्र चक्रतुः चक्रुरिति परिहारांतरं वक्ष्यति॥ कानि पुनरस्य योगस्य प्रयोजनानि॥ ॥

किंपुनस्तत्प्रयोजनमित्यत आह ३ [uncertain]

पकत्वादाश्रीयते। पूर्वस्येति षष्ठी संबंधसामान्ये विज्ञास्यते। इदं वचनेति। विधिग्रहणं स्वाश्रयनिरासार्थं इति इह भावः॥ ॥श्री॥ ॥७॥

स्तोष्यामीति। कथयिष्यामीत्यर्थः। पादिकमिति। पादोस्यास्तीति ठन्। दीव्यत्यादिवृत्तेर्थे षुवाठकः। चरत्यर्थे तु पदिक इत्येव भवति। उदकं वहतीत्यण्। संज्ञायामुदभावः। अपसेद्
न्। श्वोभूतिर्नाम शिष्यः। तस्यामंत्रणं शृणुत न पातन श्वोभूते धारयेत्याल्पौ गौ एदिता नदीषु। नेतारावितिः। शिष्ययोरामंत्रणं। नयेते गुरुमुखाच्छास्त्रार्थमिति नेतारौ धारयतारावुणाश

स्तोष्यामहं पादिकमौदवाहिं ततः श्वोभूते शातनी पातनी च। नेतारावागच्छतं धारणिं रावणिं च ततः पश्चात् स्त्रंस्यते ध्वंस्यते चाइहनावत्यादिकं प्रोदवा
हिं शातनी पातनी धारणिं रावणिमिति अकारलोपे कृते पद्वऊठ् अल्लोपस्थितो पर इत्येते विधयः प्राप्नुवन्ति। स्थानिवद्भावान्न भवन्ति। स्त्रंस्यते ध्वं
स्यते णिलोपे कृते। निदितां हलउपधायाः क्ङितीति नलोपः प्राप्नोति स्थानिवद्भावान्न भवति। नेतानिसेतिप्रयोजनानि। असिद्धवदत्रा भादि
त्यनेनाप्येतानि सिद्धानि। इदं तर्हि प्रयोजनं। याज्यते वाप्यते णिलोपे कृते यजादीनां किति संप्रसारणं प्राप्नोति स्थानिवद्भावान्न भव
ति। एतदपि नास्ति प्रयोजनं। यजादिभिरत्र किति विशेषयिष्यामः यजादीनां यः किदिति। कश्च यजादीनां कित्। यजादिभ्यो यो विहित इति।
न चायं यजादिभ्यो विहितः। इदं तर्हि प्रयोजनं पद्ध्यां मृद्वी इति। परस्य यणादेशे कृते पूर्वस्य न प्राप्नोति ईकारयणा व्यवहितत्वात्। स्थानिवद्भा
वाद्भवति। किं पुनः कारणं परस्य तावद्भवति न पुनः पूर्वस्य। नित्यत्वात्। नित्यः परयणादेशः। कृतेपि पूर्वयणादेशे प्राप्नोत्यकृतेपि प्राप्नोति। नित्य
त्वात् परयणादेशे कृते पूर्वस्य न प्राप्नोति। स्थानिवद्भावाद्भवति। एतदपि नास्ति प्रयोजनं। असिद्धं बहिरंगलक्षणमंतरंगलक्षणे इत्यसिद्धत्वा
द्बहिरंगलक्षणस्य परयणादेशस्यांतरंगलक्षणः पूर्वयणादेशो भविष्यति॥ ॥

लक्षण

द्वाभ्यां इत्रा। असिद्धं बहिरंगमिति। नित्यादप्यंतरंगं बलीय इति न्यायात् प्रथमं पूर्वस्य यणिति भावः॥ ॥श्री॥ ॥७॥ ॥

भा० कै० प्र० १४० 140

अवश्यं चेति। स्थानिवद्भावाश्रयणेऽपीत्यर्थः। कर्त्तव्यैति। कर्त्तव्ये इत्या इतिस्थितेयदिति सत्त्वात्परयणादेशः [वैप०] न तस्य स्थानिवद्भावात्पूर्वस्य यण् ततउदात्तयणो नेन स्वा
कारो न भवतीति उदात्तत्वं न स्यात्। यदान्तरंगत्वात्पूर्वं पूर्वयणादेशस्तदा ईड्. पउदात्तयणङ्सुदात्तत्वं न स्यात्। पियणि कृते आकारस्योदात्तत्वमिति सिद्धमिष्टं। अनेना
पीति। स्थानिवत्त्वे पूर्वयणादेशस्यापि निसत्त्वादित्यर्थः। अपर आह। परयणादेशोपीति। सर्वे वा ह। परश्चासाविति। शाब्दपरविप्रतिषेधात्स एव प्राप्नोति। एकमपि
सति०

अवश्यं चैषा परिभाषा आश्रयितव्या स्वरार्थं। कर्त्तव्योहर्त्तेति। उदात्तयणो हल्पूर्वादिति एष स्वरो यथा स्यात्। अनेनापि सिद्धः स्वरः कथं। आरभ्य
माणे नित्योसौ। आरभ्यमाणे त्वस्मिन्योगे नित्यः पूर्वयणादेशः कृतेपि परयणादेशे प्राप्नोत्यकृतेपि। परयणादेशोपि नित्यः। कृतेपि पूर्व
यणादेशे प्राप्नोति अकृतेपि। परश्चासौ व्यवस्थया। व्यवस्थया चासौ परः। युगपत्संभवो नास्ति। न चास्ति यौगपद्येन संभवः। कथं च सि
ध्यति। बहिरंगेण सिध्यति। असिद्धं बहिरंगलक्षणमन्तरंगलक्षणे इत्यनेन सिध्यति। एवं तर्हि योऽनुदात्तयणः तदाश्रयः स्वरो भविष्यति।
ईकारयणा व्यवहितत्वान्न प्राप्नोति। स्वरविधौ व्यंजनमविद्यमानवद्भवतीति नास्ति व्यवधानं। सा तर्ह्येषा परिभाषा कर्त्तव्या। ननु चेयमपि कर्त्त
व्या असिद्धं बहिरंगलक्षणमन्तरंगलक्षणे इति। बहुप्रयोजनैषा परिभाषा अवश्यमेषा कर्त्तव्या। सा चाप्येषा लोकतः सिद्धा। कथं। प्रसं
गवर्त्ती लोको दृश्यते। तद्यथा। पुरुषोयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत्करोति ततः सुहृदां ततः संबंधिनां॥ ॥

यणा लक्षणं पूर्वे परविषयभेदाद्भिद्यते। एकस्य च कार्यित्वनिमित्तयोर्विरोधात्सत्त्वे नव्यवस्था। प्रसंगवर्त्तीति। प्रत्यासन्नवाची प्रसंगशब्दः। अंगशब्देन प्रत्यासन्निर्लक्ष्यते
। अंगानां प्रत्यासन्नत्वात्। अंगमंगं प्रतीति प्रसंगं इत्यव्ययीभावः। प्रतिशरीरमिति। शरीरस्य भोगायतनत्वात्। सुहृदामिति। सौहार्दस्यासन्निहेतुत्वात्। ततः संबंधिनामिति। राम० १४०
१ अवश्यकर्त्तव्यत्वात्॥ ॥ ॥

सामान्यभूत इति॥ नित्ये विशेष्यार्थसंबंधे ऽक्रमे ऽप्यर्थे प्रतिपादने उपायभावेनासन्तमपि क्रमं प्रकल्प्य साध्यार्थं चाश्रित्योपेयप्रव्यवस्थापनात्। तत्र नागृहीतविशेषणा विशेष्ये बु
द्धिः प्रवर्तत इत्यादौ सामान्यमभिधीयते। ततस्तदनुरक्ते द्रव्ये प्रतीतिः। लिंगसंख्याशक्तीनां चाश्रयो द्रव्यमिति तत्पूर्वमभिधातव्यं। ततः संख्यापेक्षया लिंगं समासन्नमि
ति तदभिधीयते। द्व्यादिसंख्या हि बहुत्वं तरापेक्षोपजायते। एकत्वसंख्यापि बहुत्वं तरापेक्ष्य द्वित्वादिव्यवच्छेदं करोतीति बहिरंगा सापि सजातीयपदार्थापेक्षत्वादंतरं

प्रातिपदिकं चाप्युपदिष्टं सामान्यभूते ऽर्थे वर्तते। सामान्ये वर्तमानस्य व्यक्तिरुपजायते। व्यक्तस्य सतो लिंगसंख्याभ्यामन्वितस्य बाह्येनार्थेन
योगो भवति। यथैव चानुपूर्व्यार्थानां प्रादुर्भावः तथैव शब्दानामपि तत्कार्यैरपि भवितव्यं। इमानि तर्हि प्रयोजनानि। पटयति लघयति।
अवधीत् बहुखट्वकः। पटयति लघयतीति टिलोपे कृते ऽत उपधाया इति वृद्धिः प्राप्नोति स्थानिवद्भावान्न भवति। अवधीदित्यकारलोपे
कृते ऽतो हलादेर्लघोरिति विभाषा वृद्धिः प्राप्नोति। स्थानिवद्भावान्न भवति। बहुखट्वक इति आपोऽन्यतरस्यामिति ह्रस्वे कृते ह्रस्वान्ते ऽन्त्यात्पूर्व
मिति एष स्वरः प्राप्नोति स्थानिवद्भावान्न भवति। इह वैयाकरणः सौवश्व इति य्वोः स्थानिवद्भावादायावौ प्राप्नुतः। तयोः प्रतिषे
धो वक्तव्यः। अचः पूर्वत्वविज्ञानादेचोः सिद्धं। योनादिष्टादचः पूर्वः तस्य विधिं प्रति स्थानिवद्भावः आदिष्टाच्चैषो ऽचः पूर्वः। किं वक्तव्यमेतत्। न
हि। कथमनुच्यमानं गंस्यते। अच इति पंचमी। अचः पूर्वस्यायद्येवमादेशस्य विशेषितो भवति। आदेशश्च विशेषितः। कथं। न ब्रूमोय
त्र षष्ठी निर्दिष्टमजग्रहणं तत्पंचमीनिर्दिष्टं कर्तव्यमिति। किं तर्हि। अन्यत्कर्तव्यं। अन्यच्च न कर्तव्यं॥ ॥ ॥

गा। क्रमो दीनितु विजातीयक्रियापेक्षणाद्बहिरंगानीति न्यायप्राप्तः क्रमः। बाह्येनेति। कर्मत्वादिना। तद्धि क्रियापेक्षत्वाद्बाह्यं। योनादिष्टादच इति॥ अकृतए
वादेशे अचः पूर्वो य इत्यर्थः। अजपेक्षस्य पूर्वत्वस्येहाश्रयणात्। आदेशनमादिष्टं तद्यस्य नास्ति सोनादिष्टः। आदेश इति। ततश्च हलादेशो ऽपि स्थानिवत्स्यात्॥ ०॥

परे वा इति॥ सा दृष्टपादेवमुक्तं। प्रत्याहांतरमेवानुपंचम्यंतमपेक्ष्यते। तद्यथेति। यथादेशापेक्षया पूर्वत्वेऽप्याश्रीयमाणे विभक्तिविपरिणामस्तथास्यान्यपेक्षयापीत्यर्थः। धिन्वंती
स ओकारात्पूर्वं यदंगं तस्मान्निमित्तत्वे नाश्रिता हि धिरिति सिद्धः स्यान्निवृत्तो वः। वैयाकरण इत्यत्र तु नतत्त्वं भवति। न हीकारात्पूर्वो यो वकारः स कश्चिन्निमित्तत्वेनाश्रितः। तत्रे
ति। अतिदेशेन पराश्रयं कार्यं प्राप्यते न तु स्वाश्रयं निवर्त्यते। भाष्यकारेण तु विधिग्रहणात्स्वाश्रयकार्याभावः साधितः। उत्सर्गेति। उत्सर्गः स्थानी स स्यादेशेनापवादे

परे वादः षष्ठीनिर्दिष्टमज्ग्रहणं तस्य दिक्शब्दयोगे पंचमी भवति। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति कुतः पूर्वस्य। अच इति। तद्यथा। आ
देशः प्रथमानिर्दिष्टः तस्य दिक्शब्दयोगे पंचमी भवति। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति स्थानिवद्भवति कुतः पूर्वस्य। आदेशात्। तत्रादे
शलक्षणप्रतिषेधः। तत्रादेशलक्षणं कार्यं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः। वाय्वोः अध्वर्य्वोः। लोपो व्योर्वलीति यलोपः प्राप्नोति। असिद्धव
च्चात्रासिद्धं। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रत्यसिद्धो भवतीति वक्तव्यं। असिद्धवच्चात्रासिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः। असि
द्धवच्चात्रासिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः कर्तव्यः। पट्व्याम्रद्व्येति। ननु चैतदप्यसिद्धवच्चात्रासिद्धं। असिद्धवच्चात्रासिद्धमिति चेन्ना
न्यस्यासिद्धवचनादन्यस्य भावः। न ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति। तद्यथा। नहि देवदत्तस्य हंतरि हते देवदत्तस्य प्रादुर्भावो भवति।
तस्मात्स्थानिवद्वचनं। तस्मात्स्थानिवद्भावो वक्तव्यः। असिद्धत्वं च। पट्व्याम्रद्व्यो तत्र स्थानिवद्भावो वक्तव्यः वाय्वोः अध्वर्य्वोः अत्रासिद्धत्वं॥०॥

×असिद्धवचनात्सिद्धमिति चेत्तन्न किं कारणं नान्यस्यासिद्धवचनादन्यस्य भावः।×२

×असिद्धवदिति×

नेव निवर्त्यते। नन्वीकारयणोः सिद्धत्वाद्विभक्त्यावेयवयणभविष्यति। नैतदस्ति। पूर्वविधावसिद्धत्वमुच्यते तेन त्वानंतर्ये तो कि केयथाप्रयोग इति नास्ति विभक्तेरानंतर्यं।
अनुदेश इति। अतिदेश इत्यर्थः। ननु चैतदपीति। शास्त्रासिद्धत्वाश्रयणात्। नान्यस्येति। कार्यासिद्धत्वाश्रयमेतत्॥ ॥छ॥ ॥

उक्तं वेति॥ शास्त्रासिद्धत्वमाश्रीयत इति भावः। न देवेति। सकृत्पाठापेक्षयैतदुक्तं ते विषयभेदात्तु भेदाश्रयणाद् असिद्धत्वमाश्रीयते। नेह भारोऽस्तीति। नञ्भावातिदेशे धि-
कं सूत्रे पठनीयं विधिशब्दश्चोत्तरेणास्मिष्यति। अधीनमिति। अपवृत्तरपदानां विधानाद्बहुसम्बन्धन्यायत्वार्थ इति निरधीनशब्दः। न घप्येति। येनोप माने यवानां सक्तावगतत्वा
स संतीति वाक्यशेषं कल्पयति। असक्तावगतो नानुनसंतीति। एवमस्यापि लक्षणस्य प्रतिलक्ष्यं भेदात्क्वचिद्बाधो निदिश्यते क्वचिदभावः। किं पुनरिति। अमीषां ब्राह्मणानां

उक्तं वा। किं पुनः। स्थानिवद्वचनानर्थक्यं शास्त्रासिद्धत्वादिति। विषम उपन्यासः। युक्तं तत्र यदेकादेशशास्त्रं तुक्शास्त्रे सिद्धं स्यात्। अन्यदन्य-
स्मिन्। इह पुनरयुक्तं। कथं हि तदेव नाम तस्मिन्नसिद्धं स्यात्। तदेव चापि तस्मिन्सिद्धं भवति। वक्ष्यति ह्याचार्यः। चिणो लुकि तग्रहणानर्थक्यं
संघातस्याप्रत्ययत्वात् तलोपस्य चासिद्धत्वादिति। चिणो लुक्। चिणो लुक्येवासिद्धो भवति। कामममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति। क-
ल्प्यो हि वाक्यशेषो वाक्यं च वक्त्रधीनं हि। अर्थवावति निर्देशो यं। कामचारश्च भवति निर्देशो वाक्यशेषं समर्थयितुं। तद्यथा उशीनरवन्मद्रे-
षु यवाः संति न संतीति। मातृवदस्याः कलाः संति न संतीति। एवमिहापि स्थानिवद्भवति स्थानिवन्न भवतीति वाक्यशेषं समर्थयिष्याम
हे। इह तावत् पद्धां मृद्धेति यथा स्थानिनियणादेशो भवति एवमादेशोऽपि भवतीति। इहेदानीं वाय्वोः अध्वर्योरिति यथा स्थानिनियलोपो न भवति एवमादेशोऽपि न भवतीति। किं पुनरनंतरस्य विधिं प्रति स्थानिवद्भाव आहोस्वित्सर्वमात्रस्य। कश्चात्र विशेषः। अनंतर-
स्येति चेदेकाननुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानं। अनंतरस्येति चेत् एकाननुदात्तद्विगुस्वरगतिनिघातेषूपसंख्यानं कर्तव्यं। एकाननु-
मध्येऽस्मात्सर्वमानयेसत्रानंतरे पूर्वं षाष्ठोऽदृष्टः मधुरायाः पूर्वं पाटलिपुत्रमिसत्रतुल्यव्यवहिते इति प्रश्नः। तत्र यदा विषयभेदाल्लक्षणं भिद्यते तदा यादृशं यत्र पूर्वत्वं सं भ-
वति तादृशं तत्राश्रीयते इति व्यवहितस्यापि ग्रहणं। यदा त्वेकमेव लक्षणं तदा किमिसव्यवहितः एव संभवे व्यवहितमाश्रीयत इत्यनंतरस्यैव ग्रहणेन भाव्यं॥ ॥

त्वनीयत्रेति। हेरपित्वा उदात्तत्वं। तत्र यणादेशे कृते उदात्तस्याभावाद्धूयमाण स्वरो न स्यात्। स्थानिवद्भावात्तु यणि निःस्वरो भवत्येवमादेशोपीति सिद्धः स्वरः। पंचा
रत्न्य इति। जसादिषु छंदसिवावचनं प्राङ् णौ चङ्युपधाया इति जसि गुणप्रसंगे छंदसि विकल्पितत्वान्न भवतीति यणि कृते इगंतत्वाभावात्पूर्वपदप्रकृतिस्वरप्रसंगः।
यत्नलुनीयत्रेति। यच्छब्दप्रयोगे निघातप्रतिषेधार्थः। तत्र यणि कृते उदात्तस्याभावाद् इति निघातस्याप्रसंगः। एतच्च सर्वमनाश्रित्यांतरंगबहिरंगभावमुक्तं। श्लेष्मा ३

त्वनीयत्र। पुनीयत्र। अनुदात्तं पदमेकवर्जमिति शेषस्वरो न प्राप्नोति। द्वियुस्वर। पंचारत्न्यः दशारत्न्यः इगंतकाले इति शेषस्वरो न प्राप्नोति गतिनि
निघातः। यत्नलुनीयत्र यत्र पुनीयत्रेति। तिङि चोदात्तवतीति शेषस्वरो न प्राप्नोति। अस्तु तर्हि पूर्वमात्रस्य। पूर्व : मात्रस्येति चेदुपधाह्रस्व
त्वं। पूर्वमात्रस्येति चेदुपधाह्रस्वत्वं वक्तव्यं। वादितवंतं प्रयोजितवान् अवीवदद्वीणां परिवादकेन। किं पुनः कारणं न सिध्यति। यो सौ णौ णिलु
प्यते तस्य स्थानिवद्भावाद्ध्रस्वत्वं न प्राप्नोति। गुरुसंज्ञा च। गुरुसंज्ञा च न सिद्ध्यति। श्लेष्मा ३ घ्न। पित्रा ३ घ्न। दरु ३ ध्मन्व। मा ३ ध्मन्व। हलो
नंतराः संयोग इति संयोगसंज्ञा संयोगे गुर्विति गुरुसंज्ञा गुरोरनृत इति प्लुतो न प्राप्नोति। ननु च यस्याप्यनंतरस्य विधिं प्रति स्थानिव
द्भावः तस्याप्यनंतरलक्षणो विधिः संयोगसंज्ञा विधेया। न वा संयोगस्यापूर्वविधित्वात्। न वा एष दोषः। किं कारणं। संयोगस्यापूर्वविधि
त्वात्। न पूर्वविधिः संयोगः किं तर्हि पूर्वपरविधिः संयोगः॥ ॥श्री॥ ॥७॥

घ्न इति। कार्यत्वात्संयोगसंज्ञाया व्यवहितस्यात्र प्लुतविधिरिति पूर्वः पक्षः। ननु चेति। यथोद्देशपक्षे प्रत्येकं च संयोगसंज्ञेति पक्षे दोष इत्यर्थः। न वेति। समुदायः राम०
संज्ञीति भावः। पूर्वमात्रस्येति पक्षोत्र स्थितः। अवीवददिति तु चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधो वक्ष्यते॥ ×आनंतर्याश्रयणेपि×१ ॥ १४२

एकादेशस्येति। परस्मिन्निति सेनत्वधारणार्थमुपात्तं। तथाहि। अनुपादीयमाने परस्मिन्निति सेन स्मिन्परनिमित्तकस्यास्यानिवद्भावो लभ्यते एव। तत्रानेन यथाऽपरनिमित्तकस्य
स्यानिवद्भावो निवार्यते तथैव यथा घ्नपद्यः आदीध्ये इति। एवं परस्मिन्नेव यन्नादेश इत्यवधारणादुभयनिमित्तस्याप्यनिमित्तिभाक्। आयमादिभ्योऽणन्ते भ्यऔमसये कृ
ते एकादेशे च तस्यादिवद्भावानुमामोऽप्राप्नुतः। पादेऽउदवाहे इत्यत्र ऊठ्वेकादेशे कृते आदिवद्भावाद्भसंज्ञायां सत्यां पद्भाव ऊठ्च प्राप्नुतः। अचो ञ्णितीत्यच इति गुण

एकादेशस्योपसंख्यानं। एकादेशस्योपसंख्यानं कर्तव्यं। ख्यायसौ। गोमतौ। चातुरौ। आनडुहौ पादे। उदवाहे। एकादेशे कृते नुमामौ पद्भावऊठिसे
ते विषयः प्राप्नुवन्ति। किं पुनः कारणं न सिध्यति। उभयनिमित्तत्वात्। अजादेशः परनिमित्तक इत्युच्यते। उभयनिमित्तश्चायं। उभयादेश
त्वाच्च। अच इत्यादेश उच्यते। अचोश्चायमादेशः। नैष दोषः। यत्तावदुच्यते उभयनिमित्तत्वादिति इह यस्य ग्रामे नगरे वाऽनेकं कार्यं भव
ति शक्नोऽसौ ततोऽन्यतरव्यपदेष्टुं। तद्यथा। गुरुनिमित्तं वसाम। अध्ययननिमित्तं वसाम इति। यदप्युच्यते। उभयादेशत्वाच्चेति। इह द्वयोर्द्वयो
: षष्ठीनिर्दिष्टयोः प्रसंगे भवति लभतेऽसावन्यतरतो व्यपदेशं। तद्यथा। देवदत्तस्य पुत्रः देवदत्तायाः पुत्र इति। अथ हलचोरादेशः स्थानिव
द्भवत्युत होन। कश्चात्र विशेषः। हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलोप एकादेशः। हलचोरादेशः स्थानिवदिति चेद्विंशतेस्तिलो
९ प एकादेशो वक्तव्यः॥ ॥

त्वादेकत्वसंख्यायाः प्रभुनायजेनेतिवद्द्विवक्षितत्वात्। इह यस्येति। अन्वयव्यतिरेकाभ्यां निमित्तत्वावधारणाद्भवत्येवं निमित्तता। अयोगव्यवच्छेदेन परस्मिन्नजादे
श इति विशेषणात्। द्वयोरिति। वर्णग्रहणेनावजातिग्रहणान्नास्ति संख्याविवक्षा। भवतु वा तथापि न दोष इति भावः॥ हलचोरिति। उभयथाव्यवहारदर्शनात्प्रश्नः। उरण्
पर इत्यत्राणनस्समुदायोः कृतादिरादेशो रपरो न भवति। नास्तोपीसत्त्वस्य राजदिति हलकोलौ पेऽस्तोपि त्वाश्रयणात् उपधाह्रस्वत्वनिषेधः। अपि तिप्यत्राकोऽदेशो नमि
परस्य ९ ति॥ ॥७॥ ॥

विंशकइति। विंशतिस्त्रिंशज्ज्ञाड्डुन्। विंशमिति। शदं तविंशतेश्चेत्तिडः। विंशइति। तस्य परस्योदा स्थवीयानिति। गुणलोपयोस्तुल्यकालत्वाद्गुणस्य कथमनादिष्टादचः पूर्वत्व
मिति चेत्स्थानिनोनादिष्टादचः पूर्वत्वात्तद्वारेण गुणस्यापि भविष्यतीत्यदोषः। तत्र स्थानिवद्भावे सतिलशब्देन व्यवधानादवादेशप्रसंगः। कैकेय इति। नन्वज्मात्रे गुणे वि
धीयते न लजादौ तेन यो ना श्रीयते ना सावादेशः पश्चादेशः नासावाश्रीयते इति न्यायाच्चास्ति दोषः। नैतदस्ति। स्थानिवन्न भवतीत्यभावात्तिदेशाश्रयणपक्षे दोषः स्या
देव परिहारान्तरस्याभिधास्यमानत्वाद्धेतन्नाश्रितं। दधिसक्तुवइति। समानाधिकरणाधिकारेक्तस्तृतीयापूर्वपद उत्तरपदलोपश्चेतिलोपस्य परनिमित्तता। यद्यप्यत्र

विंशकः। विंशतेस्तिविंशः। स्थूलादीनां यणादिलोपेऽवादेशः। स्थूलादीनां यणादिलोपे कृतेऽवादेशो वक्तव्यः। स्थवीयान्। केकयमित्रय्वोरियादेश एत्वं।
केकयमित्रय्वोरियादेशे एत्वं न सिध्यति। कैकेयः मैत्रेयः। अचीत्येत्वं न सिध्यति। उत्तरपदलोपे च। उत्तरपदलोपे चदोषो भवति। दध्युपसिक्ताः सक्त
वः दधिसक्तवः। अचीति यणादेशः प्राप्नोति। यङ्लोपे यणियुवङः। यङ्लोपे यणियुवङो न सिध्यन्ति। नेम्यः चेच्यः चेक्षियः। चेक्रियः लोलु
वः पोपुवः। अचीति यणियङुवङो न सिध्यन्ति। अस्तु तर्हि न स्थानिवत्। अस्थानिवत्त्वे यङ्लोपे गुणवृद्धिप्रतिषेधः। अस्थानिवत्त्वे यङ्लोपे गुण
वृद्ध्योः प्रतिषेधो वक्तव्यः। लोलुवः पोपुवः मरीसृपः मरीमृज इति। नैष दोषः। न धातुलोप आर्धधातुक इति प्रतिषेधो भविष्यति। किं पुनराश्री
यमाणायां प्रकृतौ स्थानिवद्भवति आहोस्विदविशेषेण। कश्चात्र विशेषः। अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिः। अविशे
षेण स्थानिवदिति चेल्लोपयणादेशयोर्गुरुविधिर्न सिध्यति। न्यैष्मा इष्ट्वा। पित्रा इष्ट्वा। दाऽध्मा इध्वा। मा इध्वा। हलोनन्तराः संयोग इति संयोग
१८ संज्ञा संयोगे गुरुरिति गुरुसंज्ञा गुरोरिति प्लुतो न प्राप्नोति॥ ॥ ॥

परत्वं तद्विधौ नेति सिध्यति तथापि परिहारान्तरस्याभिधास्यमानत्वादेतच्चोक्तं। नेन्य इति। ऊनो चीसेन दनाश्रयणउपन्यासः। अस्तु तर्हीति। अच इत्युपादानात्साक्षादेव यस्या तृथा
नि त्वे नोपात्तस्तस्यैव स्थानिवद्भावः। न तु हलजादेशस्येत्यर्थः। किं पुनरिति। यत्र कार्ये स्थान्याश्रितः किं तत्रैव स्थानिवद्भाव उत यत्राप्यनाश्रित इति प्रश्नः। गुरुविधिरिति।
कार्यार्थत्वात्संयोगसंज्ञाया गुरुविधिरित्युच्यते। लोपयणादेशयोः स्थानी संयोगसंज्ञायां नाश्रीयते॥ ॥ ॥

यङो चिचेति सूत्रे भाष्येस्य पाठमेतत्

द्विर्वचनादयश्चेति। द्विर्वचनादावपि स्थानीनाश्रीयते। अनचीति पर्युदासाश्रयणात् तत्सदृशस्यैव हलो द्विर्वचनादावाश्रयणं न त्वचः। एवं यलोपेऽपि वरे स्वकारलोपे विधीयमा
ने प्रकृतिरास्थिते वाचिक्रितीति। भाष्ये तु वरेशाक्रोऽपि प्रतिरस्तत्रायं भावः। यरुः एव समुदायस्य प्रत्ययत्वेनान्तरवयवस्याकारस्ये संजातोऽप्रत्यये आकारस्य लोपविधानादत्राप्रसं
गएवेति। अघुग्धेति। क्तसालोंसस्येति लोपे कृते तेन तस्य स्थानिवद्भावाज्झलो झलीति लोपो न स्यादिति लुग्वचनं। अडुद्भूहीसेवमर्थे त्वव श्यपवक्तव्यो वकारस्याऽऽत्त्वात्। घ्नं

द्विर्वचनादयश्चप्रतिषेधे। द्विर्वचनादयश्चप्रतिषेधे वक्तव्याः॥ द्विर्वचनवरेयलोपइति [redacted]। क्सलोपे लुग्वचनं। क्सलोपे लुग्वक्तव्यः।
अघुग्ध। अघुग्धाः। लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये इति। हंने घ्नेत्वं। हंते घ्व घत्वं वक्तव्यं। घ्नंति घ्नंतु अघ्नन्। अस्तु तर्हि आश्रीयमाणायां प्र
कृतौ इति। ग्रहणेषु स्थानिवदिति चेत् जग्ध्यादिषु आदेशप्रतिषेधः। ग्रहणेषु स्थानिवदिति चेत्तर्जग्ध्यादिषु आदेशस्य प्रतिषेधो वक्तव्यः। निराघ्नास
माघ्न। अद्रो जग्धिर्ल्यप्तिकितीति जग्धिभावः प्राप्नोति। यणादेशे युलोपेत्वानुनासिकात्वप्रतिषेधः। यणादेशे युलोपेत्वानुनासिकात्वा
नां प्रतिषेधो वक्तव्यः। यलोपः। वाय्वोः अध्वर्य्वोः। लोपो व्योर्वलीति यणादेशे लोपः प्राप्नोति। ऊलोपः। अकुर्विआशांशां। अकुर्वीशां। निसंकरोतेः ये
चेतुकारलोपः प्राप्नोति। ईत्वं। अलुनि आशांशां अलुन्याशां। ईहल्यघोरितीत्वं प्राप्नोति। अनुनासिकात्वं। अजज्ञि आशांशां अजज्ञाशां ये विभा
षेत्यनुनासिकात्वं प्राप्नोति॥ ॥ ॥

नकारे
तीति। अल्लोपस्य स्थानिवत्त्वाददनंतरो नभवतीति घत्वाप्रसंगः। वचनसामर्थ्याद्व्यवधानाश्रयणे तु हननादिष्वतिप्रसंगः। निराघ्नेति। आद्यन्तेणिचिल्लोपे कृते एकदेशवि
कृतस्यानन्यत्वाद्धरिरे वायमिति जग्धिः प्राप्नोति। न च जग्धौ णिराश्रितः आद्यिग्रहणाद्वासादितिलिङ्गि· वधादेशप्रसंगः॥ यणादेश इति। बहिरंगपरिभाषानाश्रयणेनैतदु
च्यते। अजज्ञीति। जनजनने इत्यस्य व्यत्ययेनात्मनेपदं जनीप्रादुर्भावे इत्यस्य ह्रस्वपनम्छान्दसत्वाच्छ्लुः॥

सौर्यीति॥ नेनैकदिगितिसूत्रे। ततो मत्वर्थीय इनिः। सौर्ये इस इत्यनु यलोपो न प्राप्नोति। यस्येति चेत्यादौ भस्य प्रतिषेध इति वचनात्। सूर्यमत्स्ययोर्ङ्यामिति परिगणनानाश्रयणे नेन उच्यते। गार्गीभ्यामिति। गौह्रिया इति णः संघातकल्पत्वे विसर्जवा। अनातीति प्रसज्यप्रतिषेधाश्रयेण चोद्यं। पर्युदासाश्रयणात्तदशान्तद्धिताश्रयेण परिहारः। सर्वेषामिति। आ॰ श्रीयमाणायां प्रकृतावित्येतस्मिन्पक्षे आश्रीयमाणो विधिग्रहणात् अधिकाद्यन्तास्ताश्रयनिहसर्यो स्ति ध्वनितीति भावः। अत एव पक्षान्तरोपन्यासः। अथवेति॥

रायात्त्वप्रतिषेधश्च। राय आत्त्वस्य प्रतिषेधो वक्तव्यः। रायि आशं राय्या शां रायो हलीत्यात्त्वं प्राप्नोति। दीर्घेयलोपप्रतिषेधः। दीर्घेयलोपप्रतिषेधो वक्तव्यः। सौर्ये नाम हिमवतः शृंगे तद्वान् सौर्यी हिमवानिति। सौर इनाश्रये दीर्घत्वे कृते ईतियलोपः प्राप्नोति। अतो दीर्घेयलोपवचनं। अतो दीर्घेयलोपो वक्तव्यः। गार्गीभ्यां। वात्सीभ्यां। दीर्घे कृते अपत्यस्य च तद्धितेनातीति प्रतिषेधः प्राप्नोति। नैष दोषः। आश्रीयते नत्र प्रकृतिस्तद्धित इति। सर्वेषामेष परिहारः। उक्तं विधिग्रहणस्य प्रयोजनं विधिमात्रे स्थानिवद्यथा स्यात्। अनाश्रीयमाणायामपि प्रकृताविति। अथवा पुनरस्त्वविशेषेण स्थानिवत् इति। ननु चोक्तम् अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिर्द्विर्वचनादयश्च क्तलोपे लुग्वचनं हन्तेर्घत्वमिति। नैष दोषः॥ यत्नावदुच्यते। अविशेषेण स्थानिवदिति चेल्लोपयणादेशे गुरुविधिरिति। उक्तमेतत्। न वा संयोगस्यापूर्वविधित्वादिति। यदप्युच्यते द्विर्वचनादयश्च प्रतिषेधे वक्तव्या इति। उच्यते न्यास एव। क्तलोपे लुग्वचनमिति क्रियते न्यास एव। हन्तेर्घत्वमिति सप्तमे परिहारं वक्ष्यति॥ ॥ ॥

न वा संयोग[illegible]स्येति। संयोगसंज्ञायाः समुदायाश्रयत्वादपूर्वविधित्वं। उच्यत इति। अत एव लिंगादविशेषेण स्थानिवद्भावः। क्रियत इति अप उदूर्ध्वमवधृतं वक्तव्यमिति भावः। सप्तम इति। श्रुतिकृतमानन्तर्यमाश्रीयते स्थानिवद्भावकृतं तु व्यवधानं वचनसामर्थ्याद्विधानकं॥ ॥ हीलेवम १ ॥

नपदांतद्विर्वच॥ ॥चेनत्वानिति। भावसाधनविधिशब्दाश्रयेणैतदुच्यते। तत्र चेनत्वशब्दात्कुमुदनडवेतसेभ्यो ड्मतुबिति ड्मतुपि टिलोपे कृते स्वादौ पूर्वं पदमिति पदसंज्ञायां सकारः पदांतत्वं प्रतिपद्यते इति पदांततया विधीयमानत्वात्स्थानिवत्त्वनिषेधात् रुत्वप्रसंगः। न सौ मत्वर्थे इति। तदस्मिन्नस्तीति तत्रैवार्थे ड्मतुप् नतु त्रि वृत्त्यादि वचनमभिधानादित्याश्रित्यैवमुच्यते। अकारांतमिति। भसंज्ञां प्रति स्थानिवत्त्वनिषेधाभावात्सकारांतत्वाभावान्नास्ति भसंज्ञा। पदांतत्वे तु विधानत्वे स्था निवत्त्वनिषेधात्सकारांतस्य पद[illegible]त्वाद्रुत्वप्रसंगः। ननु चेति। स्थानिवत्त्वनिषेधाद्विनायः सिद्धः पदांतः तस्य विधौ स्थानिवत्त्वनिषेधः यथा कानि संतिकौ

नपदांतद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु॥ ॥पदांतविधिं प्रति न स्थानिवदित्युच्यते। तत्र चेनत्वानिति रुः प्राप्नोति। नैष दोषः। भसंज्ञात्र बाधिका भविष्यति। तसौ मत्वर्थे इति। अकारांतमेतद्भसंज्ञां प्रति। पदसंज्ञां प्रति सकारांतं। ननु चैवं विज्ञायते यः सं प्रति पदांत इति। कर्मसाधनविधिशब्दस्योपादाने एतदेवं स्यात्। अयं च विधिशब्दोस्त्येव कर्मसाधनः विधीयते विधिरिति। अस्ति भावसाधनः विधानं विधिरिति। तत्र भावसाधनविधिशब्दस्योपादाने एष दोषो भवति। इह च ब्रह्मबंध्वा ब्रह्मबंध्वै धकारस्य जश्त्वं प्राप्नोति। अस्ति पुनः किंचिद्भावसाधनविधिशब्दस्योपादाने सतीष्टं संगृहीतं आहोस्विद्दोषा न मेव। अस्तीत्याह कानि संति यानि सं[illegible] तिकौस्तः यौस्त इति यो सौ पदांतो यकारो वकारो वा श्रूयेत स न श्रूयते॥ ॥ ॥

स्त इति। इह तु सकारं स्थानिवद्भावनिषेधाद्विना पदांतत्वेनासिद्ध इति भवत्येव स्थानिवद्भावः उस पदांतत्वात्सकारस्य रुत्वाभावः। ब्रह्मबंध्वेति। ब्रह्मबंधुशब्दाद् ङ- [redacted] ङेरेकादेशः स्थानिवद्भावाद् ङ्-यहणो नग्रस्यते इति तस्मिन्नसादिविधिति पदसंज्ञायां सत्यां धकारस्य पदांततया विधेये इति स्थानिवत्त्वनिषेधाज्जश्त्वं स्यात्। भसंज्ञां प्रति तु एकादेशस्य स्थानिवत्त्वादुकारांतमेतदिति भिन्नावधिकत्वान्नास्ति भपदसंज्ञयोर्बाध्यबाधकभावः। यणादेशोच्चारणं चात्र मे कादेशस्येवोदाहरणात्वं कानि संतीति। पक्षद्वयसाधारणमिदं प्रयोजनं भावसाधनपक्षे विशिष्यसेवे[illegible] सुपन्यस्तं। यकार इति। यकारवकारौ विधीयमानावेव पदांतौ भवतः

ता

भा०कौ० ष०
१४५
145

इदानीमसाधारणं प्रयोजनमाह। षडिकइति। षडंगुलिरित्यादौ षट् च ता अंगुलयश्चेति विग्रहे। ञ्णान्ता षडिति षट्संज्ञायां षष् डित्यादि षटिका षट्का सन्त्वेषु च संख्येयेषु। डिति डीषो दृप्त्रिंशत्वंशत्संज्ञायाः पदसंज्ञाप्येतासेतेति चेत्। तिलोपे चु षडिकस्य मशब्दो न तर्व्यञ्जनाद्यविभक्त्यासिद्धः। पदांतत्वेनेतिपदांतताया अपविधीयमानत्वात् नास्तिस्याः निवृत्तनिषेधः। इत्सकारलोपस्य स्यानिवृत्तादकारांतस्य भसंज्ञा पदसंज्ञात्वे नर्व्यञ्जनविभक्त्याश्रयेण पकारांतस्येति सिद्धं जश्त्वं। कर्मसाधने तु षषः षकारः पदांतत्वेन सिद्ध इति स्यानिवृत्तनिषेधात्सकारांतस्य भसंज्ञेति तुल्यावधिक यामसंज्ञया पदसंज्ञाया एकसंज्ञाधिकाराद्बाधनाज्जश्त्वासिद्धिः। वाचिकस्त्विति। चकारस्य पदांतत्वात्कुत्वप्रसंगः। कथं पुनः षडिकसिद्धिः यावतोऽकंयोस्मोपदांतो यकारइति तद्धितेहापि इकारस्य पदांतस्य विधेयत्वात्सदांततायाविधिरिति स्यानिवृत्तनिषेधप्रसंगः। नैषदोषः। पूर्वमेव जश्त्वेन इकारस्य निष्पन्नत्वान्नेदानीं विधिरि

षडिकश्चापि सिद्धो भवति। वाचिकस्तु न सिध्यति। अस्तु तर्हि कर्मसाधनः षडिको न सिध्यति। अस्तु तर्हि भावसाधनः वाचिको न सिध्यति। वाचिकषडिकौ न संवदेते। कर्त्तव्योत्र यत्नः। कथं ब्रह्मबंध्वा ब्रह्मबंध्वै। उभयत आश्रयणेनांतादिवदिति। कथं वेतस्वान्। नैवं विज्ञायते पदस्यांतः पदांतः पदांतविधिं प्रतीति। कथं तर्हि पदे अंतः पदांतः पदांतविधिं प्रतीति। अथ वा यथैवान्यान्यपि पदकार्याणि उपप्लवंते रुत्वं जश्त्वं च। एवमिदमपि पदकार्यं उपप्लोष्यते किं भसंज्ञा नाम॥ ॥ ॥

तिभावसाधने षडिकसिद्धिः। कर्मसाधने तु इकारस्य पदांतत्वेनप्रसिद्धस्य भत्वात्सदृत्त्वनिवृत्तौ षकाररूपापत्तिर्विधेयेति स्यानिवृत्तनिषेधात्तुल्यावधिकसिद्धिः षत्वस्य धनेनुइकारस्य पदांतत्वेन प्रसिद्धस्य भत्वात्सदृ यामसंज्ञया पदसंज्ञाया बाधनाज्जश्त्वनिवृत्तौ षडिकासिद्धिः। न च भावसाधने षकाराणपत्तिर्भाव्येति शक्यते वक्तुं। तस्या अपदांतरूपत्वात्पदांतत्वे हि भिन्नजश्त्वं स्यात्। न च जश्त्वविधिनिमित्तः स्यानिवृत्तनिषेधः। यत्र स्यानिवृत्तनिषेधाज्जश्त्वं विधीयते स ग्विर्बध्यामितिसोस्य विषयः। इह तु पूर्वमेव जश्त्वकृतं स्यानिवृत्तनिषेधानुनत्विह निराशंकानो। एवं त्वासिद्धे नस्यानिवृदित्स्यापष्यमविषयः नत्वत्र पूर्वत्रासिद्धीयं किंचित्कार्यं विधे णम०
यं। कर्त्तव्योत्र यत्न इति। एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्य इति वाचिकः सिद्धः षडिकस्तु ठाजादाविति लोपे यस्येति चेति लोपे सिद्धः॥ ॥ ॥ १४५

उभयत इति। यस्मात्स्वादिविधिस्तत्स्वादौ परमिति पूर्वपरो भया श्रयणं। परेत इति। न च ढ्रलुप् प्रत्ययः परं। एवं पुदिक्केइकप्रत्ययो न परमिति नास्ति स्थानिवद्भावनिषेधः। यथे वेति। यचि भमिसत्र तसौ मत्वर्थे इ सत्रे च पदमिति वर्त्तते तेन पदे सद्धसंज्ञे भवतीति लब्धे पदत्वेत न्निवेधनरूत्व प्रतिवंधार्थो भसंज्ञा तद्विषयत्वात्सदां न विधिरिति स्थानिवत्व निषेधाद्भूत्वा [redacted] दुत्वाभावः सिद्धः। कंडूयतेरिति। कंडूञ्‌तात् क्विप्। यगंता नु क्विम्न भवति। उक्तं हि भाष्ये। नैते भ्यः क्विप् क्रियत इति। सौरीति। एकोः एपकारलोपो द्वितीय ईकारे।

वरे यल्लोपविधिं प्रति न स्थानिवद्भवतीत्युच्यते। तत्र तेषु या या वरः प्रवपेत पिंडान्। अवर्णलोपं प्रति स्थानिवत्स्यात्। नैष दोषः। नैवं विज्ञायते वरे यलोपविधिं प्रति स्थानिवद्भवतीति। कथं तर्हि वरे। यलोपविधिं प्रतीति। किमिदमयलोपविधिं प्रतीति। अवर्णलोपविधिं प्रति यलोपविधिं प्रतीति। अथवा योगविभागः करिष्यते। वरे लुप्तं न स्थानिवत्। ततो यलोपविधिं प्रति न स्थानिवदिति। यलोपे कि मुद्दाहरणं। कंडूयते रप्रत्ययः कंडूरिति। नैतदस्ति। कौलुप्तं न स्थानिवत्। इदं तर्हि सौरीबलाका। नैतदस्ति। उपधात्वविधिं प्रति न स्थानिवत्। इदं तर्हि प्रयोजनं। आदिसः। नैतदस्ति। पूर्वत्रासिद्धे न स्थानिवत्। इदं तर्हि कंडूतिः वल्गूतिः। नैतदस्ति कंडूया वल्गूया इति भवितव्यं। इदं तर्हि कंडूयतेः क्विच ब्राह्मणकंडू तिः क्षत्रियकंडूतिः॥ ॥ ॥ ॥

तयोः स्थानिवत्वाद्यकारस्योपधात्वं न स्यात्। स्थानिवत्वनिषेधे द्वितीयलोपस्य समानाश्रयत्वादसिद्धत्वादणिलोपस्य व्याश्रयत्वाँ (सिद्धत्वा) द्यकारस्योपधात्वाल्लोपः सिध्यति। आदि स इति। आदितेः सास्य देवते सर्थे एपः। हलो यमामिति यल्लोप इष्यते स च स्थानिवत्वनिषेधात्सिध्यति। ब्राह्मणकंडूतिरिति। षष्ठीसमासः। कर्मधारये कंडूतिशब्दस्य पूर्वनिपा ततो भवादावर्थे द्वितीयो एपः। १ ॥ तप्रसंगः॥ ॥ [redacted] ॥ ॥

आकर्षिक इति॥ चर संर्षे आकषोत्स्थलितिष्ठन्। यस्येति लोपः स्यस्यानिवद्भावात्ककाराकारयोरानन्तर्यं न स्यात्। कारक इत्यादौ च स्वरविधौ व्यंजनमविद्यमानवदिति व्यंजन
स्याविद्यमानत्वादनन्तरस्य स्वरभाजः संभवादत्र व्यवधाने न स्यात्। यत्र तु व्यवहिते पूर्वशब्दो वर्तते तत्राप्यव्यवधिमतोरानन्तर्यासंभवादन्तरालस्यानन्तरोपस्थितो न्त्य इत्यनादूरस्य व्यव
हारः। यत्र त्वानन्तर्यसंभवः तत्र व्यवहितं नाश्रीयते। इष्ट लोलि कर्षणाद्व्यवधाने भविष्यतीति चेत्। आकारस्यापि पक्षे स्यादिति स्थानिवत्त्वनिषेधः कर्तव्यः। प्रतिदीव्ने
ति। रेफवकारान्तस्य भस्य न भकुर्छुरामिति दीर्घत्वनिषेध इत्यत्र न प्रवर्तेते। इह हि लोपोपीति। प्रकृतः प्रत्ययतः। आनुपूर्व्येणेति। तत्र पदार्थानां समन्वयावगमात्। इह तु लो

प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवत्। प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद्भवतीति वक्तव्यं। स्वर। आकर्षि
कः। चिकीर्षकः। जिहीर्षकः। योऽसावल्लोप आदेशः स्थानिवदेवासौ भवति पंचारत्न्यो दशारत्न्य इति। स्वर। दीर्घ। प्रतिदीव्ना। प्रतिदीव्ने। योऽसावल्लोप आदे
शः स्थानिवदेवासौ भवति किर्योर्गिर्योरिति। दीर्घ। यल्लोप। ब्रासनणाकं इतिः क्षत्रियक इतिरिति। योऽसावल्लोप आदेशः स्थानिवदेवासौ भवतीति वा
य्वोः आध्वर्य्वोरिति। तत्तर्हि वक्तव्यं। न वक्तव्यं। इह हि लोपोपि प्रकृतः आदेशोपि विधिग्रहणमपि प्रकृतं अनुवर्तते दीर्घादयोपि निर्दिश्यन्ते। अंतरंगत्वेनन सिद्धिः पूर्वोत्तरपदेति निषेधादिति के-
केवलं तत्राभिसंबंधमात्रं कर्तव्यं। स्वरदीर्घयलोपविधिषु लोपाजादेशो न स्थानिवदिति। आनुपूर्व्येण सन्निविष्टानां यथेष्टमभिसंबंधः शक्य
ते कर्तुं न चैतान्यानुपूर्व्येण सन्निविष्टानि। अनानुपूर्व्येणापि सन्निविष्टानां संबंधो भवति। तद्यथा॥ ×यथेष्टमभि× ॥ ॥

पोयष्टाह्नेन संबद्धः सकञ्चश्रुतोद्विधाचास्योपयोग इष्यते। स्वरदीर्घयलोपास्त्वविक्षिप्तास्ते कथं समुच्चीयन्तामिति भावः। अनानुपूर्व्येणापीति। लोपशब्द आवर्त्यते। तत्र
लोपाजादेश इति विज्ञायते। तत्र द्विर्वचनवि[धौ] लोपाजादेशस्यासंभवात्। सवर्णादिविधौ तस्यैव संभवान्न तत्रादेशस्य लोपो विशेषणं। पदान्ते तु यद्यपि संभवव्यभिचारौ
स्तस्तानि संनिकानियन्तीति तथापि न पदान्ते तियोगविभागान्न द्विधी लोपो न विशेषणमिति पारिशेष्यात्स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवदिति विज्ञायते। स्य
निशाह्नलाच्चास्य एतावन्तोऽर्थाः सन्निहिता इत्येतावत्प्रतीयते। ग्रहणकवाक्यानुलक्ष्यसंस्कारकं प्रक्रियावाक्यमुपप्लवते इति सिद्धमिष्टं॥ ॥ ॥

अनड्वाहमिति। पाठक्रमादर्थः क्रमो बलीयानिति यथेष्टमत्राभिसंबंधः। लौरिति। णिलोपस्य स्थानिवद्भावाद्वृद्ध्यान सात्। अल्लोपेति। एषत्वो पूर्वविप्र इ. यणगुणानामृद्धिदीर्घेभ्यः
पूर्वविप्रतिषिद्धमिति। णिलोपस्ततो वृद्धिः। आवादेशो वर्णाश्रयत्वात्प्रत्ययलक्षणेन न भवति। यथा गोहितमित्यवादेशः। एतच्चांतरंगमनाश्रित्योक्तं। तत्रत्वाश्रितेंतरंग
बहिरंगयोर्विप्रतिषेधाभावः। लवमाचष्टे इति। क्वौ विधिं प्रति न स्थानिवदिति स्थानार्थस्य प्रदर्शनायेदमुदाहृतं। इदं तु क्वौ लुप्तोपधाहरणं देवयतेर्द्यूरिति। बिंबमिति। बिंबी बदरी
शब्दाभ्यां ऊ. ध्यामनुदात्तादेश्चेत्यञ्। तस्य फलेलुक्। लुक्तद्धितलुकीति ङीषो लुक्। तस्य स्थानिवद्भावाद्यस्येति लोपः प्राप्नोतीति प्रतिषेध उच्यते। तद्धितस्य स्थानि

अनड्वाहमुदहारियात्वं हरसिशिरसाकुंभं भगिनि साचीनमभिधावंतमद्राक्षीरिति। तस्य यथेष्टमभिसंबंधो भवति। उदहारि भगिनि या त्वं कुंभं हर
सि शिरसा अनड्वाहं साचीनमभिधावंतमद्राक्षीरिति। क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानं कर्तव्यं। क्वौ किमुदाहरणं। कंडूयतेरप्रत्य
यः। कंडूरिति। नैतदस्ति। यलोपविधिं प्रति न स्थानिवत्। इदं तर्हि पिपठिषतेरप्रत्ययः पिपठीः नैतदस्ति। दीर्घविधिं प्रति न स्थानिवत्। इदं तर्हि लाव
यतेर्लौः पावयतेः पौः। नैतदस्ति। अल्लोपाद्धावादेशो णिलोपः। प्रत्ययलक्षणेन वृद्धिर्भविष्यति। इदं तर्हि लवमाचष्टे लवयति लवयतेरप्रत्ययः लौः पौः।
स्थानिवद्भावात्सेवृद्ध्यानप्राप्नोति। क्वौ लुप्तमिति वचनाद्भवति। एवमपि न सिध्यति। कथं। क्वौ णिलोपः णावकारलोपः तस्य स्थानिवद्भावाद्वृद्ध्यानप्राप्नोति
। नैष दोषः। नैवं विज्ञायते क्वौ लुप्तं न स्थानिवदिति। लुकि किमुदाहरणं। बिंबं बदरं। नैतदस्ति। पुंवद्भावेनाप्येतत्सिद्धं। इदं तर्हि। आमलकं। एतदपि ना
×न स्थानिवदिति कथं तर्हि क्वौ विधिं प्रति ×स्ति। वक्ष्यत्येतत्। फलेलुग्वचनमनर्थकं प्रकृत्यंतरत्वादिति॥ ॥ ॥ ॥

नः परत्वाल्लुकोपि परत्वाश्रयणात्परनिमित्तकत्वं ङीप्रत्ययलुकआश्रीयते। अन्यथा तदभावे न पौर्वापर्याभावात्कुतः परनिमित्तकत्वं। अथवा बुद्धिपरिकल्पितमभावेनापि
पौर्वापर्याश्रयणं। पुंवद्भावेनेति। भस्याढे तद्धिते इति पुंवद्भावः। अत्र च भाषितपुंस्कत्वं नाश्रीयते इत्येवमुक्तं। तदाश्रये तु नास्ति पुंवद्भावः। आमलकमिति। हृद्भुलान्म
यतो विधानात्ऌतो भावः। प्रकृत्यंतरत्वादिति। बिंबबदरामलकादयो न यौगिकाः शब्दाः किं तर्हि विशिष्टजातिवाचिन इत्यर्थः॥ ॥श्री॥ ॥

भा० कै० प्र० पंचभिरिति। आर्होदितिठक्। तस्याध्यर्द्धपूर्वेति लुक्। लुक्तद्धितलुकीति ङीषो लुक्। अंतरंगानपि विधीन्बहिरंगो लुग्बाधत इति यणादेशः पूर्वं न प्रवर्त्तते। कृते तु लुकि न तस्य स्था
१४७ निवद्भावाद्यणः प्रसंग इति स्थानिवत्त्वनिषेध उच्यते। अथ विकल्पाये नैठगभविष्यतीति चेत्तत्र तिप्रत्ययो रवप्रसंगः। वर्णो ह्यय इति। यद्यपि पुंवद्भावे सिद्धस्य प्रत्ययविधावि
147 त्यस्ति तथापि यत्र भाविमत्त्वं तत्र पुंवद्भावः। इह तु लुकि मत्त्वाभावात्तु तः पुंवद्भावः। किं तर्ह्यन्येऽपीति। यत्र पुंवद्भावो नास्ति। पंचेंद्र इति। सास्य देवतेत्यण्। द्विगोर्लुगनपत्य इति
लुक्। ततो ङीषो लुक्। तस्य स्थानिवद्भावान्ङीषा सन्नियुक्त आनुक् श्रूयेतेत्यर्थः। दराणीति। तथा पंचाग्न्यो देवता अस्य पंचाग्निरिति ऐकारः श्रूयेत। समानायामाकृतौ

इदं तर्हि पंचभिः पट्वीभिः क्रीतः पंचपटुरेषपटुरिति। ननु चैतदपि पुंवद्भावे नैव सिद्धं। कथं पुंवद्भावः भस्याढे [redacted] तद्धिते पुंवद्भवतीति। भस्येत्युच्यते। ॥
जातेश्च भं भवति। न चात्र यजादिपश्यामः। प्रत्ययलक्षणेन यजादिः। वर्णाश्रये नास्ति प्रत्ययलक्षणम्। एवं तर्हि ठक्छसोश्चेत्येवं भविष्यति। ठक्
छसोश्चेत्युच्यते। न चात्र ठक्छसौ पश्यामः। प्रत्ययलक्षणेन। न लुमतातस्मिन्निति प्रत्ययलक्षणस्य प्रतिषेधः। नखल्वप्यवश्यं ठगेव क्रीतप्रत्ययः
क्रीताद्यर्था एव वा तद्धिताः। किं तर्हि अन्येऽपि तद्धिता ये लुकं प्रयोजयंति। पंचेंद्राण्यो देवता अस्येति पंचेंद्रः। शातेंद्रः। पंचाग्निः शातागिनः। उपधात्वे कि
मुदाहरणम्। पिपठिषतेः प्रत्ययः पिपठीरिति। नैतदस्ति। दीर्घविधिं प्रतिन स्थानिवत्। इदं तर्हि सौरीवलाका। नैतदस्ति। यलोपविधिं प्रतिन स्था
निवत्। इदं तर्हि पारिखीयः। चटूपरनिर्ह्रासे चोपसंख्यानं कर्तव्यम्। वादितवंतं प्रयोजितवानवीवदद्वीणां परिवादकेन। किं पुनः कारणं न सिद्ध्यति। यौ सौ णौ णि
लोपस्तेन तस्य स्थानिवद्भावाद्ध्रस्वत्वं न प्राप्नोति। ननु चैतदपि उपधात्वविधिं प्रतिन स्थानिवदित्येव सिद्धम्। वृक्षो यत एतद्रूक्षं वांछा। प्रत्ययविधाविति। इहमा
भूत्। पट्यति लघयतीति। कुत्वे चोपसंख्यानं कर्तव्यम्। अर्चयतेरर्कः मर्च्चयतेर्मर्कः। नैतद्वक्तव्यं। औणादिकः एष प्रत्ययः तस्मिन्नार्धधातुके कुत्वमेतदपि णिचाम

मापितपुंस्कत्वामावाद्दर्णाश्रयत्वाद्गुलामावाच्च पुंवद्भावो नास्ति। अपत्यस्येति लोपप्रसंगः लुकि च स्थानिवत्त्वनिषेधाद्दाद्दीघ्य इति परस्मिन्निति तस्य पूर्वेसूत्रे प्रत्युदा
हरणमुपपद्यते। शार्ङ्गं कुते टेरेत्वस्य स्थानिवद्भावादद्व्यवधानाच्च लोपप्रसंगात्। पारिखीय इति। परिखा शब्दाच्चातुर्थिकेणि कृते आकारलोपस्य स्थानिवत्त्वात्सा रि राम०
ऽखेमव इतिहस्वादृक्केकांत रवोपधादिति छोन स्यात्॥ ॥ २ ॥ ॥ १४७

क्तलोपइति। अदुदूर्थे लुग्वचनं कर्त्तव्यमेवं तर्ह्यर्थे लुग्ग्रहणं नेति छेदं कुर्वंति। कर्त्तव्यं भवती सुत्तरं। अवश्यपकार्यमिसर्थे। चकारो न कर्त्तव्य इति। रुपं तत्त्वान् पूर्वेण सि
द्धत्वात्। पापक्तिरिति। किंच। संयोगांतलोपादयः पदांतविधौ स्थानिवद्भावनिषेधासिद्धा इति भाष्येनोदाहृताः। स्कन्दयतेः स्कन्काष्टंन क्षंतीति काष्ठतक्रूः स

पूर्वत्रासिद्धे च। पूर्वत्रासिद्धे च न स्थानिवदिति वक्तव्यं। किं प्रयोजनं। क्तलोपः सलोपे। क्तलोपः सलोपे प्रयोजनं। अदुग्ध। अदुग्धाः। लुग्वा
दुहदिहलिहगुहामात्मनेपदे दंत्य इति लुग्ग्रहणं न कर्त्तव्यं भवति। धकारलोपे आदिचतुर्थत्वे प्रयोजनं। धत्से धध्वे धद्ध्वं इति। दः धस्तथोश्चे
ति चकारो न कर्त्तव्यो भवति। हलो यमां यमि लोपे प्रयोजनं। आदित्सः। हलो यमां यमि लोपः सिद्धो भवति। अल्लोपणिलोपौ संयोगांत
लोपप्रभृतिषु प्रयोजनं पापच्यतेः पापक्तिः। यायज्यतेर्यायष्टिः। द्विर्वचनादीनि च। द्विर्वचनादीनि च नारब्धव्यानि भवंति। पूर्वत्रासिद्धे
नैव सिद्धानि भवंति किमविशेषेण। नेत्याह। वरे यलोपस्वरवर्ज्जं। वरे यलोपं स्वरं च वर्ज्जयित्वा। तस्य दोषः संयोगादिलोपलत्वणत्वेषु। तत
सेतस्य लक्षणस्य दोषः। संयोगादिलोपलत्वणत्वेषु। संयोगादिलोपे। काकस्यर्थे वास्यर्थे। स्कोः संयोगाद्योरंते चेति लोपः प्राप्नोति। लत्वे। नि
गाल्यते निगार्यते। अचि विभाषेति लत्वं न प्राप्नोति। णत्वं। माषवपनी। व्रीहिवपनी। प्रातिपदिकांतनुम्विभक्तिषु चेति णत्वं प्राप्नोति॥ •

पाचयतेः पाक्तिः याजयतेर्याष्टिः।२

योगादिलोपलत्वणत्वेष्विति वचनात्संयोगादिलोपे स्थानिवत्वान्न द्वमावादत्र संयोगांतलोपः। दोहयतेर्धोक् लेहयतेर्लेट्। उणादीनामव्युसन्नत्वात् क्रियोः गिर्यो
रिसत्र दीर्घाभावः। माषवपनीति। समासांतस्य नकारस्य णत्वं विधीयमाने अच्छोपस्य स्थानिवत्वनिषेधात् ईषु सत्रेः प्राक्तमासविधानात्प्राप्नोति॥ ० ॥

भा०कै०प्र० द्विर्वचनेचि॥ ॥ अचः परस्मिन्नित्यत्र योनादिष्टादचः पूर्व इति स्थितं। सा च स्थद्विर्वचनमिति पूर्वविधित्वाभावादप्राप्तं स्थानिवत्त्वं विधीयते। अथापि निमित्तात्पूर्व इत्य
१४८ 148 स्मिन्पक्षे प्राप्तिः स्यात्। तथापि न परान्तं द्विर्वचने निमित्ते प्रतिषेधप्रसंगादिदं वचनं। आदेश इति। कार्यातिदेश इति पूर्वः पक्षः। चक्रतुरित्यत्र यणादेशे कृते एकाचो विधीयमानं द्वि
र्वचनं अनच्कत्वादप्राप्तमिति स्थानिवत्त्वादायुक्तस्यैव प्राप्नोति। अथ हीति। कार्यातिदेशे हि धर्मी धर्मीति भाव्यमेव द्विर्वचनेनेति किमज्ग्रहणेन। नन्वन्यदज्ग्रहणस्य

द्विर्वचनेचि॥ आदेशः स्थानिवदनुदेशात्तद्वतो द्विर्वचनं। रूपादेशः स्थानिवदनुदेशात्तद्वतः किं वतः आदेशवतो द्विर्वचनं प्राप्नोति। तत्र को दोषः।
तत्राभ्यासरूपं। तत्राभ्यासरूपं न सिध्यति। चक्रतुः चक्रुरिति। अज्ग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्य। यदयमज्ग्रहणं करोति तज्ज्ञापयत्या
चार्यः रूपं स्थानिवद्भवतीति। अज्ग्रहणस्यैतत्प्रयोजनं। इह मा भूत् जेघ्रीयते देध्मीयते। यदि च रूपं स्थानिवद्भवति ततोऽज्ग्रहणमर्थवद्भ
वति। अथ हि कार्येणार्थोऽज्ग्रहणेन। भवत्येवात्र द्विर्वचनं। तत्र गाङ्प्रतिषेधः। तत्र गाङः प्रतिषेधो वक्तव्यः। अधिजगे। इवर्णाभ्यासता प्रा
प्नोति। न वक्तव्यः। गाङ् लिटीति द्विलकारको निर्देशः लिटि लकारादाविति॥ ॥ ॥श्री॥ ॥

प्रयोजनं। भसेः कृसौ घसिभसोर्हलि चेत्युपधालोपे कृते द्विर्वचनं मा भूदिति। नैतदस्ति। सत्यसति वा द्विर्वचने प्स्वानिति श्रुतौ विशेषाभावात्। छान्दसत्वाच्चैवोपधालोपः। छ
न्दसि च दृष्टानुविधिः। रूपस्थानिवत्त्वे च निन्यतुरित्यत्र पूर्वमियङादेशे कृते स्थानिरूपातिदेशान्नी नीति द्विर्वचनं। एरनेकाच इति यणा बाधितत्वात्पुनरियङ् न प्रवर्त्तते। अ राम०
धिजगे इति। कृते एशादेशे गाङि तिप् क्रियाश्रयेण चोद्यं। ङकारस्यानुबन्धत्वादिकारस्य गाङ् भवत्यादेशः॥ ॥ ॥ १४८

कृसेजंतेति। अचियोऽजादेशः स द्विर्वचने कर्त्तव्ये स्थानिवदिति सूत्रार्थमाश्रित्योच्यते। जास्त इति। शित्त्वदर्शो आलमिति पक्षेऽयं दोषः। द्विर्वचननिमित्त इति। अ
स्मिन्पक्षे जस्त इस न परिहृतं। उत्तरं तु परिहरिष्यते। इषित्रपुसमिति। समाहारद्वंद्वः कर्मधारयो वा। इष्येव विशिष्टत्रस्थायुक्तं त्रपुसमुच्यते। तत्र द्विर्वचननिमित्त

कृसेजंत दिवादि नाम धातुष्वभ्यासरूपं। कृसेजंत दिवादि नामधातुष्वभ्यासरूपं न सिध्यति। कृति। अचिकीर्त्तत्। हृति। एजंता जग्लेमम्लौ एजं
ता। दिवादि। उद्यूषति। सुस्यूषति। दिवादि। नामधातु। भवनमिच्छति भवनीयति। भवनीयतेः सन् बिभवनीयिषति। एवं तर्हि प्रत्यय इति वक्ष्यामि।
प्रत्यय इति चेत्कृसेजंत नामधातुष्वभ्यासरूपं। प्रत्यय इति चेत्कृसेजंत नामधातुष्वभ्यासरूपं न सिध्यति। दिवादय एके परिहृताः। एवं तर्हि
द्विर्वचननिमित्तेऽचि अजादेशः स्थानिवदिति निमित्तशब्दं निमित्तार्थो गम्यते तद्यथा। इषित्रपुसं प्रत्यक्षो ज्वरः। ज्वरनिमित्तं इति गम्य
ते। नड्वलोदकं पादरोगः। पादरोगनिमित्तमिति गम्यते। आयुर्घृतं। आयुषो निमित्तमिति गम्यते। अथवा काऽकारो मत्वर्थीयः। द्विर्वचनमस्ति
अस्मिन्सोऽयं द्विर्वचने कर्त्तव्ये इति कृते (तस्य) द्विर्वचने स्थानिवन्न भविष्यति। एवं तर्हि प्रतिषेधः प्रकृतः सोऽनुवर्त्तिष्यते। क्व प्रकृतः। न पदांत
द्विर्वचने इति। द्विर्वचननिमित्तेऽचि अजादेशो न भवतीति। एवमपि न ज्ञायते कियंतं कालमसौ आदेशो न भवतीति यः पुनराह द्विर्वच
र्वचनः द्विर्वचन इति। एवमपि न ज्ञायते कियंतं कालं स्थानिवद्भवतीति। यः पुनराह द्वि[र्वच]नेऽचि। स तर्हि निमित्तशब्द उपादेयः। न ह्यंतरेण निमित्तशब्दं निमित्तार्थो गम्यते। अंतरेणापि नि+८

लात्तद्रूपारोपेणाजेव द्विर्वचनमुच्यते। अथ वा द्विरुच्यतेऽस्मिन्निति। अधिकरणे ल्युट्। एतत्प्रतिपद्यमानं प्रतिपरिहारांतरमाह। अथवा का इति। एवमपीति॥
एकत्वाद्द्विर्वचनशब्दस्य तस्य चाजविशेषणे उपयुक्तत्वात्कालावधारणाभावः। एवं तर्हीति। स्थानिवदिति नानुवर्त्तत इति भावः॥ ॥ ॥

मा०कौ०प्र०
१४९
149

प्रत्ययश्चेति। द्विर्वचनेन प्रत्ययस्याक्षिप्तत्वात् तद्विशेषणं द्विर्वचनं अचीत्येतच्च। तस्य तदादिविधिर्भवत्यजादाविति। कथं पुनरिति। विरुद्धत्वादनयोरर्थयोरेकेन द्विर्वचनाद
त्यनेन परेणानुपादानादिति भावः। एकशेषनिर्देश इति। सहविवक्षाभावेपि सरूपाणामित्येकशेषः संज्ञापरिभाषावल्लक्षणांगत्वात्तस्येति प्रागेवोक्तं। विभक्तं तयोश्चै
कशेषविधानादप्राप्तिपरिकल्पनाच्च द्विर्वचनाभावः। अपि वैकशेषेण समानफलत्वात्तं न्यमाहत्ति वेल्लक्ष्यते। ओः पुयण्ज्यपर इति। नहि णौ कृतस्य स्थानिवद्भावमन्तरेण

एवं तर्ह्युभयमनेन क्रियते प्रत्ययश्च विशेष्यते द्विर्वचनं च। कथं पुनरेकेन यत्नेनोभयं लभ्यं। लभ्यमित्याह। कथं। एकशेषनिर्देशात्। एकशेषनिर्दे
शोयं। द्विर्वचनं च द्विर्वचने च द्विर्वचनं। द्विर्वचने च कर्त्तव्ये द्विर्वचने चि प्रत्यय इति। द्विर्वचननिमित्ते चि स्थानिवदिति चेत्सो स्थानिवद्वचनं द्विर्वचननिमित्ते
चि स्थानिवदिति चेत्सो स्थानिवद्भावो वक्तव्यः। अवनुनावयिषति। अवचुक्षावयिषति। न वक्तव्यः। ओः पुयण्जिषु वचनं ज्ञापकं णौ स्थानिवद्भावस्याय
दयमोः पुयण्ज्यपरे इत्याह तज्ज्ञापयत्याचार्यः भवति णौ स्थानिवदिति। यद्येतज्ज्ञाप्यते अचिकीर्तत् अत्रापि प्राप्नोति। तुल्यजातीयस्य ज्ञापकं। क
श्च तुल्यजातीयः यथाजातीयकाः पुयण्जयः। कथं जातीयकाश्चैते। अवर्णपराः। कथं जस्तेमत्वे। अनेमित्तिकमात्वं शितितु प्रतिषेधः। कानि पु
नरस्य योगस्य प्रयोजनानि। पपतुः पपुः। तस्थतुः तस्थुः। जग्मतुः जग्मुः। आटिटत् आशिशत्। चक्रतुः चक्रुरिति। आतो लोप उपधालोप इति लोप
यणादेशेषु कृतेषु अनच्कत्वाद्द्विर्वचनं न प्राप्नोति। स्थानिवद्भावाद्भवति। नैतानि सन्ति प्रयोजनानि॥ ॥ ॥

पुयण्जिषु सर्वेष्ववर्णपरेष्ववर्णान्तो भ्यासः संपद्यते। पिपविषते इत्यत्रैवानेन स्थानिवद्भावात्तत्र पुरिनिवर्गेग्रहणाद्यणीति प्रत्याहारग्रहणाज्जयहणा
च्च ज्ञापकात् णौ कृतस्य स्थानिवद्भावोऽनुमीयते। ननु तत्र णाविति नास्ति तत्कथं तत्रैव स्थानिवत्त्वानुमानं ननु निनवनीयिषति। इदवनीयिषतीत्यादावपि। नैतदस्ति। राम०
येन नाव्यवधानमित्येकेनैव प्रत्ययेन तत्र व्यवधानाश्रयणात्स्येरेव केवलस्य व्यवधायकत्वसंभवात्। कानि पुनरिति। अन्यथासिद्धत्वात्पृच्छति॥ ॥ १४९

विषय२

पूर्वविप्रतिषेधेनापीति। अपूर्वो वाचनिकः पूर्वविप्रतिषेधो न हि निसानामाल्लोपादीनामनिसेन द्विर्वचनेनान्याय्यो विप्रतिषेधः। अप्यनित्यत्वं तु रिति कथं। न ह्यत्रेयङ्‌ परिगणितः।
एवं तर्हि प्रकृत्यन्यचाप्यवादमिति न्यायाद्यणा भाव्यमितीयङ्‌ न प्रवर्त्तत इति द्विर्वचने कृते पश्चादनेकाच इति यणा सिद्धं। ओदौतोदेशस्येति। ओदौतौ तौ रादेशो यस्मिन्नङ्गे तस्याभ्यासः
उ तु शरादिः तस्य यो आस्तस्योकारादेशो भवतीत्यर्थः। यथा चुश्नावयिषति शुश्रुनावयिषति पुस्फारयिषति अत्र च्यु स्फुरोर्णौ वृद्धि ओकार
स्यात्वे। अत्र च यद्यपि स्वयः श्रोषेकृते भ्यासे शरादित्वेनास्ति तथापि अभ्यासं ज्ञापयद्भिरिकाले स्ति। एतेषु नरंगत्वात्यागे वृद्धिर्वचनाद्ध्यावादेशयोः प्रवर्त्तनादिवर्णोत्तता या
मभ्यासस्य मा ज्ञायामुत्वं विधीयते। ननु चत्वयापीति। अपोः पुयणज्जिविति ज्ञापनार्थमवश्यं वाच्यमित्यर्थः। उत्त्ववादी त्वोः पुयणज्जिति न पठति। सन्यतरइतीत्वस्यासिद्धत्वात्।
परार्थमिति। इत्वार्थं। प्रसंगानुज्ञापकं। त्वयात्वपूर्ववक्तव्यमित्यर्थः। ममापीति। उत्वमप्यन्यार्थं वक्तव्यं न देशाधिकविषये उपजीव्यत इत्यर्थः। नत्रायं न्यासः। उसरस्यातः। तिच॥

पूर्वविप्रतिषेधेनाप्येतानि सिद्धानि कथं वक्ष्यति ह्याचार्यः। द्विर्वचनं यणयवायावावाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्य इति। स पूर्वविप्रतिषेधो न
वक्तव्यो भवति। किं पुनरत्र ज्यायः। स्थानिवद्भाव एव ज्यायान्। पूर्वविप्रतिषेधे सति हीदं वक्तव्यं स्यात्। ओदादेशस्य उ इवति चुडुतुशरादेरभ्यासस्येति। ननु चत्वया
पीत्वं वक्तव्यं। परार्थं मम भविष्यति। सन्यतर इत्युवतीति। ममापि तर्ह्युत्वं परार्थं भविष्यति। उसरस्यातः तिचेति। इत्वमपि त्वया वक्तव्यं। यत्समानाश्रयं तदर्थं।
उत्पिपविषतेसयियविषतीत्येवमर्थं। तस्मात्स्थानिवदादेश एव पक्षो ज्यायान्॥ ॥इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्यायस्य

ओदौतादेशस्य चुडुतुशरादेरिति। अभ्यासस्येति वर्त्तते। इत्वमपीति। यत्रान्तरंगत्वं नास्ति। समानाश्रयत्वात्। पवतेर्यौ तेश्चसनि स्मिपूङ्‌रंज्वशांसनि सनीवन्तर्द्धिति चेदिक्
तेपरत्वाद्गुणे पूर्वविप्रतिषेधाद्वादेशात्पूर्वं द्विर्वचनमितीत्वं वक्तव्यं। तथा जिजावयिषतीत्यत्र उत्त्वबाधनार्थं वक्तव्यं। तस्मादिति। नन्वस्मिन्पक्षे अपोः पुयणज्जीति ज्ञापक
मेवं समर्थयिष्यते। अन्तरंगो णिलोपविधिर्द्विर्वचनेन प्रतिषिध्यत इति। तत्र द्विर्वचने कृते यथाप्राप्तं भविष्यति। न त्वयुक्तं। यदि सामान्येन ज्ञापकमाश्रीयते अचिकीर्तदि
त्यत्रापि पूर्वं द्विर्वचनप्रसंगादनिष्टरूपापत्तिः। अथ तुल्यजातीयापेक्षं ज्ञापकं व्याख्यायते यथोक्तं भाष्यकारेण। तथा च सति चङ्‌नुगित्यादि न सिध्यतीति सूत्रमेव वक्
तव्यं। यत्नुतेन न सिध्यति तदर्थं ज्ञापकमाश्रयणीयं तुल्यजातीयापेक्षमिति सर्वेष्टलक्ष्यसिद्धिः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्या

॥ चतुर्थः पादः ॥

अदर्शनं लोपः॥ अर्थस्येति। स्वं रूपमिति वचनात् शब्दस्यैव संज्ञा प्राप्नोतीति भावः। इतरेतराश्रयमिति। विधिप्रदेशे येन तञ्चोद्यं नानुवादे चादिर्लोपे विभाषेत्या
दौ। इतिकरण इति। इहापि स एवानुवर्त्तते लोप इत्यन्वर्थसंज्ञाविज्ञानाद्वा अर्थस्य संज्ञा न शब्दस्य सर्वप्रसंगस्त्विति। यदि स्वभावतो ऽप्रयुक्तस्यान्वाख्यान

अदर्शनं लोपः॥ अर्थस्य संज्ञा कर्त्तव्या शब्दस्य माभूदिति। इतरेतराश्रयं च भवति। का इतरेतराश्रयता। सतो ऽदर्शनस्य संज्ञया भवितव्यं स
ंज्ञया चादर्शनं भाव्यते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते। लोपसंज्ञायामर्थसतो ह्युक्तं। किमुक्तं। अर्थ
स्य तावदुक्तं। इतिकरणो ऽर्थनिर्देशार्थ इति। सतो ऽप्युक्तं। सिद्धं तु नित्यशब्दत्वादिति। नित्याः शब्दाः नित्येषु शब्देषु सतो ऽदर्शनस्य संज्ञा क्रियते
न संज्ञयादर्शनं भाव्यते। सर्वप्रसंगस्तु सर्वस्यान्यत्रादृष्टत्वात्। सर्वप्रसंगस्तु भवति [redacted] सर्वस्यादर्शनस्य लोपसंज्ञा प्राप्नोति।
किं कारणं। सर्वस्यान्यत्रादृष्टत्वात्। सर्वो हि शब्दः यो यस्य प्रयोगविषयः स ततो ऽन्यत्र न दृश्यते। ते न पुनरिह संज्ञा णो ऽदर्शनं तत्रादर्शनं
लोप इति लोपसंज्ञा प्राप्नोति। तत्र को दोषः। तत्र प्रत्ययलक्षणप्रतिषेधः। तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः
नैष दोषः। ञ्णित्संगस्याचो वृद्धिरुच्यते। यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ऽङ्गं भवति। यस्माच्चात्र प्रत्ययविधिर्न तत्प्रत्यये परतः यच्च प्र
अचो ञ्णितीति वृद्धिः प्राप्नोति [redacted] प्रत्यये परतः न तस्मात्प्रत्ययविधिः॥ ॥ श्री॥ ॥

प्रयत्नेन क्रियते तदा सर्वस्यस्वविषयादन्यत्राप्रयोगादस्यादर्शनमिति लोपसंज्ञाप्रसंगः। ञ्णित्संगस्येति। अंगसंज्ञा च विधानप्रतिबद्धा न चात्र प्रत्ययस्य ञ्णितो वि
धानं। यस्माच्चेति। त्रपुशब्दात्तो ऽर्विधानं। न तत्प्रत्यये परत इति। ञ्णिति वृद्धिनिमित्त इत्यर्थः। यच्चेति। सुशब्दो न तस्मादिति। तस्मात्त्रपुशब्दात्तो ऽरन्यस्याणो विधानं ना
स्तीत्यर्थः॥ ॥

अनंगकार्यं चोदयति। क्विप इति। तत्पुनस्तत्र क्विपोऽदर्शनमस्ति। स च लुगिति लुक्प्रसंगः। सिद्धं त्विति। शास्त्रादर्थाद्वा प्रसक्तस्य यददर्शनं तल्लोपसंज्ञं भवति। स्थान
ग्रहणमिह त्वनुवर्त्तते स्थाने चप्रसंगो यददर्शनमिति लभ्यते। ग्रामणीरिति। अर्थोपपदधातुसन्निधानादर्थाच्छास्त्राच्चाणः प्रसंगोस्तीति भावः। षष्ठीनिर्दिष्टस्ये
संगःप्र२

क्विपस्तर्ह्यदर्शनं तत्रादर्शनं लोप इति लोपसंज्ञां प्राप्नोति। तत्र को दोषः। तत्र प्रस [redacted] यलक्षणप्रतिषेधः। तत्र प्रत्ययलक्ष
णं कार्यं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। ह्रस्वस्य पिति कृति तुगिति तुक् प्राप्नोति। सिद्धं तु प्रसक्तादर्शनं स्यल्लोपसंज्ञित्वात्। सिद्धमेतत्। कथं
। प्रसक्तादर्शनं लोपसंज्ञं भवतीति वक्तव्यं। यदि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यते। ग्रामणीः सेनानीः अत्र वृद्धिः प्राप्नोति। प्रस
क्तादर्शनं लोपसंज्ञं भवति षष्ठीनिर्दिष्टस्य। यदि षष्ठीनिर्दिष्टस्येत्युच्यते चाहलोप एवेत्यवधारणां। चादिलोपे विभाषा अत्र लोपसंज्ञा
न प्राप्नोति। अथ प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यमाने कथमेवैतत्सिध्यति। को हि शब्दस्य प्रसंगः। यत्र चार्थो गम्यते। न च प्रयु
ज्यते। अस्तु तर्हि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्येव। कथं ग्रामणीः सेनानीः। योत्राणः प्रसंगः क्विपा सो बाध्यते॥ ॥

ता। षष्ठीग्रहणमप्यनुवर्त्तते। चादिलोप इति॥ तत प्रमुक्तात्रीह्योर्भवंति श्वेतागाच्छा ज्याय दुहंतीति निघातविकल्पो न स्यात्। अथेति। अत्रापि चादीनां शा
स्त्रात्प्राप्तिप्रसंगः। क्विपा सौ बाध्यत इति। सत्सूद्विषेति क्विपो विधानाद्रणोत्र प्रसंगाभावः॥ ॥श्री॥ ॥१६०॥

प्रत्ययस्य ॥ ॥ प्रत्ययग्रहणमिति। लुगादिविधौ क्वचित्प्रत्ययः साक्षान्निर्दिश्यते क्वचिदनुवर्त्तते क्वचित्सामर्थ्यात्प्रतीयते इति प्रश्नः। अप्रत्ययस्येति गृह्य वि
द्यमानः प्रत्ययो यस्मिन्न दृश्येत न तदप्रत्ययं। गोरपीति। पंचेंद्र इत्यादौ तु निर्दिश्यमानस्यादेशा इति वचनात् स्त्रीप्रत्ययस्यैव लुग्भविष्यति न तदंतस्य। गोरतद्धि
तलुकीत्यत्र गोर्लुकि कृते पंचगुरित्यादौ गोशब्दान्तत्वाभावात् समासांतः प्राप्नोति तद्धितलुकीति प्रतिषेधो नर्थकः स्यादिति चेत्। कृते समासांते लुक् स्यादि

प्रत्ययस्य लुक्श्लुलुपः ॥ प्रत्ययग्रहणं किमर्थं। लुमतीति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थं। लुमतीति प्रत्ययग्रहणं क्रियते।
अप्रत्ययस्यैताः संज्ञा मा भूवन्निति। किं प्रयोजनं। प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनिवृत्त्यर्थं। तद्धि
तलुकि गोनिवृत्त्यर्थं। कंसीयपरशव्ययोश्च लुकि प्रकृतिनिवृत्त्यर्थं। लुकून तद्धितलुकि गोरपि प्राप्नोति। प्रत्ययग्रहणान्न
भवति। कंसीयपरशव्ययोर्यञञौ लुक्चेति प्रकृतेरपि लुक् प्राप्नोति प्रत्ययग्रहणान्न भवति। गोनिवृत्त्यर्थेन तावन्नार्थः। यो
गविभागात्सिद्धं। योगविभागः करिष्यते। गोरुपसर्जनस्य। गोंतस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति। ततः स्त्रिया
ः। स्त्रीप्रत्ययांतस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति। ततो लुक् तद्धितलुकीति। स्त्रिया इति वर्त्तते गोरिति निवृत्तं॥ ०॥

सर्थवानेव प्रतिषेधः। न तु स्वभावतो ऽप्रवृत्तस्यादर्शनं लुक्संज्ञं। न च तत्र गोशब्दस्य स्वभावतो ऽप्रवृत्तिः। नैष दोषः। शास्त्रानुसारि ... मिरस्यार्थस्य उज्झनत्वात्।
प्रकृतेरपीति। समुदायस्य षष्ठीनिर्देशात्। योगविभागादिति। एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिरित्येतत्प्रकारांतरेण प्रतिपाद्यते॥ ॥०॥

विशिष्टनिर्देशादिति। छयतावेवात्रनिर्दिष्टत्वाविसर्थेः। उणादय इति। अतः कृकमिकंसकुंभेति कंसशब्दस्य भेदेनोपादानात् क्वचिदुणादयोऽव्युत्पन्निकार्येन लभ्यंत इत्यर्थः। यत्रत्वो
स्तुविधानसामर्थ्याल्लुगभावः। एषो नन्वार्थ इति। प्रकृतिनिवृत्त्यर्थं वचनं तु प्रत्ययांतरनिवृत्त्यर्थोपीत्यर्थः। षष्ठीनिर्देशार्थं त्विति। विशिष्टस्य षष्ठ्यर्थस्य स्थाने योगत्व

कंसीयपरशव्ययोर्विशिष्टनिर्देशात्सिद्धं। कंसीयपरशव्ययोरपि विशिष्टनिर्देशः कर्तव्यः। कंसीयपरशव्ययोर्यञञौ भवतः छयतोश्च लुग्भ
वतीति। सचावश्यं विशिष्टनिर्देशः कर्तव्यः। क्रियमाणेपि वै प्रत्ययग्रहणे उकारसकारयोर्मा भूदिति। कमेः सः कंसः। परान् शृणातीति परशु
रिति। नैष दोषः। उणादयोऽव्युत्पन्नानि प्रातिपदिकानि। स एषोऽनन्वार्थो विशिष्टनिर्देशः कर्तव्यः प्रत्ययग्रहणं वा कर्तव्यं। उक्तं वा। किमु
क्तं। ङ्याप्प्रातिपदिकग्रहणमंगभपदसंज्ञार्थं यच्छयोश्च लुगर्थमिति। षष्ठीनिर्देशार्थं तु। षष्ठीनिर्देशार्थं तर्हि प्रत्ययग्रहणं कर्तव्यं। षष्ठी
निर्देशोयथा प्रकल्पेत। अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः। अक्रियमाणे हि प्रत्ययग्रहणे [redacted] षष्ठ्यर्थस्याप्रसिद्धिः स्यात्। कस्य। स्थाने योगत्वस्य। क्व पुनरिह षष्ठीनिर्देशार्थेनार्थः प्रत्ययग्रहणे
न। यावता सर्वत्रैव षष्ठ्युच्चार्यते। अणिञोः। न द्व्याजस्य यञञोः। श्यापइति। इह न कश्चित् षष्ठी जनपदे लुबिति। अत्रापि प्रकृतं प्रत्ययग्रहणमनु
वर्तते। क्व प्रकृतं। प्रत्ययः परश्चेति। तद्वै प्रथमानिर्दिष्टं। षष्ठीनिर्दिष्टेन चेहार्थः। ङ्याप्प्रातिपदिकादित्येषा पंचमी प्रत्यय इति प्रथमायाः षष्ठीं प्रक
ल्पयिष्यति तस्मादित्युत्तरस्येति। प्रत्ययविधिरयं। नच प्रत्ययविधौ पंचम्यः प्रकल्पिका भवंति। नायं प्रत्ययविधिः। विहितः प्रत्ययः प्रकृतश्चानुवर्तते॥

स्य निर्देशार्थमित्यर्थः। अप्रसतिप्रत्ययस्येत्यस्मिन्नपि कश्चिदानंतर्यादिः संबंधः स्यात्। ततश्च जनपदे लुबिति पंचालाः शोभना इत्यादौ जनपदवाचिनोऽनंतरस्य शोभनादेरपि लु
ग्स्यात्॥

सर्वादेशार्थं वेति। षष्ठीनिर्दिष्टस्यार्थे तु स्थितमेवेति वार्त्तिककारेण विकल्पार्थो वाशब्द उक्तः। आगस्त्यकौण्डिन्ययोरित्यत्र हि यदि लुगनुवर्त्तेत तदा एकैकस्य त्रय आदेशाः। अथ नानुवर्त्तेत तदा वेवादेशो विधीयेतेत तदागस्त्यादेशेन सर्वत्र भाव्यमिति आगस्तीया इत्यादि न सिध्यति। अवृद्धत्वात्प्रकृतेः। प्रत्ययस्येति तु व्यमाने गोत्रे लुगचीति लुक्प्रति षिद्धे सन्नियोगशिष्टत्वात् लुगभावादगस्त्यादेशाभावात् आगस्तीया इति सिध्यतीति षष्ठीनिर्दिष्टार्थं प्रत्ययग्रहणं। भाष्यकारस्तु नत्वर्थे वाशब्दं व्याचक्षाणः षष्ठीनिर्दिष्टार्थत्वं नेच्छति। स्थिवेवमस्तेत। आगस्त्यकौण्डिन्ययोरित्यत्र यस्कादिभ्यो गोत्र इत्यतो गोत्रग्रहणमनुवर्त्तते लुगितिच। तेनागस्त्यकौण्डिन्ययोर्यो गोत्रे विहितस्तस्य लुक्। परिशिष्टस्य तु प्रकृतिभागस्य यथासंख्यमगस्तिकुण्डिनचावादेशाविति सूत्रार्थः। अथ क्रियमाणेऽपीति। अल्लोपस्येति वचनात्प्रत्ययस्यायं लः। न तस्य वक्ष्यमाणे भवतीति भावः। वचनप्रामाण्यादि

सर्वादेशार्थं वा वचनप्रामाण्यात्। सर्वादेशार्थेन तर्हि प्रत्ययग्रहणं कर्त्तव्यं। लुक्श्लुलुपः सर्वादेशाय था स्युः। अथ क्रियमाणेऽपि प्रत्ययग्रहणे कथमिव लुक्श्लुलुपः सर्वादेशा लभ्याः। वचनप्रामाण्यात्। प्रत्ययग्रहणसामर्थ्यात्। एतदपि नास्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञापयति लुक्श्लुलुपः सर्वादेशा भवन्तीति। यदयं लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्य इति लोपे प्रकृते लुकं शास्ति। उत्तरार्थं तु। उत्तरार्थं तर्हि प्रत्ययग्रहणं कर्त्तव्यं। क्रियते तत्रैव प्रत्ययलोपे प्रत्ययलक्षणमिति द्वितीयं कर्त्तव्यं। कृत्स्नस्य प्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्। एकदेशलोपे मा भूदिति। आघ्नीत संराध्यो षेणगीर्यो येति॥ " "

ति। प्रत्ययस्येति वचनसामर्थ्यादल्लोपस्येति वाच्यते। वचनप्रामाण्यादिति भुवतो वार्त्तिककारस्यापि षष्ठीनिर्दिष्टार्थत्वमनवस्थितं। तदर्थं तर्हि प्रत्ययस्येत्यस्य च रितार्थत्वात्कथमल्लोपस्य विधिर्बोध्येत। यदयमिति। विपर्ययस्तु न प्रकल्प्यते। अनुपसंजातविरोधित्वात् लोपस्ता वदन्त्यादेशाः स्थिताः। ततो लुगारम्भमाणो यद्यन्त्यस्य स्यात् तल्लोपानुवृत्त्यैव सिद्धत्वात् लुकं न विदध्यात्। विहितस्तु सर्वादेशात्वस्य ज्ञापकः संपद्यते। द्वितीयमिति। लोपविशेषणापेक्षया द्वितीयं पाठापेक्षया तु तृतीयं भवति। एकदेशलोप इति। अवयवक्रियासमुदायेऽप्यप दिश्यते यथा पटो दग्ध इति। अवयवेऽपि पटाख्यो ऽवयवी समवेत इति तस्याप्यसौ ग्राहः। न त्वयं गौणः। अपदेशः गौणत्वे सति मुख्यस्यैव संप्रत्ययाच्च कर्त्तव्यमेव प्रत्ययग्रहणं स्यात्। आघ्नीतेति। परत्वादुपधालोपे कृते पुनः प्रसंगविज्ञानादनुनासिकलोपः स्यात्॥ " " एम०
१५२

प्रत्ययलोपे प्रत्ययलक्षणम्॥ ॥प्रत्ययग्रहणम् किमिति। प्रत्ययनिमित्तं कार्यं लोपेऽपि भवतीत्युक्ते प्रत्यासत्त्या प्रत्ययस्यैव लोप इति विज्ञास्यते इति भावः। सौरथीति। प्रत्ययस्य लक्षणे दर्शने प्रादुर्भाव इत्यर्थे परिकल्प्यमाने उच्यते। सुरथस्य विहितस्य चापत्ये गोत्रे स्त्रीति इञि कृते मकारनकारयोर्भावे यथा गुरूपोत्तमत्वात् ष्यङ् भवति एवं लोपेऽपि स्यात्। प्रत्ययग्रहणे तु सति विरूढत्वान्न्यायमर्थो भवति प्रत्ययलोपे कृते तस्यैव पुनः प्रादुर्भाव इति एवं हि लोपविधानमनर्थकं स्यात्। तस्मात्प्रत्ययनिमित्तं कार्यं प्रत्ययलोपेऽपि भवतीति वाक्यार्थ आश्रीयते। नैवमिति। संदेहेऽपि व्याख्यानात्करणसाधनो लक्षणशब्द आश्रयिष्यते। अन्यथा क्रियमाणेऽपि प्रत्ययग्रहणे भावसाधनाशंकान

प्रत्ययलोपे प्रत्ययलक्षणम्॥ ॥प्रत्ययग्रहणं किमर्थम्। लोपे प्रत्ययलक्षणमित्युच्यमाने सौरथी वैहतीति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत। नैष दोषः। नैवं विज्ञायते लोपे प्रत्ययलक्षणं भवति प्रत्ययस्य प्रादुर्भाव इति। किं तर्हि प्रत्ययो लक्षणं यस्य कार्यस्य तल्लुप्तेऽपि भवतीति। इदं तर्हि प्रयोजनम्। सति प्रत्यये यत्प्राप्नोति तत्प्रत्ययलक्षणेन यथा स्यात्। लोपोत्तरकालं यत्प्राप्नोति तत्प्रत्ययलक्षणेन मा भूदिति। किं प्रयोजनम्। ग्रामणिकुलं सेनानिकुलम्। अत्र परत्वात् ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुगिति तुक् प्राप्नोति स मा भूदिति। यदि तर्हि यत्सति प्रत्यये प्राप्नोति तत्प्रत्ययलक्षणेन भवति लोपोत्तरकालं यत्प्राप्नोति तन्न भवति॥ ॥ ॥

निवर्त्तते। प्रत्ययलोपे प्रत्ययान्तरस्य प्रादुर्भाव इति। यथा ग्रामणीरिति क्विपो लोपे स्याद्युत्पत्तिः ततश्चायोगित्वात्पदसंज्ञा न स्यादिति करणसाधनत्वे व्याख्यानमेव शरणमिति भावः। लक्षणशब्दोपादानसामर्थ्याद्धि करणसाधनो लक्षणशब्दः। अन्यथा लोपे प्रत्यय इत्येव वक्तव्यं स्यात्। सति प्रत्यय इति। प्रत्ययशब्दोऽत्र लुप्तसप्तमीको निर्दिश्यते। तेन प्रत्यये सति यत्कार्यं दृष्टं तल्लोपेऽपि भवति। न च ग्रामणीरित्यत्र क्विपि सति तुग्दृष्टः ह्रस्वाभावात्। कृते क्विपो लोपे ह्रस्वत्वे च तुक्प्राप्तिः॥ ॥

जगदिति॥ द्युतिगमिजुहोतीनां द्वे चेति गमेः क्विपि। अन्तरङ्गत्वात्पूर्वं विलोपः। गमः क्वाविति संयंस्लोपोऽङ्गवृत्ते परिभाषया न द्विर्वचनमेकाचो द्वे प्रथमस्येत्यनेन द्विर्वचनं। भिन्नविषयत्वाद्द्विर्वचनेन नाप्राप्ते इति पित्त्वाद्योगविभागः। ~~~~~ न भव
ति। सति तत्स्मिन्न्याये नैव विलोपः स्यात्। तस्मात्सति द्विर्वचने क्विपि नात्र तुक्। माध्विः। अपि तु विलोपे कृते। अन्यतरदिति। एकमेव प्रत्ययग्रहणं सामर्थ्यात्। कृते त्व प्रत्ययस्य लोप
प्रतिपादने समर्थे। वर्णलक्षणमिति। प्रत्ययलोपेन लक्षणमिति सूच्यमानेन प्रत्ययप्रत्ययत्र कार्ये निमित्तत्वभावः प्रत्ययत्वरूपाश्रयेणाव र्णरूपाश्रयेण वा तत्संवे [redacted] सा
ता। सर्वेनाम्नो वस्तुमात्र परामर्शित्वात्। प्रत्ययग्रहणं तु सति प्रत्यय निमित्तमेव कार्यं प्रत्ययलोपेऽपि भवति न वर्णरूपता निमित्तं रैकुलमिति। अवयवद्वारेणात्र प्र

जगत् जनगत् इस त्र तुक् प्राप्नोति। लोपो नरकालं द्यत्र तु गागमः तस्मान्नार्थे एवमर्थेन प्रत्ययग्रहणेन। कस्मान्न भवति यामणिकुलं
सेनानिकुलं। बहिरङ्गं ह्रस्वत्वं अन्तरङ्गस्तुक्। असिद्धं बहिरङ्गमन्तरङ्गे। इदं न हि प्रयोजनं। कृते प्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्। एकदे
शलोपे मा भूदिति। आघ्नीत। सं राय स्पो षेण गमीयेति। पूर्वस्मिन्नपि योगे प्रत्ययग्रहणस्यैतत्प्रयोजनमुक्तं अन्यतरच्छक्य मकर्तुं। अ
र्था द्वितीयं प्रत्ययग्रहणं किमर्थं। प्रत्ययलक्षणं यथा स्याद्वर्णलक्षणं मा भूदिति। गवे हितं गोहितं। रायः कुलं रैकुलमिति। किमर्थं पुनरिदमु
च्यते। प्रत्ययलोपे प्रत्ययलक्षणवचनं सदन्वाख्यानाच्छास्त्रस्य। प्रत्ययलोपे प्रत्ययलक्षणमिति सूच्यते। सदन्वाख्यानाच्छास्त्रस्य। सच्छास्त्र

त्ययस्याप्यायादेशं प्रति निमित्तत्वमस्त्येव। प्रत्ययाश्रयत्वाया देशो न भवतीति न प्रवर्तेते। अनेनैव न्यायेन न धातुलोप आर्द्धधातुक इति षिन्वि कृण्व्योर्विचिल्लोपो व्यो
र्वलीति वल्लोपस्य वल् निमित्तत्वादार्द्धधातुकनिमित्तत्वाभावाद्गुणनिषेधो न भवति। तेन सुधेसुकरीति न तु सुधी सुकरीरिति। किमर्थमिति। स्याद्वानिवृद्धावेन सिद्धमि
ति भावः। सदन्वाख्यानादिति। शास्त्रं कर्त्रकरणं वा शेषत्वेन विवक्षितमिति षष्ठी कृता। सच्छास्त्रेणेति। शास्त्रेणाकरणेनाचार्येः स्मर्त्तांसद्विद्यमानं वस्तु निमित्तत्वेनान्वा
॥ चक्षे ॥ ॥

सतो वेति। एतस्य सूत्रस्यैवाविच्छेदे न प्रक्रम्यमानस्य सतस्तत्र तत्रान्वाख्याने इति पूर्वस्माद्व्याख्यानादस्य विशेषः। न चास्य स्थानिवद्भावेन सिध्यति। अत्र गोरित्यादावल्विधित्वात्। लुक्श्लुपसं
ख्यानमिति। तक्रकौण्डिन्यन्यायेन लोपसंज्ञाया लुगादिसंज्ञाभिर्बाधनादिति भावः। लुग्ग्रहणस्योपलक्षणार्थत्वात् श्लुलुपावपि गृह्येते। न वाऽदर्शनस्येति। अदर्शनमात्रस्य लो
पसंज्ञाविधीयमाना लुगादिसंज्ञाविषयमप्यवगाहते। न च संज्ञानां बाध्यबाधकभावः समावेशाद्दर्शनानामपि तिङ्कृदारसंज्ञेवेत्याशयः। लोपस्य संज्ञिलोपसंज्ञितस्य भावो लो

सतो वा शास्त्रमन्वाख्यायकं भवति। सदन्वाख्यानाच्छास्त्रस्य। उगिदचां सर्वनामस्थानेऽधातोरिति ह्येव स्यात्। गोमन्तौ यवमन्तौ गोमान्यवमानित्यत्र
न स्यात्। इष्यते च स्यादिति तच्चान्तरेणायत्नं न सिध्यति। अतः प्रत्ययलोपे प्रत्ययलक्षणवचनं। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं त
र्हीति। लुक्श्लुपसंख्यानं। लुक्श्लुप्सु प्रसंख्यानं कर्तव्यं। पंच सप्त। किं पुनः कारणं न सिध्यति। लोपे हि विधानं। लोपे हि प्रत्ययलक्षणं विधीयते। ते
न लुकि न प्राप्नोति॥ न वाऽदर्शनस्य लोपसंज्ञित्वात्। न वा कर्तव्यं। किं कारणं। अदर्शनस्य लोपसंज्ञित्वात्। अदर्शनं लोपसंज्ञं भवतीत्युच्यते।
लुमत्संज्ञाश्चाप्यदर्शनस्य क्रियन्ते। तेन लुक्यपि भविष्यति। यद्येवं प्रत्ययादर्शनं तु लुमत्संज्ञं। प्रत्ययादर्शनं तु लुमत्संज्ञमपि प्राप्नोति। तत्र
को दोषः। तत्र लुकि श्लुविधिप्रतिषेधः। तत्र लुकि श्लुविधिरपि प्राप्नोति। स प्रतिषेध्यः। अत्ति हंति। श्लाविति द्विर्वचनं प्राप्नोति॥ ०॥

पसंज्ञित्वं तस्मादित्यर्थः। प्रत्ययादर्शनं त्विति। लुक्श्लुलुप्संज्ञानां संकरः प्राप्नोतीत्यर्थः। तत्र लुकि श्लुविधिरिति। उपलक्षणं चैतत्। तेन श्लावपि लुग्विधि
: प्राप्नोति जुहोतीति उतो वृद्धिर्लुकि हलीति। लुप्यपि लुग्विधिप्रसंगः हरीतकीति लुक् तद्धितलुकीति। तथा लुकि लुब्विधिः लवणः सूप इति युक्तवद्भावः॥ ॥

न वा पृथगिति। एकयैव संज्ञया प्रदेशवाक्येषु संज्ञिप्रसायनेन सिद्धेः नेकसंज्ञाविधानसामर्थ्यात् तदाविततग्रहणं विज्ञायते। तत्राश्रितस्वरूपव्यापारा एवालुगादय आश्री
यन्ते आहत्रिवी लुगादिशब्दा नामाश्रीयन्ते इति तदाविततग्रहणं सिध्यति। विधिप्रदेशेषु चैतेनाश्रयदोषानवतारः। निःसृशब्दाश्रयणाद्भाविसंज्ञाविज्ञानाद्वा। यथैवेति।
निसृणं संज्ञानां विधानसामर्थ्यात्परस्परविषयावगाहनं तासां मा भूत्। लोपसंज्ञाविषये तु ताः प्रवर्त्तेरन्। गोमतीभूतेति। च्वेर्लोपे कृते लुक्संज्ञायां सत्यां लुक्त
द्धितलुकीति प्राप्नोति। पुंवद्भावस्तु न भवति। वैयधिकरण्यात्। महद्भूता ब्राह्मणी सत्र तु भवति सामानाधिकरण्यात् नित्यत्वाद्दिशब्दानां क्वचिद्विकारस्य ज

न वा पृथक्संज्ञाकरणात्। न वा एष दोषः। किं कारणं। पृथक्संज्ञाकरणात्। पृथक्संज्ञाकरणसामर्थ्यात्। लुकि श्लुविधिर्न भविष्यति।
तस्माददर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अवगाहते यथैव तर्ह्यदर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अवगाहत एवं लुमत्संज्ञा
अपि लोपसंज्ञामवगाहेरन्। तत्र को दोषः। अगोमती गोमती संपन्ना गोमतीभूता लुक्तद्धितलुकीति ङीपो लुक् प्रसज्येत। ननु चात्रापि न
वा पृथक्संज्ञाकरणादित्येव सिद्धं। यथैव तर्हि पृथक्संज्ञाकरणसामर्थ्याल्लुमत्संज्ञा लोपसंज्ञां नावगाहन्ते एवं लोपसंज्ञापि लुमत्सं
ज्ञां नावगाहेत। तत्र स एव दोषः। लुक्युपसंख्यानमिति। प्रत्ययस्य लोपसंज्ञाकरणे प्रयोजनं। किं लुमत्संज्ञासु य उच्यते तल्लोपमात्रे
मा भूदिति। लुमति प्रतिषेधार्थं वा। अयं वा यदयं न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवति लुकि प्रत्यय
लक्षणमिति। सतो निमित्ताभावात्संज्ञाभावः। प्रत्ययो येषां कार्याणां निमित्तं॥ ॥

पाः प्रथमसंज्ञा२

निकर्त्तृत्वं कश्चित्प्रकृतेः। ननु चात्रापीति। लुगादिसंज्ञानां भेदेनोपादानं तदाविततग्रहणमित्यर्थः। अस्मन्मते ... ति। प्रत्ययाप्रत्ययादर्शनस्य लोपसंज्ञा यथा स्यादिति।
लोपमात्रे मा भूदिति। यथा गोमतीभूतेति च्वेर्लोपे कृते लुक्तद्धितलुकीति न भवति। तस्माल्लोपसंज्ञायां नास्ति तदाविततग्रहणं। सतो निमित्ताभावादिति निमित्तशब्देन नि
मित्तत्वमुच्यते तेन यस्य सतः कार्यं प्रति निमित्तत्वं नाभूत्तस्य लोपो न निमित्तं स्यात्॥ ॥श्री॥ ॥

राज्ञ इति॥ सति ह. सिभसंज्ञायां स्वादिष्विति पदसंज्ञा बाधिते तेन नलोपो नाभूद् अल्लोपश्चाभूदिति लुप्तेऽपि तस्मिंश्च नलोपो न स्याद् अल्लोपश्च स्यात्। अस्तु तस्याः इति द्वे चात्र प
द संज्ञे। एकास्वादिष्विति अवयवस्य स्याच्च भसंज्ञया बाधिता। द्वितीया सुबन्तत्वेन समुदायस्य स्याच्च लुप्तेऽपि स्थितैव। अल्लोपस्तु न लुमताङ्गस्येति प्रतिषेधान्न भ
वति। समस्ते तदिति। कालविप्रकर्षप्रतिपादनापानघ्नन प्रत्ययप्रयोगः। राज्ञ इसत्रावधिभेदाद् इसंज्ञयावयवस्यैव पदसंज्ञा बाध्यते न समुदायस्य सुबन्तत्वानि

राज्ञः पुरुष इति। लुप्तोऽप्यनिमित्तं स्याद्राजपुरुष इति। अस्तु न स्याः अनिमित्तं यास्वादौ पदमिति पदसंज्ञा यातु सुबन्तमिति पदसंज्ञा
सा भविष्यति। समस्ते तत्प्रत्यये आसीत् अनया भविष्यसनया न भविष्यति। लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा
तावत एव सुबन्तं पदमिति। अस्ति च प्रत्ययलक्षणेन यजादिपरतेति कृत्स्ना भसंज्ञा प्राप्नोति। नुग्दीर्घत्वयोश्च विप्रतिषेधानुपप
त्तिरेकयोगलक्षणत्वात् परिवीरिति। नुग्दीर्घत्वयोश्च विप्रतिषेधो नोपपद्यते। क्व। परिवीरिति। किं कारणं। एकयोगलक्षणत्वात्।
एकयोगलक्षणे हि नुग्दीर्घत्वे इहलुप्ते प्रत्यये सर्वाणि प्रत्ययाश्रयाणि कार्याणि पर्येव पन्नानि भवन्ति। नान्येनेन प्रत्यस्तु स्यात्पुंने।
अनेनैव तु गनेनैव च दीर्घत्वमिति। तदेकयोगलक्षणं भवति। एकयोगलक्षणानि च न प्रकल्प्यन्ते॥ ॥

=वाक्यं स्य पदैराः भसमजश्लोकाणां नानेन विधीयेत समर्थः।१८=

मित्तालुप्तेतु प्रत्यये वधिभेदाभावात्प्रत्ययलक्षणेन प्राप्नया भसंज्ञया द्वे अपि पदसंज्ञे बाधितव्ये। एकापवादत्वे न द्वितीया परत्वेनेति भावः। अनयेत्याप
दसंज्ञाद्वयमनेन दर्शितं। भसंज्ञा प्रत्ययलक्षणेन वर्णाश्रयापि भवति। यथाऽपत्तोऽदितीमागमः। नुग्दीर्घत्वयोश्चेति। अनेनैव प्रत्ययनिमित्तानि कार्याणि
लुप्तेऽपि प्रत्यये विधीयन्त इति क्रमाभावात्सौर्वोपर्यं न प्रकल्प्यते। कार्यस्य प्राधान्यान्नानेन शास्त्र [illegible] स्पदेशो विधीयते॥ ॥ ॥

सिद्धं क्ङिति॥ अन्यो भावोऽन्यद्वस्तु स्थान्यपेक्षया आदेशः। अन्यभाव एवान्यमात्रं स्वार्थे ष्यञ्। तत्र परिवीरिति स्थानिनः क्विपो या संज्ञा यो व्यपदेशः पित्कृतप्र
त्ययस्तादिः सलोपस्या नेन विधीयते न तस्तन्निबन्धनं शास्त्रं प्रवर्तते इति सिद्धो विप्रतिषेधः। सत्तामात्रमिति। कृदादिव्यपदेशस्य सर्वथा॥ यद्येवमि
ति। हन्तिस्वरूपेणोपादानादात्मनेपदं विधीयते। ननु कांचित्संज्ञामाश्रित्येति भावः। नहीति। यद्यपि धातुसंज्ञास्ति तथापि न तदुपादानेनात्मनेपदं विधी

सिद्धं तु स्थानिसंज्ञानुदेशादन्यमात्रस्य। सिद्धमेतत्। कथम्। स्थानिसंज्ञा अन्यभूतस्य भवतीति वक्तव्यम्। किं कृतं भवति। सत्तामात्रमनेन
न क्रियते। यथा प्राप्ते तु गुदीर्घे भविष्यतः। तद्वक्तव्यं भवति। यद्यप्येतदुच्यते। अथवैतर्हि स्थानिवद्भावो नारभ्यते। स्थानिसंज्ञान्यभू
तस्यानल्विधाविति वक्ष्यामि। यद्येवं आङो यमहनः आत्मनेपदं भवतीति हन्तेरेव स्याद्वधेर्न स्यात्। नहि कांचिद्धन्तेः संज्ञास्ति या
वधेरप्यतिदिश्येत। हन्तेरपि संज्ञास्ति। का। हन्तिरेव। कथम्। स्वरूपं शब्दस्याशब्दसंज्ञेति वचनात्स्वरूपं शब्दस्य संज्ञा भवतीति हन्तेरपि
हन्तिः संज्ञा भविष्यति। भसंज्ञा ङीप् पुष्यगोराज्ञे पुच सिद्धं। भसंज्ञा ङीप् पुष्यगोराज्ञे पुच सिद्धं भवति। भसंज्ञा। राज्ञः पुरुषो राजपुरु
षः। प्रसयलक्षणेन यचि भमिति भसंज्ञा प्राप्नोति। स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भवति। ङीप्। चित्रायां जाता चित्रा।
प्रसयलक्षणेनाणन्तादिति ङीकारः प्राप्नोति। स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भवति। ष्यक्। वतण्डी। प्रसयलक्षणेन यञन्ता
दिति ष्यक् प्राप्नोति। स्थानिसंज्ञान्यभूतस्यानल्विधाविति वचनान्न भवति॥ ॥ ॥

यते। हन्तेरपीति। आङो यमहन इति सूत्रोपात्तो हन्तिः संज्ञा प्रयोगस्थस्तु संज्ञीति वधेरपि हन्तिसंज्ञा अतिदिश्यते। चित्रायां जातेति। चित्रारेवतीरोहिणीभ्यः स्त्रियामुप रम०
संख्यानं इत्यणो लुक्। टिड्ढाणञिति सत्रान्त इत्यधिकारान्ङीपोऽलिविधित्वं। वतण्डीति। यथा आवट्यायनीति चापं बाधित्वा सर्वत्र ग्रहणात्प्रकृतौ ष्फो भवति एवं शार्ङ्गर १५५
वादिपाठात्तान्ते ङीनं बाधित्वा प्राचां ष्फः स्यात्। अत इत्यधिकारादल्विधिः ष्फः॥ ॥०॥

गच्छतीति। औतोम्शसोरित्याचीत्यनुवर्त्तनादल्विधित्वं। चर्म्मन्निति। सुपांसुलुगिति ङेः लुक्। अत्र भसंज्ञाया अभावान्न लोपः प्राप्नोतीति नङिसंबुद्ध्योरिति वक्तव्यं जायते। परत्वाद्दीर्घत्वमिति। सतिप्रत्यये यत्कार्यं दृष्टं तल्लुप्तेपि भवतीति सूत्रार्थः। परिवीये सा दीर्घश्च सतिप्रत्यये दीर्घो दृष्टो न तु गीति परिवीसत्त्वापि दीर्घ एव भवति॥

गोमान् त्वं। गामिच्छति गव्यति। प्रत्ययलक्षणेनामि औतोम्शसोरित्यात्वं प्राप्नोति। स्थानिसंज्ञात्मभूतस्यानल्विधाविति वचनान्न भवति। तस्य दोषो ङौ नकारलोपे त्वेमविधयः। तस्यैतस्य लक्षणस्य दोषः। ङौ नकारलोपः। आर्द्रे चर्मन् लोहिते चर्मन्। प्रत्ययलक्षणेन यचि भमिति भसंज्ञा सिद्धा भवति। स्थानिसंज्ञात्मभूतस्यानल्विधाविति वचनान्न प्राप्नोति। इत्वं। आशीः। प्रत्ययलक्षणेन हलीति इत्वं सिद्धं भवति। स्थानिसंज्ञात्मभूतस्यानल्विधाविति वचनान्न प्राप्नोति। इमा। अपत्। शोट्। प्रत्ययलक्षणेन हलीतीमत्सिद्धो भवति। स्थानिसंज्ञात्मभूतस्यानल्विधाविति वचनान्न प्राप्नोति। सूत्रे च भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं सतो निमित्ताभावात् स्वरसंज्ञाभावः नुग्दीर्घत्वयोश्च विप्रतिषेधानुपपत्तिरेकयोग [illegible] लक्षणत्वात् परिवीरिति। नैष दोषः। वक्ष्यति अत्र परिहारं। इहापि परिवीरिति शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यति। कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनम् उक्तं श्लोपे तुम्मामौ गुणवृद्धि दीर्घत्वे मह्यं अम्मविधयः। अपृक्तलोपे शिलोपे च कृते तुम् अमामौ गुणवृद्धी दीर्घत्वं इम् अपशौ अम्मविधिरिति प्रयोजनानि तुम्। अग्नेत्रीते वाजिनाची पथस्तातातापिंडानां तुम्॥ ॥

प्रयोजनमिति। यद्यप्यत्र विध्यर्थमत्रोदिस्यादौ तथापि विशेषविहितत्वान्नुमादयोप्यस्यैवोदाहरणानीति भावः॥ ॥श्री॥ ॥७॥

मि ६९ १ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

अनडुह्निति। पूर्वं संबुद्धिलोपमाश्रित्यैतदुक्तं। यदि तु विशेषविहितत्वात् अम् संबुद्धाविति पूर्वं अम् प्रवर्त्तते तेनदा संबुद्धिलोपो न स्यात्। ऐ य इति। इयर्त्तेर्लङ् सिप् शपः श्लुः द्वि
र्वचनं। अर्त्तिपिपर्त्योश्चेतीत्वं। अभ्यासस्यासवर्णे इतीयङ्। आैन इति। उरेर्लङ् तिप् अम् आत्त्वलोपः इश्चेति रुत्वं। न च लोप इति। दिशि रूच्चारणक्रियोन च लोपउच्चार्यते अ

=ईदीति नयस्याप्येतानिसेनसंबुद्धिलोपेनवाधनादः मल्यमलक[illegible]नताभावेऽमागमस्यानिसत्वादितिभावः। २=नस्मादिति। तस्मादिवशेषविहितत्वमात्रेन वाध्यवाधकभावप्रयोजकाम पितुभमानाजपालंविनोधोनानचेतदुभयंसकृ

अमामौ। अनडुन् अनडुहान्। गुणः। अधोक्। अलेट्। वृद्धिः। न्यमार्ट्। दीर्घत्वं। अग्ने ईते वाजिनाचीषघस्ता। ना ना पिंडानां इमा अनृणो ऽ आसु
टौ। अधोक्। अलेट्। ऐ यः। आैनः। अन मृ विधिः। अभिनो त्रा। अछिनो त्रा। अपक्षिलोपयोः कृतयोः एते विधयो न प्राप्नुवंति। प्रत्ययलक्षणे
न भवंति नेतानि संति प्रयोजनानि। स्थानिवद्भावेनाप्येतानि सिद्धानि। न सिध्यंति। आदेशः स्थानिवदिति अनेन च लोप आदेशः। लोपो प्यादे
शः। कथं। आदिश्यते यः स आदेशः। लोपश्चाप्यादिश्यते। दोषः खल्वपि स्यात् यदि लोपो नादेशः स्यात्। इहाचः परस्मिन् पूर्वविधाविसेतस्य
योगस्य भूयिष्ठानि लोपे उदाहरणानि तानि न स्युः। यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः। क्व च स्थानिवद्भावो नास्ति। यो
ल्विधिः। किं प्रयोजनं। प्रयोजनं ङौ नकारलोपे त्वेमविधयः। भसंज्ञा ङी प्रकृत्य गोरात्वे षुचदो षोभवति। भसंज्ञायां तावन्नदोषः। आचार्य
प्रवृत्तिर्ज्ञापयति न प्रत्ययलक्षणेन भसंज्ञा भवतीति। यदयं नङि संबुध्योरिति ङौ प्रतिषेधं शास्ति। ङी प्यपि नैवं विज्ञायते। ऽस्मिन् तादकारां
ऽऽ तादिति कथं तर्हि एपोऽकार इति॥ ॥ ॥

भावरूपत्वात्। लोपोपीति। प्रतिपादन क्रियो त्रदिशि रिति भावः। अएपो कार इति। अकारेणाणंतं न विशेष्यते किंतर्हि गेवा सर्वस्याग अकार एवेति विशेषणसामर्थ्यात् प्र
यमाणाकाररूपादेण इति विज्ञायते। अथ वा एपो ऽकार इति अणा अकारो विशेष्यत इति वर्णनिमित्तो ङीप्र नतु प्रत्ययनिमित्त इति प्रत्ययलक्षणाभावः॥ ॥

[illegible]

यन्त्रयोः कार इति। अकारावयवइत्यर्थः। अथवायन्त्रवयवेयन्त्रशब्दोत्रवर्त्तते। यन्त्रवयवोयोःकार इत्यर्थः। पूर्ववदेतदपि व्याख्येयं। अच्यमीति। अचप्रधानं तद्विशेष
णमयमीति तदादिविधिर्भावः। तत्रवर्णनिमित्तमात्रं न प्रत्ययनिमित्तमिति दोषाभावः। क्रियत एतदिति। त्वयापि ज्ञापनार्थमवश्यं वक्तव्यमित्यर्थः। शास इत्त्वइति। कृते
प्यस्मिन्सूत्रे नियमार्थमेतद्वक्तव्यं। आशास्त इत्यादौ मा भूत्। अकृते तु विध्यर्थमाशास्त इत्यादौ तु न। शास्तु अनुशिष्टादिषु सावकाशस्यैव ग्रहणात्। प्रत्ययंग्रहीत्वेति। स्थानि

ष्वेपि नैवं विज्ञायते। यन्नंतादकारांतादिति। कथं तर्हि। यन्त्रयोः कार इति। गोराज्ञेपि नैवं विज्ञायते अम्यचीति कथं तर्हि अच्यमीति। प्र
योजनान्यपि तर्हि नैतानि संति। यत्ताव उच्यते ङेः न कारलोप इति। क्रियत एतन्न्यास एव। नरि. संबुध्योरिति। इत्त्वमपि। वक्ष्यसे न त। शास
इत्त्वे आशासः क्वाविति। इमविधिरपि। हलीति निवृत्तं। यदि हलीति निवृत्तं तदा हानीत्यत्रापि प्राप्नोति। एवं तर्ह्यचि नेत्यप्यनुवर्तिष्य
ते। न तर्हीदानीमयं योगो वक्तव्यः। वक्तव्यश्च। किं प्रयोजनं। प्रत्ययंग्रहीत्वा य उच्यते तत् प्रत्ययलक्षणेन यथा स्यात् शब्दंग्रहीत्वा य उ
च्यते तन्न प्रत्ययलक्षणेन मा भूदिति। किं प्रयोजनं। शोभनादृषदो अप्रत्ययदृषद्भ्यास्यणः सोर्मनसी अलोमोषसी सेषस्वरो मा भूदिति॥ ॥

वद्भावे सिद्धे सत्ययं योगो नियमार्थः। प्रत्यय एव प्रत्ययलक्षणं न प्रत्ययलोपे यथा स्यात्। सोर्मनसी सत्रनुअनिनस्मन्ग्रहणानि चेति वचनादस्मत्प्रत्ययश्चाप्रत्यय
श्च गृह्यत इति सुदृषदित्यत्र स्थानिवद्भावाँ उत्तरपदाद्युदात्तत्वाभावेन न सुप्यामिसंतोदात्तत्वं भवति। तत्रचोत्तरपदादिरित्यधिकारादसंतमुत्तरपदं गृह्यत इति सु
नर भावा
। दृषदित्यत्रापि स्थानिवद्भावादसंतत्वमुत्तरपदस्यास्मात्॥ ॥श्री॥ ॥

न लुमताङ्गस्य॥ ॥लुमतीति। लुमत्संज्ञया प्रतिपादितमदर्शनं लुमत् तत्र चायं प्रतिषेधः तस्मिन्नित्यर्थः। एकपदस्वरस्येति। एकपदाश्रयो यः स्वरस्तस्येत्यर्थः। यस्तु पदस्य पदा
दिति पदद्वयाश्रयः स्वरस्तत्र प्रत्ययलक्षणं भवत्येव। दधि तिष्ठति। तिङ्ङतिङ इति निघातः। अङ्गस्येत्यङ्गाधिकारनिर्देशात् ञ्नित्स्वरस्य चाङ्गत्वात्प्रतिषेधः स्यात्प्रा
प्नोतीति भावः। सर्वे स्तोम इति। सर्वस्य सुपीति यदाद्युदात्तत्वं तदेव बहुव्रीहौ प्रकृत्येति विधीयत इत्येकपदस्वरो भवत्येव। सर्पिरिति। सर्पिःशब्दोऽन्तोदात्तः प्रत्ययस्वरे
ण घृतादित्वाद्वा। सप्तशब्दोऽपि घृतादित्वादन्तोदात्तः। नित्स्वरेणाद्युदात्तत्वे विशेषो न स्यात्। माहि दाताम् इति। गातिस्थाघ्विति सिचो लुक्। लेरेव लुकि विधानत्वे सिचो

न लुमताङ्गस्य॥ ॥लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानं। लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानं कर्तव्यं। एकपदस्वरे च
लुमता लुप्ते प्रत्ययलक्षणं नेति वक्तव्यं। किमविशेषेण नेत्याह। सर्वामन्त्रितसिज्लुक्स्वरवर्ज्जं। सर्वस्वरमामन्त्रितस्वरं सिज्लुक्स्वरं च व
र्ज्जयित्वा। सर्वस्वरः। सर्वस्तोमः। सर्वपृष्ठः। सर्वस्य सुपीत्याद्युदात्तत्वं यथा स्यात्। आमन्त्रितस्वरः। सर्पिरागच्छ। सप्तागच्छ। आमन्त्रितस्ये
त्याद्युदात्तत्वं यथा स्यात्। सिज्लुक्स्वरः। माहि दाताम्। माहि धाताम्। आदिः सिचोऽन्यतरस्यामित्येष स्वरो यथा स्यात्। किं प्रयोजनं। ञ्निति कित्स्व
राः। ञ्निति कित्स्वराः लुकि प्रयोजयन्ति। गर्गाः। वत्साः। विदाः। उर्वाः। उष्ट्रग्रीवा वामरज्जुः। ञ्नितीत्याद्युदात्तत्वं मा भूदिति। इह च त्र
ञ्यः। कित इत्यन्तोदात्तत्वं मा भूदिति॥ ॥ ॥

लुग्विधानं प्रत्ययलक्षणार्थम्। ञ्निति कित्स्वरा इति। इकार उच्चारणार्थः। ञ्नित्कितां प्रत्ययानां लुकि कृते स्वराः निवर्त्तमानतया प्रयोजनमिति पदानां संबन्धः।
भाष्यकारस्तु वस्त्वर्थं व्याचष्टे ञ्निति कित्स्वरा इति प्रतिषेधमिति शेषः। उष्ट्रग्रीवा वामरज्जुरिति। देवपथादित्वात्कनो लुप्। असंज्ञायां चेत्युदाहरणं। संज्ञायां तु सं
ज्ञायामुपमानमिति भवितव्यमाद्युदात्तत्वेन। ञ्यः इति। राशदिभ्यां त्रिप्। अदेस्त्रिनिश्चेति त्रिबन्तो त्रिशब्द आद्युदात्तः॥ ॥ ॥ एम॰ १५८

पथिप्रियो मथिप्रिय इति। पूर्वपदप्रकृतिस्वरेणान्तोदात्तौ पथिमथिशब्दौ भवतः। अहर्द्दृशातीति। अनसुपीति प्रसज्यप्रतिषेधः पर्युदासे तु दीर्घो हानिदाघ इत्यत्रापि सुप्त्वद
शे निदाघशब्दे परतो रत्वं स्यात्। रूत्वं चेष्यते। लोपशब्देन सोर्लुप्तत्वात् प्रत्ययलक्षणेन सुपि नेति रत्वप्रतिषेधात् उत्वे यत्वे च स्य च लोपे दीर्घो हानिदाघ इति सिध्यति। लु
कि तु प्रत्ययलक्षणप्रतिषेधात् इत्वे सत्युत्वाभावादहर्द्दृशातीत्यादि सिध्यति। उत्तरपदत्वे चेति। उत्तरपदमुत्तरशब्देनोच्यते पदैकदेशत्वोपात्। तेनोत्तरपदस्य पद

पथिमथोः सर्वनामस्थाने लुकि॥ पथिमथोः सर्वनामस्थाने लुकि प्रयोजनं॥ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यं॥
पथिप्रियः मथिप्रियः। पथिमथोः सर्वनामस्थाने इत्येष स्वरो मा भूदिति। अह्नो रविधौ। अह्नो रविधाने लुमता लुप्ते प्रत्ययलक्षणेन
भवतीति वक्तव्यं। अहर्द्दृशातिः अहर्भुङ्क्ते। रोऽसुपीति प्रत्ययलक्षणेन प्रतिषेधो मा भूदिति। उत्तरपदत्वे चापदादिविधौ। उत्तरपदत्वे
चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यं। परमवाचा परमवाचे। परमगोदुहा परमगोदुहे। परमश्वलिहा प
रमश्वलिहे। पदस्येति प्रत्ययलक्षणेन कुत्वादीनि मा भूवन्निति। अपदादिविधाविति किमर्थं॥ ॥ ॥

त्वे पदत्वं पदे भेकत्वे प्रत्ययलक्षणं न भवतीत्यर्थः। परमवाचेति। समासात्पोया विभक्तिः कृतान्तां प्रत्ययलक्षणेनाश्रित्य पदत्वनिबन्धनानि कुत्वादीनि प्राप्नु
वन्ति। भसंज्ञा तु यस्मादप्यजादिविधिरिति समुदायस्यैव न त्ववयवस्य॥ ॥श्री॥ ॥ ॥

भा०कै०प्र० दधिसेचाविति। दध्नः सेचाविति षष्ठीसमासः। उपपदसमासेन तु प्राक् सुबुत्पत्तेः समासविधानात्सेचशब्दस्य पदसंज्ञायाश्चाभावात् सादित्वं सकारस्य न स्यात्। अनभि
१५८ धानाच्च सोपपदाद्धिजभावात् दधिषेचाविति सादिप्रयोगाभावात्। कर्णो वर्णलक्षणादिति। नन्वपदादिविधावित्युच्यते सरस्त्वायं पदादिविधिः। ककारो वादिर्नेत्त्वकार
158 इत्यदोषः। स्वरविधौ यं जनमविद्यमानवन्नत्यादिव्यपदेशो। तत्त्वे चासमासार्थं स्यात्तत्कर्णो माहात्म्यं शब्दाद्यचिह्नते मुक्तः कर्ण इत्याद्युदात्तत्वं यथा स्यात्। यदि
पुनरिति। तेन पूर्वस्मिन्नपरं च च भवत्सेव प्रत्ययलक्षणं। राजकुमार्याविति। इकोऽसवर्णे इत्यत्र इकः पदान्तादिति सतः पदान्तग्रहणमनुवर्त्तते। तत्र प्रत्ययलक्षणेन पदान्त

दधिसेचौ दधिसेचः। सात्पदाद्योरिति षत्वप्रतिषेधो यथा स्यात्। यद्यपदादिविधावित्युच्यते उत्तरपदाधिकारो न प्रकल्प्येत। तत्रायमदोषः। कर्णो वर्ण
लक्षणादित्येवमादिविधिर्न सिध्यति। यदि पुनर्न लोपादिविधौ प्रत्ययलक्षणं तेन लुमता लुप्ते प्रत्ययलक्षणं न भवतीत्युच्यते। नैवं शक्यं। इह हि राजकुमार्यौ
राजकुमार्य्य इति शाकल्यं प्रसज्येत। नैष दोषः। यदेतत्सिनिशाकल्यं नेति एतत्प्रत्यये शाकल्यं नेति वक्ष्यामि। यदि प्रत्यये शाकल्यं नेत्युच्यते दधि अत्र
मधु नाम मधु अत्र मधुनात्रापि न प्रसज्येत। प्रत्यये शाकल्यं न भवति कतरस्मिन्नस्माद्यः प्रत्ययो विहित इति। इह तर्हि परमदिवा परमदिवे दिव उदित्
त्वं प्राप्नोति। अस्तु तस्य विशेषेण। ननु चोक्तमुत्तरपदाधिकारो न प्रकल्प्येतेति। वचनादुत्तरपदाधिकारो भविष्यति॥ ॥ ॥

सा॰ शाकलप्रसंगः। दधि अत्र मधुनेति। अधुना प्रत्यय इत्यमो विधीयते। तत्र इदम इश्। यस्येति चेति लोपः। यस्माद्यः इति। प्रत्यासत्तेरिति भावः। राजकुमार्याविति तत्र
यद्यपि समुदायाद्विहितस्तथाप्यवयवादप्यसौ विहित इति बुद्धिर्भवत्येव। समुदाये हि द्विर्वचनेऽवयवद्विर्वचनबुद्धिवत्। उत्त्वमिति। उत्त्वविधावेङः पदान्तादतीति पदा
धिकारः। वचनादिति। समासे तूत्तरं पदं भवति। न च कर्णशब्दोऽप्रत्ययान्तोऽस्ति। अपर्षआदिषु हि स्वाङ्गाद्धीनादिति पठ्यते। तेन स्वं जादिभ्य एव हीनस्वाङ्गवाचिभ्यो एम०
ऽप्रत्ययो भवति। न च कर्णशब्दो हीनस्वाङ्गवाची॥ ॥ ॥ १५८

तर्हीति। उत्तरपदत्वे चापदादिविधाविति तत्। यच्चिभमिति। ततश्च परमवाचेत्यत्र वाक् शब्दस्य भत्वात् पदत्वाभावः। इह तर्हीति। अ सर्वनामस्थाने इति प्रसज्य
प्रतिषेधं मन्यते। ततश्च सर्वनामस्थाने परतो यस्मात् स्वादिविधिस्तदादि सुबन्तं च पदसंज्ञं न भवतीति प्रसज्यलक्षणेन सर्वनामस्थानपरत्वात् सदत्त्व निषेधा

तर्हि वक्तव्यं न वक्तव्यं। अनुवृत्तिः करिष्यते। इदमस्ति यस्मात् प्रत्ययविधिस्तदादि प्रत्यये अंगं। सुप्तिङन्तं पदं। यस्मात् सुप् तिङ् विधिः
तदादि सुबन्तं च। नः क्ये। नान्तं क्ये पदसंज्ञं भवतीति यस्मात् क्य विधिः तदादि सुबन्तं च। सिति च। सिति च पूर्वं पदसंज्ञं भवति यस्मात् सि
द्विधिः तदादि सुबन्तं च। स्वादिष्वसर्वनामस्थाने। स्वादिष्वसर्वनामस्थाने पूर्वं पदसंज्ञं भवति यस्मात् स्वादिविधिः तदादि सुबन्तं च।
यचि भं। यजादि प्रत्यये पूर्वं भसंज्ञं भवति यस्माद्यजादि विधिः तदादि सुबन्तं च। इह तर्हि परमवाक्। असर्वनामस्थाने इति प्रति
षेधः प्राप्नोति। अस्तु तस्याः प्रतिषेधः या स्वादौ पदमिति पदसंज्ञा या सुबन्तमिति पदसंज्ञा सा भविष्यति। सत्येतत् प्रत्यये आश्री
दनया भविष्यसन यान भविष्यतीति। लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा तावत एवावधेः सु
बन्तं पदमिति। अस्ति च प्रसज्यलक्षणेन सर्वनामस्थानपरत्वे तिष्ठत्वात् प्रतिषेधाश्च बलीयांसो भवन्तीति प्रतिषेधः प्राप्नोति। नाप्र
तिषेधात्। नायं प्रसज्य प्रतिषेधः सर्वनामस्थाने नेति किं तर्हि पर्युदासोयं। यदन्यत् सर्वनामस्थानादिति सर्वनामस्थाने। व्यापा
॥ रः पदिके न चित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति॥ ॥ ॥

त्कृत्वा प्राप्तिः। सत्येतदिति। अवधिभेदात् संज्ञिनां भेदात्। बलीयांस इति। विध्युन्मूलकत्वात्॥ ॥ ॥७॥ ॥

भा०कै० ३० एवं तर्हीति योगविभागे सति सर्वोप्राप्तिः प्रतिषिध्यते इति दोषाभावः। अथ सर्वनामस्थान इति नञः क्रियापदेन संबंधात उत्तरपदेनासंबंधो यचीत्येतदत्र स
१५९ र्वनामस्थानविशेषणं। तेनायमर्थो भवति। यजादौ सर्वनामस्थाने परतः पदसंज्ञा न भवतीति। हलादौ तु स्त्यं भवत्येव। भाष्ये तु वस्तुमात्रमुप
159

अप्राप्तेर्वा। अथवा अनंतरायाः प्राप्तिः सा प्रतिषिध्यते। कुत एतत्। अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिर
प्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधेत। नोत्सहते प्रतिषिद्धा सती बाधितुं। यद्येवं परमवाचौ परमवा
च इति स्वप्तिङं तेपदमिति पदसंज्ञा प्राप्नोति। एवं तर्हि योगविभागः करिष्यते। स्वादिषु पूर्वं पदसंज्ञं भवति। ततः सर्वनामस्था
ने पचि पूर्वं पदसंज्ञं भवति। ततो भं भसंज्ञं भवति यजादाव सर्वनामस्थाने इति। यदि तर्हि सावपि पदं भवति। एचः प्लुतविकारे
पदांतग्रहणं चोदयिष्यते इह माभूत् भद्रंकरोषि गौरिति। तस्मिन्क्रियमाणेपि प्राप्नोति। वाक्यपदयोरंत्यस्येत्येवं न तत्। इह तर्हि दधि
सेचौ दधिसेचः सात्पदाद्योरिति पदादिलक्षणः षत्वप्रतिषेधो न प्राप्नोति। माभूदेवं पदस्यादिः पदादिः पदादेर्नेति। कथं तर्हि पदादा
दिः पदादिः पदादेर्नेति एवं भविष्यति। नैवं शक्यं। इहापि प्रसज्येत ऋक्षु वाक्षु त्वक्षु कुमारी चुक्षि श्रोशीष्विति। सात्प्रतिषेधो ज्ञापकः
स्वादिपरत्वेनये षां पदसंज्ञा न तेभ्यः प्रतिषेधो भवतीति। इह तर्हि बहुसेचौ बहुसेचः बहुजयं प्रत्ययः। अत्र पदात् आदिः पदादिः प
दादेर्नेत्युच्यमानेपि न सिध्यति। एवं तर्हि उत्तरपदत्वे च पदादिविधौ लुमताल्लुप्ते प्रत्ययलक्षणं भवतीति वक्ष्यामि तन्नियमार्थं

न्यसंतं सर्वनामस्थाने ऽपचीति। यजादौ सर्वनामस्थाने पदसंज्ञाया निषेधात्सामर्थ्यादयमर्थः संपद्यते। अयजादौ सर्वनामस्थाने पदसंज्ञा भवतीति। वाक्य एम०
पदयोरिति। गोरिसौ कारो वाक्यांतो न भवतीसाद्रुतौ न भवतः। पदादादिरिति। पंचमीति योगविभागात्समासः॥ ॥ ॥ १५९

कथं बहुसे चाविति। समासाभावान्नोत्तर पदत्वं नापि पूर्वत्वं पदत्वं। द्वंद्वे समस्ये ति। उत्तरपदत्वे चेसनेनैव सिद्धे नियमार्थमिदं समस्ये वेति। मध्यमपदस्यापि पूर्वप
दापेक्षयोत्तरपदत्वसंभवात् प्रत्ययलक्षणप्रतिषेधप्रसंगात्। मुख्ये उत्तरपदे संभवति कथं मध्यमपदस्य ग्रहणं स्यादिति चिंत्यमेतत्। आकारप्रकरणादिति।
आकारस्य नियमार्थत्वेन प्रस्तावादित्यर्थः। अथवा आकारे प्रकरणादात इत्यत्र सिचः प्रकृतत्वादित्यर्थः। इति युष्मत्सु त्र इति। पदाउत्तरयोर्युष्मदस्मदोरादेशा वि

12

कथं बहुसेचौ बहुसे च इति। बहुच्पूर्वस्य च पदादिविधावेव न पदांतविधाविति। द्वंद्वे समस्या द्वंद्वे समस्य लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यं।
वाक्यत्वस्तु चं। इहाभूवन्निति प्रत्ययलक्षणेन जुस्भावः प्राप्नोति। सिचि जुसोः प्रसंग आकारप्रकरणात्। सिचि जुसः अप्रसंगः। किं कारणं। आका
रप्रकरणात्। आत इत्येतन्नियमार्थं भविष्यति। आत एव च सिज्लुगंतान्नान्यस्मात्। इहर इति युष्मत्सु त्रो ददाति इत्यस्मत्सुत्रो ददातीत्यत्र प्रत्य
यलक्षणेन युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावादयः प्राप्नुवंति। युष्मदस्मदोः स्थग्रहणात्। स्थग्रहणं न त्र क्रियते तच्छ्रूयमा
णविभक्तिविशेषणं विज्ञास्यते। अस्त्यन्यत्स्थग्रहणस्य प्रयोजनं। किं। सविभक्तिकस्य वान्नावादयो यथा स्युरिति। नैतदस्ति प्रयोजनं। प
दस्येति वर्तते विभक्त्यंतं च पदं। तत्रांतरेणापि स्थग्रहणं सविभक्तिकस्यैव भविष्यति। भवेत्सिद्धं यत्र विभक्त्यंतं पदं॥ ॥ ॥

ष्ठानादिति शाब्दप्रयोगः। श्रूयमाणविभक्तिविशेषणमिति। षष्ठीचतुर्थीद्वितीयास्विसेव सिद्धे स्थग्रहणे सत्यसमर्थोभवति। नासुये त्ववस्थिते युष्मदस्मदी इति। श्रूयमा
णासु चावस्थानं संभवति न लुप्तासु। लुप्तस्याधारत्वासंभवात्। अस्त्यन्यदिति। तिष्ठतिरहानौ वर्त्तते। यथातपस्थितः तपो न जहातीत्यर्थः। तथा समये तिष्ठत्सुग्रीवेति
समयं माहासीरिति गम्यते। तेन सति स्थग्रहणे तत्संहितयोः कार्यं विज्ञायते। अथवा यथा रथ॥ ॥ ॥

भा॰ कै॰ प्र॰ स्थानीयत्वाभिमुख्येऽपरत्र स्थानीयतेन षष्ठ्यादिसहितयोर्युष्मदस्मदोः कार्यं भवतीति विज्ञायते। पदस्येति वर्त्तत इति। केवलयोः पदत्वाभावात्तदवयवं पदं गृह्य
१६० ते इति भावः। यत्र त्विति। अत्र हि ते एव पदे इति तयोरेवादेशप्रसंगः। सर्वग्रहणमपीति। अनेकाल्त्वात्सर्वादेशत्वे लब्धे सर्वग्रहणमनुवर्त्तते षष्ठ्यन्तं विपरिणम्यमानं स
160 र्वस्य पदस्य प्रयोगार्हस्य विभक्त्यन्तस्य स्थानित्वमवगमयतीत्यर्थः। याजयांचकारेति। परत्वान्निघातादिषु कृतेष्वाम इति लुकि प्रत्ययलक्षणेन याजयामिसस्य
तिङः. तत्त्वमिति पूर्वः पक्षः। आमिलिलोपादिति। नाप्राप्तेषु तिबादिषु लुगारभ्यमाणस्तेषां बाधकः। अङ्गाधिकार इति। अंगस्येति स्वर्यते। तेनांगाधिकारविहितं य

यत्तु खलु विभक्तौ परं तत्र न सिध्यति। ग्रामो वां दीयते ग्रामो नौ दीयते। सर्वग्रहणमपि प्रकृतमनुवर्त्तते। तेन सर्वविभक्तिकस्यैव भविष्यति। इह च स्तु
ष्कामं याजयांचकारेति तिङः। तिङ इति तस्य च निघातः तस्माच्चानिघातः प्राप्नोति। आमि लिलोपात्तस्य चानिघातः तस्माच्च निघातः सिद्धो भवति।
अंगाधिकारे इड्विधिप्रतिषेधौ। अंगाधिकारे इटो विधिप्रतिषेधौ न सिध्यतः। जिगमिषुसंविवृत्सा। अंगस्येतीटो विधिप्रतिषेधौ न प्राप्नुतः॥
क्रमेर्दीर्घत्वं च। किंच इट्स्य विधिप्रतिषेधौ। नेत्याह। आदेशे यं चः पठितः। क्रमेश्च दीर्घत्वं उत्क्रामसंक्राम इति। इह किंचिदंगाधिकारे लुम
तालुप्ते प्रत्ययलक्षणेन भवति। किंचिच्चान्यत्र न भवति॥ ॥ ॥१॥ ॥

त्कार्यं तल्लुमतालुप्ते प्रत्ययेन भवतीति सूत्रार्थे दोषोपन्यासः। जिगमिषेति। अतो हेरिति लुकि कृते गमेरिट्परस्मैपदेष्वितीट् न प्राप्नोति। संविवृत्सेति। न वृद्भ्यश्चतुर्भ्य
इतीट्प्रतिषेधः। क्रमेरिति कार्यसमीपे श्रूयमाणश्चकारः कार्यमेव समुच्चिनुयादित्यभिप्रायेणाह किंचेति। आदेश इति। कार्यस्य समुच्चेतव्यस्याभावात्सामर्थ्यात्प्रकृ राम॰ १६०
तिसमुच्चय इत्यर्थः। किंचिच्चेति। त्रिनिकित्स्वराः॥ ॥श्री॥ ॥

न लुमताऽतस्मिन्निति। लुमता यो लुप्तः प्रत्ययः तस्मिन्यत्कार्यं अंगं अनांगं वा तन्न भवतीत्यर्थः। अत्रय इत्यत्र स्वरो न भवति तद्धितस्येति वक्ति तोनोदात्तत्वविधानात्। लु
क्विलुते कार्ये णोऽसत्त्वात् प्रत्ययलक्षणं यदन्यस्य कार्यं तत्प्रत्ययलोपेऽपि भवति। न तु प्रत्ययस्यैव यत्कार्यं तदपि न हि वचनेनासतः कार्यं शक्यते प्रतिपादयितुं। न तं२
द्विशेषणमिति। विशेषणे गौ पक्षीणत्वात्कार्यं प्रति निमित्तभावो नास्तीत्यर्थः। हनिणिङादेशा इति। लुका लुप्तो विषयस्यापहाराद्विषयस्य प्रत्ययस्याश्रयणेऽप्य

यदिपुंने लुमताऽतस्मिन्निसुच्येत। अथ न लुमताऽतस्मिन्निति सुच्यमाने किं सिद्धमेत इङ्वुतिइटो विधिप्रतिषेधौ क्रमेदीर्घत्वं च। बाढं सिद्धं। नेटो विधिप्र
तिषेधौ परस्मैपदेष्विसुच्यते। कथं तर्हि सकारादाविति। तद्विशेषणं परस्मैपदग्रहणं। न खल्वपि क्रमे दीर्घत्वं परस्मैपदेष्विसुच्यते कथं तर्हि शितीति
ति तद्विशेषणं परस्मैपदग्रहणं। न लुमताऽतस्मिन्निति चेद् हनिणिङादेशास्तल्लोपे। न लुमताऽतस्मिन्निति चेद् हनिणिङादेशास्तल्लोपे न सिध्यंति।
अवधिभवतादस्युः अगायि भवताग्रामः। अध्यगायि भवतानुवाकः। तल्लोपे कृते लुङीति हनिणिङादेशा न प्राप्नुवंति। नैष दोषः। न लुङीति ह
निणिङादेशा उच्यंते किं तर्हि आर्द्धधातुक इति। तद्विशेषणं लुङ्ग्रहणं। इह च सर्वस्तोमः सर्वपृष्ठः सर्वस्य सुपीत्याद्युदात्तत्वं न प्राप्नोति। तच्चापि व
क्तव्यं। न वक्तव्यं। न लुमताऽङ्गस्येत्येव सिद्धं। कथं। न लुमता लुप्तेऽङ्गाधिकारः प्रतिनिर्दिश्यते। किं तर्हि योसौ लुमता लुप्यते तस्मिन्यदंगं तत्प्रत्ययला
ऽयेतन्न भवति। एवमपि सर्वे स्वरो न सिध्यति। कर्त्तव्योऽत्र यत्नः॥ ॥ ॥

सिद्धिः। तद्विशेषणं लुङ्ग्रहणमिति। तेन लुङ्परे च्लि एपादेशविधानं। न लुमतेति। अंगस्येत्यस्याधिकारितत्त्वात् प्रतिज्ञानात्र लुमता लुप्ते प्रत्यये यदंगं तस्य
यत्कार्यं प्रत्ययाश्रयमांगमनांगं वा तन्न भवतीत्यर्थः। कर्त्तव्यो वेति। सर्वशब्दार्थं वचनं कर्त्तव्यं॥ ॥ ॥

अलोंत्यात्पूर्व उपधा॥ किमिदमिति। प्रथमा पंचमी वेति संदेहात्प्रश्नः। एवमिति। प्रथमायामभिप्रेतायामसंदेहार्थे अलि सेकवचनं वक्तव्यं स्यात्। अंत्यादिति पंचमीसा
हचर्याच्चाल इत्यपि पंचम्यंतमिति भावः। अल्ग्रहणमिति। निर्दिश्यते ऽभिधीयते ऽनेनेति निर्देशः। यथैवं सः प्राप्यत इत्यर्थः। संघातप्रतिषेध इति। पूर्वस्याविशेषित
त्वात्समुदायावयवसन्निधौ च समुदायस्यैव कार्यित्वात् एकाज्द्विर्वचन इवेति भावः। अंत्यसविशेषणत्वे वर्णनिर्देशो जातिग्रहणे प्यल इत्युपादानसामर्थ्यात्संख्या

अलोंत्यात्पूर्व उपधा। किमिदमल्ग्रहणमंत्यविशेषणं। एवं मवितुमर्हति। उपधासंज्ञायामल्ग्रहणमंत्यनिर्देशश्चेत्संघातप्रतिषेधः। उप
धासंज्ञायामल्ग्रहणमंत्यनिर्देशश्चेत्संघातस्यप्रतिषेधो वक्तव्यः। संघातस्योपधासंज्ञा प्राप्नोति। तत्रको दोषः। शास इदङ्हलोः। शिष्टः। शि
ष्टात्। संघातस्येत्वं प्राप्नोति। यदि पुनरलंत्यादित्युच्यते एवमप्यंत्यस्य विशेषितो भवति। तत्रको दोषः। संघातादपिपूर्वस्योपधासंज्ञा प्राप्नो
ति। तत्रको दोषः। शास इदङ्हलोः। शिष्टः। शिष्टा[redacted]त्। शकारस्यैत्वं प्रसज्येत। सूत्रं च भिद्य
ते। यथान्यासमेवास्तु ननु चोक्तमुपधासंज्ञायामल्ग्रहणमंत्यनिर्देशश्चेत्संघातप्रतिषेध इति। नैष दोषः। अंत्यविज्ञानात्सिद्धं। सिद्ध
मेतत्। कथं। अलोंत्यस्य विधयो भवंतीत्यंत्यस्य भविष्यति॥ ॥

विवक्ष्यते। यदि पुनरिति। अत्राप्यल्ग्रहणसामर्थ्यात्संख्या विवक्ष्यते। पिबेरदं न त्वप्रतिज्ञानाच्चलिंगादल्समुदायस्य हि संज्ञित्वे गुणस्य प्राप्तिरेव नास्ति किम
दंतत्वप्रतिज्ञानेन। सूत्रं चेति। अलंत्यादिति पठ्यमान इत्यर्थः। अंत्यविज्ञानादिति। उपधाया इति षष्ठ्यंतमलंतं नीयत इत्यर्थः॥ ॥ ॥

अनभ्यासविकार इति। अभ्यासो नर्थकः षष्ठस्य छायावृत्तिर्नोर्थस्य। अव्यक्तानुकरणस्येति। अव्यक्तानुकरणस्य योच्छब्दः तस्येतौ पररूपमिति सूत्रार्थः। पटत्पटिति। वा म्रेडितस्येत्येव वक्तव्यं स्यात्। घ्वसोरिति। अनभ्यासविकारप्रतिषेधो रूपवत्सादेशे लोपस्तनी रूपः। तथा च पस्य शायां लोपागमवर्ता

अंसविज्ञानात्सिद्धमिति चेन्नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे। अनर्थकेऽलोन्त्यविधिर्नेत्येषा परिभाषा कर्तव्या। किमविशेषेण। नेत्याह। अनभ्यासविकारे। अभ्यासविकारान्वर्जयित्वा। भृञामित्। अर्तिपिपर्त्योश्चेति काव्येतस्यां परिभाषायाः प्रयोजनानि। प्रयोजनमव्यक्तानुकरणस्यात इतौ। अंत्यस्य प्राप्नोति। अनर्थकेऽलोन्त्यविधिर्नेति न दोषो भवति। नैतदस्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञापयति नान्त्यस्य पररूपं भवतीति। यदयं ना म्रेडितस्यान्त्यस्य तु वेत्याह। घ्वसोरेद्धावभ्यासलोपश्च। घ्वसोरेद्धावभ्यासलोपश्चान्त्यस्य प्राप्नोति। अनर्थकेऽलोन्त्यविधिर्नेति न दोषो भवति। एतदपि नास्ति प्रयोजनं पुनर्लोपवचनसामर्थ्यात्सर्वस्य भविष्यति॥ ॥श्री॥ ॥

विकारग्रहणं इति लोपविकारौ भेदेन निर्दिष्टौ। पुनर्लोपेति। लोपो यीत्यतो लोपग्रहणेनुवर्तमाने इति भावः। तत्र घ्वसोरेद्धावभ्यासस्य चेति वक्तव्यं। तत्र व्याख्यानादभ्यासस्य लोप एव भविष्यति। न त्वेत्वं। योगविभागो वा करिष्यते। घ्वसोरेद्धौ ततोऽभ्यासस्येति। अत्र च लोपो नुवर्तिष्यते। तत्र पुनर्लोपवचनसामर्थ्यादलोन्त्यस्येति बाध्यते॥ ॥ ॥

द्विशकारकोनिर्देश इति। लोपशब्दात्परः दंतात्संज्ञिनार्थेनार्थवत्त्वाद्विभक्तौ कृतायां शकारः प्रतिनिर्दिश्यते। तस्य चैतत्संज्ञायां सत्यां सर्वादेशो लोपो भव
ति। इत्संज्ञोपदेशे प्रवर्त्तते। तत्कार्यं तु प्रयोग इत्येषा सिद्धांतः। गतिष्ठतिसूत्रमिति। लक्ष्यलक्षणभावस्याविवक्षितत्वात्तिष्ठतसूत्रमिति न कृतं। तत्रायमर्थः

अथवा शिल्लोपः करिष्यते। शित्सर्वस्येति सर्वादेशो भविष्यति। सतर्हि शकारः कर्त्तव्यः। न कर्त्तव्यः। क्रियते न्यास एव द्विशकार
कोनिर्देशः। घ्वसोरेद्धावभ्यासलोपश्चेति। आपिलोपोऽकोंनचि। तिष्ठतिसूत्रमन्यथाव्याख्यायते। आपि हलि लोप
इत्येतत्स्य प्राप्नोति। अनर्थके लोंत्यविधिर्नेति न दोषो भवति। एतदपि न। अन एव लोपं वक्ष्यामि। तदनो ग्रहणं कर्त्त ग्रस्य
व्यं। प्रकृतमनुवर्त्तते। क्व प्रकृतं। अनाप्यक इति। तद्वै प्रथमानिर्दिष्टं। षष्ठीनिर्दिष्टेन चेहार्थः। हलीत्येषा सप्तमी। अ
निति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मिन्निति निर्दिष्टे पूर्वस्येति। अत्र लोपोऽभ्यासस्य। अंत्यस्य प्राप्नोति। नान
र्थके लोंत्यविधिरिति न दोषो भवति। एतदपि नास्ति प्रयोजनम्॥ ॥ ॥श्री॥

। तिष्ठतिसूत्रं न प्रसाव्याख्यायते। तत्त्वन्यथाव्याख्यायते। तत्रानचीत्यनेन हलीत्यस्यार्थो व्याख्यातः। अनाप्यक इत्यनुवृत्तिर्दर्शिता। अन एवेति। अ राम॰
नाप्यक इति सामान्येनानादेशं विधाय हलादौ तु तस्यैव लोपो विधास्यत इत्यर्थः। येन नाव्यवधानमिति सदाद्यत्वेन व्यवधानमाश्रीयते॥ ॥ १६२

अत्रग्रहणसामर्थ्यादिति। मीमांसादीनामधिकारादेव सिद्धेः अत्रग्रहणादयमर्थ आश्रीयते योऽभ्यासत्वेन निर्ज्ञातस्तस्य समग्रस्य लोपो न त्वलोंऽत्यस्येति। यथा
जातीकोंऽस इति। एतच्च ब्रुवता पंचमीपक्ष एवाश्रितः। षष्ठीप्रथमयोरपि न दोषः। षष्ठीपक्षे निर्द्धारणे षष्ठी। निर्द्धारणं च तुल्यजातीयस्य भवतीति अलां मध्ये

अत्रग्रहणसामर्थ्यात्सर्वस्य भविष्यति। अस्त्वन्यदत्रग्रहणस्य प्रयोजनं। किं सन्त्वधिकारोऽपेक्ष्यते। इह माभूत् आदधौ ददौ। अन्तरेणाप्यत्र
६२ ग्रहणं सन्त्वधिकारमपेक्षिष्यामहे। संस्तां हि सकारादिरपेक्ष्यते सनि सकारादाविति। इह माभूत्। जिज्ञपयिषतीति। अन्तरेणाप्यत्रग्र
हणं सनं सकारादिमपेक्षिष्यामहे। प्रकृतयस्तर्ह्यपेक्ष्यन्ते। एतासां प्रकृतीनां लोपो यथा स्यात्। इह माभूत्। पिपक्षति यियक्षति।
अन्तरेणाप्यत्रग्रहणमेताः प्रकृतीरपेक्षिष्यामहे। विषयस्तर्ह्यपेक्ष्यते। मुचोऽकर्मकस्य गुणो वेति। इह माभूत् मुमुक्षति गामिति। अन्त
रेणाप्यत्रग्रहणमेतं विषयमपेक्षिष्यामहे। कथं। अकर्मकस्येत्युच्यते नैतत्रैवायं मुचिरकर्मकस्तत्रैव भविष्यति। तस्मात्त्रार्थो
लोऽ नयापरिभाषया अनर्थके लोंऽत्यविधिर्नेति। अंसात्पूर्वो लुप धेतिवा। अथवा व्यक्तमेव पठितव्यं अलः अंसात्पूर्वो लुपधासंज्ञो
भवति। तत्तर्हि वक्तव्यं। न वक्तव्यं। अवचनाल्लोकविज्ञानात्सिद्धं। अन्तरेणापि वचनं लोकविज्ञानात्सिद्धमेतत्। तद्यथा लोके अमीषां
ब्राह्मणानां मन्त्रात्पूर्व आनीयतामिति उक्ते यथाजातीयकोऽस्य तथाजातीयकोऽस्मात्पूर्व आनीयते॥ ॥

योंऽसो ल तस्मात्पूर्व उपधासंज्ञक इत्यले वोक्तन्यायात्प्रतीयते। प्रथमाबहुवचनपक्षेप्ययमर्थः अंसात्पूर्वो लुपधासंज्ञ इति। अल इति जातौ बहुवचनं।
॥ अवधिमत्तुल्यजातीयकस्यावधिरिति॥ ॥ ॥

तेन२

भा०कै०प्र० तस्मिन्निति॥ किमुदाहरणमिति। इतिकरणस्य गौरित्ययमाह। सादौ स्वरूपपदार्थकत्वेन व्यवस्थापकत्वदर्शनात्। अम्भः। दध्यत्रेति। यदि तस्मिन्नणि चेति तस्माच्छ
१६३ स इति चात्रैवैते परिभाषे उपात्ते स्यातां तत्रैव पूर्वग्रहणमुत्तरग्रहणं चाकरिष्येतामिति भावः। अत्र च व्यवच्छेद्यमस्ति। यौष्माकीणः अस्मभ्यं देहि। आस्माकी
163 न युष्मभ्यं दीयतामिति। खञः परयोर्युष्मदस्मदोरादेशौ न भवतः। वृक्षान् निस्वत्र पूर्वस्य वर्णो दीर्घीभूतात् च्छसः पूर्वस्य षकारस्य नत्वं न भवति। अथ शास इति

तस्मिन्निति निर्दिष्टे पूर्वस्य॥ तस्मादित्युत्तरस्य। किमुदाहरणं। इह तावत् तस्मिन्निति निर्दिष्टे पूर्वस्येति इको यणचि। दध्यत्र
मध्वत्र। इह तस्मादित्युत्तरस्येति। द्व्यन्तरुपसर्गेभ्योऽप ईत्। द्वीपं अन्तरीपं समीपं। अन्यथा जातीयकेन निर्देशः क्रियते। अन्यथा
जातीयक उदाह्रियते। किं तर्ह्युदाहरणं। इह तावत् तस्मिन्निति निर्दिष्टे पूर्वस्येति तस्मिन्नणि च युष्माकास्माकौ इति। त
स्मादित्युत्तरस्येति तस्माच्छसो नः पुंसीति। इदं चाप्युदाहरणं। इको यणचि द्व्यन्तरुपसर्गेभ्योऽप ईदिति। कथं॥ ॥

स्यान षष्ठीति व्याख्यानात् सकारस्य न भवतीत्युच्यते एवमप्युत्तरत्रापान् उपलभत इत्यादौ पूर्वस्य वर्णो दीर्घोत्पूर्वस्य शासो नत्वं व्यवच्छेद्यमेवास्त्यन्यं जा
तीयकेनेति। इतिकरणात् स्वरूपेनैव भाव्यमिति भावः। यावता प्रकारमात्रमभिधीयत इति तद्द्योतनाभिधानाय जातीयर् प्रत्ययः कृतः। लौकिके प्रयोगे लाघवा
नादरं प्रदर्शनाय प्रत्ययद्वयप्रयोगः। केवलेनापि जातीयरा प्रकारवानुगम्यत एवा। इदं चापीति। सिद्धान्तवादी। इतिकरणो ह्यत्रार्थनिर्देशार्थ एव स्वं रूपमिति रा०प्र०
ग्रहणे२ ॥ वचनात् स्वरूपग्रहणे प्राप्ते॥ ॥ ॥ १६३

सर्वनाम्नायमिति। सूत्रेऽन्तरोपात्तस्य तस्मिन्निति सप्तम्यादेस्तस्य च नैतदुत्करणं। किं तर्हि सर्वनाम्ना निर्देश इत्यर्थः। तेन यत्र सप्तम्यर्थे निर्देशः पञ्चम्यर्थे निर्देशश्च तत्रोभयोरुपस्थानं। विशेषा अपीति। अपिः संभावनायां न समुच्चये। नहि विशेषपरित्यागेनेह सामान्यमस्ति यदुदाहरणं स्यात्। तस्मात्सर्वे विशेषा इहोदाहरणमित्यर्थः। सामान्यस्य सर्वविशेषेषु भावात्। किं पुनरिति। सामान्यविशेषभावस्यानवस्थानात्प्रश्नः। कदाचिद्दूराद्गोत्वमा

सर्वनाम्नायं निर्देशः क्रियते। सर्वनाम च सामान्यवाचि सामान्ये निर्दिष्टे विशेषा अपि निर्दिष्टा भवन्ति। किं पुनः सामान्यं को विशेषः। गौः सामान्यं कृष्णो विशेषः। न तर्हीदानीं कृष्णः सामान्यं गौर्विशेषो भवति। भवति च। यदि तर्हि सामान्यमपि विशेषः विशेषोऽपि सामान्यं। सामान्यविशेषौ न प्रकल्पेते। कल्पेते च। कथं। विवक्षातः। यदास्य गौः सामान्येन विवक्षितो भवति कृष्णो विशेषत्वेन तदा गौः सामान्यं कृष्णो विशेषः। यदास्य कृष्णः सामान्येन विवक्षितो भवति गौर्विशेषत्वेन तदा कृष्णः सामान्यं गौर्विशेषः।
॥ अपर आह। प्रकल्पेते च। कथं॥ ॥ ॥

त्रस्य ग्रहणं पश्चात्कृष्णादिविशेषावगमः। कदाचित्तु पूर्वं कृष्णादेर्ग्रहणं पश्चाद्गोत्वादेः। गौः सामान्यमिति। यद्विशेष्यं प्रधानं तत्सामान्यं। यत्तु विशेषणत्वेन परोपकारितया निर्दिश्यते स विशेष इति तात्पर्यं। इहापि तस्मिन्निति सप्तम्यर्थमात्रं सामान्यं निर्दिष्टं। अचि हल्तीत्यादयस्तु विशेषाः॥ ॥

भा०कै०प्र० १६४ 164 पितापुत्रवदिति। जन्यजनकशक्तिद्वययोगवदेकस्यैव विशेषणविशेष्यशक्तिद्वययोगात्कदाचित्कांचिच्छक्तिमाश्रीयते। सप्तमीनिर्दिष्टे पूर्वस्येत्येव कस्मान्नोच्यत
इत्याह। एते खल्वपीति। नैर्देशिकानां निर्देशप्रयोजनानां मध्ये वार्त्ततरका युक्ततरका इत्यर्थः। भाष्यकारवचनप्रमाणादुत्तरप्रत्ययः। तमपास्य भाष्यं
। एतैर्हीति। यदि हि सप्तमीनिर्दिष्टे इत्युच्येत तदा सप्तमीशब्देन योनिर्दिष्ट इति प्रतीयेतेति भावः। किमर्थमिति। किमर्थमुपसर्गयुक्तस्य धातोर्निर्देशः क्रियते।

पितापुत्रवत्। तद्यथा। स एव कंचित्प्रति पिता भवति कंचित्प्रति पुत्रो भवति। एवमिहापि स एव कंचित्प्रति सामान्यं कंचित्प्रति
विशेषः। एते खल्वपि नैर्देशिका नां वार्त्ततरका भवन्ति। ये सर्वनाम्ना निर्देशाः क्रियन्ते। एतैर्हि बहुतरकं व्याप्यते। अथ किमर्थ
मुपसर्गेण निर्देशः क्रियते। शब्दे सप्तम्या निर्दिष्टे पूर्वस्य कार्यं यथा स्यात्। अर्थे मा भूत्। जनपदे ऽप्रातिशायने इति। किं ग
तमेतदुपसर्गेण आहोस्विच्छब्दाधिक्यादर्थाधिक्यं। गतमित्याह। कथं। निरयं बहिर्भावे वर्तते। तद्यथा निष्क्रान्तो देशान्निर्दे
श इति बहिर्देश इति गम्यते। शब्दश्च शब्दाद्बहिर्भूतः ऽर्थश्च बहिर्भूतः॥ ॥ ॥

तस्मिन्निति पूर्वस्येति कस्मान्नोच्यत इति प्रश्नः। न पुनर्निर्दिष्ट एवोच्यतामिति प्रश्नः। केवलस्य दिशेर्देर्नार्थत्वादिहानुपयोगात्। शब्द इति। अन्तरेणापि निर्दिष्टग्र
हणं तस्मिन्निति पूर्वस्येति निर्दिष्टत्वे लब्धे पुनर्निर्दिष्टशब्द उपादीयमानो बहिर्भावं गमयति। शब्दाच्च बहिर्भूतः शब्द एव भवतीति। जनपद इति। अत्रायम एम०
र्थः स्याज्जनपदवाचिनि शब्दे परतस्तस्मादुत्तरार्थिकस्य लुब्भवतीति॥ ॥ ॥श्री॥ ॥ १६४

अथेति। ननु प्रयोजनस्योक्तत्वात्पुनः प्रश्नानुपपत्तिः। अयं भावः। जनपदे तु विसर्गार्थे न पौर्वापर्यासंभवाज्जनपदेयडसन्नः प्रसयत्तस्य तु बुभवति
तथा आतिशायने तमपादयइत्यर्थे निर्दृशेऽपूप स्थानेन भविष्यति। यदि चैतत्प्रयोजनं तदा तस्मिन्निति शब्दे पूर्वस्येति वक्तव्यं। निर्दिष्टग्रहणमि
ति। पूर्वोक्तप्रयोजनाभावादिति भावः। निःशब्दश्च नैरंतर्ये वर्त्तते दिशिश्चोच्चारणक्रियः। तेन निरंतरोच्चारितेकार्यमिति लभ्यते। समिधावितिति। ननु

वर्णमात्र२

अथ निर्दिष्टग्रहणं किमर्थं। निर्दिष्टग्रहणमानंतर्यार्थं। निर्दिष्टग्रहणं क्रियते।
आनंतर्यार्थं। आनंतर्यमात्रे कार्यं यथा स्यात्। इकोयणचि। दध्यत्रमध्वत्राइ
हमाभूत्। समिधौ समिधः दृषदौ दृषदः। किमर्थं पुनरिदमुच्यते॥ ॥
म०

संहितायामित्युच्यते न च व्यवहितयोः संहितास्ति। अचीति चाधिकरणमौपश्लेषिकं निर्दिष्टं। न च व्यवहिते उपश्लिष्टो भवति। नैष दोषः। वर्णानां परः सन्नि
कर्षः संहिता। सा चात्रास्ति। अचीति सप्तमी विज्ञायते। व्यवहितेऽपि पूर्वशब्दो वर्त्तते इति यत्र विषये यथाभूत इकः संभवति अनंतरो वा व्यवहितो वा तत्र त
थाभूतस्यैव यणादेशः स्यात्। किमर्थमिति। किं नियमार्थमथ षष्ठीप्रक्लृप्त्यर्थमिति प्रश्नः॥ ॥श्री॥ ॥ॐ॥

भा० कै० प्र० पूर्वोत्तरयोरिति। कर्म्मणि षष्ठी। योगः संबन्धः। तदयमर्थः। अनुपश्लिष्टस्येकोयणामायं। यथा च परस्मिन्पूर्वे उपश्लिष्टस्य पार्श्वेस्मिन्नपि परः। तिङ्. ति
१६५ ङ्. इ सत्रापि यथाः तिङ्. तासरं तिङ्. तेभवति एवं पूर्वेमपि। तत्र षष्ठी प्रकृतिप्रक्षेपष्यानुवर्त्तयितव्येति गौरवप्रसंगान्नियमार्थमित्युक्तं। अथवा योगयोरितियु
165 ग्मेनेरतियोगौ कर्मणि घञ्। अचीति सप्तमी प्रक्षेप्पनियमप्रसंगः। अचि पूर्वस्येति। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायादधिकरणसप्तमीत

तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगाविशेषान्नियमार्थवचनं दध्युदकं पचत्योदनं। तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियम
मार्थोयमारंभः। ग्रामे देवदत्तः पूर्वः पर इति सन्देहः। ग्रामाद्देवदत्तः पूर्वः पर इति संदेहः। एवमिहापि इकोयणचि दध्युदकं पचत्योदनं
उभाविकौ उभावचौ अचि पूर्वस्याचि परस्येति संदेहः। तिङ्ङ्तिङ इति अतिङः पूर्वस्यातिङः परस्येति संदेहः। इष्यते चात्राचि पूर्वस्यास्मा
त् अतिङः परस्येति। तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थ एवमर्थमिदमुच्यते अस्ति प्रयोजनमेतत् किं तर्हीति। अथ यत्रोभयं
निर्दिश्यते किं तत्र पूर्वस्य कार्यं भवत्याहोस्वित्परस्येति॥ ॥ ॥

तानन्तुदिग्योगलक्षणा पंचमी। तत्र दध्युदकमित्यादौ पर्यायप्रसंगः। नहि युगपदेकस्य स्थानित्वं निमित्तत्वं चोपपद्यते इति नियमार्थवचनं पूर्वस्यैवानन्तरस्ये
व भवति। द्वयं चानेन क्रियते परनिवृत्तिर्व्यवहितनिवृत्तिश्च। संदेहस्तूपक्रममात्रतयोपन्यस्तः। नहि संदेहादलक्षणमिति न्यायात्पर्यायप्रसंगात्। अथ यत्रे राम०
ति। यथा वहोर्लोपः इत्यत्र। युगपच्चैकस्य कार्यित्वनिमित्तत्वासंभवात्प्रश्नः॥ ॥श्री॥ ॥ ॥ १६५

किमर्थमिति। वृक्ष्यमाणेऽभिप्रायः। शब्देनार्थगतेरिति। कात्यायनवचनप्रामाण्यादङ्क्रियामिति प्रतिषेधस्यासिद्धत्वाच्छिन्नागुणेऽङ्क्रियामिति पंचमी। तद्योगपतालक्षणेन संदेहेन सद्देहोऽर्थः प्रसाधयति। यावत्करतोऽपि प्रमुरपसंदेहता मां च उदंचोऽभरणा अप्यर्थ एवं गम्यते। अप्येरंगिता हेतुत्वाप्रसङ्गेन पौर्वापर्यासंभवा विप्रतिषेधादिति। सूत्रपाठापेक्षया परस्य व्यवस्थापकत्वमित्यर्थः। किं प्रयोजनमिति। विभक्तिविशेषनिर्देशानवकाशत्वाद्वक्ष्यमाणोऽभिप्रायः। संदेह इति। संदेहाच्च पर्यायप्रसंगः। इष्ट

उभयनिर्देशे विप्रतिषेधात्पंचमीनिर्देशः। उभयनिर्देशे विप्रतिषेधात्पंचमीनिर्देशो भविष्यति। किं प्रयोजनं। प्रयोजनमतोल्सार्वधातुकानुदात्तत्वे। वृक्ष्यतिता[redacted]स्यादिभ्योऽनुदात्तत्वे सप्तमीनिर्देशोऽभ्यस्तसिजर्थ इति तस्मिन्निति यमाणेना स्यादिभ्यः परस्यल्सार्वधातुकस्यल्सार्वधातुके परतस्तास्यादीनामिति संदेहः। तास्यादिभ्यः परस्यल्सार्वधातुकस्य। वहोरिष्ठादीनामादिलोपे। वहोरुत्तरेषामिष्ठेमेयसां इष्ठेमेयस्सु परतो वहोरिति संदेहः। वहोरुत्तरेषां इष्ठेमेयसां। गोतो णित्। गोतः परस्य सर्वनामस्थानस्य सर्वनामस्थाने परतो गोत इति संदेहः। गोतः परस्य सर्वनामस्थानस्य। रुदादिभ्यः सार्वधातुके। रुदादिभ्यः परस्य सार्वधातुकस्य सार्वधातुके परतो रुदादीनामिति संदेहः। रुदादिभ्यः परस्य सार्वधातुकस्य। आने मुक्। ईदासः। आस उत्तरस्यानस्य। आने परत आस इति संदेहः। आस उत्तरस्यानस्य। आमि सर्वनाम्नः सुट्। सर्वनाम्नः परस्यामः आमि परतः सर्वनाम्न इति संदेहः। सर्वनाम्न उत्तरस्यामः। घेर्ङिति। आण्नद्याः। नद्याः परेषां ङितां ङिति सुप परतो नद्या इति संदेहः। नद्या उत्तरेषां ङितां। याडापः। आप उत्तरस्य ङितः ङिति परत आप इति संदेहः। आप उत्तरस्य ङितः॥ ॥

मेयः स्विति। नदाच्च बहुशब्दस्य लोपभूभावौ प्रयोये एणसातां गोतो णिदिति। यदि गोशब्दस्य णित्वं स्यात्तदा ति छति गौरित्यवचनसामर्थ्याद्दनंगस्यापि

॥ वृद्धिः स्यात्॥ ॥ ॥ ॥

भा०कौ०प्र० ङमो ह्रस्वादिति। ङमो ङमुडागमे सति कुर्वन्नास्ते इत्यत्र णत्वप्रसंगः। पदस्यैव कोन कार्यो नन्तु ह्रस्वपिदित्तिपदांतस्येति णत्वप्रतिषेधो नास्ति। विभक्तीति। पूर्वोपान्त्ये षुसप्तमी
१६६ षुसप्तमीनिर्दिशस्य कचित्पूर्वार्थत्वात्कचिदुत्तरार्थत्वात्सावकाशत्वं। पंचमीतु निरवकाशेति परस्यकार्यित्वं बोधयिष्यतीति भावः। यथार्थं वेति। यथा विषय
166

ङमो ह्रस्वादचि ङमुण्नित्यं। ङम उत्तरस्याचः इत्यपि परतो ङम इति सन्देहः। ङम उत्तरस्याचः। विभक्तिविशेषनिर्देशानवकाशत्वा
वि२ दप्रतिषेधः। विभक्तिविशेषनिर्देशसानवकाशत्वादयुक्तोयं विप्रतिषेधः। सर्वत्रैवात्र कृतसामर्थ्यो सप्तमी अकृतसामर्थ्या पंच
मीति कृत्वा पंचमीनिर्देशो भविष्यति। यथार्थं वा षष्ठीनिर्देशः। यथार्थं वा षष्ठीनिर्देशः कर्त्तव्यः। यत्र पूर्वस्य कार्यमिष्यते तत्र पू
र्वस्य षष्ठी कर्त्तव्या। यत्र परस्य कार्यमिष्यते तत्र परस्य षष्ठी कर्त्तव्या। सत हि तथा निर्देशः कर्त्तव्यः। न कर्त्तव्यः। अनेनैव प्रक्लृप्ति
र्भविष्यति। तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी। तस्मादित्युत्तरस्य षष्ठीति। तत्र हि षष्ठीग्रहणं कर्त्तव्यं न कर्त्तव्यं। प्रकृतमनुवर्त्तते क्व प्र
कृतं। षष्ठी स्थानेयोगेति। प्रकल्पकमिति चेन्नियमाभावः। प्रकल्पकमिति चेन्नियमस्याभावः। उक्तं चैतन्नियमार्थो यमारंभ
१८ ॥ इति॥ ॥

मित्यर्थः। प्रदेशेषु कार्यिणः षष्ठ्यैव निर्दिष्टत्वात्। प्रकल्पकमिति चेदिति। यत्र षष्ठी नास्ति तत्रास्याः प्रक्लृप्तिः क्रियते। यत्र तु षष्ठ्यस्ति इकोयणचीत्यादौ तत्रानेन प्रम०
नियमो न क्रियते। नहि व्यापारद्वयमुपपद्यते येन षष्ठीप्रक्लृप्तिस्तस्या नियमश्चेति भावः॥ ॥श्री॥ ॥ ॥ १६६

इत्संज्ञेति। आदेशस्योपदेशाभावान्नास्येत्संज्ञा न सिध्यतीत्यर्थः। स्थानीचोक्तत्रिकाल एव निवृत्त्यभिमुखतया प्रतिपन्न इति स्थानिन्यपीत्संज्ञा नास्ति।
यस्मिन्निति प्रथमाया इति। न तस्यैकः स्थाने यण् न लभ्यते। इकोप्यन्यस्यादेशः स्याद्गुणोप्यन्य इत्यभिमतस्थान्यादेशभावव्यवस्था न स्यात्। उभ

प्रसयविधौ खल्वपि पंचम्यः प्रकल्पिकाः स्युः। तत्र को दोषः। गुप्तिज्किद्भ्य इत्येषा पंचमी तस्मिन्निति प्रथमायाः षष्ठीं
प्रकल्पयेत् तस्मादित्युत्तरस्येति। अस्त्यनकश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रान्तर्यतः [सनः] सन्नेव भविष्यति। नैवं श
क्यं। इत्संज्ञा न प्रकल्पेत। उपदेश इतीत्संज्ञोच्यते। प्रकृतिविकाराव्यवस्था च। प्रकृतिविकारयोरव्यवस्था न प्र
कल्पते इको यणचि इत्येषा सप्तमी यस्मिन्निति प्रथमायाः षष्ठीं प्रकल्पयेत्। तस्मिन्निति निर्दिष्टे पूर्वस्येति। पं
चमीसप्तम्योरभावादुभयत्र षष्ठी प्रक्लृप्तिः। तत्रोभयकार्यप्रसंगः। सप्तमीपंचम्योरभावादुभयत्रैव षष्ठी
प्राप्नोति। तास्यादिभ्य इत्येषा पंचमी लसार्वधातुक इत्यस्याः सप्तम्याः षष्ठीं प्रकल्पयेत् तस्मादित्युत्तरस्येति। लसा
र्वधातुक इत्येषा सप्तमी तास्यादिभ्य इति पंचम्याः षष्ठीं प्रकल्पयेत् तस्मिन्निति निर्दिष्टे पूर्वस्येति। तत्र को दोषः। तत्रो
॥ भयकार्यप्रसंगः। उभयोः कार्यं तत्र प्राप्नोति। नैष दोषः॥०॥

यकार्यप्रसंग इति। विरोधाभावाद्यौगपद्येनोभयोः कार्यं प्राप्नोति॥ ॥श्री॥ ॥श्री॥ ॥७॥

मा भून्नियम इति। षष्ठी प्रकॢप्तैव तन्न कल्पयितव्यमित्यादि तिभावः। यत्र षष्ठी नास्ति तत्रासौ प्रकल्प्यते। यत्र त्वस्ति इको यणचीति तत्रापि पूर्वस्यैव षष्ठी न परस्येति
प्रकल्प्यते। कृतायामिति संज्ञायामिति। सूत्रएवोच्चारितस्य संज्ञेति प्रयोगे सशब्द एव सन्निति कार्यं लभत इत्यर्थः। अथवेति। परत्वविप्रतिषेधस्य सनउत्सादने

यत्राप्युच्यते प्रकल्पकमिति चेन्नियमाभाव इति। माभून्नियमः सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते पंचमीनिर्दिष्टे पर
स्य। यावता सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते पंचमीनिर्दिष्टे परस्य। नोत्सहते सप्तमीनिर्दिष्टे परस्य कार्यं भवितुं नापि
पंचमीनिर्दिष्टे पूर्वस्य। यदप्युच्यते। प्रसज्यविधौ पंचम्यः प्रकल्पिकाः स्युरिति। सन्तु प्रकल्पिकाः। ननु चोक्तं गुप्तिज्किद्भ्यः स
न्निति षष्ठी पंचमी सन्निति प्रथमायाः षष्ठी प्रकल्पयेत्तत्र स्मादिसुच्चरस्येति। परिहृतमेतत्। न कश्चिदन्य आदेशः प्रतिनिर्दि
श्यते तत्रान्तर्यतः सनः सनेव भविष्यति। ननु चोक्तं नैवं शक्यं। इत्संज्ञा न प्रकल्प्येत उपदेश इतीत्संज्ञोच्यत इति। स्मादेषदेशः
पदीत्संज्ञा आदेशं प्रतीक्षेत तत्र खलु कृतायामित्संज्ञायां लोपे च कृते आदेशो भविष्यति। उपदेश इति हीत्संज्ञोच्यते। अथवा
नानुबन्धे सनि प्रक्लृप्त्या भवितव्यं। यदा चोसन्न्तः सन्नतदाकृतसामर्थ्या पंचमीति कृत्वा प्रक्लृप्तिर्न भविष्यति॥ ॥

उपश्लेषयात्प्रवृत्तं तराभावान्नास्ति पंचम्याः प्रकल्पकत्वमित्यर्थः॥ ॥श्री॥ ॥७॥ ॥

प्रकृतौ षष्ठीति॥ इको यणचीति श्रुतयोरेव स्थान्यादेशभावोपपादनान्नास्ति षष्ठीप्रकल्पनमपेक्षाया अभावादिति भावः। यद्ययमिति। यद्युभयनि
र्देशे परं स्य षष्ठीप्रकल्पने सति ग्रहणकवाक्याद्वाक्यान्तरमनुमीयते तास्यादिभ्यो लसार्वधातुकस्य तु लसार्वधातुके तास्यादीनामनुदात्तत्वं भव

सर॰

यस्य स्थेष्यते। प्रकृतिविकारावस्था चेति। तत्रापि कृता प्रकृतौ षष्ठी इक इति विकृतौ प्रथमा यणिति। यत्र च नाम सौ
त्री षष्ठी नास्ति तत्र प्रकल्प्या भवितव्यं। अथवा अस्तु तावदिको यणिति यत्र नाम सौत्री षष्ठी यदि चेदानीं अचीति से
षा सप्तमी यणि प्रथमायाः षष्ठी प्रकल्प्येत तस्मिन्निति निर्दिष्टे पूर्वस्येति। अस्तु न कश्चिदन्य आदेशः प्रतिनि
र्दिश्यते। तत्रान्तर्यतो यणो यणेव भविष्यति। यदप्युच्यते। सप्तमीपञ्चम्योरुभावादुभयत्र षष्ठी प्रकल्पि
ता तत्रोभयकार्यप्रसङ्गः इति नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति। नोभे युगपत्प्रकल्पिके भवत इति। य
द्ययमेकः पूर्वयोरिति पूर्वग्रहणं करोति। तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्तरस्य॥ ॥

पर॰ पर॰

तीति। तदाऽऽङ्गुण इत्यादावपि तथैव प्रकल्प्तिर्भविष्यतीति किं पूर्वपरयोरित्यनेनेत्यर्थः। तत्र परत्वादनवकाशत्वाच्चाम्पां नियमपक्षस्त्वन्त्व षष्ठीप्र
कल्पनपक्षे व्यवस्था। दीर्घाच्छे तुग् भवतीत्यत्र तु षष्ठी स्थाने व्यत्ययेन पञ्चमीव्याख्यानात् सुराच्छायेत्यादेर्वाऽऽतापकाद्दीर्घे सैत्तुग्भवति न तु छ
कारस्य॥ ॥ ॥

प्रति२ भावा१

भा०कै०प्र० १६८ 168 स्वं रूपं॥ स्वरूपस्य पर्यायाणां च ग्रहणे शास्त्रे नियमार्था परिभाषेति केचिदाहुः॥ अन्ये तु लिङ्गाभावाद्विध्यन्तरशेषभावाच्च नेयं परिभाषा अपि तु संज्ञासूत्रमिदमिति प्रत्याः॥ देवदत्तादयश्च संज्ञानियमार्था इति सिद्धान्तः॥ सर्वार्थप्रत्यायनशक्तियुक्तो हि शब्दः सर्वशब्दप्रत्याय्यशक्तियुक्तश्चार्थ इति व्यवहाराय नियमः क्रियते। रूपशब्देन चेह अग्निशब्दत्वादिकं मुक्तासारिकापुरुषोदीरितभिन्नशब्दव्यक्तिसमवेतं सामान्यमभिधीयते। तत्र व्यक्तेः सामान्यं संज्ञा सामान्यस्य वा व्यक्तिः संज्ञेति व्याख्याने कामचारः॥ व्यक्तिः कार्यं प्रतिपद्यते। सामान्यमपि कार्यं प्रतिपद्यमानं व्यक्तिद्वारेण गौणं प्रतिपद्यते इति फलेन कश्चि

स्वं रूपं शब्दस्याशब्दसंज्ञा॥ रूपग्रहणं किमर्थं। न शब्दस्य स्वमित्येव रूपं शब्दस्य संज्ञा भविष्यति। न ह्यन्यत्स्वं शब्दस्यास्ति अन्यदतो रूपात्। एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति तज्ज्ञापयत्याचार्यः अस्त्यन्यद्रूपात्स्वं शब्दस्येति। किं पुनस्तत्। अर्थः। किमेतस्य ज्ञापने प्रयोजनं। अर्थवद्ग्रहणे नानर्थकस्येति परिभाषा न कर्तव्या भवति॥ ॥

द्भेदः॥ रूपग्रहणमिति। प्रतीतावुपदेशानपेक्षत्वादन्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च रूपमेव गृह्यते। अर्थो हि संबन्धग्रहणमपेक्षते। अनुकरणशब्देषु नार्थः प्रतीयते। साधारणश्च पर्यायैरपि प्रत्यायनात्। न चार्थः संज्ञा शक्यते वक्तुं। संज्ञित्वे चास्य सूत्रमनर्थकमिति प्रश्नः॥ एवं तर्हीति। यत एवेह रूपग्रहणस्याव्यावर्त्यं नास्ति तत एव ज्ञापकं। सति तु व्यावर्त्ये तन्नैवोपक्षयान्न ज्ञापकं स्यात्। अर्थवद्ग्रहण इति। अर्थयुक्तं रूपं गृह्यते इत्यर्थः। तेन काशे कुशे वंशे इत्यत्र राम० १६८
शे इति प्रगृह्यसंज्ञा न भवति। यत्र चार्थवत्तारूपेण शब्दो नाश्रीयते तत्रेदं नोपतिष्ठते। यथा वर्णग्रहणेषु टेरेत्वे चेति। पचेते इत्यत्रानर्थकस्यापि टेरेत्वं भवति॥

तथावाक्यान्यपीति शास्त्रस्याप्यर्थवद्विगतत्वमित्यर्थः अथवेति केवलानांवर्णानांलोकेप्रयोगाभावाद्धा।
त्वादीनांचशुद्धानांपाठात् तत्सत्वाच्चवर्णानांनकश्चिद्दोषः यानितर्हीतिद्धिन्यादीनि एतेषामपीति शिष्टप्रयु

अथवाइदंतावदयंप्रष्टव्यः केमेसंवृतादयःश्रूयेरन्निति आगमेषु आगमाःशुद्धाःपठ्यंते विकारेषु
तर्हि विकाराःशुद्धाःपठ्यंतेप्रत्ययेषुतर्हिप्रत्ययाःशुद्धाःपठ्यंते धातुषुतर्हिधातवोपिशुद्धाःपठ्यंते प्रा।
तिपदिकेषुतर्हिप्रातिपदिकानिशुद्धानिपठ्यंते यानितर्ह्यग्रहणानिप्रातिपदिकानि एतेषामपिस्वरव
र्णानुपूर्वीज्ञानार्थउपदेशःकर्तव्यः शशःषषइतिमाभूत्पलाशःपलाषइतिमाभूत् मंचकोमंजकइतिमा।
भूत् आगमाश्चविकाराश्चप्रत्ययाःसहधातुभिः उच्चार्यंतेततस्तेषुनेमेप्राप्ताःकलादयः॥ ॥ इतिश्री
मद्भ‒वत्पतंजलिविरचितेव्याकरणमहाभाष्येप्रथमस्याध्यायस्यप्रथमेपादेप्रथमान्हिकं॥ ॥

कृत्वेनोणादीनांपृषोदरादीनांचसाधुत्वाभ्यनुज्ञाँस्तेषामत्रसंग्रहः॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृतेमाहा
भाष्यप्रदीपेप्रथमस्याध्यायस्यप्रथमेपादेप्रथममान्हिकं॥ शु शुभंभवतु ॥ ॥ ॥ ॥